स्कादेशः । यथा—पेस्कदि आचस्कदि । तथा छस्य श्चो भवति । यथा—पिश्चिले आवण्णश्चले । तथा षशोः संयोगस्थयोस्तालव्यशकारः । यथा—विष्नुः विहस्पदी कास्यगालं । अर्थस्थयोः थस्य स्तादेशः । यथा—एसे अस्ते एषोऽर्थः, समुपस्तिदे समुपस्थितः । तथा ज्ञण्यन्यञ्जीनां ञो भवति । यथा—ञ्ञ । अञली अञ्जलिः । ण्य । पुञकम्मे पुण्यकर्मा, पुञाहं पुण्याहम् । न्यस्य च अभिमञु: अभिमन्युः कञका कन्यका । व्रजेः कृतादेशस्य वव्वइ वञइ । तथा तस्य दकारोऽन्ते । यथा—मालेदि होदि य्याएदि इत्यादि । अन्यल्लक्षणं ग्रन्थान्तराल्लक्ष्याच्च ज्ञेयमिति । तथा प्राकृतमेव किंचिद्विशेषात्पैशाचिकम् । यथा णनोर्नकारः पैशाचिक्याम् । यथा—आगंनूनयनमतीत्यादि । तथा दस्य वा तकारः । यथा—वतनं वदनम् । प्राकृतलक्षणापवादश्चात्र । यथा टस्य न डकारः । यथा—पाटलिपुत्रम् । तथा पस्य न वकारः । यथा—पदीपो, अनेकपो । तथा कगचजतदपयवानामनादौ यथाप्रयोगं लोपः स्वरशेषता च न कर्तव्या । यथा क्रमेण—आकाशं, मिगंको, वचनं, रजतं, वितानं, मदनो, सुपुरिसो, दयालू, लावण्णं । एवं सुको, सुभगो, सूची, गजो, भवति, नदी इत्यादि च । तथा खघथधफभानां हो न भवति । यथा—मुखं मेघो रथो विद्याधरो विफलं सभा इत्यादि । यथा थठयोर्ढोऽपि न भवति । यथा पथमं, पुथुवी, मठो, कमठो । तथा ज्ञस्य ञो भवति । यथा—यञकोसलं, राञा लपितं । तथा हृदये यस्य पः । हितपकं । तथा सर्वत्र तकारो न विक्रियते । एति बिंबमित्यादिषु । इत्यादयोऽन्येऽपि प्राकृतविहिता व्यञ्जनादेशा न क्रियन्ते ते च बृहत्कथादिलक्ष्यदर्शनाज्ज्ञेया इति । सूरसेन्यपि प्राकृतभाषैव । केवलमयं विशेषः । यथा सूरसेन्यामस्वसंयोगस्यानादौ तस्य दो भवति यथा तदो, दीसदि, होदि, अन्तरिदमित्यादिषु । अस्वसंयोगस्येति किम् । मत्तो, पसुत्तो । स्वग्रहणात् निच्चिन्दो, अन्देउरमिति स्यादेव । अनादावित्येव । तेव तदेत्यादौ न भवति । तथा र्यस्य य्यो भवति । यथा लक्ष्यम्—अय्यउत्त, पय्याकुलीकदह्मि । यथालक्ष्यमित्येव । तेन कज्जपरवसो, वज्जकज्ज इत्यादौ न भवति । इह थध्वमां धो वा भवति । इध, होध, परित्तायध । पक्षे इथ, होह, परित्तायह । तथा पूर्वस्य पुरवो वा । यथा—न कोवि अपुरवो पक्षे । अपुव्वं पदं । तथा कडुय करिय गडुय गच्छिय इति क्त्वान्तस्यादेशः तथा एदु भवं जयदुभवं, तथा आमन्त्रणे भयवं कुसुमाउह इत्यादि । तधा इनः आ वा ।

वाक्य भाषा के आधार पर छः प्रकार का होता है । वे छः भाषाएँ ये हैं:— प्राकृत, संस्कृत, मागध, पिशाच, शौरसेनी तथा अपभ्रंश । इनमें से अपभ्रंश भाषा विभिन्न देशों (विभिन्न भू-भागों के विभिन्न प्रयोगों) के कारण अनेक प्रकार की होती है ।११,१२।

यथा—भो कंचुइया। अतश्च। भो वयस्सा, भो वयस्स। तथा इलोप इदानीमि। यथा—किं दाणिं करइस्सं। निलज्जो दाणिं सो जणो। तथा अन्त्यान्मादिहेतोर्णो भवति, यथा—जुतण्णिमं, किण्णिमं, एवण्णेदं। यथाप्रयोगमित्येव। तेन किं एत्थं करइस्सं। तदस्ता भवति। यथा ता जाव पविसामि। तथा एवार्थे य्येव। यथा—मम य्येव एकस्स। हंजे चेट्याह्वाने। हंजे चतुरिए। हीमाणहे निर्वेदविस्मययोर्निपातः। यथा—हीमाणहे पलिस्संता हगे एदिणा नियविहिणो दुव्विलसिदेण। हीमाणहे जीवंतवच्छा मे जनणी। णं निपातो नन्वर्थे। यथा—णं भणामि। अम्महे हर्षे निपातः। हीहीभो विदूषकाणां हर्षे। शेषं प्राकृतसमं द्रष्टव्यमिति। तथा प्राकृतमेवापभ्रंशः। स चान्यैरुपनागराभीरग्राम्यत्वभेदेन त्रिधोक्तस्तन्निरासार्थमुक्तं भूरिभेद इति। कुतो देशविशेषात्कारणात्। तस्य च लक्षणं लोकादेव सम्यगवसेयम्। सामान्यं तु किंचिदिदम्। मथा न लोपोऽपभ्रंशेऽधोरेफस्य। यथा—प्रखुरभ्रायरवग्रेणेत्यादि। तद्वदभूतोऽपि क्वाप्यधो रेफः क्रियते। यथा—व्राचालउव्रचव्रचउक्काखक्रूखीत्यादि। तथोदन्तस्य दकारो भवति। यथा—गोत्रुगजिद्रुमलिदुचारितु इत्यादि। तथा ऋतः स्थाने ऋकारो वा भवति। यथा—तृणसमुगणिजई। पक्षे तणं इत्यादि लक्ष्यादवसेयम्। व्यत्ययो बहुलं भाषालक्षणस्य। यथा—थहकारयोः सूरसेन्यां धत्वमुक्तं मागध्यामपि भवति। आभीरीभाषा अपभ्रंशस्था कथिता क्वचिन्मागध्यामपि दृश्यते। सूरसेन्यामिदानींशब्दे इलोप उक्तः शुद्धप्राकृतेऽपि भवति। तथा कगचजतदपयादीनां पैशाचिक्यां स्वरशेषत्वाभावोऽभिहितः। खघधफभादीनां हत्वाद्यभावश्च सूरसेन्यामपि भवति। इत्याद्यन्यदपि सांकर्यं महाकविलक्ष्यादवसेयमिति। विशेषतस्तु भाषालक्षणं ग्रन्थान्तरादवसेयमिति॥

एवं शब्दलक्षणं गुणदोषांश्चाभिधायेदानीं तस्यालङ्कारान्विवक्षुराह—

वक्रोक्तिरनुप्रासो यमकं श्लेषस्तथा परं चित्रम्।
शब्दस्यालंकाराः श्लेषोऽर्थस्यापि सोऽन्यस्तु ॥१३॥

---

५. शब्दालंकार—

वक्रोक्ति, अनुप्रास, यमक, श्लेष तथा चित्र ये शब्दालङ्कार हैं। इनमें से श्लेष अर्थालङ्कार भी है।१३।

अलंकार के मुख्य दो भेद माने जाते हैं—शब्दालंकार और अर्थालंकार। तीसरा अन्य भेद भी स्वीकृत किया जाता है—शब्दार्थालंकार। इन भेदों का आधार रुद्रट तक निर्णीत तो हो चुका होगा, पर इस पर प्रकाश नहीं डाला गया। रुद्रट ने भी प्रकाश

वक्रोक्तिरिति । तथाशब्दः समुच्चये । अन्यैरनुक्तं चित्रं शब्दालंकारमध्ये समुच्चीयते । परमुत्कृष्टमपरं वा । अन्यदित्यर्थः । शब्दस्येत्यर्थनिवृत्त्यर्थम् । अतश्च कश्चिदाशङ्कते—शब्दालंकार एवायं श्लेषो न त्वार्थालंकारोऽपीति तं प्रत्याह—श्लेषोऽर्थस्यापीति । किमयमेव श्लेषोऽर्थस्यापि नेत्याह—सोऽन्यस्तु । तुरवधारणे । सोऽन्यादृक्ष एवेत्यर्थः । तेन यदन्यैरभेदेन श्लेषलक्षणमवादि तदयुक्तमित्युक्तम् । नन्वलंकारोऽलंकार्यादिभन्नो दृष्टः । यथा पुरुषात्कटकादयः । न चैवमत्र भेदमवगच्छाम इति । सत्यम् । विद्यत एव भेदः । यथा—**किं गौरि मां प्रतिरुषा** इति शब्दसमुदायोऽलंकार्य एव । तस्य यद्भङ्ग्यन्तरेण व्याख्यानं सोऽलंकारः । अनुप्रासेऽपि प्रथमोक्ता वर्णा आवृत्ताश्चान्योन्यमलंकुर्वते । यथा हि—द्वौ साधू संगतौ परस्परमलंकुर्वाते इति । एवं यमके श्लेषे च द्रष्टव्यम् । चित्रेऽपि स्पष्टो वर्णक्रमोऽलंकार्यो भङ्ग्यन्तरकृतस्त्वलंकार इति ॥

नहीं डाला । आगे चलकर मम्मट ने उक्त विभाजन का आधार 'अन्वयव्यतिरेकभाव' स्वीकार किया है और रुय्यक ने 'आश्रयाश्रयिभाव'—

[क] **इह दोषगुणालङ्काराणां शब्दार्थगतत्वेन यो विभागः स अन्वयव्यतिरेकाभ्यामेव व्यवतिष्ठते ।** काव्यप्रकाश ९म उ०

[ख] **तत्र शब्दालङ्कारा यमकादयः । अर्थालङ्कारा उपमादयः । उभयालङ्कारा लाटानुप्रासादयः । × × × लोकवदाश्रयाश्रयिभावश्च तत्तदलङ्कारनिबन्धनम् ।**

अलंकारसर्वस्व पृष्ठ २५६

जिसके रहने पर जो रहे वह 'अन्वय' कहाता है और जिसके न रहने पर जो न रहे वह व्यतिरेक—यत्सत्त्वे यत्सत्त्वम् अन्वयः । यदसत्त्वे यदसत्त्वम् व्यतिरेकः । इसी आधार पर मम्मट ने अनुप्रास आदि को शब्दालंकार, उपमा रूपक आदि को अर्थालङ्कार, तथा पुनरुक्तवदाभास, श्लिष्टपरम्परित रूपक और शब्दहेतुक अर्थान्तरन्यास को उभयालंकार माना है ।

इस प्रसंग में एक शंका उपस्थित होती है कि उभयालंकार होते हुए भी पुनरुक्तवदाभास को शब्दालंकारों के साथ और श्लिष्ट परम्परित रूपक तथा शब्दहेतुक अर्थान्तरन्यास को अर्थालंकारों के मध्य स्थान क्यों मिलता चला आया है ? इस शंका का समाधान अपेक्षाकृत चमत्काराधिक्य में सन्निहित है, क्योंकि एक ओर पुनरुक्तवदाभास में शब्दगत चमत्कार अधिक है तो अर्थगत कम, और दूसरी ओर अवस्था ठीक इस के विपरीत है ।

वक्रोक्ति, यमक और लाटानुप्रास के सम्बन्ध में भी एक ऐसी जिज्ञासा स्वाभाविक है । अन्वयव्यतिरेक की कसौटी पर क्या इनकी गणना शब्दार्थालंकारों में नहीं

यथोद्देशं निर्देश इति पूर्वं वक्रोक्तिलक्षणमाह—

वक्त्रा तदन्यथोक्तं व्याचष्टे चान्यथा तदुत्तरदः ।
वचनं यत्पदभंगैर्ज्ञेया सा श्लेषवक्रोक्तिः ॥१४॥

हो सकती ? यद्यपि इसी आधार पर इन्हें भी शब्दार्थालंकार मानना चाहिए, पर शब्द-गत चमत्कार की अत्यधिकता के कारण इनकी गणना शब्दालंकारों में ही की जाती है ।

१. वक्रोक्ति

अब रुद्रट वक्रोक्ति अलंकार का निरूपण करते हैं । रुद्रट का यह प्रसंग अपने प्रकार का मौलिक प्रयास है और आगे चलकर इसका अनुकरण भी हुआ । रुद्रट से पूर्व भामह, दण्डी और वामन ने वक्रोक्ति पर प्रकाश डाला था ।

भामह ने वक्रोक्ति का स्पष्ट लक्षण प्रस्तुत नहीं किया, किन्तु इस प्रसंग में उन के निम्नोक्त कथनों से इस का स्वरूप आभासित हो जाता है,—[१] जहां अतिशयोक्ति होती है, वहां सर्वत्र वक्रोक्ति होती है । अतिशयोक्ति कहते हैं उस उक्ति को जिस में लोक (साधारण जन) के नैमित्तिक वचन का—कारण-कार्य सम्बन्ध पर आधारित कथन का—उल्लंघन किया गया हो । (२) वक्रोक्ति के द्वारा अर्थ (कवि का वर्ण्य विषय) विभावित (चमत्कृत) हो उठता है । (३) सफल कवि को इस (वक्रोक्ति के प्रदर्शन) में प्रयास करना चाहिए, क्योंकि इसके बिना कोई अलंकार सम्भव नहीं होता । (४) इतना ही क्यों, काव्य के सभी अंग-उपांग वक्रतापूर्ण स्वभावोक्ति से युक्त होने चाहिएं । (५) जिन कथनों में वक्रोक्ति का अभाव रहता है, उन्हें अलंकार नाम से अभिहित नहीं करना चाहिए, उदाहरणार्थ—'सूर्य डूब गया', 'चन्द्रमा चमक रहा है', 'पक्षिगण अपने घोंसलों को जा रहे हैं'—ये कथन तो 'वार्ता' मात्र हैं, इन्हें काव्य कहना समुचित नहीं है । हेतु, सूक्ष्म और लेश ये तीनों अलंकार नाम से अभिहित नहीं होने चाहिएं, क्योंकि इनके [उदाहरणों में] समुदाय रूप से वक्रोक्ति का अभिधान नहीं होता—

निमित्ततो वचो यत्तु लोकातिक्रान्तगोचरं ।
मन्यन्ते अतिशयोक्तिं तामलंकारतया यथा ॥ का० अ० २।८१।
सैषा सर्वत्र वक्रोक्तिरनयार्थो विभाव्यते ।
यत्नोऽस्यां कविना कार्यः कोऽलंकारोऽनया विना ॥२।८५।

वक्त्रा प्रतिपादकेन तस्मादुत्तरवचनादन्यथा प्रकारान्तरेणोक्तम् । तदन्यथोक्तं व्याचष्टे वक्ति चान्यथा । तस्योक्तस्योत्तरं ददातीति तदुत्तरदः । यद्वचनं यद्वाक्यम् । कैर्व्याचिष्टे पदभंगैः । पदखण्डनायेत्यर्थः । स श्लेषवक्रोक्तिर्ज्ञेया । वक्रोक्तिस्तु द्विविधा, श्लेषवक्रोक्तिः काकुवक्रोक्तिश्च । तल्लक्षणयोश्च वैलक्षण्यान्नैकं लक्षणमस्तीति भेदेनाभिधानमुपपन्नम् ।

तत्रोदाहरणमाह—

किं गौरि मां प्रति रुषा ननु गौरहं किं

कुप्यामि कां प्रति मयीत्यनुमानतोऽहम् ।

जानाम्यतस्त्वमनुमानत एव सत्य-

मित्थं गिरो गिरिभुवः कुटिला जयन्ति ।।१५।।

किमिति । इत्थमेवं गिरो वाचो गिरिभुवो गौर्याः कुटिला वक्रा जयन्ति । कथम् । प्रणयकुपितां गौरीं शंभुरनुनयन्नाह–हे गौरि उमे, मां प्रति मामुद्दिश्य किं तव रुषा रोषेण । तत्प्रसीदेत्यर्थः । एतदुत्तरदायिनी सान्यथा पदभंगैराह––ननु गौरहं किम् । ननुरक्षमायाम् । किमहं गौस्त्वया कृता यद् गौरित्यामन्त्रयसे । कां च प्रति । मया कोपः कृतः यदात्थ किमिमां प्रति रुषेति । पुनः शंभुमाह––अतोऽस्मादनुमानतोऽनुमानाद्वक्रवचनलक्षणान्मयि विषये त्वं कुप्यसीत्यहं जाने । भूयो भवान्याह––त्वमनुमानत एव सत्यम् । न उमा अनुमा तस्या एव नतः । अस्मदनमनं केन तव ज्ञातमित्यर्थः ।।

युक्तं वक्रस्वभावोक्त्या सर्वमेवैतदिष्यते ।१।३०।

हेतुश्च सूक्ष्मो लेशोऽथ नालंकारतया मतः ।
समुदायाभिधानस्य वक्रोक्त्यनभिधानतः ।। २।८६ ।

गतोऽस्तमर्कः भातीन्दुर्यान्ति वासाय पक्षिणः ।
इत्येवमादि किं काव्यं ? वार्त्तामेनां प्रचक्षते ।।२।८७।

निष्कर्षतः भामह के अनुसार अतिशयोक्ति अथवा वक्रोक्ति प्रत्येक अलंकार का अनिवार्य तत्त्व है, इसके बिना कोई कथन साधारण 'वार्ता-मात्र' होता है ।

दण्डी के अनुसार समस्त वाङ्मय दो प्रकारों में विभक्त हो सकता है—स्वभावोक्ति और वक्रोक्ति । उन्होंने स्वभावोक्ति से इतर अन्य सभी अलंकारों को

इदानीं काकुवक्रोक्तिलक्षणमाह—

विस्पष्टं क्रियमाणादक्लिष्टा स्वरविशेषतो भवति ।
अर्थान्तरप्रतीतिर्यत्रासौ काकुवक्रोक्तिः ॥१६॥

विस्पष्टमिति । यत्र स्वरविशेषादर्थान्तरप्रतीतिर्भवति । कीदृशात् । विस्पष्टं स्फुटं क्रियमाणादुच्चार्यमाणात् । कीदृशी अर्थान्तरप्रतीतिः । अक्लिष्टा कल्पनारहिता सा काकुवक्रोक्तिः ॥

प्रकारान्तर से वक्रोक्ति का पर्याय मानते हुए कहा है कि इन सभी अलंकारों में 'श्लेष' के कारण शोभावृद्धि होती है—

श्लेषः सर्वासु पुष्णाति प्रायो वक्रोक्तिषु श्रियम् ।
द्विधा भिन्नं स्वभावोक्तिर्वक्रोक्तिश्चेति वाङ्मयम् ॥ का० द० २।३६२

वामन के अनुसार सादृश्यमूला लक्षणा (अर्थात् गौणी लक्षणा) का नाम वक्रोक्ति अलंकार है: **सादृश्याल्लक्षणा वक्रोक्तिः** (का० सू० वृ० ४।३।८) । इसी प्रसंग को अधिक स्पष्ट करते हुए स्वयं वामन लिखते हैं कि जहाँ सादृश्य सम्बन्ध न हो वहाँ वक्रोक्ति अलंकार नहीं मानना चाहिए । 'असादृश्यनिबन्धना तु लक्षणा न वक्रोक्तिः । (का० सू० वृ० ४।३।८ वृत्ति) ।

इस प्रकार हमने देखा कि रुद्रट से पूर्व भामह और दण्डी ने वक्रोक्ति को कोई विशेष अलंकार न मानकर अलंकारों का मूल तत्त्व माना है, तथा वामन ने इसे गौणी लक्षणा का पर्याय स्वीकार करते हुए इसे विशेष प्रकार का अर्थालंकार माना है । किन्तु रुद्रट ने इसका नवीन स्वरूप उपस्थित करते हुए इसे विशेष प्रकार का शब्दालंकार घोषित किया—

[वक्रोक्ति के भेद हैं, श्लेष वक्रोक्ति और काकु वक्रोक्ति ।] जहाँ वक्ता के एक विशिष्ट अभिप्राय से कहे हुए वचन को [सुनकर] उत्तरदाता जान-बूझकर उस वचन के पदों को भंग करके अन्य रूप में उत्तर देता है वहाँ श्लेष वक्रोक्ति अलंकार माना जाता है ॥१४॥

निम्न श्लोक पदभंग श्लेष वक्रोक्ति का उदाहरण है—इसमें शिव-पार्वती से कहते हैं, 'किं गौरि मां प्रति रुषा'—हे गौरि ! तुम मुझसे क्यों अप्रसन्न हो? पार्वती इस पंक्ति के पदों को इस प्रकार पृथक् कर देती है । 'किं गौः इमां प्रति रुषा?' अर्थात् हे गौ ! तुम क्यों इस बेचारी पर अप्रसन्न हो । और कहती है 'क्या मैं गाय हूँ ?

तत्रोदाहरणम्—

शल्यमपि स्खलदन्तः सोढुं शक्येत हालहलदिग्धम् ।
धीरैर्न पुनरकारणकुपितखलालीकदुर्वचनम् ॥१७॥

शल्यमिति । इदमनपराधकुपितखलवचनान्यसहमानं कश्चित्स्वमुद्दीपयन्नाह—आस्तामन्यत् । शल्यमपि काण्डमपि स्खलदन्तर्मध्ये मर्मघट्टनां कुर्वाणं सोढुं क्षन्तुं शक्येत । कीदृशम् । हालहलेन विषेण दिग्धं लिप्तम् । धीरैर्धैर्योपेतैर्न पुनरकारणकुपितखलालीकदुर्वचनमित्येकोऽर्थः । एतदेव वाक्यं काक्वा स्वरविशेषेण वदन्स्वमाश्वासयति—यथा अपि शल्यं स्खलदन्तः सोढुं शक्येत धीरैर्न पुनरकारणकुपितखलालीकदुर्वचनम् । यदि शल्यमपि सोढुं शक्यते तदा दुर्वचनं सुसहमेवेत्यर्थः । पूर्वपक्षे खलदुर्वचनस्य दुःसहतोक्ता, द्वितीये तु सुसहतेति भेदः ।

अथानुप्रासलक्षणमाह—

एकद्वित्र्यन्तरितं व्यञ्जनमविवक्षितस्वरं बहुशः ।
आवर्त्यते निरन्तरमथवा यदसावनुप्रासः ॥१८॥

एकेति । यद्व्यञ्जनं बहुशो बहून्वारानावर्त्यते । कीदृशम् । एकद्वित्र्यन्तरितम् । एकेन द्वित्रैर्वा व्यञ्जनैरन्तरितं व्यवहितम् । किं व्यवहितानुवर्तनमेवानुप्रासो नेत्याह—

और मैं किस पर अप्रसन्न हूं?' शिव कहते हैं—'मयीत्यनुमानतोऽहम्—मेरा अनुमान है कि तुम मुझ पर कुपित हो।' पार्वती इस वाक्य में इस प्रकार पदविच्छेद कर देती है—मयि इति अनुमा-नतोऽहम्' अर्थात् तुम मुझपर कुपित हो ऐसा मैं (अनुमा) उमा से पृथक् किसी स्त्री से (नतः) प्रेम करने वाला कहता हूँ, और इस प्रकार वह यह जतलाती है कि मैं जानती हूँ कि तुम यथार्थतः उमा-भिन्न किसी स्त्री से प्रेम करते हो। पार्वती के ऐसे कुटिलार्थ-संयुक्त वचनों की जय हो।१५।

काकु वक्रोक्ति—

जहां अत्यन्त स्पष्ट रूप से किये गये विशेष प्रकार के स्वर अर्थात् उच्चारण से अक्लिष्ट (अर्थात् किसी प्रकार की कल्पना किये बिना नितान्त सरल) अन्य अर्थ की प्रतीति हो जाती है, वहां काकु वक्रोक्ति अलंकार माना जाता है।१६।

जैसे धैर्यशाली पुरुष अपने वक्षःस्थल पर मर्मभेदी विषैले शल्य का प्रहार तो सह सकते हैं किन्तु बिना कारण ही कुपित हुए दुष्टों के मिथ्या कटुवचन नहीं सह सकते।१७।

रुद्रट-सम्मत वक्रोक्ति अलंकार का उक्त स्वरूप आगे चलकर अत्यन्त प्रचलित

निरन्तरमथवा । एतेनैकव्यञ्जनश्लोकानामनुप्रासतोक्ता । व्यञ्जनग्रहणं स्वरनिरासार्थम् । ननु स्वरनिरासे कृतेऽनुप्रासस्याभाव एव स्यात् । स्वररहितस्यावृत्तेरनुपलम्भादित्याह—अविवक्षितस्वरम् । अविवक्षिताः स्वरा यत्र तथा । स्वरचिन्ता न क्रियत इत्यर्थः । बहुशोग्रहणादेकावृत्तिमात्रेण नानुप्रासः । किं तर्हि । एकद्वित्रान्तरितमनेकवारानावर्त्यते ततोऽनुप्रास इति ॥

सामान्येनानुप्रासलक्षणमभिधायेदानीमस्यैव भेदानाह—

मधुरा प्रौढा परुषा ललिता भद्रेति वृत्तयः पञ्च।
वर्णानां नानात्वादस्येति यथार्थनामफलाः ॥१९॥

मधुरेति । अस्यानुप्रासस्य पञ्च वृत्तयो भवन्ति । कुतः । वर्णानां व्यञ्जनानां नानात्वात् । व्यञ्जनानामावृत्त्यानुप्रासस्योक्तत्वाद्वर्णानामित्युक्तेऽपि व्यञ्जनानामिति गम्यते । कास्ताः मधुरा, प्रौढा, परुषा, ललिता, भद्रा । इतिशब्दः परिसमाप्त्यर्थः । एता एव, न त्वष्टौ तिस्रो वा । तथा ह्यष्टौ हरिणोक्ताः । यथा—

रहा । रुय्यक, मम्मट, विश्वनाथ और अप्पय्यदीक्षित ने इसका यही स्वरूप निरूपित किया । हाँ, इन तीनों से पूर्व कुन्तक ने 'वक्रोक्ति' को भामह और दण्डी के अनुरूप सामान्य धरातल पर अवस्थित करते हुए इसे काव्य का 'जीवित' (आत्मा) घोषित किया तथा इसीमें अन्य काव्यांगों को अन्तर्भूत करने का प्रयास किया । वस्तुतः ये दोनों दृष्टिकोण अपनी अपनी सीमा तक समुचित हैं । संकुचित दृष्टि से देखें तो इसे एक विशिष्ट प्रकार का अलंकार न मानने की आशंका ही उपस्थित नहीं होती, तथा व्यापक दृष्टि से देखें तो वक्रता का व्यापार निस्सन्देह सामान्य वार्ता एवं स्वभावोक्ति आदि की अपेक्षा उच्च धरातल पर स्थित है । शेष प्रश्न रहा कि रस और ध्वनि जैसे महत्त्वपूर्ण काव्यांगों का समावेश इसमें कैसे सम्भव है तो पारिभाषिक दृष्टि से यह यदि उसमें समाविष्ट न किये जा सकें, किन्तु सामान्य 'वार्ता' की अपेक्षा ये भी उच्च धरातल पर स्थित हैं, तथा अधिकांश सीमा तक वक्र व्यापार की अपेक्षा रखते ही हैं । अस्तु !

२. अनुप्रास

एक व्यंजन की बहुत बार आवृत्ति को अनुप्रास अलंकार कहते हैं -- ऐसे आवृत्त व्यंजन के बीच एक, दो अथवा तीन अन्य व्यंजनों का व्यवधान रहना चाहिए तथा स्वर के [व्यवधान के] सम्बन्ध में कोई चिन्ता नहीं करनी चाहिए ।१८।

वर्णों के नाना प्रकार के [प्रयोग के] कारण अनुप्रास अलंकार की पाँच वृत्तियाँ हैं —मधुरा, प्रौढा, परुषा, ललिता और भद्रा । इन वृत्तियों के जैसे नाम हैं वैसी ही इन में व्यंजन-योजना रहती हैं ।१९।

महुरं परुसं कोमलमोजस्सि निट्ठुरं च ललियं च ।
गंभीरं सामण्णं च अद्धभणिति उनायच्चा ॥

अत्रौजस्विनिष्ठुरगम्भीराणां न तथा भेद इत्येकतरोपादानमेव न्याय्यम् । तथा वृत्तीनां मिश्रता सामान्यम् । तच्चानुक्तमपि लभ्यते । इत्येताः पञ्चैव । तथान्यैर्ग्राम्या परुषोपनागरिकेत्युक्तं तत्र त्वसंग्रह एवेति । कीदृश्यस्ताः । यथार्थनामफलाः सान्वयनानिकाः । कुतः । इति हेत्वर्थे । सा च माधुर्यान्मधुरा, प्रौढत्वात्प्रौढा, इत्यादिहेत्वर्थो द्रष्टव्यः ॥

इदानीमासां लक्षणमाह । तत्र मधुरायास्तावत्—

निजवर्गान्त्यैर्वर्ग्याः संयुक्ता उपरि सन्ति मधुरायाम् ।
तद्युक्तश्च लकारो रणौ च ह्रस्वस्वरान्तरितौ ॥२०॥

निजवर्गान्त्यैरिति । मधुरायां वर्ग्याः कचटतपवर्गवर्णा उपर्युपरिष्टात्संयुक्ताः सहिताः सन्ति विद्यते । कैरित्याह—निजवर्गान्त्यैङञणनमैर्वर्णैः । तथा तद्युक्तस्तेन लकारेण युक्तो लकारः। रणौ च रेफणकारौ च । कीदृशौ । ह्रस्वस्वरेणान्तरितौ व्यवहितौ भवतः। नन्वेकव्यञ्जनावृत्तिरनुप्रासलक्षणमुक्तम्, तत्किमिह बहुवर्णसद्भाव उच्यते । सत्यम् । बहुत्वाद्वर्णानां बहवोऽनुप्रासा अपीति न दोषः । एतेषां च वर्णानां युगपत्प्रयोग एव मधुरा वृत्तिरित्येव न द्रष्टव्यम् । किं तर्हि । तेषां वर्णानां मध्यादन्यतमवर्णैरनुप्रासे मधुरा वृत्तिरिति ॥

किमविशेषेणैते प्रयोक्तव्याः । नेत्याह—

तत्र यथाशक्ति रणौ द्विस्त्रिर्वा युक्तितो लकारं च ।
पञ्चभ्यो न कदाचिद् वर्ग्यानूर्ध्वं प्रयुञ्जीत ॥२१॥

जैसा कि पीछे लिख आये हैं अनुप्रास अलंकार के अन्तर्गत वृत्तियों का निरूपण सर्वप्रथम उद्भट ने किया था । इन के पश्चात् रुद्रट ने तथा आगे चलकर मम्मट ने भी इसी पद्धति को अपना लिया ।

मधुरावृत्ति में वर्ग्य (कवर्ग आदि पाँचों वर्गों के २५ वर्ण) अपने-अपने अन्तिम वर्णों (ङ्, ञ्, ण्, न् और म्) के साथ आगे की ओर संयुक्त रहते हैं । इस वृत्ति में परस्पर संयुक्त लकार का प्रयोग भी अपेक्षित है तथा ह्रस्व स्वर के व्यवधान से युक्त रकार और णकार का भी ।२०,२१।

तत्रेति । तत्र तेषु वर्णेषु मध्ये रणौ यथाशक्ति यावतोः प्रयोगकरणे सामर्थ्यमस्ति तावत्प्रमाणौ प्रयोक्तव्यौ । माधुर्यलाभात् । युक्तितः संयोगाल्लकारं द्विस्त्रिर्वा प्रयुञ्जीत । वर्ग्यास्तु पञ्चभ्य ऊर्ध्वमधिकं न कदाचनापि प्रयुञ्जीत । माधुर्यभङ्गप्रसङ्गादित्यर्थः ।।

एतदुदाहरणमाह —

भण तरुणि रमणमन्दिरमानन्दस्यन्दिसुन्दरेन्दुमुखि ।
यदि सल्लीलोल्लापिनि गच्छसि तत्किं त्वदीयं मे ।।२२।।

अनणुरणन्मणिमेखलमविरतशिञ्जानमंजुमञ्जीरम् ।
परिसरणमरुणचरणे रणरणकमकारणं कुरुते ।।२३।। (युग्मम्)

भणेति । अनण्विति । कश्चित्परमहिलां निजदयितगृहं व्रजन्तीं वीक्ष्याह भण वद त्वमेव हे तरुणि, यदि त्वं निजदयितमन्दिरं व्रजसि तत्किम् । त्वदीयं परिसरणं मे निष्प्रयोजनमेव रणरणकं हृदयाकुलत्वं कुरुते । आनन्दस्यन्दि हर्षकारि सुन्दरं रम्यमिन्दुवन्मुखं यस्याः सामन्त्र्यते । तथा सल्लीलया सुविलासेनोल्लपितुं वक्तुं शीलं यस्याः सा चामन्त्र्यते । तथारुणचरणे लोहितक्रमे । कीदृशं परिसरणम् । अनणु तारं रणन्ती शब्दायमाना मणिमेखला रत्नरशना यत्र तत् । तथाविरतं शिञ्जानानि रणन्ति मञ्जूनि मधुराणि मञ्जीराणि चरणाभरणानि यत्र तत् । लक्षणं तु स्वधिया सर्वमायोज्यम् ।।

अथ प्रौढामाह

अन्त्यटवर्गान्मुक्त्वा वर्ग्ययणा उपरि रेफसंयुक्ताः ।
कपयुक्तश्च तकारः प्रौढायां कस्तयुक्तश्च ।।२४।।

उदाहरणार्थ —

किसी स्त्री को अपने पति के घर में जाते देखकर कोई पुरुष कहता है:—

आनन्ददायी चन्द्रमा के समान सुन्दर मुखवाली ! हावभाव से मधुर आलाप करनेवाली तथा लाल-लाल चरणों से युक्त हे तरुणि! जब तुम ज़ोर से बजती हुई मणियों की कांची का शब्द करती हुई तथा सुन्दर नूपुरों की मधुर-झंकार के साथ अपने पति-गृह में प्रवेश करती हो, तब न जाने क्यों अकारण ही मेरा हृदय उत्कंठावश आतुर हो उठता है ।२२-२३।

प्रौढा वृत्ति में वर्गों के अन्तिम वर्णों (ङ्, ञ् ण्, न्, म्) और टवर्ग को छोड़कर शेष वर्ग्य (स्पर्श वर्ण) तथा य और ण ये सभी रकारके साथ आगे की ओर संयुक्त रहते

अन्त्यटवर्गानिति । प्रौढायां वृत्तौ वर्ग्याः कादयो यकारणकारौ चोपरिभागे रेफेण संयुक्ता भवन्ति । किं कृत्वा । अन्त्यान् ङञणनमान् टवर्गं च मुक्त्वा विहाय । तथा ककारपकाराभ्यामुपरिभागे तकारश्च युक्तो भवति । चः समुच्चये । तथा ककारस्तकारेणोपरिभागे संयुक्त इत्यर्थः ॥

तत्रेदमुदाहरणम्—

कार्याकार्यमनार्यैरुन्मार्गनिरर्गलैर्गलन्मतिभिः ।
नाकर्ण्यते विकर्णैर्युक्तोक्तिभिरुक्तमुक्तमपि ॥२५॥

कार्याकार्यमिति । येऽनार्या अशिष्टा उन्मार्गे कुमार्गे निरर्गला निरङ्कुशाः स्वच्छन्दा इत्यर्थः । तथा गलन्मतयो नश्यद्बुद्धयः । विकर्णा जडस्तैरेवंभूतैः कार्याकार्यं हिताहितमुक्तमुक्तमपि पुनःपुनर्भणितमपि नाकर्ण्यते न श्रूयते । कैरुक्तमित्याह—युक्ता संगता उक्तिर्वचनं येषां तैः । पयुक्तकारस्य तयुक्तककारस्य च स्वमुदाहरणं द्रष्टव्यमिति । एषा वृत्तिरन्यैरोज इत्युक्ता ॥

अथ परुषामाह—

सर्वैरुपरि सकारः सर्वे रेणोभयत्र संयुक्ताः ।
एकत्रापि हकारः परुषायां सर्वथा च शषौ ॥२६॥

सर्वैरिति । परुषायां वृत्तौ सर्वैरुक्तैरनुक्तैश्च वर्णैरुपरिभागे सकारो युक्तो भवति । तथा सर्वे वर्णा उक्ता अनुक्ता रेफेणोभयत्रोपर्यधोभागयोः पर्यायेण युगपद्वा

हैं । इसके अतिरिक्त इसमें त का संयोग क् और प् के साथ [आगे की ओर] रहता है (जैसे युक्त, गुप्त आदि), तथा क का संयोग के साथ आगे की ओर रहता है (जैसे सत्कार आदि) ।२४।

उदाहरणार्थ—

सुन्दर युक्तियों द्वारा उपदेश देने वाले विद्वानों के बार-बार कहने पर भी अनार्य, स्वेच्छाचारी, नष्ट एवं जड़बुद्धि लोग अपने हित और अहित की बात नहीं सुनते ।२५।

पुरुषा वृत्ति में सकार सब वर्णों के साथ आगे की ओर संयुक्त रहता है (जैसे लिप्सा, कुत्सित आदि) । सभी वर्ण रकार के साथ दोनों रूपों में पहले अथवा बाद में युक्त रहते हैं (जैसे–कर्म, क्रम आदि), र के साथ ह का प्रयोग एक ही ओर होता है– ऊपर या नीचे । जैसे 'अर्ह, ह्री आदि) तथा श और ष का प्रयोग सर्व प्रकार से होता है [जैसे परामर्श, श्री आदि] ।२६।

युक्ता भवन्ति । तथा हकारो रेफेणैकत्रोपर्यधो वा युक्तो भवति । अपि शब्दो नियमार्थः । एकत्रैवेत्यर्थः । शकारषकारौ च सर्वथा सर्वेण प्रकारेण । रेफेणान्यैर्वा युक्तावसंयुक्तौ वेति सर्वथाशब्दार्थः ॥

उदाहरणम्—

लिप्सून्सर्वान्सोऽन्तर्ब्रह्मोद्यैर्ब्राह्मणैर्वृतः पश्यन् ।
जिह्रेत्यगर्ह्यबर्हिःशेषशयः कोषशून्यः सन् ॥२७॥

लिप्सूनिति । कश्चिन्महासत्वो दत्तसर्वस्वोऽत्र वर्ण्यते । स महासत्त्वोऽन्तर्मध्ये जिह्रेति लज्जते । किं कुर्वन् । पश्यन् । कान् । लिप्सूंल्लब्धुकामान् सर्वान्याचकानित्यर्थः । कीदृशः । वृतः परिगतः । कैः ब्रह्मोद्यैर्वेदपारगैर्ब्राह्मणैः । पुनः कीदृक् । अगर्ह्यः प्रशस्तो यो बर्हिर्दर्भः स एव शेषमुर्वरितं तत्र शेते यः । तन्मात्रधन इत्यर्थः । लक्षणयोजना स्वयं कार्या ॥

अथास्याः सर्वत्र प्रयोगनिवारणार्थमाह –

परुषाभिधायिवचनादनुकरणाच्चापरत्र नो परुषाम् ।
रचयेदथागतिः स्यात्तत्रापि ह्लादयो हेयाः ॥२८॥

परुषेति । परुषाभिधायिवचनान्निष्ठुरत्वप्रतिपादनपरगिरोऽनुकरणाच्चान्यत्र परुषां वृत्तिं न रचयेत् । अथागतिर्गत्यन्तराभावः स्यात्, तत्रापि ह्लादयो हेयास्त्याज्याः । अत्यन्तपरुषत्वात् । केवलं शषादिप्रयोगः कार्यः ॥

[सर्वस्वदान करने के पश्चात्] राज्य-कोष के रिक्त हो जाने पर पवित्र दर्भ-शय्या पर शयन करने वाले महाराज वेदज्ञ ब्राह्मणों द्वारा घिरे हुए हैं, और धन की कामना से आये हुए सब याचकों को देखकर मन-ही-मन लज्जा अनुभव कर रहे हैं।२७।

परुषा वृत्ति का प्रयोग कठोरता-सूचक वचनों में अथवा ऐसे वचनों के अनुकरण में करना चाहिए, अन्य प्रसंगों में नहीं। यदि किसी रचना में गति (प्रवाह) का अभाव उपस्थित होने लगे तो 'ह' आदि वर्णों का त्याग कर देना चाहिए । (हाँ, श, ष का प्रयोग किया जा सकता है।) ।२८।

ललिता वृत्ति में घ, थ भ, र और स का प्रयोग होता है, और वे लघु होने चाहिएं। इसमें 'ल' का प्रयोग किसी वर्ण से असंयुक्त रूप में होना चाहिए।

भद्रा वृत्ति में उक्त चारों वृत्तियों के वर्णों से शेष बचे हुए वर्णों का पृथक्

ललिताभद्रयोर्लक्षणमाह—

ललितायां घधभरसा लघवो लश्चापरैरसंयुक्ताः ।

परिशिष्टाभद्रायां पृथगथवा श्रव्यसंयुक्ताः ॥२९॥

ललितायामिति । ललितायां वृत्तौ घकारधकारभकाररेफसकारा भवन्ति । ते च लघवो न गुरवः । तथा लकारश्चापरैर्वर्णैरसंयुक्तः । आत्मना तु भवेदिति । भद्रायां तु वृत्तौ परिशिष्टा वृत्तिचतुष्टयोपयुक्तवर्णशेषाः । ते च पृथगसंयुक्ताः सन्ति । युक्ताश्चेद्भवन्ति तदा श्रव्यैः श्रुतिसुखैर्योज्या इति ॥

ललितोदाहरणमाह—

मलयानिलललनोल्ललमदकलकलकण्ठकलकलललामः ।

मधुरमधुविधुरमधुपो मधुरयमधुना धिनोति धराम् ॥३०॥

मलयेति । अयं मधुर्वसन्तोऽधुना धरां पृथ्वीं धिनोति प्रीणयति । किंभूतः । मलयानिलस्य मलयवायोर्यल्ललनं गमनं तेनोल्ललाः सोत्कण्ठा मदकला मदमधुरा ये कलकण्ठा कोकिलास्तेषां यः कलकलः कोलाहलस्तेन ललामः श्रेष्ठः । अथवा स एव ललामो ध्वजो यस्य स तथा । अन्यच्च मधुरेण मधुना मकरन्देन विधुरा मत्ता भ्रमरा यस्य स तथा । अत्रान्ये उदाहृताः । घभसानां स्वयमुदाहरणं द्रष्टव्यम् ॥

भद्रोदाहरणमाह—

उत्कटकरिकरटतटस्फुटपाटनसुपटुकोटिभिः कुटिलैः ।

खेलेऽपि न खलु नखरैरुल्लिखति हरिः खरैराखुम् ॥३१॥

अर्थात् असंयुक्त रूप से प्रयोग होता है । यदि वे संयुक्त रूप से प्रयुक्त किये जाते हैं तो इस रूप में कि वे श्रुति-सुखद प्रतीत हों ।२९।

दक्षिण दिशा की शीतल एवं सुगन्धित वायु के चलने से उत्कंठा और मद से पूर्ण कोयलों के मधुर आलाप से रमणीय, तथा मधुर पुष्प रस-पान से मस्त भ्रमरों से युक्त यह वसन्त अब पृथ्वी को पुलकित बना रहा है ।३०।

तीव्र अग्रभाग वाले अपने भयानक एवं कठोर नाखूनों से दुर्दान्त हस्तियों के

उत्कटेति । हरिः सिंहो न खलु नैव खेलेऽपि क्रीडायामप्याखुं मूषकमुल्लिखति विदारयति नखैः । कीदृशैः । उत्कटा दृढा ये करिकरटतटा द्विपगण्डस्थलानि तेषां यत्स्फुटं प्रकटं दारणं तत्र सुष्ठु पटुर्दक्षा कोटिरग्रं येषां तैः । तथा कुटिलैरनृजुभिः खरैस्तीक्ष्णैः । अत्र कटखाः केवलाः केवलाः पूर्वत्र न प्रयुक्ता इति परिशिष्टत्वम् ॥

अथाध्यायमुपसंहरन्यथैता वृत्तयो रचिता रमणीया भवन्ति तथाह—

एताः प्रयत्नादधिगम्य सम्यगौचित्यमालोच्य तथार्थसंस्थम् ।
मिश्राः कवीन्द्रैरघनाल्पदीर्घाः कार्या मुहुश्चैव गृहीतमुक्ताः ॥३२॥

एता इति । एता पूर्वोक्ता वृत्तयः कवीन्द्रैः सुकविभिर्मिश्राः परस्परान्तरित कार्याः । किं कृत्वा । अधिगम्य ज्ञात्वा प्रयत्नात्तात्पर्येण । कथम् । सम्यगविपरीतम् ।ः तथा औचित्यमर्थसंस्थं पात्रगतमभिधेयगतं चालोच्य विमृश्य । कीदृश्यः सत्यो मिश्रा कार्या इत्याह—अघनाल्पदीर्घाः । अघना असंहताः । वृत्तौ वृत्तिर्निरन्तरलग्ना न कार्या । यदि वा अघना असंयोगाक्षरा. । एवंविधा अप्यल्पदीर्घाः कर्तव्याः । एकैव वृत्तिरत्यन्तमायता न कार्या यदि वा अल्पानि दीर्घाणि दीर्घाक्षराणि यास्विति योज्यम् । एवंविधा अप्यलकारान्तररहिता उद्वेगकारिण्यः श्रोतॄणां स्युरित्याह- कार्या मुहुः पुनर्गृहीतमुक्ताः । मुहुर्मोक्तव्यः कर्तव्यश्चानुप्रास इति ॥

इति श्रीरुद्रट कृते काव्यालङ्कारे नमिसाधुविरचितटिप्पणसमेतो
द्वितीयोऽध्यायः समाप्तः ।

कपोलों को फाड़ने वाला सिंह खेल में भी कभी चूहे के मृदु शरीर को विदीर्ण नहीं करता ।३१।

इस प्रकार सुसज्जनों द्वारा इन वृत्तियों को प्रयत्नपूर्वक समझकर, इनके [पात्रगत] औचित्य की तथा अर्थस्थ अर्थात् अभिधेयार्थ की अनुकूलता को देखकर इनका प्रयोग कहीं मिश्रित अर्थात् परस्पर संयुक्त रूप से, कहीं अल्प तथा कहीं दीर्घ रूप से करना चाहिए, तथा कहीं इनका प्रयोग करके फिर छोड़ देना चाहिए जिससे निरूपण-शैली एकरूपता न रहे ।] ।३२।

इति 'अंशुप्रभा'ऽऽख्य हिन्दी-व्याख्यायां द्वितीयोऽध्यायः समाप्तः ।

तृतीयोऽध्यायः

अथेदानीं यमकलक्षणमाह —

तुल्यश्रुतिक्रमाणामन्यार्थानां मिथस्तु वर्णानाम् ।
पुनरावृत्तिर्यमकं प्रायश्छन्दांसि विषयोऽस्य ।।१।।

तुल्येति । पुनरावृत्तिः पुनरुच्चारणं वर्णानां तद्यमकम् । कीदृशानाम् । तुल्या समाना श्रुतिः श्रोत्रेन्द्रियोपलब्धिः क्रमश्च परिपाटी येषाम् श्रुतिग्रहणाद्यत्र वर्णविकारेण षत्वरत्वादिना वपुष्टा वपुस्ता इत्यादौ तथा पुनर्गता पुना रौतीत्यादौ च सत्यपि क्रमे तुल्यश्रुतित्वाभावस्तत्र यमकत्वनिरासः । क्रमग्रहणात्प्रतिलोमानुलोमसर्वतोभद्रानुप्रासादीनां यमकत्वनिरासः । नहि तेषु तुल्यश्रुतिसद्भावेऽपि तुल्यक्रमो विद्यते । मिथोऽन्यार्थानां परस्परं भिन्नार्थानाम् । इत्यनेन तु पुनरुक्तस्य यमकत्वव्युदासः । यथा—

अहो रूपमहो रूपमहो मुखमहो मुखम् ।
अहो कान्तिरहो कान्तिस्तस्याः सारङ्गचक्षुषः ।।

इत्यादिषु । अन्यार्थानामित्यत्रार्थशब्दः प्रयोजनवाच्यपि । तेनेहापि यमकत्वं सिद्धं भवति ।

विजृम्भितोद्दामरसेन चेतसा निरूप्यमाणं किमपि प्रियावपुः ।
तदेव वैराग्यवता विभागशो निरूप्यमाणं किमपि प्रियावपुः ।।

अत्र हि वर्णानामेकाभिधेयत्वेऽपि प्रयोजनं भिद्यते । अस्य च यमकस्य प्रायो बाहुल्येन च्छन्दांसि पद्यं विषयः । प्रायोग्रहणाद् गद्यमपि क्वापीति ।।

तृतीय अध्याय

द्वितीय अध्याय में दो शब्दालंकारों--वक्रोक्ति और अनुप्रास का निरूपण किया गया था । इस अध्याय में यमक का निरूपण प्रस्तुत है ।

(१)

इस अध्याय में यमक का लक्षण प्रस्तुत करने के उपरान्त इसके भेदोपभेदों पर प्रकाश डाला गया है, जिनका विवरण इस प्रकार है—

पहले यमक के दो भेद किये गये हैं—

(क) समस्तपादज और (ख) देशज ।

(क) इनमें से समस्त पादज के तीन भेद हैं—पादावृत्ति, अर्द्धावृत्ति और श्लोकावृत्ति । इनमें से पादावृत्ति के पहले तीन भेद हैं—मुख, संदंश और आवृत्ति । फिर इसके दो अन्य भेद हैं—गर्भयमक और संदष्टक । फिर दो अन्य भेद—पुच्छ और पंक्ति, और फिर दो अन्य भेद—परिवृत्ति और युग्मक । इस प्रकार पादावृत्ति समस्तपादज यमक के कुल ६ भेद हुए ।

अर्द्धावृत्ति समस्तपादज का दूसरा नाम 'समुद्गक' है और श्लोकावृत्ति का दूसरा नाम महायमक ।

इस प्रकार समस्तपादज यमक के कुल ११ भेद हुए । (३।१६)

(ख) 'एकदेशज यमक' के अनेक भेद सम्भव हैं । उदाहरणार्थ—चारों पादों के प्रथम अर्द्धभाग की दूसरे पादों में पारस्परिक आवृत्ति । इस प्रकार 'एकदेशज' के स्थूल रूप से २० भेद हो जाते हैं । (देखिए ३।२०-२१)

इसी प्रकार एक पाद के अन्तिम अर्द्ध भाग की किसी अन्य पाद के प्रथमार्द्ध रूप में आवृत्ति के भी भेद गिनाये गये हैं । इस आवृत्ति का नाम 'अन्तादिक' है । इसके दो भेद हैं—व्यस्त और समस्त । व्यस्त के भी दो रूप हैं । (देखिए ३।२३) । इस प्रकार अन्तादिक यमक के तीन रूप हुए ।

अन्तादिक यमक का एक अन्य रूप है—'मध्य यमक' जिसका तात्पर्य है—द्वितीय पाद के अन्तिम अर्द्ध भाग की तृतीय पाद के अर्द्धभाग में आवृत्ति ।

मध्य और समस्त के योग का नाम 'वंश' यमक है और 'वंश' की विशिष्ट स्थिति में योग का नाम चक्रक यमक है ।

इस प्रकार अन्तादिक यमक के ६ भेद हुए—व्यस्त–२, समस्त–१, मध्य–१, वंश–१, चक्रक–१ । (देखिए ३।३०)

अन्तादिक यमक के अतिरिक्त 'आद्यन्तक' यमक भी माना गया है । इसके भी अन्तादिक के समान छः भेद हैं । (३।३३)

इनके अतिरिक्त अर्द्धपरिवृत्ति, पादसमुद्गक दो यमक और माने गये हैं । (३।३४)

पादसमुद्गक के चार भेद हैं—अन्तरित, अनन्तरित, व्यस्त और समस्त । इनमें से अन्तरित और अनन्तरित के ५-५ भेद हैं, व्यस्त के ४ तथा समस्त का १ भेद है । इस प्रकार पादसमुद्गक के १५ भेद हुए । (३।३६)

इनके उपरान्त पाद के चतुर्थ अंश की आवृत्ति के आधार पर यमक के निम्नोक्त तीन रूप निर्दिष्ट किये गये हैं—वक्त्र यमक, शिखायमक और मालायमक (३।४०);

पुनः ये तीन भेद और—मध्ययमक, आद्यन्त यमक और काञ्ची यमक। (३।४४)

किसी एक पाद के तृतीयांश की आवृत्ति के आधार पर यमक के दस भेद होते हैं, और यही आपस में आवृत्त होकर ३० प्रकार के बन जाते हैं। (३।४८, ४९)

आद्यन्त और अन्तादिक के छः-छः भेदों के अतिरिक्त एक ऐसा अन्य भेद है—अर्धपरिवृत्ति। इस प्रकार ये कुल १३ भेद हुए। इन तेरहों के भी अर्द्धार्द्ध भागों की आवृत्ति करने से कई भेद बन जाते हैं। (३।५१)

स्थान के आधार पर यमक के तीन अन्य भेद भी सम्भव हैं—आदिमध्य, आद्यन्त और मध्यान्त। (३।५२) और अन्ततः एक भेद और—जिसमें पाद के किसी अवयव का स्थान नियत नहीं होता। (३।५६)

इस प्रकार रुद्रट ने यमक की अनेक चमत्कृतियों की चर्चा करने के उपरान्त इस अध्याय के अन्तिम श्लोक में इनके प्रयोग की विधि का निर्देश किया है।

: २ :

रुद्रट से पूर्व भामह ने यमक के पाँच भेद गिनाये हैं—आदि यमक, मध्य-यमक, अन्त यमक, पादाभ्यास, आवली और समस्तपाद यमक। भामह के कथनानुसार सन्दष्टक, समुद्गक आदि अन्य यमक-प्रकार इन्हीं पाँचों में अन्तर्भूत हो जाते हैं, इन्हें स्वतन्त्र नहीं मानना चाहिए। (काव्यालंकार २।९,१०)

भामह के उपरान्त दण्डी ने यमक के दो प्रमुख भेद माने हैं—अव्यपेत और व्यपेत। ये दोनों एक, दो, तीन अथवा चारों पादों के आदि, मध्य और अन्त के अति-रिक्त मध्यान्त, मध्यादि और आद्यन्त में घटित होने के कारण अनेक प्रकार के हैं। (काव्यादर्श ३।१, २, १९, ३३)। इनके अतिरिक्त दण्डी ने 'श्लोकाभ्यास' नामक यमक भी निर्दिष्ट किया है, जिसमें एक श्लोक की पूर्णतः आवृत्ति की जाती है (३।६७)। यमक का एक और रूप है—'महायमक'। (३।७०) इन सब के विपरीत यमक का एक और रूप भी दण्डी ने माना है—प्रतिलोम। (३।७३)

दण्डी के ही अनुरूप वामन ने भी यमक-भेदों को निम्नोक्त रूप में प्रतिपादित किया है—एक पाद का यमक; एक, दो, तीन अथवा चारों पादों के आदि, मध्य और अन्त भागों का यमक। (का० सू० वृ० ५।१।२)। इसी प्रसंग में वामन ने यमक-भंग की भी चर्चा की है। इसे उन्होंने तीन प्रकार का माना है—शृंखला, परिवर्तक और चूर्णा। (४।१।४)

भामह, दण्डी और वामन के इन यमक-भेदों पर आपाततः दृष्टिपात करने से ज्ञात हो जाता है कि रुद्रट ने उक्त सभी ग्रन्थों से साक्षात् अथवा असाक्षात् रूप से सामग्री ग्रहण की है, किन्तु इनका यमक-प्रकरण उनकी अपेक्षा पर्याप्त रूप से परि-वर्द्धित एवं व्यवस्थित है।

: ३ :

अब विवेच्य प्रश्न यह है कि क्या ये सब भेदोपभेद-चक्र ग्राह्य है ? काव्य-सौन्दर्य के दो पक्ष स्वीकृत किये जाते हैं—बाह्य और आन्तरिक। बाह्य काव्य-सौन्दर्य के अन्तर्गत अनुप्रास, वक्रोक्ति, श्लेष और यमक नामक शब्दालंकारों, 'पुनरुक्तवदाभास' नामक उभयालंकार का चमत्कार आता है। उपमा, रूपक, दीपक आदि अर्थालंकार भी निस्सन्देह बाह्य सौन्दर्य से सम्बद्ध हैं, किन्तु उनमें आन्तरिक सौन्दर्य भी कम नहीं है। रस और ध्वनिगत सौन्दर्य वस्तुतः काव्य का ऐकान्तिक आन्तरिक सौन्दर्य है। अर्थालंकारों का सौन्दर्य रस-ध्वनिगत सौन्दर्य का परिवर्द्धक है, और केवल इसी स्थिति में ही वे मान्य हैं—

(क) रसभावादितात्पर्यमाश्रित्य विनिवेशनम्।
अलंकृतीनां सर्वासामलंकारत्वसाधनम्॥

—हिन्दी ध्वन्यालोक, पृष्ठ १२२

(ख) ध्वन्यात्मभूतश‍ृंगारे समीक्ष्य विनिवेशतः।
रूपकादिरलंकारवर्ग एति यथार्थताम्॥

—ध्वन्यालोक २।१७

(क) सभी अलंकारों का अलंकारत्व इसी तथ्य में है कि वे रस, भाव आदि के तात्पर्य के आश्रित होकर रहें—वे रस आदि का अंग बनकर रहें।

(ख) रूपक आदि अर्थालंकारों की यथार्थता इसीमें है कि कवि इन्हें अपनी समीक्षा-बुद्धि द्वारा काव्य की आत्मा ध्वनि [पर आश्रित] श‍ृंगार [आदि रसों] के आश्रित रूप में वर्णित करें।

इसका तात्पर्य यह कि अलंकार रसों के उपकारक रूप में ही वर्णित हों। उनके अंग बनकर रहें, स्वतन्त्र रूप में वर्णित न हों—

उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।
हारादिवदलंकारास्तेऽनुप्रासोपमादयः॥ का० प्र० ८।६७

शब्दालंकारों की, विशेषतः विवेच्य अलंकार यमक की, यथार्थता के सम्बन्ध में संस्कृत का काव्याचार्य प्रारम्भ से सतर्क रहा है। उन्होंने उक्त चार शब्दालंकारों में से 'चित्र' अलंकार को सर्वाधिक हेय माना है, और इसके उपरान्त इस दृष्टि से क्रमशः यमक और अनुप्रास को। 'श्लेष' की हेयता पर विशिष्ट रूप से बल नहीं दिया गया। इसका एक मात्र कारण यह है कि इस अलंकार में उपमेय और उपमान दोनों का साम्य श्लिष्टता के आधार पर पाठक के हृदय में कुछ चमत्कार अवश्य उत्पन्न कर देता है। अस्तु, अनुप्रास और यमक के सम्बन्ध में विभिन्न आचार्यों के कतिपय कथन उल्लेखनीय हैं—

१. दण्डी ने केवल दो शब्दालंकारों—अनुप्रास और यमक का निरूपण किया

है और दोनों को समादर की दृष्टि से नहीं देखा। उनके कथनानुसार अनुप्रास का अर्थ शैथिल्य है, और यह 'श्लेष' नामक गुण के अभाव का दूसरा नाम है। गौड मार्ग (जा कि वैदर्भ मार्ग की अपेक्षा निकृष्ट मार्ग है) के अवलम्बी ही इसे अपनाते हैं।

—का० द० १।४३,४४

यमक के सम्बन्ध में उनकी धारणा है कि उसका अकेला प्रयोग मधुरताजनक नहीं होता—**'तत्तु नैकान्तमधुरम्'** —का० द० १।६१

२. आनन्दवर्द्धन ने यमक आदि शब्दालंकारों की अपेक्षाकृत हीनता प्रबल शब्दों में व्यक्त की है :

ध्वन्यात्मभूतशृंगारे यमकादिनिबन्धनम्।
शक्तावपि प्रमादित्वं विप्रलम्भे विशेषतः॥

× × × **यमके च प्रबन्धेन बुद्धिपूर्वकं क्रियमाणे नियमेनैव यत्नान्तरपरिग्रह आपतति शब्दविशेषान्वेषणरूपः।** × × ×

अपृथग्यत्ननिर्वर्त्यः सोऽलंकारोध्वनौमतः। यत्तु रसवन्ति कानिचिद् यमकादीनि दृश्यन्ते तत्र रसादीनामङ्गता, यमकादीनान्त्वंगितैव। ध्वन्या० २।१५,१६ तथा वृत्ति

अर्थात् ध्वन्यात्मक शृङ्गार में यमक आदि का निबन्ध कवि के प्रमाद का सूचक है। काव्य में अलंकार का प्रयोग अप्रयत्नज होना चाहिये, पर यमक-निबन्धन के लिये तो कवि को विशेष शब्दों की खोज करनी पड़ती है। सरस रचना में यमक अलंकार रस को अंग बना देता है और स्वयं अंगी बन जाता है।

३. कुन्तक की भी यमक के सम्बन्ध में यही धारणा है कि यह शोभाशून्य अलंकार है, इसके विस्तृत जाल में उलझने से क्या लाभ ?

स तु शोभान्तराभावादिह नातिप्रतन्यते। —व० जी० २।७

और स्वयं रुद्रट भी यमक अलंकार के प्रयोग के विशेष में सतर्कता और सावधानी बरतने का आदेश दे रहे हैं। (देखिये ३।५९)

यमक का लक्षण

ऐसे वर्णों की आवृत्ति को यमक कहते है जो सुनने में समान प्रतीत हों, जिनका क्रम समान हो किन्तु उनका अर्थ परस्पर भिन्न हो।

रुद्रट के अनुसार यमक का पहला तत्त्व है—समानश्रुति, अर्थात् उन वर्णों की आवृत्ति जो सुनने में एक-समान हों, किन्तु यह विशेषण निरर्थक प्रतीत होता है। स्वयं 'आवृत्ति' शब्द ही 'समानश्रुति' तत्त्व का सूचक है। नमिसाधु ने **'वपुष्टा वपुस्ता'** तथा **'पुनर्गता पुना रौति'** उदाहरण देते हुए कहा है कि इनमें क्रमशः षत्व (स को ष) और रत्व (विसर्ग को र) वर्णविकार हो जाने के कारण समानश्रुति नहीं मानी जाएगी, अतः यहाँ यमक अलंकार भी नहीं होगा। किन्तु ऐसे स्थलों में भी यमक अलंकार

मानना चाहिए—क्योंकि यहाँ 'वपु' और 'पुन' वर्णों की आवृत्ति है। वस्तुतः निरर्थक वर्ण-समुदाय (शब्दों) की आवृत्ति में भी यमक मान लिया जाता है यद्यपि रुद्रट ने इस ओर कोई संकेत नहीं किया।

यमक का दूसरा तत्त्व है वे वर्ण जिनका क्रम समान हो, जैसे—**चक्रं दहतारं चक्रन्द हतारम्।** यह तत्त्व यमक अलंकार को चित्र अलंकार के अनुलोम और प्रतिलोम नामक भेदों से अलग करता है। इनमें वर्णों की आवृत्ति अथवा समानश्रुति होने पर भी समान क्रम नहीं रहता। (देखिए प्रस्तुत ग्रन्थ ५।१७)

इस अलंकार का तीसरा तत्त्व है—आवृत्त वर्णों का अर्थ भिन्न-भिन्न हो। नमिसाधु के अनुसार 'अर्थ' शब्द से यहाँ 'प्रयाजन' अथवा 'तात्पर्य' भी अभिप्रेत है। जैसे—

विजृम्भितोद्दामरसेन चेतसा
निरूप्यमाणं किमपि प्रियावपुः
तदेव वैराग्यवता विभागशो
निरूप्यमाणं किमपि प्रियावपुः।

इस उदाहरण में 'निरूप्यमाणं किमपि प्रियावपुः' वाक्य दो बार आवृत्त किया गया है किन्तु दोनों स्थलों पर इसका आशय भिन्न-भिन्न है। 'रसिक चित्त से देखना'—इस पक्ष में 'प्रिया का शरीर जगत् का सर्वोत्कृष्ट सार है' यह ध्वनित होता है। 'वैराग्यपूर्ण चित्त से देखना'—पक्ष में उसे 'अस्थिचर्ममय' मानते हुए उसके प्रति घृणा व्यक्त की गयी है। इस प्रकार नमिसाधु के अनुसार इस उदाहरण में प्रयाजन की भिन्नता होने पर भी यमक अलंकार माना जाएगा, किन्तु परवर्ती आचार्यों ने ऐसे स्थलों में लाटानुप्रास माना है—

शब्दार्थयोः पौनरुक्त्यं भेदे तात्पर्यमात्रतः।
लाटानुप्रास इत्युक्तो × × ×॥

उदाहरणार्थ—

यस्य न सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य।
यस्य च सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य॥

—सा० द० १० म० परि०

जिन स्थलों में वर्णों की समान क्रम से आवृत्ति तो हो किन्तु उनमें अर्थ भिन्न न होकर समान हो वहाँ पुनरुक्त (अथवा वीप्सा) अलंकार मानना चाहिए, जैसे—

अहो रूपमहो रूपमहो मुखमहो मुखम्।
अहो कान्तिरहो कान्तिस्तस्याः सारंगचक्षुषः॥

यहाँ यह भी ज्ञातव्य है कि प्रायः पद्य ही यमक का प्रयोगक्षेत्र है, गद्य में इसका

अथ परोक्तयमकभेदान्निरस्यन्स्वाभिमतयमकभेदांल्लक्षणाभिधानायाह—

पूर्वं द्विभेदमेतत्समस्तपादैकदेशजत्वेन ।

पादार्धश्लोकानामावृत्त्या सर्वजं त्रेधा ।। २ ।।

पूर्वमिति । पूर्वं मूलभेदाद्यपेक्षया एतद्यमकं द्विभेदम् । केन भेदेनेत्याह—समस्तेत्यादि । तत्र समस्तपादश्च समस्तपादौ च समस्तपादाश्चेत्येकशेषः । तथा एकदेशश्च एकदेशौ च एकदेशाश्चेति । समस्तपादजमेकदेशजं चेति भेदद्वयम् । अत्र च वक्ष्यमाणभेदाः सर्वेऽप्यन्तर्भवन्तीति पंचधा चतुर्दशधा चेति परोक्तवचनव्युदास इति । तत्र समस्तपादजप्रभेदानाह—पादार्धेत्यादि । पादावृत्त्या अर्धावृत्त्या श्लोकावृत्त्या च समस्तपादजं त्रेधा भवति ।।

तत्रापि पादावृत्तेस्तावद्भेदानाह—

पर्यायेणान्येषामावृत्तानां सहादिपादेन ।

मुखसंदंशावृतयः क्रमेण यमकानि जायन्ते ।। ३ ।।

पर्यायेणेति । पर्यायेण क्रमेणान्येषां द्वितीयादीनां त्रयाणां पादानामादिपादेन सहावृत्तानां यमकितानां मुखसंदंशावृतिसंज्ञितानि क्रमेण यथासंख्यं यमकानि त्रीणि जायन्ते भवन्तीति ।।

तदुदाहरणानि क्रमेणाह—

चक्रं दहतारं चक्रन्द हतारम् ।

खड्गेन तवाजौ राजन्नरिनारी ।। ४ ।।

प्रयोग विरल एवं चमत्कारशून्य होता है ।

यमक के भेद

यमक अलंकार के [प्रमुख] दो भेद हैं—

समस्तपादज और एकदेशज । इनमें से समस्तपादज के तीन भेद हैं—

पादावृत्ति, अर्द्धावृत्ति और श्लोकावृत्ति ।२।

पादावृत्ति यमक के भेद

इनमें से पादावृत्ति के तीन भेद हैं । प्रथम पाद की शेष तीन पादों में क्रमिक आवृत्ति क्रमशः मुख, संदंश और आवृति कहाती है ।

अर्थात् प्रमुख पाद की द्वितीय पाद में आवृत्ति 'मुख' कहाती है, तृतीय पाद में वह 'संदंश' कहाती है और चतुर्थ पाद में इसका नाम 'आवृत्ति' है ।३।

मुख का उदाहरण

अन्वय—हे राजन् ! आजौ आरं (रिपुसम्बन्धि) चक्रं (समूहं) अरं दहता तव खड्गेन हता (शोकं प्रापिता) अरिनारी चक्रन्द ।

चक्रमिति । कश्चिन्नृपमाह—हे राजन्, तव संबन्धिना खड्गेनाजौ रणे आरं रिपुसक्तं चक्रं समूहमरं शीघ्रं दहता घ्नता अरिनारी रिपुस्त्री भर्तृवधेन हता ताडिता सती चक्रन्द । क्रन्दितवतीत्यर्थः । इति प्रथमद्वितीयपादयमकं मुखसंज्ञम् ।।

अथ संदंशः—

सन्नारीभरणोमायमाराध्य विधुशेखरम् ।
सन्नारीभरणोऽमायस्ततस्त्वं पृथिवीं जय ।। ५ ।।

सन्नारीति । कश्चिन्नृपस्याशिषमाह—त्वं विधुशेखरं हरमाराध्य ततः पृथिवीं जय । कीदृशं हरम् । सत्यश्च ता नार्यश्च सन्नार्यः साध्व्यः स्त्रियस्ता बिभर्ति पोषयतीति सन्नारीभरणः स चासावुमायश्च । उमा पार्वती तां याति गच्छति तया सह संयुज्यते यस्तं तथाविधम् । त्वं कीदृशः । सन्नाः खिन्ना अरीभा रिपुद्विपा यत्र स तथाविधो रणः संग्रामो यस्य स तथा । पुनः कीदृशः । अमायो मायारहितः । सात्त्विक इत्यर्थः । अत्र प्रथमतृतीयपादयोः संदंशनामकं यमकम् ।।

अथावृतिः—

मुदारताडी समराजिराजितः प्रवृद्धतेजाः प्रथमो धनुष्मताम् ।
भवान्बिभर्तीह नगश्च मेदिनीमुदारताडीसमराजिराजितः ।। ६ ।।

हे राजन् ! युद्धक्षेत्र में तुम्हारी तलवार द्वारा शत्रुमण्डल के मारे जाने पर शत्रु पक्ष की स्त्रियाँ अपने स्वामियों के वध से शोकाकुल होकर क्रन्दन कर रही थीं ।४।

संस्कृत पद्य में प्रमथ पाद की द्वितीय पाद में आवृत्ति की गयी है, अतः यहाँ 'मुख' यमक है ।

संदंश का उदाहरण

अन्वय—त्वं सन्नारी-भरण-उमायं विधुशेखरं आराध्य सन्न-अरि-इभ-रणः, अमायः [सन्] पृथिवीं जय ।

हे राजन् ! पतिव्रता स्त्रियों के रक्षक उमा के पति तथा चन्द्रशेखर भगवान् शिव की आराधना करके आप रणक्षेत्र में शत्रुओं के हाथियों को अपने पराक्रम से व्याकुल बनाते हुए सात्त्विक भाव से पृथ्वी को जीतें ।५।

यहाँ संस्कृत-पद्य में प्रथम की तृतीयपाद पाद में आवृत्ति की गयी है । अतः यहाँ **'संदंश'** यमक है ।

आवृति का उदाहरण

अन्वय—इह भवान् (नगश्च), मुदा-आर-ताडी, समर-अजिर-अजितः, प्रवृद्ध-तेजाः, धनुष्मतां प्रथमः [मेदिनीं विभर्ति] । नगश्च उदार-ताडी-सम-राजि-राजितः, मेदिनीं बिभर्ति ।

मुदेति । कश्चिच्चाटुकक्कन्नृपमाह—इह भवांस्त्वं नगश्चाद्रिश्च मेदिनीं भुवं बिभर्ति पोषयति धारयते च। कीदृशस्त्वम्। मुदा हर्षेण, न तु भयेन, आरताडी रिपुसमूहताडनशील:। तथा समराजिरे रणाङ्गणेऽजितोऽपरिभूतः। तथा प्रवृद्धतेजाः प्रथितप्रतापः। धनुष्मतां धानुष्काणां प्रथमो मुख्यः। नगः कीदृशः। उदारा उन्नता यास्ताडचस्ताडिवृक्षास्तासां समा अविषमा या राजयः पंक्तयस्ताभी राजितः शोभितः। इह चतुर्थपादयमकमावृतिर्नाम ॥

भेदान्तरमाह—

प्रत्येकं पश्चिमयोरावृत्त्या पादयोर्द्वितीयेन ।
यमके संजायेते गर्भः संदष्टकं चेति ॥ ७ ॥

प्रत्येकमिति। पश्चिमयोस्तृतीयचतुर्थपादयोर्द्वितीयेन पादेन सहावृत्त्या प्रत्येकं पृथग्यमके संजायेते भवतो गर्भसंदष्टकसंज्ञिते ॥

तत्र गर्भोदाहरणम्—

यो राज्यमासाद्य भवत्यचिन्तः समुद्रतारम्भरतः सदैव ।
समुद्रतारं भरतः स दैवप्रमाणमारभ्य पयस्युदास्ते ॥ ८ ॥

हे राजन् ! अरिगण को भयभीत करने वाले अमित तेजस्वी, धनुर्धारियों में श्रेष्ठ तथा युद्धभूमि में अपराजित आप प्रसन्नता से पृथ्वी का पालन-पोषण करते हैं, और [इधर] पर्वत भी आपके समान पृथ्वी को धारण कर रहा है जो ऊँचे-ऊँचे ताड़ वृक्षों की समान पंक्तियों से शोभित है।६।

संस्कृत-पद्य में प्रथम पाद की आवृत्ति चतुर्थ पाद में की गयी है। अतः यहाँ 'आवृति' नामक यमक है।

पादावृत्ति यमक के दो अन्य भेद

द्वितीय पाद की परवर्ती दोनों पादों में (अर्थात् तृतीय और चतुर्थ पाद में) आवृत्ति को क्रमशः गर्भ-यमक और संदष्टक यमक कहते हैं।७।

अर्थात् द्वितीय पाद की तृतीय पाद में आवृत्ति को 'गर्भ-यमक' कहते हैं और इसी पाद की चतुर्थ पाद में आवृत्ति को 'संदष्टक-यमक'।

गर्भ का उदाहरण

अन्वय—यः राज्यं आसाद्य अचिन्तः भवति तथा सन्मुत् (सन्) सदैव रत-आरम्भ-रतः (भवति), (स) भर-तः समुद्र-तारं आरभ्य दैवप्रमाणं पयसि उदास्ते।

जो पुरुष राज्य पाकर उसकी रक्षा करने में उदासीन हो जाता है और नित्य रति-क्रीड़ा में आनन्द अनुभव करता रहता है, वह उस पुरुष के समान है जो

य इति । यः पुरुषो राज्यं प्राप्य तस्य रक्षणादौ निश्चिन्तो भवति । तथा प्राप्तं राज्यमिति समुत्सहर्षः । यो रतारम्भरतः सदैव निधुवनप्रारम्भासक्तः । सततं स तथाविधनृपो भरतो भरेण समुद्रतारं जलनिधितरणं बाहुभ्यामारभ्य पयसि जलमध्य उदास्ते निष्क्रियो भवति । कथम् । दैवं पुराकृतं कर्म प्रमाणं यत्र तत्तथेति क्रियाविशेषणम् । यः प्राप्तराज्यो निरुद्यमः स बाहुतरणप्रवृत्तजलधिमध्यस्थितनिष्क्रियनरतुल्य इत्यर्थः । इति मध्यमपादयोर्गर्भो नाम यमकम् ।।

अथ संदष्टकम्—

इदं च येन स्वयमात्मभोग्यतां समस्तकाञ्चीकमनीयताकुलम् ।
नितम्बबिम्बं कथमस्तु नो नृणां स मस्तकाञ्चीकमनीयताकुलम् ।।६।।

इदमिति । कश्चिद्रागी परस्त्रियं दृष्ट्वा कंचिदाह—इदं नितम्वबिम्बं श्रोणीतटं येन स्वयमसहायेनात्मभोग्यतां स्वोपकारितामनीयत नीतं स तथाविधो नृणां पुंसां मस्तकाञ्ची शिरोवर्ती कथं नो अस्तु कथं मा भूत् । सौभाग्यातिशयवानित्यर्थः । कीदृशं कटितटम् । आकुलं प्रयोगवशाच्चटुलमत एव समस्ता सम्यक्क्षिप्ता काञ्ची मेखला यतस्तत्समस्तकाञ्चीकम् । तथा च कमनीयताया रामणीयकस्य कुलं स्थानम् । अत्र द्वितीयचतुर्थपादयोः संदष्टयमकम् ।।

भुजाओं से समुद्र पार करना प्रारम्भ करके फिर भाग्य पर ही जीवन छोड़कर तैरना बन्द कर देता है ।८।

संस्कृत-पद्य में द्वितीय पद्य की आवृत्ति तृतीय पद्य में भी गयी है । अतः यहाँ 'गर्भ' नामक यमक है ।

सन्दष्टक का उदाहरण

अन्वय—येन सम्-अस्त-काञ्चीकम् (अतएव)आकुलम्, (तथा) कमनीयता-कुलम्, इदं नितम्वबिम्बं, स्वयं आत्मभोग्यतां अनीयत, सः नृणां मस्तक-अञ्ची कथं नो अस्तु ।

[कोई कामुक किसी पर-स्त्री को देखकर अपने साथी से कहता है—] जिस पुरुष ने बड़ी अधीरता से इसकी कमर में बँधी मेखला (तगड़ी) को खींचकर सौंदर्य के केन्द्रस्थल इन नितम्बों का उपभोग किया है, वह सबसे अधिक भाग्यशाली कैसे न होगा ।६।

संस्कृत-पद्य में द्वितीय पद्य की आवृत्ति चतुर्थ पद्य में की गयी है । अतः यहाँ 'सन्दष्टक' नामक यमक है ।

पुनराह—

अन्योन्यं पश्चिमयोरावृत्त्या पादयोर्भवेत्पुच्छः ।
सर्वैः सार्धं युगपत्प्रथमस्य तु जायते पंक्तिः ।। १० ।।

अन्योन्यमिति । पश्चिमयोस्तृतीयचतुर्थपादयोः परस्परावृत्त्या पुच्छो नाम यमकं भवेत् । तथा प्रथमपादस्य सर्वैस्त्रिभिरन्यैः सार्धं युगपत्समकालमावृत्त्या पंक्तिर्नाम यमकं जायते ।।

तत्र पुच्छः—

उत्तुङ्गमातङ्गकुलाकुले यो व्यजेष्ट शत्रून्समरे सदैव ।
स सारमानीय महारि चक्रं ससार मानी यमहारिचक्रम् ।।११।।

उत्तुङ्गेति । कश्चिद्वीरो वर्ण्यते—स मानी मानवान्नरोऽरिचक्रं रिपुराष्ट्रं ससार जगाम । कीदृशः । यः समरे रणे । कीदृशे । उत्तुङ्गमातङ्गकुलाकुले उन्नतद्विपसमूहसंकुले सदैव सर्वदैव व्यजेष्टाभ्यभूत्, शत्रून्रिपून् । कथम् ! सारमुत्कृष्टं महारि महद्भिररैर्युक्तं चक्रमायुधविशेषमानीयादाय । कीदृशो मानी । यमं युग्मं कृतान्तमपि वा हन्तीति यमहा ।।

पादावृत्ति यमक के दो अन्य भेद

पश्चिम अर्थात् तृतीय और चतुर्थ पादों की पारस्परिक आवृत्ति को पुच्छ-यमक कहते हैं, तथा प्रथम पाद की शेष तीनों पादों में आवृत्ति को पंक्ति-यमक ।१०।

पुच्छ का उदाहरण

अन्वय—स मानी सदैव उतुङ्ग-मातङ्ग-कुल-आकुले समरे शत्रून् व्यजेष्ट । (अथ च) [सः] यम-हा, सारं, महा-अरि चक्रं आदाय अरि-चक्रं ससार ।

जो बड़े-बड़े हाथियों से व्याप्त रणभूमि में शत्रुओं पर सदा विजय पाता था, वही यमराज को भी आतंकित करने वाला मानी वीर बड़े-बड़े अरों वाले श्रेष्ठ चक्र को लेकर 'अरिचक्र' अर्थात् शत्रु देश में चला गया है ।११।

संस्कृत पद्य में तृतीय और चतुर्थ पाद की परस्पर आवृत्ति की गयी है, अर्थात् दोनों पाद एक से हैं । अतः यहाँ 'पुच्छ' नामक यमक है ।

पंक्ति का उदाहरण

अन्वय—सभाजनेन, सभा-अजने, न उपरिपु-ऊरित-असौ अपरिपूरित-असौ नः सभाजने इत-असौ उपरि पूः इता जन-इनः स-भाः अथ च ऊः ।

शब्दार्थ

सभाजनेन—मंत्रियों द्वारा, सभा-अजने—[मंत्रियों पर] आक्षेप करने वाले, न उपरिपु ऊरितासौ—शत्रु के समीप खड्ग न उठानेवाले, अपरिपूरित-असौ—मृतक तुल्य, नः सभाजने—हमें प्रसन्नता देने वाले, इत-असौ—अपमानित होने वाले [पुरवासियों

अथ पंक्त्युदाहरणम्—

सभाजनेनोपरि पूरितासौ सभाजने नोपरिपूरितासौ ।
सभा जनेनोऽपरिपूरितासौ सभाजने नोऽपरिपूरितासौ ।।१२।।

सभाजनेनेति । 'कस्यचिद्राज्ञो मन्त्रिणः पौरैस्तिरस्कृताः । ततस्तस्य स्वसभ्याधिक्षेपजातकोपस्यापरागभयात्पौराननिगृह्णतः कान्तिभ्रंशो बभूव । ततः कस्मिंश्चिद्दवसरे ते सभ्या लब्धावसराः सन्तः पौराणामुपरि कटकयात्रामदुः । ततस्ते पौरा निरायुधाः सन्तः पराजिग्यिरे । ततो राजा परितुष्टः पुनरात्मीयां कान्तिमाप' इति समुदायार्थः । पादानां त्वेवं योजना । कश्चित्सभ्यः परस्य कथयति—सभाजनेन सभ्यलोकेन । मन्त्रिजनेनेत्यर्थः । उपरि पृष्ठतः, पूः पौरजनता । इता प्राप्ता, असौ । एषां पौराणां पृष्ठतः सभ्या आगता इत्यर्थः । कदा । सभां सभालोकमजति क्षिपतीति सभाजनस्तस्मिन्पौरजने । न उपरिपु शत्रुसमीपे सभ्यसंनिधाने ऊरिता असयः खड्गा येन स ऊरितासिस्तस्मिन्नेवंविधे । अनुद्यतखड्ग इत्यर्थः । अत एव जनानामिनः स्वामी जनेनो राजा, सह भासा वर्तते इति सभाः सदीप्तिकः संवृत्तः । अन्यच्च कीदृशे पौरलोके । अपरिपूरिता अनाप्यायिता असवः प्राणा यस्यासौ तथोक्तस्तस्मिन् । मृततुल्य इत्यर्थः । तथा सभाजने । 'सभाज प्रीतिदर्शने'[1] इत्यस्मात्कर्तरि ल्युट् । नोऽस्माकं प्रीतिकरे । पूजक इत्यर्थः । अत एवास्माकं पूर्वप्रक्रान्तो जनेनः, अवतीत्यूः । रक्षिता संपन्न इत्यर्थः । कथम् । अपगता रिपवो यत्रावने तत्तथेतिं क्रियाविशेषणम् । किंभूते पौरलोके । इतासौ इता प्राप्ता असुः अपूजा येन तस्मिन् । अधिगतमानभ्रंश इत्यर्थः ।

'परिप्रतिगतार्थौ तु सु पूजायां यदा भवेत् ।
अतिरतिक्रमणे चैव नोपसर्गा इमे तदा ।।'

इति सर्वपादजं पंक्तियमकम् ।।

पर], उपरि पूः इता—पीछे से आक्रमण किया गया, जन-इनः—[अतएव] राजा, स-भाः—दीप्तिमान्, ऊः—[और] रक्षक [हो गया] ।

[नगरवासियों ने किसी राजा के मन्त्रियों का तिरस्कार किया । किन्तु राजा ने प्रतिक्रियास्वरूप कोई कदम नहीं उठाया, इसलिए उसकी प्रतिष्ठा को धक्का लगा । उधर मन्त्रियों ने अवसर पाकर उन नागरिकों पर आक्रमण कर दिया । वे नागरिक शस्त्र-रहित होने के कारण पराजित हो गये और राजा को अपनी खोई प्रतिष्ठा मिल गयी । निम्नांकित उदाहरण में यह वर्णन प्रस्तुत है—]

एक मन्त्री किसी से कह रहा है कि मन्त्रियों ने अपना अपमान करने वाले निःशस्त्र, मृतक-समान नागरिकों पर पीछे से आक्रमण कर दिया । इससे राजा फिर अपने राजतेज से दीप्त हो उठा ।१२।

भूयोऽपि भेदान्तरमाह—

परिवृत्तिर्नाम भवेद्यमकं गर्भावृतिप्रयोगेण ।
मुखपुच्छयोश्च योगाद् युग्मकमिति पादजं नवमम् ।। १३ ।।

परिवृत्तिरिति । पूर्वोक्तगर्भावृतियमकयोर्युगपद्योगे वृत्तिर्नाम यमकं भवति । तथा पूर्वोक्तमुखपुच्छयोर्युगपद्योगाद्युग्मकं नाम समस्तपादसंभवं नवमं यमकं भवति ।।

तत्र परिवृत्त्युदाहरणम्—

मुदा रतासौ रमणी यता यां स्मरस्यदोऽलं कुरुतेन वोढा ।
स्मरस्यदोऽलंकुरुतेऽनवोढामुदारतासौ रमणीयतायाम् ।।१४।।

मुदेति । एतन्मानिन्याः सखी अनुनयप्रत्याख्यानभयादपसृतं नायकमाह—असौ रमणी स्त्री त्वयि रता । मुदा प्रीत्या । न तु धनलोभादिना । यता त्वदागमनार्थं प्रयत्न-

---

संस्कृत पद्य में प्रथम पाद की आवृत्ति शेष तीनों पादों में की गयी है, अर्थात् चारों पाद एक-समान हैं । अतः यहाँ 'पंक्ति' नामक यमक है ।

पादावृत्ति यमक के दो अन्य भेद

उपर्युक्त गर्भ और आवृत्ति नामक यमकों के पारस्परिक योग को परिवृत्ति नामक यमक कहते हैं, तथा मुख और पुच्छ का योग युग्मक नामक नवम यमक कहाता है ।१३।

अन्वय—कुरुतेन (उपलक्षितः) यां वोढा, अदः अलं स्मरसि । असौ रमणी मुदा रता यता (च) । असौ उ.ारता, (यत्) रमणीयतायां स्मरस्यदः अनवोढां अलंकुरुते ।

शब्दार्थ

यां वोढा—जिससे तुम विवाह करने जा रहे हो, अदः अलं स्मरसि—अवश्य ही तुम उसे निरन्तर स्मरण करते रहते हो, कुरुतेन [उपलक्षितः]—अनायास ही तुम्हारे मुख से उसके विषय में वचन निकल पड़ते हैं, असौ रमणी मुदा रता—वह भी तुम्हें सच्चे हृदय से प्रेम करती है, यता—तुमसे मिलने के लिए प्रयत्नशील रहती है, [रहा उसका मान करना] असौ उदारता—वह भी उचित ही है, रमणीयतायां स्मरस्यदः अनवोढाम् अलंकुरुते—प्रगल्भ नायिका के लावण्य का काम का उद्रेक [भाव] भूषित ही करता है [दूषित नहीं] ।

परिवृत्ति का उदाहरण

प्रार्थना के ठुकरा दिए जाने के भय से लौटते हुए नायक के प्रति किसी मानवती नायिका की सखी द्वारा प्रस्तुत यह उक्ति है—

जिससे तुम विवाह करने जा रहे हो अवश्य ही तुम उसे निरन्तर स्मरण करते हो, क्योंकि अनायास ही तुम्हारे मुख से उसके विषय में वचन निकल पड़ते हैं और

परा । यां त्वं वोढा परिणेता । अदोऽलं निःसंदेहं स्मरसि ध्यायसि । कीदृशस्त्वम् । कुरुतेनोपलक्षितः । कुत्सितं रुतं कुरुतं तेन । यत्पुरुषस्य धैर्यच्युतिप्रकाशकमत एव तत्स्मरणपरिज्ञानम् । ननु यदि सा मानिनी तत्किमनुनयार्थं त्वं प्रेषितेत्याह—यस्मादुदारतासौ औचित्यमिदम् । रमणीयतायां रमणीयत्वे । यत्स्मरस्यदः कामोद्रेकोऽलंकुरुते भूषयति । अनवोढां प्रगल्भां नायिकाम् ।।

अथ युग्मकम्—

विनायमेनो नयताऽसुखादिना विना यमेनोनयता सुखादिना ।
महाजनोऽदीयत मानसादरं महाजनोदी यतमानसादरम् ।।१५।।

विनेति । कश्चित्कंचिदाह—अयं महाजनः सत्पुरुषलोकः । एनोऽपराधं विना । अनपराध इत्यर्थः । अदीयत खण्ड्यते स्म । केन । यमेन । किं कुर्वता यमेन । नयता-

---

वह भी तुम्हें सच्चे हृदय से प्रेम करती है तथा तुमसे मिलने के लिए प्रयत्नशील रहती है । [रहा उसका मान करना] वह भी उचित ही है, क्योंकि प्रगल्भ नायिका के लावण्य को काम का उद्रेक-भाव भूषित ही करता है, (दूषित नहीं) ।१४।

संस्कृत पद्य में प्रथम पाद की आवृत्ति चतुर्थ पाद में की गयी है (आवृत्ति-यमक), और द्वितीय पाद की तृतीय पाद में की गयी है (गर्भ यमक) । अतः यहाँ इन दोनों यमकों के प्रयोग के कारण 'परिवृत्ति' यमक है ।

युग्मक का उदाहरण

अन्वय—नयता असुखादिना ऊनयता सुखादिना यमेन अयं मानसात् महाजनोदी महाजनः एनः विना अरं यतमान सादरं [च] अदीयत ।

शब्दार्थ

नयता—अपने पास बुलाकर, असुखादिना—प्राणों का भक्षण करनेवाले, ऊनयता—[श्रेष्ठ पुरुष को मारकर] जनसंख्या कम करने वाले, सुखादिना—सुख-समृद्धि के विनाशक, अथवा-सुखादिना ऊनयता—सुख-समृद्धि के विरहित करने वाले, यमेन—यमराज ने, एनः विना—अपराध के बिना, अयं महाजनः—इस सत्पुरुष का अरं—शीघ्र, यतमान-सादरं [प्राण रक्षार्थ] प्रयत्नशील बन्धुओं को खेद पहुँचाते हुए अर्थात् उनके यत्न को निष्फल बनाते हुए, [यमराज ने] अदीयत—वध कर दिया, जो [सत्पुरुष] बिना यमराज के आगे पुरुषार्थहीन हो गया था, मानसात्—[शत्रुओं का] मानमर्दन करने वाला था, [और] महाजनोदी—सुख में बाधा डालने वाले दुष्टों का नियामक था ।

कोई किसी से कहता है कि—

अपने पास बुलाकर, प्राणों का भक्षण करने वाले श्रेष्ठ पुरुष को मारकर जन-संख्या कम करने वाले, सुख-समृद्धि के विनाशक अथवा सुख-समृद्धि से विरहित करने

त्मसमीपं प्रापयता । तथाऽसुखादिना प्राणभक्षणशीलेन । ऊनयता महाजनमूनीकुर्वता । सुखादिना सौख्यभक्षकेण । अथवा सुखादिनार्थेन न्यूनयता । कीदृशो महाजनः । विना विगता नरो यस्मात् । यमं प्रति पुरुषकारविफलत्वाद्विपुरुष इत्यर्थः । बहुलत्वात्को न भवति । यद्वा विनष्टो ना पुरुषो विना । पुनः महाजनः कीदृशः । मानसान्मानमहंकारं सादयतीति मानसाद्रिपूणाम् । यदि वा मानसाच्चित्तात्सकाशात्सुखादिना । तथा महाजनोदी महमुत्सवमजन्ति क्षिपन्ति महाजा दुर्जनास्तान्नुदति प्रेरयतीति महाजनोदी । कथमदीयत । अरं शीघ्रम् । तथा यतमानसादरं यतमानानां मरणप्रतिक्रियाव्यापृतानां सादं खेदं राति ददातीति च क्रियाविशेषणम् ॥

एतानि नव यमकानि समस्तपादस्योक्तानि । अधुना समस्तपादयोः समस्तपादानां चाह—

अर्धं पुनरावृत्तं जनयति यमकं समुद्गकं नाम ।
श्लोकस्तु महायमकं तदेवमेकादशैतानि ॥ १६ ॥

अर्धमिति । प्रथममर्धं पुनरावृत्तं भूय उच्चरितं समुद्गकाख्यं यमकं जनयति करोति । नामशब्दः संस्थाननिषेधसूचनार्थः । तेन चित्रमध्येऽस्य नान्तर्भावः । अर्धद्वय-

---

वाले, यमराज ने अपराध के बिना इस सत्पुरुष का [प्राण-रक्षार्थ] प्रयत्नशील बन्धुओं को खेद पहुँचाते हुए अर्थात् उनके यत्न को निष्फल करते हुए शीघ्र वध कर दिया । वह सत्पुरुष यमराज के आगे पुरुषार्थहीन हो गया था, शत्रुओं का मानमर्दन करने वाला था और सुख में बाधा डालने वाले दुष्टों का नियामक था ।१५।

संस्कृत पद्य में प्रथम पाद की आवृत्ति द्वितीय में की गयी है (मुख यमक), और तृतीय पाद की आवृत्ति चतुर्थ में । अतः यहाँ 'युग्मक' यमक है ।

इस प्रकार पादावृत्ति यमक के ९ भेद हुए ।

अर्द्धावृत्ति : समुद्गक तथा श्लोकवृत्ति महायमक

पाद का अर्द्ध भाग आवृत्त होने पर 'समुद्गमक' नामक यमक कहाता है । किसी पूरे श्लोक (पद्य) की आवृत्ति को महायमक कहते हैं ।

इस प्रकार यमक के ये (९+२=) ११ भेद हुए ।१६।

समुद्गक का उदाहरण

अन्वय—मही, न च अरित्रमुत्, न नामलः लोकः आनवेन आरधीरं अकोविदमानवेनं अहीनचारित्रं उदारधीरं विदं ननाम ।

शब्दार्थ

मही—सुप्रसन्न, न च अरित्रमुत्—शत्रु की प्राणरणा में जिन्हें प्रसन्नता नहीं होती, ऐसे, न नामलः—शुद्ध स्वभाव, लोकः—लोगों ने, आनवेन—स्तुति से, विदं—

सारूप्येण च समुद्गकसादृश्यम् । श्लोकः श्लोकान्तरे यमकितो महायमकं जनयति । तुः पुनरर्थे । श्लोक इत्येकवचनं द्वयोस्त्र्यादीनां च यमकत्वनिवृत्त्यर्थम् । यथालक्ष्येष्वदर्शनात् । एवं मुखादारभ्य महायमकान्तान्येकादशैतानि समस्तपादयमकानि भवन्ति ।।

तत्र समुद्गकम्—

ननाम लोको विदमानवेन मही न चारित्रमुदारधीरम् ।
न नामलोऽकोविदमानवेनमहीनचारित्रमुदारधीरम् ।।१७।।

ननामेति । लोको जनो विदं पण्डितं ननाम प्रणतः । केन । आनवेन स्तुत्या । कीदृशः । महा उत्सवाः सन्त्यस्येति मही तथारीन्रिपूंस्त्रायतेऽरित्रा मुत्प्रमोदो यस्य स तथाभूतो न च नैव । विदं कीदृशम् । अरीणां समूह आरं तस्य धीर्बुद्धिस्तामीरयतीति तं तथाविधम् । लोकस्तु न नामलः, अपि त्वमलो निर्मल एव । विदं पुनः कीदृशम् । अकोविदा मूर्खास्तेषां मानमहंकारं वान्ति गन्धयन्ति नाशयन्तीत्यकोविदमानवास्तेषा-

---

उस विद्वान् पुरुष को, ननाम—नमस्कार किया, [जो] आरधीरं—शत्रुओं की बुद्धि को कुण्ठित करने वाला है, अकोविदमानवेनं—मूर्ख लोगों के अहंकार का नाश करने वालों में अग्रणी है, अहीनचारित्रम्—जिसका चरित्र अखण्डित है, [तथा] उदारधीरम्—जो उदारता एवं धैर्य से भूषित है ।

सुप्रसन्न तथा शत्रु की प्राणरक्षा में प्रसन्न न होने वाले शुद्ध स्वभाव लोगों ने स्तुति से उस विद्वान् पुरुष को नमस्कार किया, जो शत्रुओं की बुद्धि को कुण्ठित करने वाला है और मूर्ख लोगों के अहंकार का नाश करने वालों में अग्रणी है, जिसका चरित्र अखण्डित है तथा जो उदारता एवं धैर्य से भूषित है ।१७।

संस्कृत पद्य में प्रथम श्लोकार्ध की आवृत्ति द्वितीय श्लोकार्ध में की गई है । अतः यहाँ 'समुद्गक' नामक यमक है ।

महायमक का उदाहरण

अन्वय—स तु अलसं अवान् (तथा) अस्थितः (वित्) आरं भरतः अवश्यं अबलं विततारवं सर्वदा रणम् आनैषीत । [तथा] सत्त्वारम्भरतः सर्वदारणमानैषी दवानलसमस्थितः (स वित्) वश्यं अवलम्बिततारवं [आरम्] ।

शब्दार्थ

स तु [वित्]—वह रणपंडित, अलसं अवान्—निष्क्रिय अथवा कायर शत्रुओं के पास जाने वाला नहीं है, [तथा] अस्थितः—शत्रुओं की अस्थियों को चूर्ण करने वाला है, [उसने] आरं—शत्रुसमूह को, सदा—हमेशा, भरतः—अपने पराक्रम से, समरम्—युद्ध में, अवश्यं—निश्चय ही, अबलम्—बलहीन, विततारवं [भयजनित]—क्रन्दन के शब्द से दिशाओं को गुँजाने वाला, आनैषीत्—बना दिया है ।

मिनः स्वामी तम् । तथाहीनचारित्रमखण्डशीलम् । उदारो विपुलाशयो धीरो धैर्योपेतः । उदारं च धीरं चेति ।

अथ महायमकं श्लोकद्वयेनाह—

स त्वारं भरतोऽवश्यमबलं विततारवम् ।
सर्वदा रणमानैषीदवानलसमस्थितः ॥ १८ ॥
सत्त्वारम्भरतो वश्यमवलम्बिततारवम् ।
सर्वदारणमानैषी दवानलसमस्थितः ॥ १९ ॥

स इति । सत्त्वेति । स पूर्वप्रक्रान्तो वित् । तुशब्दः क्रियान्तरोपन्यासार्थः । आरमरिसमूहम्, भरतो भरेण, अवश्यं निश्चितम्, अबलं बलरहितम्, विततारवं कृतभयार्तिविस्तीर्णनिःस्वनम्, सर्वदा सदा, रणं समरम्, आनैषीदानीतवान् । कीदृशोऽसौ । अवानगच्छन् । कम् । अलसं निष्क्रियं जनम् । तथास्थितोऽस्थीनि शत्रूणां तस्यति क्षयं नयतीत्यस्थित इति । तथा सत्त्वेनावष्टम्भेनारम्भा ये तेषु रतः सक्तः । कीदृशमारम् । वश्यं वशगतमथवावश्यमनायत्तम्, अवलम्बिततारवं समाश्रिततरुसमूहम् । वित्कीदृशः । सर्वदारणमानैषी सर्वेषां यद्दारणं विनाशनं तेन मानमिच्छतीति कृत्वा, अत

इन्हीं शब्दों के श्लेष से उस 'रणपंडित और 'शत्रुसमूह' के अन्य विशेषण इस प्रकार बन जाते हैं—

[वह रणपण्डित] सत्त्वारम्भरतः—पराक्रम के कार्यों में उत्साह रखने वाला, सर्वदारणमानैषी—सभी [शत्रुओं] के विनाश कर देने के मान का इच्छुक [अतएव] दवानल समस्थितः—दवाग्नि के सदृश प्रचण्ड है ।

[वह शत्रुसमूह] अवश्यम् (उस रणकुशल के वश में है) [अथवा अवश्यम्= स्वाधीन है], अवलम्बिततारवम् [वनों में] (वृक्षों का आश्रय लेने वाला है) ।

प्रथम अर्थ—वह रणपंडित निष्क्रिय अथवा कायर शत्रुओं के पास जाने वाला नहीं है तथा शत्रुओं की अस्थियों को पूर्ण करने वाला है । उसने शत्रुसमूह को हमेशा अपने पराक्रम से युद्ध में निश्चय ही बलहीन तथा [भयजनित] क्रन्दन के शब्द से दिशाओं को गूँजाने वाला बना दिया है ।

द्वितीय अर्थ—वह रणपंडित पराक्रम के कार्यों में उत्साह रखने वाला [सभी शत्रुओं के] विनाश कर देने के मान का इच्छुक है, [अतएव] वह दावाग्नि के सदृश प्रचण्ड है । [वह शत्रु-समूह] उस रणकुशल के वश में है, अथवा स्वाधीन है, एवं वनों में वृक्षों का आश्रय लेने वाला है ।१८-१९।

संस्कृत के दोनों पद्यों में से प्रथम पद्य की आवृत्ति द्वितीय पद्य में की गयी है । अतः यहाँ 'महायमक' है ।

एव दवानलेन दवाग्निना समं तुल्यं स्थितं स्थितिर्यस्येति । शब्दश्लेषस्यास्य च महायमकस्यायं विशेषः । तत्रैकेनैव प्रयत्नेन वाक्यद्वयमुच्चार्यते, इह तु द्वाभ्याम् ।

एवं समस्तपादजं यमकमाख्यायेदानीमेकदेशजमाह—

पादं द्विधा त्रिधा वा विभज्य तत्रैकदेशजं कुर्यात् ।
आवर्तयेत्तमंशं तत्रान्यत्रापि वा भूयः ॥ २० ॥

पादमिति । यच्छन्दोऽर्धादिभागं ददाति तस्य पादं द्विधा त्रिधा वा विभज्य द्विखण्डं त्रिखण्डं वा कृत्वा तत्र विभक्तेंऽश एकदेशजं यमकं कुर्यात् । कथमित्याह—आवर्तयेद्यमकयेत्तमंशं विभक्तं भागम् । तत्रैवांशे प्रथमार्धानि प्रथमार्धेषु द्वितीयार्धानि द्वितीयार्धेष्वित्यादिक्रमेण । अन्यत्र वाप्यंशान्तरैर्भूयः प्रभूतमावर्तयेत् । अंशान्तरावृत्तौ बहवो भेदा भवन्तीत्यर्थः । अपिशब्दः समुच्चये ॥

तत्रैवावृत्त्या ये भेदाः संभवन्ति तानाह—

आद्यर्धान्यन्योन्यं पादावृत्ति क्रमेण जनयन्ति ।
दश यमकान्यपरस्मिन्परिवृत्त्या तद्वदन्यानि ॥ २१ ॥

आद्यर्धानीति । श्लोकपादचतुष्टयस्य प्रथमार्धान्यपरस्मिन्पादेऽन्योन्यं परस्परं पादावृत्तिक्रमेण समस्तपादद्वययमकवद्दश यमकानि जनयन्ति । तद्वत्तथैव चान्यान्यपि दश जनयन्ति । तानि च मुखसंदंशावृत्तिगर्भसंदष्टकपुच्छपंक्तिपरिवृत्तियुग्मकसमुद्गकसंज्ञानि ॥

किं पुनरेषामुदाहरणानि नोक्तानीत्याह—

एतदुदाहरणानां पादावृत्त्यैव दर्शितो मार्गः ।
इह विंशतिभेदमिदं यमकं नोदाहृतं तेन ॥ २२ ॥

एकदेशज यमक

एक पाद को दो अथवा तीन भागों में विभक्त करने के उपरान्त एक भाग 'एकदेशज' कहाता है । यदि उस अंश की आवृत्ति दूसरे स्थानों पर की जाए तो एकदेशज के बहुत से भेद सम्भव हैं ।२०।

चारों पादों के प्रथम अर्द्ध भाग की दूसरे पादों में पारस्परिक आवृत्ति [समस्त पाद यमक के उपर्युक्त दस भेदों के समान] दस भेदों को उत्पन्न करती है । इसी प्रकार अन्य एकदेशज भी पारस्परिक आवृत्ति द्वारा विभिन्न प्रकार के यमक-भेदों को उत्पन्न करते हैं ।

इन सब भेदों के उदाहरण का मार्ग उपर्युक्त पादों की आवृत्ति में दिखाया गया है । (वहाँ से ही समझ लेना चाहिए) । इसलिए यमक के इन बीस भेदों के उदाहरण प्रस्तुत नहीं किये जा रहे ।२१-२२।

मिनः स्वामी तम् । तथाहीनचारित्रमखण्डशीलम् । उदारो विपुलाशयो धीरो धैर्योपेतः । उदारं च धीरं चेति ।

अथ महायमकं श्लोकद्वयेनाह—

स त्वारं भरतोऽवश्यमबलं वितताखम् ।
सर्वदा रणमानैषीदवानलसमस्थितः ।। १८ ।।
सत्त्वारम्भरतो वश्यमवलम्बिततारवम् ।
सर्वदारणमानैषी दवानलसमस्थितः ।। १६ ।।

स इति । सत्त्वेति । स पूर्वप्रक्रान्तो वित् । तुशब्दः क्रियान्तरोपन्यासार्थः । आरमरिसमूहम्, भरतो भरेण, अवश्यं निश्चितम्, अबलं बलरहितम्, वितताखं कृतभयार्तिविस्तीर्णनिःस्वनम्, सर्वदा सदा, रणं समरम्, आनैषीदानीतवान् । कीदृशोऽसौ । अवानगच्छन् । कम् । अलसं निष्क्रियं जनम् । तथास्थितोऽस्थीनि शत्रूणां तस्यति क्षयं नयतीत्यस्थित इति । तथा सत्त्वेनावष्टम्भेनारम्भा ये तेषु रतः सक्तः । कीदृशमारम् । वश्यं वशगतमथवावश्यमनायत्तम्, अवलम्बिततारवं समाश्रिततरुसमूहम् । वित्कीदृशः । सर्वदारणमानैषी सर्वेषां यद्दारणं विनाशनं तेन मानमिच्छतीति कृत्वा, अत

इन्हीं शब्दों के श्लेष से उस 'रणपंडित और 'शत्रुसमूह' के अन्य विशेषण इस प्रकार बन जाते हैं—

[वह रणपण्डित] सत्त्वारम्भरतः—पराक्रम के कार्यों में उत्साह रखने वाला, सर्वदारणमानैषी—सभी [शत्रुओं] के विनाश कर देने के मान का इच्छुक [अतएव] दवानल समस्थितः—दवाग्नि के सदृश प्रचण्ड है ।

[वह शत्रुसमूह] अवश्यम् (उस रणकुशल के वश में है) [अथवा अवश्यम्= स्वाधीन है], अवलम्बिततारवम् [वनों में] (वृक्षों का आश्रय लेने वाला है) ।

प्रथम अर्थ—वह रणपंडित निष्क्रिय अथवा कायर शत्रुओं के पास जाने वाला नहीं है तथा शत्रुओं की अस्थियों को पूर्ण करने वाला है । उसने शत्रुसमूह को हमेशा अपने पराक्रम से युद्ध में निश्चय ही बलहीन तथा [भयजनित] क्रन्दन के शब्द से दिशाओं को गूँजाने वाला बना दिया है ।

द्वितीय अर्थ—वह रणपंडित पराक्रम के कार्यों में उत्साह रखने वाला [सभी शत्रुओं के] विनाश कर देने के मान का इच्छुक है, [अतएव] वह दावाग्नि के सदृश प्रचण्ड है । [वह शत्रु-समूह] उस रणकुशल के वश में है, अथवा स्वाधीन है, एवं वनों में वृक्षों का आश्रय लेने वाला है ।१८-१६।

संस्कृत के दोनों पद्यों में से प्रथम पद्य की आवृत्ति द्वितीय पद्य में की गयी है । अतः यहाँ 'महायमक' है ।

एव दवानलेन दवाग्निना समं तुल्यं स्थितं स्थितिर्यस्येति । शब्दश्लेषस्यास्य च महायमकस्यायं विशेषः । तत्रैकेनैव प्रयत्नेन वाक्यद्वयमुच्चार्यते, इह तु द्वाभ्याम् ।

एवं समस्तपादजं यमकमाख्यायेदानीमेकदेशजमाह—

पादं द्विधा त्रिधा वा विभज्य तत्रैकदेशजं कुर्यात् ।
आवर्तयेत्तमंशं तत्रान्यत्रापि वा भूयः ॥ २० ॥

पादमिति । यच्छन्दोऽर्धादिभागं ददाति तस्य पादं द्विधा त्रिधा वा विभज्य द्विखण्डं त्रिखण्डं वा कृत्वा तत्र विभक्तेंऽश एकदेशजं यमकं कुर्यात् । कथमित्याह—आवर्तयेद्यमकयेत्तमंशं विभक्तं भागम् । तत्रैवांशे प्रथमार्धानि प्रथमार्धेषु द्वितीयार्धानि द्वितीयार्धेष्वित्यादिक्रमेण । अन्यत्र वाप्यंशान्तरैर्भूयः प्रभूतमावर्तयेत् । अंशान्तरावृत्तौ बहवो भेदा भवन्तीत्यर्थः । अपिशब्दः समुच्चये ॥

तत्रैवावृत्त्या ये भेदाः संभवन्ति तानाह—

आद्यर्धान्यन्योन्यं पादावृत्ति क्रमेण जनयन्ति ।
दश यमकान्यपरस्मिन्परिवृत्त्या तद्वदन्यानि ॥ २१ ॥

आद्यर्धानीति । श्लोकपादचतुष्टयस्य प्रथमार्धान्यपरस्मिन्पादेऽन्योन्यं परस्परं पादावृत्तिक्रमेण समस्तपादद्वययमकवद्दश यमकानि जनयन्ति । तद्वत्तथैव चान्यान्यपि दश जनयन्ति । तानि च मुखसंदंशावृत्तिगर्भसंदष्टकपुच्छपंक्तिपरिवृत्तियुग्मकसमुद्गकसंज्ञानि ॥

किं पुनरेषामुदाहरणानि नोक्तानीत्याह—

एतदुदाहरणानां पादावृत्त्यैव दर्शितो मार्गः ।
इह विंशतिभेदमिदं यमकं नोदाहृतं तेन ॥ २२ ॥

एकदेशज यमक

एक पाद को दो अथवा तीन भागों में विभक्त करने के उपरान्त एक भाग 'एकदेशज' कहाता है । यदि उस अंश की आवृत्ति दूसरे स्थानों पर की जाए तो एकदेशज के बहुत से भेद सम्भव हैं ।२०।

चारों पादों के प्रथम अर्द्ध भाग की दूसरे पादों में पारस्परिक आवृत्ति [समस्त पाद यमक के उपर्युक्त दस भेदों के समान] दस भेदों को उत्पन्न करती है । इसी प्रकार अन्य एकदेशज भी पारस्परिक आवृत्ति द्वारा विभिन्न प्रकार के यमक-भेदों को उत्पन्न करते हैं ।

इन सब भेदों के उदाहरण का मार्ग उपर्युक्त पादों की आवृत्ति में दिखाया गया है । (वहाँ से ही समझ लेना चाहिए) । इसलिए यमक के इन बीस भेदों के उदाहरण प्रस्तुत नहीं किये जा रहे ।२१-२२।

एतदिति । समस्तपादावृत्तियमकोदाहरणैरेव पूर्वोक्तैरेतदुदाहरणानां दिक्प्रदर्शनं कृतमितीह विंशतिभेदं यमकं नोदाहृतमिति । यद्यपि चोभयत्राप्यत्रैकादशोऽपि भेदः संभवति । यथा यादृशानि प्रथमश्लोक आद्यन्तानि चार्धानि कृतानि तादृशान्येव तानि श्लोकान्तरे क्रियन्त इति कृत्वा तथापि महाकवीनां न क्वचिदेवंविधं लक्ष्यं दृश्यत इति दशैव भेदा उक्ताः ।।

इदानीमन्यत्र देश आवृत्त्या तानाह—

प्रथमतृतीयान्त्यार्धे तदनन्तरभागयोः परावृत्ते ।
अन्तादिकमिति यमकं व्यस्तसमस्ते त्रिधा कुरुतः ।।२३।।

प्रथमेति । प्रथमपादान्त्यार्धं द्वितीयपादाद्यर्धे तृतीयपादान्त्यार्धं च चतुर्थपादाद्यर्धे परावृत्तं प्रत्येकं युगपच्चेत्यन्तादिकं नाम त्रिविधं यमकमन्ताद्योर्यमकनाद्भवतीति ।।

तत्रोदाहरणानि—

नारीणामलसं नाभि लसन्नाभि कदम्बकम् ।
परमास्त्रमनङ्गस्य कस्य नो रमयेन्मनः ।।२४।।

नारीणामिति । नारीणां कदम्बकं स्त्रैणं कस्य मनश्चित्तं नो रमयेत्प्रीणयेत् । कीदृशम् । अलसं मन्थरगमनम् । तथा नाभि अबलात्वात्सभयम् । तथा लसन्ती मनोज्ञा नाभिर्यस्य तत्तथा । तथा परमास्त्रं प्रकृष्टायुधमनङ्गस्य ।।

प्रथम पाद के अन्तिम अर्द्धभाग की आवृत्ति द्वितीय पाद के प्रथमार्द्ध में, तथा तृतीय पाद के अन्तिम अर्द्धभाग की आवृत्ति चतुर्थ पाद के प्रथमार्द्ध में करना अन्तादिक यमक कहाता है । इसके दो भेद हैं—व्यस्त और समस्त । [व्यस्त उसे कहते हैं जहाँ उक्त दोनों रूपों में से केवल कोई एक रूप हो । इस प्रकार व्यस्त के दो भेद हुए । 'समस्त ' उसे कहते हैं जहाँ दोनों रूप एक साथ हों ।] इस प्रकार ये कुल तीन भेद हुए ।२३।

अन्वय—अलसं, नाभि (न-अ-भि), लसन्नाभि, अनङ्गस्य परमास्त्रं नारीणां कदम्बकम् कस्य मनः नो रमयेत् ।

मन्द गति से चलने वाली, भीरु स्वभाव वाली, सुन्दर नाभि धारण करने वाली तथा कामदेव का अमोघ अस्त्र ये नारियाँ किसके मन को हरण नहीं कर लेतीं ।२४।

इस पद्य में प्रथम पाद का अन्त्यार्द्ध द्वितीय पाद के आद्यार्द्ध में आवृत्त हुआ है । अतः यहाँ प्रथम 'व्यस्त' अन्तादिक यमक है ।

अन्वय—पथिकाः काम-शिखि-धूम-शिखामिव पद्मालय-अलीनां, लय-आलीनां, इमां महा-आवलीं पश्यन्ति ।

द्वितीयोदाहरणमाह—

पश्यन्ति पथिकाः कामशिखिधूमशिखामिव ।
इमां पद्मालयालीनां लयालीनां महाबलीम् ॥२५॥

पश्यन्तीति । पद्मान्यालयो येषां ते च तेऽलयश्च भ्रमराश्च तेषां महावलीं दीर्घश्रेणीमिमां पथिकाः पान्थाः पश्यन्ति । कीदृशीम् । लयेनान्योन्यश्लेषेणालीनां संबद्धाम् । कामशिखिधूमशिखामिव स्मरानलधूमलेखामिव । इति व्यस्तोदाहरणे ॥

समस्तोदाहरणमाह—

पुष्यन्विलासं नारीणां सन्नारीणां कुलक्षयम् ।
आ कल्पं वसुधासार सुधासार जगज्जय ॥२६॥

पुष्यन्निति । हे वसुधासार भूप्रधान नृप, आ कल्पं युगान्तं यावज्जगद्भुवनं जय । कीदृश । सुधासार अमृतवेगवर्ष । किं कुर्वन् । पुष्यन्पुष्टिं नयन् । कम् विलासम् । कासाम् । नारीणाम् । तथा सन्नानामवसादं गतानामरीणां रिपूणां कुलक्षयमन्वायान्तं पुष्यन् । अन्तर्भावितकारितार्थोऽत्र पुषिः सकर्मकः ॥

भेदान्तराण्याह—

द्वैतीयमन्यमर्धं परिवृत्तमनन्तरे भवेन्मध्यम्
मध्यसमस्तान्तादिकयोगादपि जायते वंशः ॥२७॥

प्रवासी लोग कमलों के कोष में रहने वाले भ्रमरों की परस्पर सम्बद्ध दीर्घ पंक्ति को कामाग्नि की धूमशिखा समझते हैं ।२५।

इस पद्य में तृतीय पाद का अन्त्यार्द्ध चतुर्थ पाद के आद्यार्द्ध में आवृत्त हुआ है। अतः यहाँ द्वितीय व्यस्त अन्तादिक यमक है ।

अन्वय—वसुधासार ! सुधासार ! (त्वम्) नारीणां विलासं पुष्यन् (तथा) सन्न-अरीणां कुलक्षयं (पुष्यन्) आकल्पं जगत् जय ।

हे भूमण्डल के रत्नरूप अमृतवर्षी राजन् ! आप नारियों को विलास-सुख प्रदान करते हुए तथा विषादग्रस्त शत्रुओं को समूल नष्ट करते हुए जगज्जयी बनो ।२६।

इस पद्य में प्रथम पाद का अन्त्यार्द्ध ('सं नारीणां') द्वितीय पाद के आद्यार्द्ध में तथा तृतीय पाद का अन्त्यार्द्ध ('सुधासार') चतुर्थ पाद के आद्यार्द्ध में आवृत्त हुआ है । अतः यहाँ समस्त अन्तादिक यमक है ।

द्वितीय पाद के अन्तिम अर्द्धभाग की आवृत्ति तृतीय पाद के अर्द्धभाग में होने पर मध्य यमक माना जाता है ।

मध्य और समस्त नामक अन्तादिक के योग का नाम वंश यमक है ।२७।

द्वैतीयमिति। द्वितीयपादस्यान्त्यार्धं तृतीयपादाद्यर्धे परिवृत्तं मध्याख्यं यमकं जनयति। एतस्य मध्यस्य पूर्वोक्तसमस्तान्तादिकस्य योगे वंशो नाम यमकम्। समस्तग्रहणं व्यस्तान्तादिकनिवृत्त्यर्थम्। तन्निवृत्तिस्तु लक्ष्यदर्शनात्, न त्वसंभवात्। एवमन्यत्रापि द्रष्टव्यम्। अपिः समुच्चये॥

तत्रोदाहरणमाह—

समस्तभुवनव्यापियशसस्तरसेहते।
रसेहते प्रियं कर्तुं प्राणैरपि महीपते॥२८॥

समस्तेति। हे महीपते भूपते, तवेहात्र रसा पृथ्वी प्राणैरपि। आस्तां धनादिभिः। प्रियं हितं कर्तुमीहते चेष्टते। तरसा झगिति। कीदृशस्य ते। समस्तभुवनव्यापियशसः सकलजगद्व्यापिश्लोकस्य। इति मध्यः॥

अथ वंशः—

ग्रीष्मेण महिमानीतो हिमानीतोयशोभितः।
यशोऽभितः पर्वतस्य पर्व तस्य हि तन्महत्॥२९॥

ग्रीष्मेणेति। ग्रीष्मेण निदाघेन पर्वतस्य शैलस्य महिमा माहात्म्यमानीतः। कीदृशः। महद्धिमं हिमानी ततः स्रुतेन तोयेनाम्बुना शोभितो राजितः। हि यस्मात्तस्य पर्वतस्य तद्धिमानीतोयमभितः समन्ताद्यशो वर्तते। तथा पर्व महोत्सवश्च महन्महाप्रमाणम्॥

अन्वय—महीपते! इह रसा समस्तभुवनव्यापियशसः ते प्रियं प्राणैरपि कर्तुं तरसा ईहते।

हे राजन्! आपका यश समस्त संसार में व्याप्त है। यह पृथ्वी अपने प्राणों से भी आपके अभीष्ट सम्पादन के अिए आतुर है।२८।

इस पद्य में द्वितीय पाद का अन्त्यार्द्ध ('रसेहते') तृतीय पाद के आद्यार्द्ध में आवृत्त होने से मध्य अन्तादिक यमक है।

अन्वय—ग्रीष्मेण हिमानी-तोय-शोभितः पर्वतस्य महिमा आनीतः। हि तस्य (पर्वतस्य) अभितः यशः पर्व (च) महत् (प्रमाणम्)

ग्रीष्म ऋतु पर्वत-जैसी विशिष्टता धारण कर रही है, क्योंकि यह बर्फ के बहते हुए पानी से शोभित है और प्रसन्नता का कारण है, इधर बहते हुए निर्झर उसका यश हैं और वह पर्वों (पेरवों) से युक्त है।२९।

इस पद्य में प्रथम पाद का अन्त्यार्द्ध ('हिमानीतो') द्वितीय पाद के आद्यार्द्ध में, द्वितीय पाद का अन्त्यार्द्ध ('यशोभितः') तृतीय पाद के आद्यार्द्ध में और तृतीय

पुनर्भेदमाह—

आवृत्तं प्रथमादौ द्वितीयमर्धं चतुर्थपादस्य ।
वंशश्च चक्रकाख्यं षष्ठं चान्तादिकं यमकम् ॥३०॥

आवृत्तमिति । चतुर्थपादद्वितीयार्धं प्रथमपादाद्यर्धेन सहावृत्तं पूर्वोक्तवंशश्चेति यमकयोगे चक्रकं नाम यमकम् । षष्ठोऽन्तादिकभेदः । एकश्चकारो वंशकसमुच्चये द्वितीयश्च चक्रस्यान्तादिकमध्ये समुच्चयार्थः ॥

सभाजनं समानीय स मानी यः स्फुटन्नपि ।
स्फुटं न पिहितं चक्रे हितं चक्रे सभाजनम् ॥३१॥

सभाजनमिति । स एव मानी मनस्वी यश्चक्रे राष्ट्रे हितं चक्रेऽनुकूलं चकार । किं कृत्वा । सभाजनं सभालोकं समानीय सम्यगात्मसमीपं प्रापय्य । सभ्यानां विदितं कृत्वेत्यर्थः । कथं हितं चक्रे । पिहितं गुप्तम्, न स्फुटं प्रकटम् । अविकत्थनात् । किं कुर्वन्नपि । स्फुटन्नपि पीडितोऽपि । कीदृशं सभाजनम् । सभाजनं प्रीतिदर्शनम् । लक्षणं सर्वत्र स्वधिया योज्यम् । अत्र च सप्तमोऽप्येष भेदः संभवति । यत्र केवलमेव प्रथमाद्यर्द्धे चतुर्थान्त्यार्धमावर्त्यते स तु पूर्वकविलक्ष्येषु दृश्यमानोऽपि कथमपि नोक्तः ॥

पाद का अन्त्यार्द्ध ('पर्वतस्य') चतुर्थ पाद के आद्यार्द्ध में आवृत्त है । अतः यहाँ वंश अन्तादिक यमक है ।

चतुर्थ पाद का द्वितीय अर्द्धभाग प्रथम पाद के आदि में आवृत्त हो तथा साथ ही उक्त 'वंश' यमक का योग भी हो, वहाँ 'चक्रक' नामक यमक माना जाता है । इस प्रकार अन्तादिक यमक छः प्रकार का हुआ [दो प्रकार का व्यस्त, एक समस्त, एक मध्य, एक वंश और एक चक्रक ।] ।३०।

अन्वय—स एव मानी यः स्फुटन्नपि सभाजनं, सभा-जनं समानीय चक्रे पिहितं, न स्फुटं हितं चक्रे ।

इस पद्य में प्रथम पाद का अन्त्यार्द्ध ('समानीय') द्वितीय पाद के आद्यार्द्ध में, द्वितीय पाद का अन्त्यार्द्ध ('स्फुटन्न') तृतीय पाद के आद्यार्द्ध में, और तृतीय पाद का अन्त्यार्द्ध (हितं चक्रे) चतुर्थ पाद के आद्यार्द्ध में आवृत्त हुआ है । [यहाँ तक 'वंश' यमक हुआ ।] इसके अतिरिक्त इस पद्य में चतुर्थ का अन्त्यार्द्ध (सभाजनम्) प्रथमपाद के आद्यार्द्ध में आवृत्त हुआ है । अतः इस पद्य में 'चक्रक' नामक अन्तादिक यमक है ।

[नमिसाधु के अनुसार उक्त छः भेदों के अतिरिक्त 'अन्तादिक' यमक का सातवाँ भेद भी सम्भव है और जिसके उदाहरण भी पूर्व कवियों के काव्यों में मिल जाते हैं, किन्तु रुद्रट द्वारा यहाँ उसका उल्लेख नहीं किया गया । वह इस प्रकार है— जहाँ केवल चतुर्थ पाद के अन्त्यार्द्ध की प्रथम पाद के आद्यार्द्ध में आवृत्ति हो ।]

अथाद्यन्तकभेदानाह—

प्रथमादिप्रथमार्धैः परिवृत्तान्यत्र सार्धमर्धानि ।
अन्त्यान्यनन्तराणां जनयन्त्याद्यन्तकं नाम ॥ ३२ ॥

प्रथमादीति । प्रथमद्वितीयतृतीयपादप्रथमार्धैः सार्धमनन्तराणां द्वितीयतृतीयचतुर्थ-पादानामन्त्यार्धानि परिवृत्तानि यमकितानि सन्त्याद्यन्तकसंज्ञकं यमकं जनयन्ति ॥

किमेकभेदमेवेदम् । नेत्याह—

इदमप्यन्तादिकवत्क्रमेण षोढैव भिद्यते भूयः ।
अस्योदाहरणानां तेनैव च दर्शितो मार्गः ॥ ३३ ॥

इदमिति । न केवलमन्तादिकमिदमप्याद्यन्तकं तेनैव क्रमेण षोढा षड्भिर्भेदैर्भिद्यते । भूयः पुनः यथा प्रथमाद्यर्धे द्वितीयपादान्त्यार्धेन सह यमकिते तृतीयाद्यर्धे चतुर्थान्त्यार्धेन सह व्यस्तमाद्यन्तकं द्विधा तदुभययोगे समस्तमिति तृतीयो भेदः । द्वितीयाद्यार्धं तृतीयान्त्यार्धेन सह मध्यनामा चतुर्थः । मध्यसमस्ताद्यन्तकयोगे वंशः पञ्चमभेदः । प्रथमान्त्यार्धचतुर्थाद्यर्धसारूप्ये वंशे च युगपत्कृते चक्रकं नाम षष्ठः । पूर्ववच्च सप्तमो भेदः संभवतीति यत्र प्रथमाद्यर्धचतुर्थान्त्यभागयोः सारूप्यम् । अस्य च निदर्शनानां तेनैवान्तादिकेन मार्गो दर्शितो दिक्प्रदर्शनं कृतमिति नोदाहरणं दत्तम् ॥

भूयो भेदमाह—

प्रथमतृतीयाद्यर्धे तदनन्तरचरमयोः परावृत्ते ।
भवति समस्तान्तादिकयोगादप्यर्धपरिवृत्तिः ॥ ३४ ॥

प्रथमेति । प्रथमाद्यर्धं द्वितीयपादान्त्यार्धेन तृतीयाद्यर्धं चतुर्थान्त्यार्धेन यमकितं समस्तान्तादिकं चेत्युभययोगेऽर्धपरिवृत्तिर्नाम भवति ॥

आद्यन्तक यमक

प्रथम, द्वितीय और तृतीय पाद के प्रथमार्द्ध भाग क्रमशः द्वितीय, तृतीय और चतुर्थ पादों के अन्तिम अर्द्धभागों में आवृत्त होने पर 'आद्यन्तक' नामक यमक कहलाता है ।३२।

आद्यन्तक यमक के भेद

इस आद्यन्तक यमक के भी अन्तादिक के समान पुनः छः भेद होते हैं । इनके उदाहरण उक्त उदाहरणों के अनुरूप जान लेने चाहिए ।३३।

यमक का अन्य भेद—अर्द्धवृत्ति

प्रथम पाद का प्रथमार्द्ध द्वितीय पाद के अन्तिम भाग में तथा तृतीय पाद का प्रथमार्द्ध चतुर्थ पाद के अन्तिम भाग में आवृत्त होने के साथ-साथ यदि समस्त नामक

यथा—

ससार साकं दर्पेण कंदर्पेण ससारसा ।
शरन्नवाना बिभ्राणा नाविभ्राणा शरं नवा ।। ३५ ।।

ससारेति । कंदर्पेण कामेन साकं सार्धं दर्पेण वेगेन शरत्ससार प्रसृता । कीदृशी सा । ससारसा सह सारसैः पक्षिविशेषैर्वर्तते या सा । तथा नवानि नूतनान्यनांसि शकटानि यस्यां सा नवाना: । तथा शरं काण्डतृणविशेषं बिभ्राणा धारयमाणा । तथा भ्राणनं भ्राणः शब्दः । वीनां पक्षिणां भ्राणो विभ्राणो न विद्यते विभ्राणो यस्यां साऽविभ्राणा नैवंविधा । सपक्षिरुतेत्यर्थः । तथा नवा प्रत्यग्रा तत्कालप्रवृत्तत्वात् ।।

पुनर्भेदान्तराण्याह—

पादसमुद्गकसंज्ञं तत्रावृत्तानि कुर्वते तच्च ।
अन्तरितानन्तरितव्यस्तसमस्तेषु पादेषु ।। ३६ ।।

पादेति । चतुर्णामपि पादानां यान्यर्धानि तानि तत्रैव पादे परिवृत्तानि सन्ति पादे पादे समुद्गकसादृश्यात्पादसमुद्गकं नाम यमकं कुर्वन्ति । तच्च पादेष्वन्तरितेषु व्यवहितेष्वनन्तरितेषु च तथा व्यस्तेषु केवलेषु समस्तेषु च पादेषु बहुधा भवति । ते च बहवः

अन्तादिक का भी योग हो तो वहाँ 'अर्धपरिवृत्ति' नामक यमक स्वीकृत किया जाता है ।३४।

अन्वय—स-सारसा, नव-अना, शरं बिभ्राणा, न-अ-वि-भ्राणा, नवा शरत् कंदर्पेण साकं दर्पेण ससार ।

यह नई-नई शरद् ऋतु कामदेव को साथ लेकर बड़े गर्व से सर्वत्र व्याप्त हो रही है । इस ऋतु में सारस पक्षी यत्र-तत्र विहार करते दिखाई देते हैं । नये-नये शकट (छकड़े) चलते हैं । शर नाम की घास यत्र-तत्र उग रही है, तथा पक्षियों का मनोहर शब्द दिशाओं को मुखरित कर रहा है ।३५।

इस पद्य में (१) प्रथम पाद का आद्यर्द्ध द्वितीय पाद के अन्त्यार्द्ध में आवृत्त है, (२) तृतीय पाद का आद्यर्द्ध चतुर्थ पाद के अन्त्यार्द्ध में आवृत्त है, (३) तथा इसके अतिरिक्त यहाँ समस्त अन्तादिक यमक भी है—अर्थात् प्रथम पाद का अन्त्यार्द्ध द्वितीय पाद के आद्यर्द्ध में तथा तृतीय पाद का अन्त्यार्द्ध चतुर्थ पाद के आद्यर्द्ध में आवृत्त है । अतः यहाँ अर्द्धपरिवृत्ति नामक यमक है ।

यमक का एक अन्य भेद : पादसमुद्गक

चारों पादों के अर्द्धभाग यदि वहीं अपने-अपने पादों में ही आवृत्त किये जाते हैं तो 'पादसमुद्गक' नामक यमक माना जाता है। वह यमक अन्तरित और अनन्तरित तथा व्यस्त और समस्त पादों में होता है ।३६।

प्रकाराः पञ्चदश । कथमन्तरितं तावत्पञ्चधा । प्रथमतृतीययोर्द्वितीयेन, द्वितीयचतुर्थयोस्तृतीयेन, प्रथमतृतीयचतुर्थानां द्वितीयेन, प्रथमद्वितीयचतुर्थानां तृतीयेनान्तरणम् । इत्येकान्तरितं चतुर्भेदम् । प्रथमचतुर्थयोस्तु द्वितीयतृतीयाभ्यामिति द्व्यन्तरितमेकमेव । इत्यन्तरितं पञ्चभेदम् । अनन्तरितमपि प्रथमद्वितीययोर्युगपद्द्वितीयतृतीययोर्वा तृतीयचतुर्थयोर्वेति द्वियोगे त्रिभेदम् । त्रियोगेण तु प्रथमद्वितीयतृतीयानां द्वितीयतृतीयचतुर्थानां चेति द्विभेदम् । एवमेकत्रानन्तरितं तत्पञ्चधा । तथा व्यस्तेषु चतुर्षु पादेषु चत्वारो भेदाः, समस्तेषु त्वेक एव भेदः । इत्येवं सर्वे पञ्चदश ॥

तत्राद्येऽन्तरितभेदद्वये तथा पञ्चदशे समस्तजभेदे च दिक्प्रदर्शनायोदाहरणत्रयमाह । यथा—

मुदा सेनामुदासेनादसौ तामसमञ्जसम् ।
महीनाथमहीनाथ जयश्रीरालिलिङ्ग तम् ॥ ३७ ॥

[अन्तरित से अभिप्राय है दो अथवा तीन पादों के बीच व्यवधान' और अनन्तरित से अभिप्राय है दो पादों के बीच व्यवधान का अभाव । पाद्समुद्गक यमक के निम्नोक्त १५ प्रकार सम्भव हैं—अन्तरित के पाँच, अनन्तरित के पाँच, व्यस्त के चार और समस्त का एक ।

अन्तरित के पाँच भेद—(१) प्रथम और तृतीय पादों में समुगद्क किन्तु द्वितीय पाद में नहीं, (२) द्वितीय और चतुर्थ में समुद्गक किन्तु तृतीय पाद में नहीं, (३) प्रथम, तृतीय और चतुर्थ पादों में समुद्गक, किन्तु द्वितीय पाद में नहीं, (४) प्रथम, द्वितीय और चतुर्थ पादों में समुद्गक, किन्तु तृतीय पाद में नहीं । (५) प्रथम और चतुर्थ पादों में समुद्गक किन्तु द्वितीय और तृतीय पादों में नहीं ।

अनन्तरित के पाँच भेद—(१) प्रथम और द्वितीय पाद में समुद्गक, (२) द्वितीय और तृतीय पाद में समुद्गक, (३) तृतीय और चतुर्थ पाद में समुद्गक, (४) प्रथम, द्वितीय और तृतीय पादों में समुद्गक, (५) द्वितीय, तृतीय और चतुर्थ पादों में समुद्गक ।

व्यस्त के चार भेद—चारों पादों में से किसी एक-एक में समुद्गक ।

समस्त का एक भेद—चारों पादों में समुद्गक ।]

अन्तरित पादसमुद्गक का उदाहरण

अन्वय—असौ तां सेनां मुदा इनात् असमञ्जसम् उदास । अथ अहीना जयश्रीः तं महीनाथं आलिलिङ्ग ।

उस महीनाथ राजा ने उस (शत्रु) सेना को हर्षपूर्वक (अनायास ही) उसके स्वामी से पृथक कर दिया । अर्थात् सेनापति अथवा राजा को मारकर सेना को अनाथ

मुदेति । असौ महीनाथो राजा तां सेनां मुदा हर्षेण इनात्स्वामिनः सेनाभर्तुः सकाशादुदास चिक्षेप । वियोजितवानित्यर्थः । कथम् । असमञ्जसमितस्ततः । अथानन्तरं महीनाथमहीना संपूर्णा जयलक्ष्मीरालिलिङ्ग परिषस्वजे ॥

द्वितीयोदाहरणमाह—

यत्त्वया शात्रवं जन्ये मदायतमदायत ।
तेन त्वामनुरक्तेयं रसायत रसायत ॥ ३८ ॥

यदिति । कश्चिद्राजानमाह—यद्यस्मात्त्वया शात्रवं शत्रुगणो जन्ये रणेऽदायतालूयत तेन हेतुनेयं रसा पृथ्व्यनुरक्ता सती त्वामयतागता । 'अय गतौ' इत्यस्य रूपम् । कीदृशम् । शात्रवं मथ्नातीति मत् रिपुमथनसमर्थम् । आयतं विस्तीर्णम् । यद्वा मदेनायतम् । कीदृशी रसा । आयतरसा त्वां प्रति दीर्घाभिलाषा ॥

तृतीयोदाहरणमाह—

रसासार रसासार विदा रणविदारण ।
भवतारम्भवतारं महीयतमहीयत ॥ ३९ ॥

रसासारेति । हे रसासार भूश्रेष्ठ, तथा रसानां शृङ्गारादीनामासार वेगवर्ष-

---

कर दिया । तब सम्पूर्ण जयलक्ष्मी ने महीनाथ का आलिङ्गन किया ।३७।

इस पद्य में प्रथम और तृतीय पादों में समुद्‌गक है अर्थात् इन पादों का पूर्वार्द्ध इन्हीं पादों के उत्तरार्द्ध में आवृत्त हुआ है, तथा समुद्‌गक युक्त इन प्रथम और तृतीय पादों के बीच समुद्‌गक-रहित द्वितीय पाद का व्यवधान है । अतः यहाँ प्रथम प्रकार का अन्तरित समुद्‌गक यमक है ।

दूसरा उदाहरण

अन्वय—यत् त्वया जन्ये शात्रवं अदायत्, तेन इयं आयतरसा रसा मत् आयतं (अथवा मद-आयतं) त्वां (प्रति) अनुरक्ता (सती) अयत ।

हे राजन् ! तुमने रण-क्षेत्र में अभिमानी शत्रुओं को काट-काट कर गिराया है इसलिये यह पृथ्वी तुम पर अनुरक्त होकर बड़ी अभिलाषा से तुम्हारे पास आई है ।३८।

यहाँ द्वितीय और चतुर्थ पादों में समुद्‌गक है और इन दोनों के बीच तृतीय में नहीं है । अतः द्वितीय प्रकार का अन्तरित समुद्‌गक यमक है ।

अन्तरित पाद समुद्‌गक का उदाहरण

अन्वय—रसा-सार ! रस-आसार ! रण-विदारण ! विदा आरम्भवता भवता मही-यतम् आरं अहीयत ।

हे भूमण्डल के सार ! शृङ्गारादि रसों के उद्दाम प्रवाह रूप ! एवं युद्ध-विशारद राजन् ! उत्साही एवं कुशल आपने समस्त पृथ्वी के शत्रुओं को जीत लिया है ।३९।

तुल्य, तथा रणविदारण समरभेदक, भवता त्वया, विदा पण्डितेन, आरम्भवता सोद्योगेन, आरं शात्रवमहीयत हानिं नीतम्। जितमित्यर्थः। कीदृशम्। मह्यां पृथिव्यां यतं संबद्धम्। हर्म्यादिवियोजितत्वादिति। अन्यदेशावृत्तौ मनोहारित्वमाश्रित्यैते त्रिशद्भेदा जाताः। यथान्तादिके षट्कमाद्यन्तके षट्कमिति द्वादश संभवन्ति। सप्तमभेदाभ्यां सह चतुर्दश। पञ्चदशार्धपरिवृत्तिः तथामी पादसमुद्गकभेदाश्च पञ्चदशेति। यथेष्टं चावृत्ताव-संख्याता भेदाः संभवन्ति। ते तु नोक्ताः कविलक्ष्येष्वदर्शनादरम्यत्वाच्चेति ॥

अधुना प्रकारान्तरमाह—

आवृत्तानि तु तस्मिन्नाद्यर्धान्यर्धशो विभक्तानि।
वक्त्रं तथा शिखान्त्यान्युभयानि च जायते माला ॥४०॥

आवृत्तानीति। पादानामाद्यान्यर्धान्यर्धशः खण्डितानि तस्मिन्नेव खण्डितेऽर्धे यमकितानि वक्त्रं नाम यमकं जनयन्ति। तथान्त्यार्धान्यर्धीकृतानि तस्मिन्नेव यमकितानि शिखां जनयन्तीति। वक्त्रशिखयोश्च युगपद्योगे माला भवति।

क्रमेणैषामुदाहरणत्रयमाह—

घनाघनाभिनीलानामास्थामास्थाय शाश्वतीम्।
चलाचलापि कमले लीनालीनामिहावली ॥४१॥

घनेति। इह कमले पद्मेऽलीनां भ्रमराणामावली पङ्क्तिर्लीना श्लिष्टा। कीदृक्। चलाचलापि चञ्चलापि। कीदृशामलीनाम्। घनाघना वार्षुकमेघास्तद्वदभि-

---

प्रथम और द्वितीय पादों में समुद्गक होने के कारण, इस पद्य में प्रथम प्रकार का 'अनन्तरित समुद्गक' यमक है।

यमक के अन्य तीन भेद

पादों के प्रथम अर्द्धभाग का अर्द्धभाग अर्थात् चतुर्थांश यदि उसी प्रथम अर्द्ध-भाग में आवृत्त हो तो उसे 'वक्त्र यमक' कहते हैं। पादों के द्वितीय अर्द्धभाग का अर्द्ध-भाग अर्थात् चतुर्थांश यदि उसी द्वितीय अर्द्धभाग में आवृत्त हो तो 'शिखा यमक' कहते हैं। और यदि किसी पाद में दोनों का संयोग हो तो उसे 'माला' कहते हैं।४०।

वक्त्र यमक का उदाहरण

अन्वय—इह कमले घनाघन-अभिनीलानां अलीनां चलाचलापि आवली शाश्वतीं आस्थां आस्थाय लीना।

इस कमल में वर्षाकालिक मेघों की तरह श्यामल एवं चञ्चल भ्रमरों की पंक्ति स्थिरता के साथ लीन होकर स्थित है।४१।

चारों पादों के प्रथमार्द्ध का चतुर्थांश उन्हीं पादों के प्रथमार्द्ध में ही आवृत्त होने के कारण यहाँ वक्त्र यमक है।

नीलानां श्यामानाम् । किं कृत्वा । लीनां शाश्वतीं स्थिरामास्थां वृत्तिमास्थाय कृत्वा । वक्त्रमिदम् ।

यासां चित्ते मानोऽमानो नारीर्भूयोऽरं ता रन्ता ।
सारप्रेमा सन्नासन्ना जायेतैवानन्ता नन्ता ॥४२॥

यासामिति । सन्ना सत्पुरुषो भूयः पुनररं शीघ्रं जायेतैव भवेदेव । कीदृशः । रन्ता रमणशीलः । रमेरन्तर्भूतकारितार्थाद्रमयितेत्यर्थः । कास्ताः । नारीः । कीदृशीः । अनन्ताः प्रचुरास्तथा आसन्ना अभ्यर्णाः । यासां नारीणां चित्ते मनसि मानोऽहंकारोऽमानोऽतिबहुः । कीदृशः । सन्ना नन्ता नम्रः । सारप्रेमा स्थिरप्रीतिः । इति शिखा ।

भीताभीता सन्नासन्ना सेना सेनागत्यागत्या ।
धीराधीराह त्वा हत्वा संत्रासं त्रायस्वायस्वा ॥४३॥

भीतेति । कश्चिद्दूतो राजानमाह—हे धीर निर्भय, आधीर मनोदुःखप्रेरक, सा परकीया सेना चमूः सेना सस्वामिका त्वा भवन्तमाह ब्रूते । कीदृशी । भीता त्रस्ता, अभीता संमुखमागता, सन्ना सखेदा, आसन्ना निकटवर्तिनी, आगत्य समेत्य, अगत्या गत्यन्तराभावेन । किं तदाह—हत्वा विनाश्य, संत्रासं भयम्, त्रायस्व पालय । पुनः कीदृशी । आयस्वा आयस्त्वत्सकाशादागमनमेव स्वं धनं यस्याः । इति माला ॥

शिखा यमक का उदाहरण

अन्वय—यासां चित्ते अमानः मानः, ताः अनन्ताः, आसन्ना नारीः रन्ता, नन्ता, सारप्रेमा, सत्-ना भूयः अरं जायेत एव ।

अतिशय मानवती असंख्य तथा समीप रहनेवाली स्त्रियों से रमण करनेवाला, विनम्र तथा स्थिरप्रेम से युक्त सत्पुरुष फिर शीघ्र होना चाहिए।४२।

चारों पादों के द्वितीयार्द्ध का चतुर्थांश उन्हीं पादों के द्वितीयार्द्ध में आवृत्त होने के कारण यहाँ शिखा यमक है ।

माला यमक का उदाहरण

अन्वय—धीर ! आधी-र ! सा भीता, अभि-इता, सन्ना, आसन्ना, आय-स्वा स-इना सेना अगत्या आगत्य त्वा आह संत्रासं हत्वा त्रायस्व ।

एक दूत राजा से कहता है—हे निर्भय एवं मानसिक दुःखों के विनाशक राजन् ! शत्रु-सेना अपने स्वामी के साथ आपके पास आकर कहती है कि हमारे भय का नाश कर हमारी रक्षा करो । वह सेना खिन्न तथा भयभीत होकर आपके पास आई है, उसके पास अब और कोई चारा नहीं रहा । आपकी शरण में आना ही उसका एकमात्र धन है, अर्थात् उपाय है ।४३।

इस पद्य में वक्त्र और शिखा का योग होने के कारण माला यमक है ।

भूयोऽप्याह—

मध्यान्यर्धार्धानि तु मध्यं कुर्वन्ति तत्र परिवृत्त्या ।
आद्यन्तान्याद्यन्तं काञ्चीयमकं तथैकत्र ।।४४।।

मध्यानीति । तुः पुनरर्थे । मध्यान्यर्धार्धानि पुनस्तत्रैव मध्ये परिवृत्त्या मध्यं नाम यमकं जनयन्ति । एवमाद्यन्तान्यर्धार्धानि परिवृत्त्याद्यन्तं नाम कुर्वन्ति । तदुभय-योगे समकालं काञ्चीयमकं जनयन्ति । तथाशब्दः समुच्चये ।

तत्रोदाहरणत्रयं क्रमेणाह—

सन्तोऽवत बत प्राणानिमानिह निहन्ति नः ।
सदाजनो जनोऽयं हि बोद्धुं सदसदक्षमः ।।४५।।

सन्त इति । कश्चिदाह—हे सन्तः शिष्टाः, नोऽस्माकं प्राणानवत रक्षत । हि यस्मादयं जनो लोक इहात्रेमान्प्राणान्निहन्ति हिनस्ति । बतेति खेदे । कीदृशो जनः । सदा-जनः सतां क्षेप्ता । तथा सच्चासच्च युक्तायुक्तं बोद्धुं ज्ञातुमक्षमोऽसमर्थः । इति मध्यम् ।

यमक के अन्य भेद

मध्य अर्द्धार्द्ध (चतुर्थांश) आवृत्त हो तो उसे मध्य यमक कहते हैं, आद्यन्त [अर्द्धार्द्ध अर्थात् चतुर्थांश आवृत्त हो तो उसे] 'आद्यन्त' कहते हैं, [तथा इन दोनों मध्य और आद्यन्त के] एकत्र [प्रयोग] को काञ्ची यमक कहते हैं ।४४।

इसका तात्पर्य यह है—पाद के प्रथम अर्द्धभाग का अन्तिम आधा भाग (अर्थात् चतुर्थांश) यदि द्वितीय अर्द्धभाग के प्रथम अर्द्धभाग में (अर्थात् चतुर्थांश रूप में) आवृत्त हो तो उसे 'मध्य यमक' कहते हैं।

यदि पाद के प्रथम अर्द्धभाग का प्रथम अर्द्धभाग अर्थात् चतुर्थांश उसी पाद के द्वितीय अर्द्धभाग से द्वितीय अर्द्धभाग अर्थात् चतुर्थांश के रूप में आवृत्त हो तो उसे 'आद्यन्त यमक' कहते हैं ।

यदि मध्य और आद्यन्त का योग किया जाए तो 'काञ्ची' नामक यमक कहाता है ।

मध्य यमक का उदाहरण

अन्वय—सन्तः ! नः प्राणान् अवत । हि अयं सदाजनः जनः इह इमान् प्राणान् निहन्ति बत । (अथच सः) सत्-असत् बोद्धुम् अक्षमः ।

हे सज्जनो ! हमारे प्राणों की रक्षा करो । यहाँ अविवेकी दुष्ट लोग प्राणों का हनन करने वाले हैं ।४५।

प्रस्तुत पद्य में बत-बत, निह-निह, जनो-जनो, सद-सद—पादों के इन मध्यवर्ती चतुर्थांश की आवृत्ति होने के कारण यहाँ मध्य यमक है ।

दीना दूनविषादीना शरापादितभीशरा ।
सेना तेन परासे ना रणे पुञ्जीवितेरणे ।।४६।।

दीना इति । कश्चित्कस्यापि कथयति—हे नः पुरुषः, तेन केनापि वीरेण रणे समरे सेना चमूः परासे क्षिप्ता । कीदृशे रणे पुंजीवितस्येरणे क्षेप्तरि । सेना कीदृशी । दीना निष्पौरुषा । तथा दूनः परितप्तो विषादी विषण्ण इनः स्वामी यस्याः सा तथाभूता । तथा शरैर्बाणैरापादिता भीर्भयं शरो हिंसा च यस्याः सा तथा इत्याद्यन्तम् ।

या मानीतानीतायामा लोकाधीरा धीरालोका ।
सेनासन्नासन्ना सेना सारं हत्वाह त्वा सारम् ।।४७।।

येति । कश्चिद्दूतः स्वसेनासंदेशं राज्ञः कथयति—सा त्वदीया सेना पृतना, आरं रिपुसमूहम्, हत्वा विनाश्य, आह ब्रवीति । त्वा भवन्तम् । किं ब्रवीति । सारं प्रधानं वस्तु । शत्रवो जिता इति निवेदयतीत्यर्थः । तस्यैव सारत्वादिति । कीदृशी । या मानिभिर्मनस्विभिरिताधिष्ठिता । तथा आनीतः संपादितः परबलस्वीकारेणायामो विस्तारो यस्याः सा तथाभूता । लोकानामाधीर्मनःपीडा ईरयति सा लोकाधीरा । तथा धीरो निर्भय आलोकः प्रेक्षणं यस्याः सा तथाभूता । सेना सदण्डनायका, असन्ना सोत्साहा, आसन्ना निकटा । इति काञ्चीयमकम् । पादसमुद्गकभेदवदन्तादिकादियमकभेदवच्चेहापि सर्व एव भेदा द्रष्टव्या इति ।।

आद्यन्त यमक का उदाहरण

अन्वय—नः ! तेन पुंजीवित-ईरणे रणे दीना दून-विषादी-इना शर-आपादित-भी-शरा सेना परासे ।

एक व्यक्ति किसी से कह रहा है—हे भद्रजन ! उस वीर पुरुष ने प्राणों का हरण करने वाले रण में सन्तप्त तथा विषण्ण स्वामी से युक्त, शर-वर्षा से नष्ट हुई तथा डरी हुई उत्साहहीन सेना को तितर-बितर कर दिया ।४६।

प्रस्तुत पद्य में प्रत्येक पाद का प्रथम चतुर्थांश उसी पाद के अन्तिम चतुर्थांश के रूप से आवृत्त होने के कारण 'आद्यन्त यमक' है ।

माला यमक का उदाहरण

अन्वय—या मानी-इता, आनीत-आयामा, लोक-आधी-रा, धीर-आलोका सा स-इना, असन्ना, आसन्ना सेना आरं हत्वा त्वा सारं आह ।

एक दूत राजा से अपनी सेना का वृत्तान्त सुना रहा है—हे राजन् ! सेनानायक की अध्यक्षता में आपकी सेना शत्रुओं को मारकर आपसे विजय का समाचार निवेदित करती है । इस सेना के सैनिक मनस्वी तथा उत्साही हैं । पराजित शत्रुओं

'पादं द्विधा त्रिधा वा विभज्य' (३।२०) इत्युक्तम्, तत्र द्विधा विभक्ते यमकान्याख्यायेदानीं त्रिधा विभक्तस्याह—

पादस्त्रिधा विभक्तः सकलस्तस्यादिमध्यपर्यन्ताः ।
तेष्वपरत्रावृत्त्या दश दश यमकानि जनयन्ति ।।४८।।

पाद इति । यस्य पादस्य त्रिधा भागः संभवति स त्रिधा खण्डितस्ततश्च तस्यादिमध्यान्तभागा अपरत्र पादान्तरे तेष्वेव प्रथमद्वितीयतृतीयभागेषु यथाक्रमं यमकिता दश दश यमकानि पूर्ववज्जनयन्ति । एवं त्रिंशद्यमकानि भवन्ति ।।

एतदाह—

सुमतिरिमानि त्रीण्यपि पादावृत्तिक्रमेण दशकानि ।
यमकानां जानीयात्तदुदाहरणानि तद्वच्च ।।४९।।

सुमतिरिति । एतानि यमकानां त्रीणि दशकानि प्राज्ञः पादावृत्तिक्रमेण मुखसंदंशादिसंज्ञाभिर्जानीयात् । तदुदाहरणान्यपि तद्वदेव तेनैव प्रकारेण । सर्वं चैतद् द्विधा विभक्तपाद इव यमकजातं ज्ञेयम् । केवलं तृतीयभागकृतो विशेषः ।

तदेवाह—

अन्तादिकमिव षोढा विभिन्नमेतत्करोति तावन्ति ।
यमकान्याद्यन्तकवत्तथापरामर्धपरिवृत्तिम् ।।५०।।

अन्तादिकमिति । यथान्तादिकमाद्यन्तकं च पूर्वत्र षोढा भिन्नं सत्प्रत्येकं षड्-

---

को अपनी सेना में प्रविष्ट कर लेने से यह विशाल हो गई है तथा लोगों के मानसिक सन्तापों का नाश करने वाली है ।४७।

प्रस्तुत पद्य में मध्य और आद्यन्त का योग होने के कारण 'काञ्ची यमक' है ।

[पीछे कह आये हैं कि पाद के दो अथवा तीन भाग करके उनकी आवृत्ति से अनेक यमक-भेद सम्भव हैं (देखिए ३।२०) । पाद के दो भाग करके अनेक भेद दिखाये गए हैं । अब आगे तीन भाग करके भेद दिखाये जाते हैं ।]

यदि पाद के तीन भाग—आदि, मध्य और अन्त के रूप में—करके उनकी परस्पर आवृत्ति की जाए तो दस प्रकार का यमक बन जाता है ।४८।

इस प्रकार बुद्धिमान व्यक्ति को पादों की परस्पर आवृत्ति के क्रम से उक्त तीन दशकों अर्थात् तीस प्रकार के यमक-भेदों के उदाहरण जानने चाहिए ।९४।

जैसे यह श्लेष अलंकार 'अन्तादिक' के [उक्त] छः भेदों में विभक्त है, तथा जैसे यह [श्लेष] अन्तादिक को भी छः भेदों [में] विभक्त करता है, उसी प्रकार यह श्लेष 'अर्धपरिवृत्ति' नामक अलंकार को भी [उत्पन्न] करता है ।५०।

यमकानि जनितवत्तथेदमपि । तथापरामन्यामर्धपरिवृत्तिं द्वेधाविभक्तपादवज्जनयति । तथाशब्दस्योभयत्र योगः । इति त्रयोदश यमकानि ॥

एषामुदाहरणानि कानीत्याह—

तद्वदुदाहरणान्यपि मन्तव्यानि त्रयोदशैतेषाम् ।

कृत्वार्धशश्च भागानिहापि सर्वं तथा रचयेत् ॥५१॥

तद्वदिति । उदाहरणान्यपि तद्वदेव त्रयोदश ज्ञेयानि । उपलक्षणं चैतत् । पादसमुद्गकवदिहापि पञ्चदशानां भेदानां संभवात्केवलमिह भागत्रयस्य सादृश्यम् । तत्र तु द्वयस्य पुनरपि भेदानाह—कृत्वार्धशश्चेत्यादि । यथा पूर्वत्रार्धार्धानि कृत्वा वक्त्रशिखामालामध्याद्यन्तकाञ्चीयमकानि कृतान्येवमिहापि कर्तव्यान्युदाहरणानि च देयानीति ॥

भूयो भेदान्तराण्याह—

स्थानाभिधानभाञ्जि त्रीण्यन्यानीति सन्ति यमकानि ।

आदिर्मध्येऽन्ते वा मध्योऽन्ते तत्र परिवृत्तः ॥५२॥

स्थानेति । त्रिधा विभक्ते पादेऽन्यानि त्रीणि वक्ष्यमाणानि यमकानि सन्ति । किं नामधेयानीत्याह—स्थानाभिधानभाञ्जीति । स्थानकृतमभिधानं भजन्ते यानि । कथमित्याह—आदिभागे मध्यभागेन यमकिते आदिमध्ययमकम् । आदिभागेऽन्त्येन चेत्तदाद्यन्तयमकम् । मध्यभागेऽन्त्येन यदि तदा मध्यान्तयमकम् ॥

तदुदाहरणत्रयं क्रमादाह—

स रणे सरणेन नृपो बलितावलितारिजनः ।

पदमाप दमात्स्वमतेरुचितं रुचितं च निजम् ॥५३॥

इसका आशय यह है कि अन्तादिक और आद्यन्तक के छः-छः भेदों के अतिरिक्त एक अन्य १३वाँ भेद भी होता है—अर्धपरिवृत्ति, जिसका तात्पर्य है पाद के आधे भाग की आवृत्ति ।

इसी प्रकार इन १३ यमक-भेदों के १३ उदाहरण भी जानने चाहिए । तथा आधे का आधा भाग करके भी [पूर्वोक्त वक्त्र, शिखा, माला आदि के समान] यहाँ भी इसी प्रकार के भेदों की रचना करनी चाहिए ।५१।

स्थान [के आधार पर] अभिधान अर्थात् नाम को धारण करनेवाले तीन यमक-भेद और होते हैं—(१) आदि की मध्य में आवृत्ति, (२) आदि की अन्त में आवृत्ति, (३) और मध्य की अन्त में आवृत्ति ।५२।

इनके क्रमशः तीन नाम इस प्रकार हैं—आदिमध्य-यमक, आद्यन्त-यमक और मध्यान्त-यमक ।

स इति । स कश्चिन्नृपो रणे समरे सरणेन यानेन तथा दमादुपशमाच्च हेतोः स्वमतेर्निजबुद्धेरुचितं योग्यं रुचितमिष्टं च निजं स्वकीयं पदं स्थानमाप लेभे । कीदृशोऽसौ । बलिता बलित्वं तया वलितो वेष्टितोऽरिजनः शत्रुलोको येन स तथाविधः । इत्यादिमध्यम् ॥

घनाघ नायं न नभा घनाघनानुदारयन्नेति मनोऽनु दारयन् ।
सखेऽदयं तामविलास खेदयन्नहीयसे गोरथवा न हीयसे ॥५४॥

घनेति । एतत्प्रावृषि पथिकस्य सुहृदोच्यते—हे घनाघ गृहाननुसरणाद्बहुपाप, अयमसौ नभाः श्रावणो मासो न नैति । अपि त्वायात्येव । नभःशब्दो मासवाचकः पुंलिङ्गः । कीदृशो नभाः । घनाघनान्सजलजलदानुदारयन्विस्तारयन् । अनु पश्चाच्च मनश्चित्तं दारयन्विपाटयन् । तथा हे सखे अविलास निर्लील, तां कान्तामदयं निर्दयं खेदयन्नुद्वेजयन्नहीयसे सर्पायिसे । अथवा गोर्बलीवर्दान्न हीयसे । बलीवर्द एवासीत्यर्थः । इत्याद्यन्तयमकम् ॥

आदिमध्य-यमक का उदाहरण

अन्वय—सः बलित-वलित-अरिजनः नृपः रणे सरणेन, दमात् स्वमतेः उचितं रुचितं च निजं पदम् आप ।

अपने पराक्रम से शत्रुओं को घेरकर इस राजा ने युद्ध में वीरता द्वारा तथा सामनीति का आश्रय लेकर अपनी बुद्धि के अनुकूल अभीष्ट पद प्राप्त कर लिया है ।५३।

उक्त पद्य में चारों पादों का तृतीयांश [सरणे, बलिता, पदमा, रुचितं रुचितं] अपने-अपने पादों के मध्य में आवृत्त हुआ है ।

आद्यन्त यमक का उदाहरण

अन्वय—घन-अघ ! घनाघनान् उदारयन्, अनु मनः दारयन् अयं नभाः न न एति । सखे ! अविलास ! तां अदयं खेदयन् अहीयसे अथवा गोः न हीयसे ।

एक मित्र किसी प्रवासी को कह रहा है—(घर न जाने के कारण) अरे महापापी ! जलपूर्ण मेघों का विस्तार करता हुआ, फिर मन को विदीर्ण करता हुआ क्या यह श्रावण का मास नहीं आ गया । हे विलासशून्य विरक्त पुरुष ! निर्दयतापूर्वक उस अपनी प्रिया को दुःख पहुँचाने वाले तुम सर्पतुल्य हो अथवा बैल से तो किसी प्रकार कम नहीं हो, अर्थात् मूर्ख हो ।५४।

उक्त पद्य में चारों पादों के प्रथम तृतीयांश [घनाघना, नुदारयन्, सखेदयं, नहीयसे] को उन्हीं पादों के अन्त में आवृत्त किया गया है ।

असतामहितो युधि सारतया रतया ।
स तयोरुरुचे रुरुचे परमेभवते भवते ॥५५॥

असतामिति । हे उरुरुचे विस्तीर्णकान्ते । अथवा उर्वी रुग्यस्य स तस्मै विस्तीर्ण-कान्तये । स कश्चिद्वीरो भवते तुभ्यं रुरुचे प्रीतिमुत्पादितवान् । तया जगत्प्रसिद्धया युधि रणे सारतयोत्कृष्टतया हेतुभूतया । कीदृश्या । रतया सक्तया । संवद्धयेत्यर्थः । कीदृशोऽसौ । असतां दुर्जनानामहितो द्रोहकारी । अत एव महितः पूजितः । भवते कीदृशाय । परमा उत्कृष्टा इभा हस्तिनो विद्यन्ते यस्य स तथा तस्मै ॥

अथोपसंहारं कुर्वन्ननियतदेशावयवयमकानामानन्त्यमाह—

यमकानां गतिरेषा देशावयवावपेक्षमाणानाम् ।
अनियतदेशावयवं तदपरमसंख्यं सदेवास्ति ॥५६॥

यमकानामिति । देश आदिमध्यान्तलक्षणः । अवयवोऽर्धत्रिभागादिः । तौ देशाव-यवावपेक्षमाणानामत्यजतां यमकानां गतिरेषा परिपाटीयं पूर्वोक्ता । यत्तु यमकं देशाव-यवौ नापेक्षते तदपरमसंख्यमसंख्यातम् । तच्च महाकविलक्ष्येषु सदेव साध्वेवास्ति विद्यते । एतदुक्तं भवति—स्वेच्छाकृतत्वेनानन्तत्वात्तस्य लक्षणं कर्तुं न शक्यते । केवलं महाकविलक्ष्यदर्शनाज्ज्ञेयम् ॥

मध्यान्त यमक का उदाहरण

अन्वय—उरुरुचे ! असतां अहितः सः तया युधि सारतया रतया परम-इभवते भवते रुरुचे ।

हे अतुल कान्तिमान् ! दुष्टों के अहितकारी उस वीर ने युद्ध में अपनी अनुपम वीरता से सुन्दर गजसेना रखनेवाले आपके हृदय में अपना स्थान बना लिया है ।५५।

इस पद्य में तीन पादों के मध्य भाग [रतया, रुरुचे, भवते] को अन्तिम भाग में आवृत्त किया गया है ।

इस प्रकार देश अर्थात् आदि, मध्य और अन्त और अवयव अर्थात् पाद के अर्द्धभाग अथवा तिहाई भाग की अपेक्षा रखनेवाले यमक की यही उक्त व्यवस्था है। किन्तु जिस यमक में देश और अवयव नियत नहीं है, उसके असंख्य भेद हैं और वह (उसका काव्यों में प्रयोग) सुन्दर होता है ।५६।

अनियत देश तथा अवयव यमक का उदाहरण

अन्वय—सा अलिनी तेन (दयितेन) सह निषेवितां कमलिनीं (सम्प्रति) दयितं विना न सहते । अधुना मधुना हृदि निहितं रतिसारं तं प्रियं अहर्निशं स्मरति ।

अत्र तु दिङ्मात्रप्रदर्शनार्थमाह—

कमलिनीमलिनी दयितं विना न सहते सह तेन निषेविताम् ।
तमधुना मधुना निहितं हृदि स्मरति सा रतिसारमहर्निशम् ।।५७।।

कमलिनीति । सालिनी भ्रमरी दयितं प्रियं विना कमलिनीं पद्मिनीं न सहते न क्षमते । तां दृष्ट्वा तप्यत इत्यर्थः । कीदृशीं कमलिनीम् । तेन दयितेन सह समं निषेविताम् । किं तर्हीदानीं करोतीत्याह—तं प्रियमधुनेदानीं मधुना वसन्तेन हृदि मनसि निहितमर्पितं रतिसारं रसप्रधानं सा स्मरति ध्यायति । अहर्निशं दिवानिशम् । अत्र न देशविभागेनावृत्तिर्नाप्यवयवविभागेन । यतो द्रुतविलम्बिताख्यं द्वादशाक्षरमेतद्वृत्तम् । अस्यार्धे षडक्षराणि । अत्र च प्रथममक्षरं मुक्त्वा त्रीणि यमकितानि ।।

तथा—

कमलिनी सरसा सरसामियं विकसितानवमं नवमण्डनम् ।
किमिति नाधिगता धिगतादृशं मधुकरेण बताणवता कृतम् ।। ५८ ।।

कमलिनीति । इयं कमलिनी पद्मिनी किमिति तस्मान्मधुकरेण भृङ्गेण नाधिगता न संप्राप्ता । धिक्कष्टम् । तेनाणवता शब्दवता तादृशमयुक्तं कृतम् । धिग्बतशब्दावत्र खेदाधिक्यं सूचयतः । कीदृशी । सरसा नूतना । विकसिता प्रफुल्ला । अत एव सरसां जलाशयानामनवमं श्रेष्ठं नवमण्डनं प्रत्यग्रालंकरणम् । अत्रापि देशावयवानपेक्षयावृत्तिः ।।

प्रिय के साथ कमलिनी के रस का आस्वादन करनेवाली वह भँवरी अब प्रिय के वियोग में कमलिनी का दर्शन नहीं सह सकती, अर्थात् उसे देखकर संतप्त होती है । इस मधुमास में अपने रति-सर्वस्व प्रिय का विचार आ जाने से रात-दिन उसका स्मरण करती रहती है ।५७।

उक्त पद्य में पाद के किसी भी अवयव की आवृत्ति का स्थान नियत नहीं है ।

एक अन्य उदाहरण

अन्वय—इयं सरसा, विकसिता, सरसां अनवमं नवमण्डनं कमलिनी मधुकरेण किमिति न अधिगता धिक् । अणवता (तेन) अतादृशं कृतम्, बत !

सरस, विकसित एवं सरोवरों का श्रेष्ठ मण्डन-रूप यह कमलिनी भ्रमर को क्यों नहीं प्राप्त हुई । बड़े खेद की बात है कि भ्रमर ने कोलाहल करके यह अनुचित कार्य किया है [और कमलिनी को प्राप्त नहीं कर सका] ।५८।

इस पद्य में भी उपर्युक्त स्थिति है ।

अध्यायमुपसंहरन्यमकस्वरूपं विषयं चाह—

इति यमकमशेषं सम्यगालोचयद्भिः
सुकविभिरभियुक्तैर्वस्तु चौचित्यविद्भिः ।
सुविहितपदभङ्गं सुप्रसिद्धाभिधानं
तदनु विरचनीयं सर्गबन्धेषु भूम्ना ।। ५९ ।।

इतीति । इति पूर्वोक्तं यमकमशेषं सर्वं समस्तपादैकदेशजं सम्यग्यथान्याय-मालोचयद्भिः सत्कविभिरभियुक्तैः सावधानैः । तथा वस्तु च विषयविभागमालोचयद्भिः । यथा कस्मिन्रसे कर्तव्यम्, क्व वा न कर्तव्यम् । यमकश्लेषचित्राणि हि सरसे काव्ये क्रियमाणानि रसखण्डनां कुर्युः विशेषतस्तु शृङ्गारकरुणयोः कवेः किलैतानि शक्तिमात्रं पोषयन्ति, न तु रसवत्ताम् । यदुक्तम्—'यमकानुलोमतदितरचक्रादिभिदो हि रस-विरोधिन्यः । अभिधानमात्रमेतद्गड्डरिकादिप्रवाहो वा ।।' प्रयोगस्तु तेषां खण्डकाव्येषु देव-तास्तुतिषु रणवर्णनेषु च । तदेवाह—औचित्यविद्भिरिति । औचित्यं यमकादिविधाना-स्थानस्थानादिकं विदन्ति ये तैः । कीदृशं यमकम् । सुष्ठु विहिता हृदयंगमाः पदभङ्गा यत्र तत्तथाभूतम् । तथा सुप्रसिद्धान्यभिधानानि वस्तुवाचकशब्दा यत्र तत्तथाभूतं यमकम् । तदनु चौचित्यादिज्ञानानन्तरं विरचनीयम् । भूम्ना बाहुल्येन सर्गबन्धेषु महा-काव्येषु । नाटककथाख्यायिकादिषु पुनः स्वल्पमेवेत्यर्थः ।।

इति श्रीरुद्रटकृते काव्यालंकारे नमिसाधुविरचितटिप्पणसमेतः तृतीयोऽध्यायः समाप्तः ।

इस अध्याय में निरूपित यमक के समस्तपादज, एकदेशज आदि भेदों का अच्छी तरह पर्यवेक्षण करके एवं यमक के प्रयोगक्षेत्र को ध्यान में रखते हुए औचित्य के ज्ञाता सत्कविगण इसकी रचना में प्रवृत्त हों । प्रसिद्ध शब्दों का चयन तथा पदों का भङ्ग ठीक प्रकार से होना चाहिए । मुख्यतया महाकाव्यों में इसका प्रयोग समीचीन है, नाटक, कथा, आख्यायिका आदि में इसका प्रयोग कम ही होना चाहिए ।५९।

[यमक के प्रयोग में औचित्य का ध्यान रखना अपेक्षित होता है । विशेषतः रस के क्षेत्र में किस रस में इसका प्रयोग उचित रहेगा और किस में अनुचित, यह बड़े अवधान का विषय है । वस्तुतः यमक, श्लेष आदि सरस काव्य में रस का व्याघात ही उत्पन्न करते हैं, विशेषतः शृंगार और करुण में । इसका कारण यह है कि इन दोनों अलंकारों का प्रयोग कवि के विशाल शब्द-ज्ञान एवं उसके प्रयोग की प्रवीणता को तो प्रकट करते हैं किन्तु इससे काव्य की रसप्राणता पर आवरण छा जाता है, जो कि उसका मुख्य तत्त्व है । हाँ, खण्डकाव्य, रणवर्णन, देवस्तुति आदि के अतिरिक्त गद्य काव्य—ये सभी यमक और श्लेष के प्रयोगक्षेत्र हैं ।]

इति 'अंशुप्रभा'ऽऽख्य-हिन्दी-व्याख्यायां तृतीयोऽध्यायः समाप्तः ।

चतुर्थोऽध्यायः

यमकं व्याख्याय श्लेषं व्याचिख्यासुराह—

वक्तुं समर्थमर्थं सुश्लिष्टाक्लिष्टविविधपदसंधि ।
युगपदनेकं वाक्यं यत्र विधीयेत स श्लेषः ।।१।।

वक्तुमिति । यत्रालंकारे युगपत्तुल्यकालमेकप्रयत्नेनैवानेकं द्व्यादिकं वाक्यं विधीयेत स श्लेषः । युगपत्पदग्रहणान्महायमकादीनां श्लेषत्वनिवृत्तिः । कीदृशम् । वाक्यमर्थमभिधेयं वक्तुं भणितुं समर्थं शक्तम् । अनेकमितीहापि द्रष्टव्यम् । तथा सुष्ठु श्लिष्टः सुप्रयोजितोऽक्लिष्टः कष्टकल्पनारहितो विविधो नानाविधः पदानां सुप्तिङन्तानां संधिरेकीभावो यत्र तत्सुश्लिष्टाक्लिष्टविविधपदसंधीति ।

चतुर्थ अध्याय

इस अध्याय में श्लेष नामक शब्दालंकार का निरूपण है।

श्लेष का लक्षण देने के उपरान्त इसके निम्नोक्त आठ भेदों के लक्षण और उदाहरण प्रस्तुत किये गये हैं—वर्णगत, पदगत, लिंगगत, भाषागत, प्रकृतिगत, प्रत्ययगत, विभक्तिगत और वचनगत । भाषागत श्लेष के अन्तर्गत निम्नोक्त भाषाओं के उदाहरण दिये गये हैं—(१) संस्कृत, मागधी, (२) संस्कृत, पिशाच, (३) संस्कृत, शूरसेनी, (४) संस्कृत, अपभ्रंश । इन आठ भेदों के उपरान्त श्लेष के सम्बन्ध में कहा गया है कि भाषा-श्लेष के अतिरिक्त अन्य सभी श्लेष-प्रकार अलंकारों (अर्थालंकारों) से संस्पृष्ट रहते हैं, विशेषतः उपमा और समुच्चय के साथ तो ये वैचित्र्य को धारण करते हैं । रुद्रट का यह प्रसंग भामह से गृहीत है । (देखिए आगे ४।३१-३४) ।

[अर्थश्लेष तथा श्लेष-विषयक अन्य शास्त्रीय चर्चा के लिए देखिए प्रस्तुत ग्रन्थ का दशम अध्याय ।]

श्लेष

जिस [रचना] में श्लिष्ट (अर्थात् सुनियोजित, उचित प्रकार से जुड़े हुए), अक्लिष्ट (अर्थात् कष्ट-कल्पना रहित) तथा विविध पदों (सुबन्तों और तिङन्तों) की सन्धि से युक्त ऐसे अनेक वाक्यों की युगपद् (अर्थात् एक साथ, एक काल में ही, स्पष्टतः कहें तो एक वाक्य में ही) रचना हो जो [अनेक] अर्थ बताने में समर्थ हो, वहां श्लेष अलंकार माना जाना है।१।

रुद्रट से पूर्व भामह, दण्डी और उद्‌भट ने श्लेष अलंकार का निरूपण किया है। इस अलंकार के सम्बन्ध में दो बातें ज्ञातव्य हैं—

(क) इस अलंकार में उपमान और उपमेय के समान धर्मों में द्व्यर्थकता के आधार पर समानता रहती है।

सामान्यलक्षणमभिधाय विशेषाभिधानाय श्लेषप्रकारानाह—

वर्णपदलिङ्गभाषाप्रकृतिप्रत्ययविभक्तिवचनानाम् ।
अत्रायं मतिमद्भिर्विधीयमानोऽष्टधा भवति ।।२।।

वर्णपदेति। अत्र शब्दालंकारेष्वयं श्लेषो मतिमद्भिर्विधीयमानो धीमद्भिः क्रियमाणोऽष्टधाष्टप्रकारो भवति । केषां विधीयमान इत्याह—वर्णेत्यादि । वर्णश्च पदं च लिङ्गं च भाषा च प्रकृतिश्च प्रत्ययश्च विभक्तिश्च वचनं च वर्णपदलिङ्गभाषाप्रकृतिप्रत्ययविभक्तिवचनानि तेषाम् । वर्णपदादिविषयभेदात्तन्नामाष्टधा श्लेष इत्यर्थः । अत्रेति परमतनिरासार्थम् । अन्यैर्ह्य विशेषेण शब्दार्थयोः श्लेषोऽभ्यधायि । वर्णादिनिर्देशादेवाष्टविधत्वे लब्धेऽष्टधेति नियमार्थम् । भेदे सत्यष्टधैव नान्यथेत्यर्थः केचिद्धि पदेषु लिङ्गमन्तर्भावयन्ति । प्रत्यये च विभक्तिवचने । विभक्तौ च वचनम् । तदेतन्न चारु । भेददर्शनात् । तथाहि हार इति भूषणं मुक्ताकलापः, हरणं हारो मोषः, हरस्यायं हारः कोऽप्यर्थः इत्यत्र पदश्लेषेऽपि लिङ्गश्लेषो न विद्यते । सर्वत्र पुलिङ्गत्वात् । तथा पद्मो

(ख) यह समानता अलग-अलग न कही जाकर 'युगपद्' ही कही जाती है—

(क) **उपमानेन यत्तत्त्वमुपमेयस्य साध्यते ।**
गुणक्रियाभ्यां नाम्ना च श्लिष्टं तदभिधीयते ।।

× × ×

इष्टः प्रयोगो युगपदुपमानोपमेययोः ।।

का० अ० (भा०) ३।१४-१५

(ख) **श्लिष्टमिष्टमनेकार्थमेकरूपान्वितं वचः ।।**

का० द० २।३१०

इधर रुद्रट के उक्त लक्षण में प्रयुक्त 'युगपद् अनेकवाक्यम्' यह कथन द्व्यर्थकता तत्त्व की ओर प्रकारान्तर से ही संकेत करता है। वस्तुतः इनका यह कथन भामह के निम्नोक्त कथन से प्रभावित है—

"इष्टः प्रयोगो युगपदुपमानोपमेययोः ।।" भामहालंकार ३।१५

अर्थात्—श्लेष अलंकार में उपमान और उपमेय का प्रयोग 'युगपद्' अर्थात् एक साथ करना अभीष्ट रहता है।

बुद्धिमानों ने इस श्लेष के आठ प्रकारों का इस प्रकार परिगणन किया है—(१) वर्ण, (२) पद, (३) लिङ्ग, (४) भाषा, (५) प्रकृति, (६) प्रत्यय, (७) विभक्ति और (८) वचन। २।

रुद्रट से पूर्व दण्डी ने श्लेष के अनेक भेद गिनाये हैं। भामह ने श्लेष के भेदों का उल्लेख नहीं किया, इसके तीन रूपों और तीन आधारों की चर्चा-मात्र की है। उनके

निधिः, पद्मं कमलम्, पद्मा श्रीरिति लिङ्गश्लेषेऽपि पदमभिन्नम् । तथा तपनस्यायं तापयतीति वा तापनः । इत्यादिषु प्रत्ययभेदेऽपि विभक्तिवचनभेदो न विद्यते । तथा सतां मुख्यः पुरःसरः सन्मुख्यः सच्छोभनं मुखं यासां ताः सन्मुख्यः इत्यत्र वचनभेदेऽपि विभक्ति भेदो न विद्यते इति भेदप्रतीतेर्न शोभनोऽन्तर्भाव इति ।

यथोद्देशस्तथा निर्देश इत्यादौ वर्णश्लेषलक्षणमाह—

यत्र विभक्तिप्रत्ययवर्णवशादैकरूप्यमापतति ।
वर्णानां विविधानां वर्णश्लेषः सः विज्ञेयः ।।३।।

यत्रेति । यत्र विविधानां नानारूपाणां वर्णानामैकरूप्यं साम्यमागच्छति स वर्णश्लेषः । विरूपाणां कथं सादृश्यमित्याह—विभक्तिबलात्प्रत्ययबलाद्वर्णबलाच्चेति ।।

उदाहरणमिदम्—

साधौ विधावपर्तावपराहावास्थितं विषादमितः ।
आयासि दानवत्त्वं तद्धर्म्यं परमकुर्वाणः ।।४।।

अनुसार श्लेष के तीन रूप हैं—गुण, क्रिया और नाम, तथा इसके तीन आधार हैं—सहोक्ति, उपमा और हेतु [का० अ० ३ । १४-२०] । उक्त तीन रूप परवर्ती श्लेष-भेदों के बीज माने जा सकते हैं, और उक्त तीन आधार इस शास्त्रीय चर्चा के उद्गम माने जा सकते हैं कि श्लेष विविक्त रहता है अथवा नहीं [विशेष विवरण के लिए आगे देखिए ४।३१-३४] ।

दण्डी के अनुसार श्लेष के दो प्रमुख भेद हैं—अभिन्नपद और भिन्नपदप्राय । इन्हें क्रमशः अभङ्ग और सभङ्ग भी कह सकते हैं । (का० द० २।३१०) इनके अतिरिक्त श्लेष निम्नोक्त रूपों में भी प्रकट किया जा सकता है—अभिन्नक्रियश्लेष, अविरुद्धक्रियश्लेष, विरुद्धक्रियश्लेष, सनियमश्लेष, नियमाक्षेपरूपकोक्तिश्लेष, अविरोधी श्लेष, विरोधी श्लेष आदि (का० द० २।३१४, ३१५) ।

वर्णश्लेष

जहां विभक्ति, प्रत्यय ओर वर्ण के कारण विविध वर्णों में एकरूपता आ जाती है उसे वर्णश्लेष कहते हैं ।३।

उदाहरण

श्लिष्ट पदों का अर्थ—

साधौ— (क) अभेद्यसंयुक्ते, (ख) सुन्दरे ।
विधौ— (क) दैवे, भाग्ये, (ख) चन्द्रमसि ।
अपर्तौ— (क) अपगतकालविशेषे,

साधाविति । अत्र महासत्त्वो दरिद्रो वर्ण्यते—कश्चिन्नरो दानवतो भावो दानवत्त्वं दातृत्वं तत्पुराकृतमकुर्वाणोऽसंपादयन्विषादं खेदमितः प्राप्तः । कीदृशं दातृत्वम् । विधिर्दैवं तस्मिन्नास्थितमायत्तम् । दैवाधीनमित्यर्थः । दैवेऽनुकूले भवतीति भावः । कीदृशे विधौ । सहाधिभिर्वर्तत इति साधिस्तस्मिन् । नित्यमेव मनःपीडावह इत्यर्थः । तथापर्तौ सदा संनिधानादपगतोऽर्तुः कालविशेषो यस्य सोऽपर्तुस्तस्मिन् । तथापराहाव-

---

(ख) गतिरहिते, सदाऽवस्थिते ।

अपराहौ— (क) शत्रुविहीने अहिवत् कुटिले च

(ख) अपगतराहौ ।

आस्थितम् — (क) आधीनम्, (ख) आस्थाधारिणम् ।

विषादं— (क) खेदम्, (ख) कालकूटभक्षकं (शिवम्) ।

इतः— (क) प्राप्तः, (ख) अस्मात् प्रदेशात् ।

आयासि— (क) आयासजनकं, खेदावहं, (ख) आगच्छसि ।

दानवत्त्वम्— (क) दातृत्वम्, दानशीलताम्

(ख) दानव+त्वम्=हे दनुसुत ! त्वम् (वाणासुरः) ।

(तत्) धर्म्यम्— (क) धर्मसंयुक्तम्, श्रेष्ठम्

तत् हर्म्यम्— (ख) तस्य स्थानम् ।

परम्, अकुर्वाणः—(क) श्रेष्ठम्, असंपादयन्

परम-कुः-वाणः— (ख) उत्कृष्टा भूमिः (निर्वाण-पदम् । वाणासुरः ।)

प्रथम अर्थ

अन्वय—[कश्चिन् नरः] साधौ अपर्तौ अपराहौ विधौ आस्थितं धर्म्यं आयासि तद् दानवत्त्वम् अकुर्वाणः परं विषादम् इतः ।

कोई महासत्त्व मनुष्य दरिद्र बन जाने के कारण पूर्वकृत दान अब नहीं कर सकता, अतः अत्यन्त खिन्न है । उसी का वर्णन इस श्लोक में है—

[कोई महासत्त्व पुरुष] आधिसंयुक्त अर्थात् मन को अशान्त करने वाली, कालरहित अर्थात् सदा साथ रहने वाली, तथा मानो दूसरे सर्प के सदृश [दुःखदायी] विधि के अधीन, धर्मसम्मत तथा [अब न हो सकने के कारण] खेद देने वाले दान को न करता हुआ विषाद को प्राप्त हुआ ।४।

द्वितीय अर्थ

अन्वय—दानव ! त्वं वाणः इतः साधौ अपर्तौ अपराहौ विधौ आस्थितं विषादं तद् हर्म्यं परम-कुः आयासि ।

कोई बाणासुर से कहता है—हे दानव ! तुम, कालकूट-विष भक्षण करनेवाले, राहु के आक्रमण से मुक्त, सुन्दर तथा [शिव के मस्तक पर] सदावस्थित चन्द्रमा पर

विद्यमानः परः प्रतिपक्षो यस्यासावपरः स चासावहिश्च सर्पश्च पीडाकारित्वादपराहिस्तस्मिन् । अपरस्याहेर्नकुलादिर्हिंसको भवति, अस्य तु नैव । अन्यच्च कीदृशं दानवत्वम् । आयास्यघटनादभीक्ष्णं खेददायि । तथा धर्म्यं स्वभावतो धर्मादनपेतम्, अत एव परं श्रेष्ठम् । एष एकस्य वाक्यस्यार्थः ।। अपरस्य तु—साधावित्यादि कश्चिद्वाणासुरमाह—हे दानव दनुसुत, त्वं बाणो वाणाख्य इतोऽस्मात्प्रदेशाद्विषादं कालकूटभक्षकं शिवमायास्यागच्छसि । कीदृशं शिवम् । विधौ चन्द्रमस्यास्थितमास्था संजातास्येति तम् । कीदृशे विधौ । साधौ सुन्दरे । तथापगता ऋतिर्गमनं यस्यासावपर्तिस्तस्मिन् सदावस्थिते । तथापगतो राहुर्विधुंतुदो यस्मादसौ तथाविधस्तस्मिन् । किमिति तत्सकाशमायासीत्याह—तस्य हर्म्यं स्थानं तद्धर्म्यं यतः परमोत्कृष्टा कुर्भूमिः । निर्वाणपदमित्यर्थः । साधावित्यादाविकारोकारयोः सप्तमीविभक्तिवशादैकरूप्यम् । आस्थितमितः प्रभृतिषु प्रत्ययचवशात् । तद्धर्म्यमित्यत्र धकारहकारवर्णवशादिति । परमकुर्वाण इत्यत्रैकत्रौष्ठ्योऽन्यत्र दन्त्यौष्ठ्यो वकारस्तत्कथमेकरूपता वर्णानाम् । सत्यम् । यमकश्लेषचित्रेषु बवकारयोरौष्ठ्यदन्त्यौष्ठ्ययोरभेदो दृश्यते । यथा—'तस्यारिजातं नृपतेरपश्यदबलं वनम् । ययौ निर्भरसंभोगैरपश्यदवलम्बनम् ।।' तथा नकारणकारयोश्च न भेदः । यथा—'वेगं हे तुरगाणां जयन्नसावेति भङ्गहेतुरगानाम्' इति शिवभद्रस्य । विसर्जनीयभावाभावयोश्च न विशेषः । यथा—'द्विषतां मूलमुच्छेत्तुं राजवंशादजायथाः । द्विषद्भ्यस्त्रस्यसि कथं वृकयूथादजा यथा ।।' अत्र ह्येकत्राजायथा इति विसर्गान्तं क्रियापदम्, अपरत्र यथाशब्दोऽव्ययम् । तथान्त्ययोर्मकारनकारयोश्च न भेदः । यथा—प्रापयासुरथं वीर समीरसमरंहसम् । द्विषतां जहि निःशेषपृतनाः समरं हसन् ।।' अत्र हि समरंहसमिति मान्तम्, हसन्निति नान्तं पदम् । तथा व्यञ्जनात्परस्यैकस्य व्यञ्जनस्य द्वयोर्वा न विशेषः । यथा—शुक्ले शुक्लेशनाशं दिशति' इत्यादौ शुक्ले शुक्ले यमकम् । तस्मिश्चैकत्र शुक्लगुणयुक्ते, अन्यत्र शुचः क्लेशस्य च नाशं दिशतीत्यर्थः । अत्र ह्येकत्र ककाराल्लकार एवैकं व्यञ्जम् । अन्यत्र ककारो लकारश्च द्वयमिति ।

आस्था रखने वाले भगवान् शिव के पास निर्वाण पद प्राप्त करने की इच्छा से आते हो।४।

इस पद्य के उक्त श्लिष्ट पदों के अर्थों तथा दोनों अर्थों के अवयवों को देखने से ज्ञात होगा कि साधौ (स+आधौ), अपराहौ (अपर+अहौ), आस्थितम् विषादं (विष+अदं) आदि पदों के कारण श्लेष नहीं है, अपितु इन पदों के वर्णों को भिन्न रूपों में रखने के कारण श्लेष है । अतः यहाँ वर्ण श्लेष है ।

[वाणः—बाणः । यमक, श्लेष और चित्र में ब और व, ड और ल तथा र और ल में अभेद रहता है—"यमकश्लेषचित्रेषु बवयोर्डलयोरलयोर्न भित् ।" अतः यहाँ वाण का अर्थ बाण है ।]

अथ पदश्लेषः—

यस्मिन्विभक्तियोगः समासयोगश्च जायते विविधः ।
पदभङ्गेषु विविक्तो विज्ञेयोऽसौ पदश्लेषः ॥५॥

यस्मिन्निति । यत्र वाक्ये विभक्तियोगो विविधो नानासमासयोगश्च जायते । केषु । पदभङ्गेषु सत्सु । विविक्तः स्फुटः स पदश्लेषः ।

उदाहरणमिदम्—

सुरतरुतलालसगलन्नयनोदकलालसत्कुचारोहम् ।
समराजिदन्तरुचिरस्मिते नमदसौ शरीरमदः ॥६॥

पदश्लेष

जिस अलंकार में पद भंग करने पर विभक्ति एवं समासों का अनेकविध योग हो उसे स्पष्ट ही पद श्लेष समझना चाहिए ।५।

उदाहरण

श्लिष्ट पदों का अर्थ

१. (क) सुरत-रुत-लालस-गलम्, नयन-उदक-लाल-सत्-कुच-आरोहम् ।
(ख) सुर-तरु-तल-अलस-गलत्-नय-नोद-कला-लसत्-कु-चारः-अहम् ।

अर्थ—(क) निधुवन-भणित-उत्कण्ठित-कण्ठम्, अश्रु-प्रसरण-शोभित-उन्नत-स्तनोपेतम् ।
(ख) देव-वृक्ष-अधोभागेषु, मन्द-भ्रश्यत्-नीतीनां-पातन-विज्ञान-शोभमान-पृथ्वी-वलगनः-अहम् ।

२. (क) सम-राजि-दन्त-रुचिर-स्मिते !
नमत्-असौ-शरीरम्-अदः ।
(ख) समर-आजित्-अन्त-रुचिः-अस्मि, तेन-मत्-असौ-शरि-ईर-मदः ।

अर्थ—(क) अविषम-दन्त-पंक्ति-मनोहर-हास्ययुक्ते !
नमत् = विनम्रम्, असौ = सा (कान्तिः), शरीरम्=वपुः, अदः=इदम् ।
(ख) रणविजयि-विनाश-अभिलाषोऽस्मि ।
तेन = अस्माद् हेतोः, मत् = मम, असौ = खड्गे, शरि = धानुष्क ।
ईर = अभिभवः, मदः = गर्वः ।

३. (क) नव-रोम-राजि-राजित-वलि-वलय-मनोहर-तर-सारं, भा ।
(ख) न-वरो-अमर-अजिर-अजित-बलि-वल-यमन-ऊह-रत-रस-आरम्भाः ।

४. (क) धवलयति रोहि-तानव-मद्ध्य-अनमत्-आहित-स्तनि ! ते ।
(ख) धव-लय-तिरोहित-अनव-मत्-ध्यान-मद-अहित-स्तनिते ।

नवरोमराजिराजितवलिवलयमनोहरतरसारं भाः ।
धवलयति रोहितानवमद्ध्यानमदाहितस्तनि ते ।।७।।
(युग्मम्)

सुरेति । नवरोमेति । कश्चिच्चाटुक्तिप्रियामाह—हे समराजिदन्तरुचिरस्मिते अविषमदन्तपङ्क्तिकान्तहसिते, तवासौ भा एषा दीप्तिरद एतच्छरीरं वपुर्धवलयति शुक्लयति । कीदृशम् । सुरतरुतेषु निधुवनभणितेषु लालसो लम्पटो गलः कण्ठो यस्य तत्तथाभूतम् । तथा प्रियसंनिधानाद्यन्नयनोदकमानन्दलोचनवारि तस्य यो लालः प्रसरणं तेन सञ्शोभनः कुचारोहः स्तनोच्छ्रायो यत्र तत्तथाभूतम् । तथा नमत्स्तनाभोगभारान्न-म्रम् । तथा नवा नूतना या रोमराजी रोमलेखा तया राजितं भूषितं यद्वलिवलयं वल-याकारं वलित्रयं तेन मनोहरतरं रम्यतरं तच्च तत्सारमुत्कृष्टं चेति समासः । रोहत्यु-त्तिष्ठतीति रोहि तानवं कृशत्वं यस्य तद्रोहितानवं यन्मध्यमुदरं तत्रानमन्तौ कठिन-त्वादलम्बमानावाहिताववस्थितौ स्तनौ यस्यास्तस्या आमन्त्रणं हे रोहितानवमध्यान-मदाहितस्तनि । एष एकस्य वाक्यस्यार्थः ।। अपरस्य तु यथा—कश्चित्खड्गप्रहरणो धानुष्कं स्पर्धिनमुद्दिश्य वयस्यानाह—यतोऽहमेवंविशिष्टस्तेन हेतुना मदसावसमत्खड्गे

प्रथम अर्थ

अन्वय—(हे) सम-राजि-दन्त-रुचिर-स्मिते ! रोहि-तानव--मद्ध्य-अनमत्-आ-हितस्तनि !! ते असौ भाः सुरत-रुत-लालस-गलम्, नयन-उदक-लाल-सत्-कुच-आरोहम्, नमत्, नव-रोम-राजि-राजित-वलि-वलय-मनोहरतर-सारं अदः शरीरं धवलयति ।

हे समान दन्तपंक्ति से छिटकती हुई सुन्दर मुस्कान से युक्त तथा कृश उदर पर लटकते हुए कठोर स्तनों वाली सुन्दरि ! यह तुम्हारी मुस्कराहट की चमक सुरत-समय मधुर ध्वनि करनेवाले कण्ठ से युक्त [प्रिय के समीप होने से] आनन्दाश्रुओं से भीग रहे उन्नत स्तनों से मण्डित [विशाल स्तनों के बोझ से] झुकते हुए तथा त्रिवली पर नवल रोमपंक्ति से भूषित तथा अति मनोहर सर्वस्व-रूप तुम्हारे शरीर को धवलित कर रही है ।६-७।

द्वितीय अर्थ

अन्वय—[हे] अमर-अजिर-अजित-वलि-बल-यमन-ऊह-रत-रस-आरम्भाः । [यतः] अहम् सुर-तरु-तल-अलस-गलत्-नय-नोद-कला-लसत्-कु-चारः, [अथ च] समर-आजित्-अन्त-रुचिः-अस्मि, तेन धव-लय-तिरोहित-अनव-मद्-ध्यान-मद-अहित-स्तनिते मत्-असौ शरि-ईर-मदः (वर्तते) ।

कोई खड्गधारी किसी धनुर्धर से स्पर्धा करते हुए अपने मित्रों को कहता है—मैं सुरवृक्षों (कल्पतरु आदि) के नीचे विषयादि में आसक्त नीच जीवों को नीचे

न वरो न श्रेष्ठः योऽसौ शरीरमदः । शरा विद्यन्ते येषां ते शरिणो धानुष्कास्तानीरयति क्षिपत्यभिभवतीति शरीरस्तस्य मदः । जितधनुर्धरोऽहमिति कृत्वा यो दर्प इत्यर्थः । यतः कीदृशोऽहम् । सुरतरुतलेषु देववृक्षाधोभागेष्वलसा मन्दा ये गलन्नया भ्रश्यन्तीतयः । विषयासक्ता इत्यर्थः । तेषा नोदस्ततः पातनं तत्र या कला विज्ञानं तया लसञ्शोभमानः कौ पृथिव्यां चारो वलगनं यस्य स तथाविधोऽहम् । खड्गविद्यया स्वर्गस्थानपि पातयामी-त्यर्थः । तथा समरं रणमासमन्ताज्जयन्त्यभिभवन्तीति समराजितो ये शूरास्तेषामप्यन्ते विनाशे रुचिरभिलाषो यस्य स एवंविधोऽस्मि भवामीति । अधुना वयस्यानामन्त्रयते—अमराजिरेषु देवाङ्गनेष्वजितमपराभूतं यद्बलिबलं बलिदानवसैन्यं तस्य यमनं बन्धनं तत्रोहस्तर्कश्चिन्ता तत्र रतो विष्णुस्तस्येव रसस्तात्पर्यमारम्भश्चानुष्ठानं येषां ते तथा-भूता भवन्त आमन्त्र्यन्ते । कीदृशे मदसौ । धवा वृक्षविशेषास्तेषु लयो दुर्गधिया संश्रय-स्तेन तिरोहितमन्तरितमनवं बहुदिवसभवं यन्मद्ध्यानं मदीयचिन्तनम् । दुर्गस्था वयमतः स किं करिष्यतीति कृत्वा । तेन मच्चिन्तान्तर्धानेन मदो येषां ते च तेऽहिताश्च शत्र-वश्च तेषु स्तनिते तद्दारणाच्छणच्छणायमाने । खड्ग इत्यर्थः । अथवा धवाः पुरुषास्तेषां लयः स्वपौरुषकर्मकौशलम् । अनवम उत्कृष्टो ध्यानमदो नीतिशास्त्रचिन्तादर्पो येषां तेऽनवमध्यानमदा मन्त्रिप्राया उच्यन्ते । धवलयेन कर्मकौशलेन तिरोहिता न्यक्कृता अन-वमध्यानमदा यैस्ते तथा ते च तेऽहिताश्च शत्रवस्तेषु स्तनिते शब्दिते । अन्योऽप्यत्र यदि भङ्गः संभवति सोऽपि तद्विदा विचार्य कर्तव्य एव ॥

अथ लिङ्गश्लेषः—

स्त्रीपुंनपुंसकानां शब्दानां भवति यत्र सारूप्यम् ।
लघुदीर्घत्वसमासैर्लिङ्गश्लेषः स विज्ञेयः ॥८॥

गिराने में दक्ष हूँ तथा पृथ्वी पर घूमने वाला हूँ । अर्थात् मैं पृथ्वी पर रहते हुए भी अपनी खड्ग-विद्या से स्वर्गवासियों को भी नीचे गिराने वाला हूँ । बड़े-बड़े युद्ध-जयी शूरों के विनाश का इच्छुक हूँ । देवों के आङ्गन में अपराजित बलि-सेना के बन्धन में चिन्तामग्न विष्णु के सदृश अभिप्राय वाले तथा कार्य करने मित्रो ! बहुत दिनों तक मेरे पेड़ पर छिपे रहने के कारण निर्भय शत्रुओं पर छपछपाने वाली मेरी तलवार के आगे उस धनुर्धर का गर्व करना ठीक नहीं है ।६-७।

उक्त पद्य में श्लेष का आधार दोनों अर्थों में स्वतन्त्र पद हैं—जैसे सुरत-रुत-लालस [अथवा सुर-तरु-तल-अलस], सम-राजि-दन्त-रुचिर् [अथवा समर-अजित्-अन्तरुचिः] इन पदों को उक्त वर्णश्लेषगत उदाहरण के समान वर्णों में विभक्त नहीं किया जाता । अतः यहाँ पदश्लेष है ।

लिङ्ग श्लेष

जहाँ ह्रस्व तथा दीर्घ वर्णों (कहीं ह्रस्व वर्ण के दीर्घ बन जाने से, कहीं दीर्घ

स्त्रीपुमिति। यत्र स्त्रीपुंनपुंसकलिङ्गानां सारूप्यं भवत्यसौ लिङ्गश्लेषः। कैः कृत्वा। लघुदीर्घत्वसमासैरिति क्वचिद्दीर्घस्य लघुत्वेन। ह्रस्वत्वेनेत्यर्थः। क्वचिद्ध्रस्वस्य दीर्घत्वेन क्वचित्समासेन चेति॥

उदाहरणम्—

देवी मही कुमारी पद्मानां भावनी रसाहारी।
सुखनी राज तिरोऽहितमहिमानं तस्य सद्धारी॥९॥

देवीति। कश्चिद्राजानमाशास्ते—त्वं राज शोभस्व। तथा तिरश्चीनं यथा भवत्येवमहितं शत्रुं तस्य क्षयं नय। 'तसु उपक्षये' इत्यस्य रूपम्। कीदृशस्त्वम्। दीव्यतीति

के ह्रस्व बन जाने से) और कहीं समास के कारण पुंलिग, स्त्रीलिग और नपुंसकलिङ्ग शब्दों के रूपों में समानता हो वहाँ लिङ्गश्लेष रहता है।८।

उदाहरण

श्लिष्ट पदों का अर्थ

देवी—(क) क्रीडारतः (ख) आदरणीया

मही—(क) उत्सववान् (ख) पृथ्वी

कुमारी—(क) कुत्सितानां चौरादीनां मारयिता, (ख) नित्य तरुणी

पद्मानां भावनी—(क) [सेवकेभ्यः] लक्ष्मीप्रदः, (ख) कमलानां जनयित्री।

रसाहारी—(क) पृथ्व्याः आत्मसात्कर्ता, (ख) जलादिरसानां ग्रहणशीला।

सुखनीः—(क) [भृत्यादीनां] सुखदः, (ख) शोभन-आकरोपेता।

राजतिरोऽहितमहिमानं तस्य—(क) राज = शोभस्व। तिरः = कुटिलं (क्रियाविशेषण), अहितम् = शत्रुम्, अहिमानम् = वृत्रसदृश-दर्पयुक्तम्, तस्य = नाशय।

(ख) राजति = शोभते, रोहित-महिमा = आरोपित-माहात्म्या, अनन्तस्य = शेषस्य।

सद्धारी—(क) शिष्टानां पोषयिता, (ख) विद्यमान-वस्तूनां धारिका।

प्रथम अर्थ

अन्वय—(त्वम्) देवी, मही, कुमारी, पद्मानां भावनी, रसाहारी, सुखनीः, सदधारी (असि), (त्वम्) अहिमानम् अहितम् तिरः तस्य राज (च)।

कोई व्यक्ति राजा की प्रशंसा करते हुए कहता है—हे राजन्! तुम क्रीडाप्रिय हो, प्रसन्न रहने वाले हो, चौर आदि का नाश करने वाले हो, भृत्यों को धनादि से सम्पन्न करने वाले हो, शत्रु-देशों को हस्तगत करने वाले हो, सेवकों को सुख देने वाले हो, सज्जनों का पोषण करने वाले हो। वृत्रासुर की तरह अभिमानी शत्रु को बुरी तरह से विनष्ट करके शोभित होओ।९।

देवी क्रीडारतः, मही उत्सववान्, कुत्सितांश्चौरादीन्मारयतीति कुमारी। अथवा कुः पृथ्वी मारः कामस्तौ विद्येते यस्य स कुमारी। तथा पद्मानां श्रियां भावं सत्तां नयति भृत्येष्विति भावनी। सेवकानां लक्ष्मीप्रद इत्यर्थः। रसां भुवमाहरत्यात्मसात्करोतीति रसाहारी। यदि वा रसैर्मधुरादिभिराहरतीति रसाहारी। सुखं नयति भृत्यानिति सुखनीः, सतः शिष्टान्धारयति पोषयतीति सद्धारी, शोभनहारवान्वा। कीदृशम्। अहितमहिमानमहेर्वृत्रस्येव मानोऽहंकारो यस्य तं तथाविधम्। अयमेकस्य वाक्यस्यार्थः॥ अपरस्य तु—मही पृथ्वी राजति शोभते। देवीति पूजापदम्। कीदृशी मही। कुमार्यकृतविवाहा नित्यतरुणी वा। पद्मानां नलिनानां भावन्युत्पादिका। रसाञ्जलादीनाहरति गृह्णातीति। 'कर्मण्यणन्तादी।' सुखनिः शोभनाकरा। तथानन्तस्य शेषस्य रोहित आरोपितो महिमा माहात्म्यं यया। स्वयमात्मधारणे शक्तयाप्यनन्तस्य लोके माहात्म्यख्यापनात्मभरस्तयार्पित इत्यर्थः। सद्विद्यमानं वस्तुजातं धरतीति। 'कर्मण्यणन्तादी।' देवीत्यादौ दीर्घत्वे रसहारीत्यादौ दीर्घत्वे समासे च सारूप्यं दीर्घस्य। ह्रस्वत्वं त्वन्यत्र स्वधिया द्रष्टव्यम्॥

अथ भाषाश्लेषः—

यस्मिन्नुच्चार्यन्ते सुव्यक्तविविक्तभिन्नभाषाणि।
वाक्यानि यावदर्थं भाषाश्लेषः स विज्ञेयः॥१०॥

यस्मिन्निति। यत्र यावदर्थं कवेर्यावन्तोऽर्था विवक्षितास्तावन्ति वाक्यान्युच्चार्यन्ते स भाषाश्लेष इति। कीदृशानि। सुव्यक्तं स्फुटं यथा भवत्येवं विविक्ताः पृथगुपलभ्यमानविवेका भिन्ना द्वित्राद्या भाषा येषु तानि तथाविधानि॥

द्वितीय अर्थ

अन्वय—देवी, कुमारी, पद्मानां भावनी, रसाहारी, सुखनिः, अनन्तस्य रोहितमहिमा, सद्धारी मही राजति।

यह देवीस्वरूपा पृथ्वी शोभित है। यह (पृथ्वी) नित्य तरुणी है, कमलों को उत्पन्न करने वाली है, रसों का आदान करने वाली है। सुन्दर खानों से भरपूर है। शेषनाग को महत्त्व प्रदान करने वाली है, तथा सब वस्तुओं को धारण करती है।९।

उक्त पद्य में 'देवी', 'मही' आदि पदों में दीर्घरूपता तथा 'रसाहारी' आदि में समास और दीर्घरूपता होने से लिङ्ग-श्लेष का चमत्कार है।

भाषाश्लेष

जिसमें विभिन्न भाषाओं के नितान्त स्पष्ट तथा पृथक् मालूम पड़ने वाले एवं कवि के अभिवांछित अर्थों को प्रकट करने वाले दो-तीन वाक्य हों उसे भाषाश्लेष कहते हैं।१०।

तत्र संस्कृतप्राकृतश्लेषोदाहरणम्—

सरसबलं स हि सूरोऽसङ्गामे माणवं धुरसहावम्।
मित्तमसीसरदवरं ससरणमुद्धर इमं दबलम्[1] ॥११॥

सरसबलमिति। कश्चित्कंचिदाह—स सूरो रविरिमं तं माणवं रोगित्वात्कुत्सित-मनुष्यमसीसरत्सारयामास। गतियुक्तं चकारेत्यर्थः। कीदृशम्। सरसं गतिलाभात्प्रत्यग्रं बलं शक्तिर्यस्य तं तथाभूतम्। हि स्फुटम्। क्व सति पूर्वमसीसरदसङ्गामे न विद्यते सङ्गो यत्रासावसङ्गः स चासावामश्च तस्मिन्। असंपर्कयोग्ये रोगे सतीत्यर्थः। पुनः कीदृशं माणवम्। धुरसहावं धुरि प्रथममसहासमर्था अवा रक्षितारो वैद्या यस्य। पूर्वं वैद्यत्यक्तमित्यर्थः। सूरः कीदृशः। मिन्मेद्यति स्निह्यति। कृपणेषु दयापर इत्यर्थः। कीदृशम्। तमवरं सरोगत्वादश्रेष्टम्। तथा दवं लातीति दवलमुपतापयुक्तम्। कीदृशः।

उदाहरण

प्रथम अर्थ (संस्कृत भाषा के अनुसार)

अन्वय—सः मित् ससरण-मुत्-हरः सूरः असङ्ग-आमे धुर-सह-अवं, दव-लं, अवरं इयं तं माणवं सरस-बलं असीसरत्।

कोई किसी से कहता है कि योगियों को प्रसन्नता देने वाले कृपालु सूर्य ने संक्रामक रोग से ग्रसित उस मनुष्य में शक्ति का सञ्चार करके उसे चलने योग्य बना दिया। आरोग्य-लाभ से पहले चिकित्सक लोग उसकी अवस्था से निराश होकर अपनी असमर्थता प्रकट कर चुके थे। इससे वह अत्यन्त सन्तप्त था।११।

द्वितीय अर्थ (प्राकृत भाषा के अनुसार)[1]

अन्वय—सः हि शूरः संग्रामे शर-शबलं, मान-बन्धुर-स्वभावं, असीश्वर-दवरं, सशरणं [किन्तु सम्प्रति] मन्दबलं मित्रम् उद्धरति।

कोई नायिका अपने भर्ता के विषय में सखी से कहती है कि मेरे वीर स्वामी ने युद्ध में उस मित्र की रक्षा की जो विचित्र वर्ण-बाणों को धारण करने वाला है, मनस्वी एवं सुस्वभाव है। खड्ग से युद्ध करने वाले योद्धाओं को सन्ताप देने वाला है तथा शरणागतों का रक्षक है, किन्तु जिस की सेना लड़ते-लड़ते निर्बल हो चुकी थी।११।

उक्त पद्य का प्रथम अर्थ संस्कृत के अनुसार है और दूसरा अर्थ प्राकृत के अनुसार।

---

१. प्राकृतच्छाया—शरशबलं सखि शूरोऽसंग्रामे मानबन्धुरस्वभावम्।
मित्रमसीश्वरदवरं सशरणमुद्धरति मन्दबलम्॥

ससरणमुद्धरः सह सरणेन ज्ञानेन वर्तन्ते ये ते ससरणा योगिनस्तेषां मुदं हर्षं धारयति पुष्णातीति कृत्वेति संस्कृतवाक्यार्थः। प्राकृतस्य तु—काचिद्भर्तारमुद्दिश्य सखीमाह—हे सखि, स शूरोऽस्मद्भर्ता मित्रं सुहृदं संग्रामे रण उद्धरति रक्षति। कीदृशम्। शरैर्बाणैः शबलं कर्बुरम्। तथा मानेन गर्वेण बन्धुरो रम्यः स्वभावो यस्य तं तथाभूतम्। तथासीश्वराणां खड्गयोधिनां दवरमुपतापदम्। तथा सह शरणेन वर्तते यस्तं सशरणं परित्राणार्थिनामार्तिहरम्। यद्येवंविधं तत्किमिति तेनोद्ध्रियत इत्याह—मन्दबलं मन्दमसमर्थं बलं यस्य तं तथाभूतम्। बहुयोधनादक्षमसैन्यमिति॥

इदानीं संस्कृतमागध्युदाहरणम्—

कुलला लिलावलोले शलिलेशे शालशालिलवशूले।
कमलाशवलालिबलेऽमाले दिशमन्तकेऽविशमे[1] ॥१२॥

कुलेति। कश्चिज्जातसंसारभयो वक्ति—एवंविधेऽन्तके मृत्यौ सति ए विष्णो विषये या दिङ्मार्गस्तां दिशमविशं प्रविष्टोऽस्मि। कीदृशेऽन्तके। कुलानि लालयन्ति

उदाहरण

प्रथम अर्थ (संस्कृत के अनुसार)

अन्वय—कुल-लालि-लाव-लोले, शलि-लेशे, शाल-शालि-लव-शूले, कमला-शवलालि-बले, अमाले अन्तके (सति) ए दिशम् अविशम्।

कोई व्यक्ति संसार की विडम्बनाओं से घबराकर कहता है—इस निर्मम यमराज के कठोर शासन से भयभीत होकर मैं तो शरणागतवत्सल भगवान् विष्णु की शरण में चला गया हूँ। यह यमराज सज्जनों के नृशंस वध में पटु है। उद्योगियों को अथवा खड्ग से लड़ने वाले योद्धाओं को नष्ट करता है। बड़े-बड़े प्रासादों में विराजमान लोगों के लिए भी यह शूल-सदृश है। यम की सेना दरिद्रों का भी पीछा नहीं छोड़ती। प्रत्येक प्राणी को इसका सामना करना अनिवार्य है।१२।

द्वितीय अर्थ (मागधी के अनुसार)[1]

अन्वय—विषमे कुररा-आलि-राव-रोले, सारस-आलि-रव-शूरे, कमल-आसवल-अलिवरे, शे सलिले शमन्तके मालेदि।

शरद् ऋतु में कुरर पक्षियों के शब्दों से कोलाहलपूर्ण विमुक्त सारस पक्षियों को मारने में समर्थ, मकरन्द लाने वाले भ्रमरों के कारण श्रेष्ठ वियोगियों के लिए भीषण इस जल को देखकर मुनि भी क्षुब्ध हो उठते हैं, क्योंकि यह जल शान्त तपस्वियों को भी मारने वाला है।१२।

---

१. मागधीच्छाया—कुररालिरावरोलं सलिलं तत्सारसालिरवशूरम्।
कमलासवलालिवरं मारयति शाम्यतो विषमम्॥

पोषयन्ति तच्छीलाः कुललालिनः सत्पुरुषास्तेषां लावे छेदे कर्तव्ये लोलो लम्पटो यस्तस्मिन् । तथा शलन्तीति शलाः सोद्यमास्ते विद्यन्ते यत्र देशे स शली । यद्वा शलं खड्गकोषबन्धोऽस्ति येषां ते शलिनः खड्गयोधास्तांल्लिशत्यल्पीकरोतीति शलीलेशस्तस्मिन् । तथा शालैर्गृहैः शालन्ते श्लाघन्त इत्येवंशीलाः शालशालिनस्तांल्लुनातीति शालशालिलवः स चासौ शूलं च । पीडाकरत्वात् । तथा कमला लक्ष्मीस्तस्याः शवा दरिद्रास्तेष्वपि ललति विलसतीत्येवंशीलं बलं सैन्यं यस्य स तथा तस्मिन् । तथामाले । 'मल धारणे ।' मलनं मालो न विद्यते मालो यस्यासावमालस्तस्मिन् । अनिवार्य इत्यर्थः । एष संस्कृतवाक्यार्थः ॥ मागधस्य तु—शे शलिले तत्सलिलं जलं शमन्तके शाम्यतः शमिनोऽपि मालेदि मारयति । कीदृशं तत् । कुरराः पक्षिविशेषास्तेषामालिः पङ्क्तिस्तदीयै रावैः शब्दै रोलः कलकलो यत्र तत्तथाभूतम् । तथा सारसालिरवेण सारसश्रेणिवाशितेन शूरं तद्विरहिमारणसमर्थम् । तथा कमलानां पद्मानामासवं मकरन्दाख्यं लान्ति ये ते च तेऽलिनश्च भ्रमरास्तैर्वरं श्रेष्ठं यत्तत् । तथा विषमं वियोगिभीषणमेवंविधं शरदि सलिलं विलोक्य मुनयोऽपि क्षुभ्यन्ति । इति मागधवाक्यार्थः ॥

इदानीं संस्कृतपिशाचभाषाश्लेषोदाहरणमाह—

कमनेकतमादानं सुरतनरजतु च्छलं तदासीनम् ।
अप्पतिमानं खमते सोऽगनिकानं नरं जेतुम्[1] ॥१३॥

उदाहरण

प्रथम अर्थ (संस्कृत-भाषा के अनुसार)

अन्वय—(हे) सुरत-नः ! ख-मते । सः अनेकतम-आदानं छलं तत्-आसीनं, अप्पति-मानं, अग-निकानं, कं नरं जेतुम् अजतु ।

कोई व्यक्ति किसी के द्वारा की हुई दूसरे की प्रशंसा को न सहकर कहता है—

अरे मूर्ख ! रति-युद्ध प्रवीण ! (तुम रणभूमि में वीरता दिखाना क्या जानो) वह मनुष्य भला कैसे उसको विजय करने की डींग मारता है (उसे जीतना कठिन है), क्योंकि जादूगर होने के कारण उसके उत्पत्ति के स्थान अनेक हैं। वह वरुण के समान मानी एवं वर्चस्वी है । मन्दराचल के समान उसकी कान्ति है ।१३।

द्वितीय अर्थ (पिशाच-भाषा के अनुसार)

अन्वय—सः रंजयितुं कमने कृतमोदानां सुरन-रजत-उच्छलद्दासीनां गणिकानां अप्पतिमानं न क्षमते ।

---

१. पैशाचीछाया—कामे कृतामोदानां सुवर्णरजतोच्छलद्दासीनाम् ।
अप्रतिमानं क्षमते स गणिकानां न रञ्जयितुम् ॥

कमिति । कस्यचित्केनचित्पौरुषस्तुतिः कृता । ततोऽन्यस्तामसहमान आह—हे सुरतनः निधुवनपुरुष, ते तव पौरुषं न रणे इत्यामन्त्रणपदाभिप्रायः । तथा खमते शून्यबुद्धे, यस्त्वया वर्ण्यते स कं नरं जेतुमजतु गच्छतु । नास्त्येवासौ पुरुषो यं सोऽभिभविष्यतीत्यर्थः । कीदृशं नरम् । अनेकतमान्यादानान्युत्पत्तिस्थानानि यस्य तं तथाभूतम् । तथा छलं तदासीनं तां मायामाश्रितम् । आश्रयणार्थः 'आसिः' सकर्मकः । तथापां पतेरप्पतेर्वरुणस्येव मानो गर्वो यस्य तम् । तथागस्येव मन्दरस्येव निकाना दीप्तिर्यस्य तम् । अथवा न गच्छतीत्यगो निकानो यस्येत्यन्यथास्य वाक्यस्यार्थः । अथवा यदा न सन्त्येवंविधास्तदा सर्वमेव तेन यतो जितमतः स कमिव नरं जेतुमजत्विति स्तुतिरेवात्रार्थः । इति संस्कृतवाक्यार्थः ।। पैशाचस्य तु—केनचिद्वेश्यानामुपकारः कृतः । ताभिस्तु तस्य न कृत इति सोऽत्र वर्ण्यते—स पूजितगणिकः पुरुषो गणिकानां वेश्यानामप्पतिमानमप्रतीपमपूजनं न क्षमते न सहते । किमर्थम् । रञ्जयितुमात्मरञ्जनाय । इदानीं मां ताः पूजयन्त्वित्येवमर्थम् । कीदृशीनां गणिकानाम् । कामविषये कृतामोदानां कृतहर्षाणाम् । तथा सुरन (स्वर्ण) रजताभ्यामुच्छलन्त्यो विलसन्त्यो दास्यो यासाम् । पिशाचभाषायां कगचजतदपयवानां लोपो न क्रियत इत्यादिपूर्वोक्तं लक्षणम् ।।

इदानीं संस्कृतसूरसेनीवाक्योदाहरणमाह—

तोदी सदिगगणमदोऽकलहं स सदा बलं विदन्तरिदम् ।
आर दमेहावसरं सासदमारं गदासारम्[1] ।।१४।।

किसी ने वेश्याओं का उपकार किया, किन्तु उन्होंने उसका सम्मान नहीं किया । इस श्लोक में उस पुरुष का वर्णन है--

गणिकाओं की पूजा (उपकार) करने वाला वह पुरुष उनसे प्रत्युपकार की आशा रखता है और उसके प्राप्त न होने से रुष्ट है। वे वेश्याएँ काम-सम्बन्धी बातों में अत्यन्त आनन्दित होने वाली हैं, उनकी दासियाँ भी सोने-चाँदी में खेलती हैं ।१३।

संस्कृत और शौरसेनी का उदाहरण

प्रथम अर्थ (संस्कृत भाषा के अनुसार)

अन्वय—तोदी, सदिक्, अगण-मदः सः वित् सदा अकलहं, दम-ईहा-अवसरं, सासदं, गदा-सारम्, इदम् आरं बलम् अन्तः आर ।

युद्ध करते हुए मनुष्य का वर्णन है—वह युद्धकला-निपुण, शत्रुपीड़क, व्यूह-रचना से अभिज्ञ, परानपेक्षी तथा अपने भुजबल पर आश्वस्त व्यक्ति शत्रुओं की सेना में

---

१. सूरसेनीछाया--ततो दृश्यते गगनमदः कलहंसशतावलम्बितान्तरितम् ।
आर तमेघावसरं शाश्वतमारं गतासारम् ।।

तोदीति । कश्चिन्नरो रणस्थो वर्ण्यते—स कश्चिच्छूरो वित्पण्डित इदमारमरिसक्तं बलं सैन्यमन्तर्मध्य आर ससार । कीदृशोऽसौ । तुदति परानिति तोदी । तथा देशनं दिगुपदेशो व्यूहरचनादिविषयः सह दिशा वर्तत इति सदिक् । तथा न गणेन सहायवर्गेण मदो यस्यासावगणमदः स्वभुजबलसहायकापेक्ष इत्यर्थः । सदा सर्वकालमेव । कीदृशं बलम् । अकलहं परिभूतत्वान्निर्वैरम् । अत एव दमेहाया उपशमचेष्टाया अवसरः कालो यस्य तत्तथाभूतम् । तथास्यन्ते क्षिप्यन्त इत्यासाः शरास्तान्घ्नन्ति खण्डयन्तीत्यासदा धानुष्काः सह तैर्वर्तत इति सासदम् । तथा गदाभिः सारमुत्कृष्टम् । एष संस्कृतवाक्यार्थः ।। सूरसेन्यास्तु—शरदि नभो वर्ण्यते—तो इति ततः प्रावृषोऽनन्तरं दृश्यतेऽवलोक्यते । गगनं नभः । अद एतत् । कीदृशम् । कलहंसशतैरवलम्बितं चान्तरितं च । तथा आरतो निवृत्तो मेघानां घनानामवसरः कालो यत्र । यदि वा आरता उपरता मेघानामाप एव शरा बाणा यत्र तत्तथाभूतम् । तथा शाश्वतः स्थिरो मारः कामो यत्र । तथा गत आसारो वेगवर्षो यतस्तत्तथाभूतम् ।।

अथ संस्कृतापभ्रंशयोः श्लेषोदाहरणमाह—

[1]धीरागच्छदुमे हतमुदुद्धरवारिसदःसु ।
अभ्रमदप्रसराहरणुरविकिरणा तेजःसु ।।१५।।

घुसता चला गया । वह सेना पराजित होने के कारण निर्वैर थी तथा संधि के लिए अवसर देख रही थी । उस सेना में अन्धे धनुर्धर तथा गदाचालन-पटु योद्धा भी थे ।१४।

द्वितीय अर्थ (सूरसेनी भाषा के अनुसार)

अन्वय—तो कलहंस शतैरलम्बितं अन्तरितं (च) आरतमेघावसरं शाश्वतमारं गत-आसारं अदः गगनं दृश्यते ।

इसमें शरत् का वर्णन है—वर्षा के अनन्तर आकाश में सैकड़ों कलहंस उड़ते दिखायी दे रहे हैं, आकाश उनसे छिप-सा गया है । अब मेघों का समय चला गया है । कामजनित विकार इस ऋतु में शान्त हो गये हैं । अब वृष्टि का वेग भी समाप्त हो चुका है ।१४।

संस्कृत और अपभ्रंश का श्लिष्ट उदाहरण

प्रथम अर्थ (संस्कृत के अनुसार)

अन्वय—उमे ! धीरा [भव] । अभ्र-मद्-अप्प्रसरा, अवि-किरणा, अहः हत-मुत्, अणुः [गङ्गा] उद्-धर-वारि-सदःसु तेजःसु अगच्छत् ।

---

१. अपभ्रंशच्छाया—धीरा गच्छतु मेघतमो दुर्धरवार्षिकदस्यु ।
अभ्रमदप्रसरा हरणं रविकिरणास्ते यस्य ।।

धीरेति । अत्र काचिद्गौरीसखी गङ्गायाः सपत्न्या व्यसनेन गौरीमानन्दयति—यथा हे उमे गौरि, धीरा स्वस्था भवेति क्रिया गम्यते । यतः, अभ्रे गगने माद्यत्युद्धतो भवति यः स तथाविधोऽपां जलानां प्रसरो यस्याः सा अभ्रमदप्प्रसरा गङ्गा अवेरिव गड्डरिकाया इव किरणं विक्षेपणं निर्वासनं यस्याः साविकिरणा । अहर्दिवसमपि । 'कालाध्वनोरत्यन्तसंयोगे–' इति कर्म । अत एव हतमुद्गतहर्षा । तत एव चाणुः कृशा सत्यगच्छदपतत् । क्व तेजःसु । कीदृशेषु । उद्गता धरा पृथ्वी प्रलयापन्निमग्ना सती यस्मात्तदुद्धरं तच्च तद्वारि च समुद्रजलं च तदेव सदो गृहं येषां तानि तथाविधानि तेषु । वडवानलतेजःस्वित्यर्थः । हरनिर्वासनदुःखिता सती गङ्गात्मानं वडवानलेन्धनीचकारेति भावार्थः । एष संस्कृतवाक्यार्थः ।। अथवा काचित्सखी गौर्याः पुरतो हरसमरं वर्णयति—हे उमे, धीर्बुद्धिरागच्छदागता । कथमहतमुदनष्टहर्षं यथा भवति तथोद्गता निवृत्ता हरवारिणो हरनिषेधकाः शत्रवो यत्र कर्मणि तदुद्धरवारि यथा भवति यथास्माकं बुद्धिस्तुष्टिश्चाभूत्तथा हरेणारयो जिता इत्यर्थः । सा च धीः सदःसु सभासु तेजःसु च परतेजोविषयेऽभ्रमत्प्रसृता । तेजस्ततारेत्यर्थः । कीदृशी धीः । सर्वगत्वादपामिव प्रसरो गतिर्यस्याः साप्प्रसरा । अहर्दिवसम् । सदेत्यर्थः । अणुः कुशाग्रीया । तथाविकिरणा निरसितुमशक्या । इति संस्कृतवाक्यार्थः ।। अपभ्रंशस्य तु—वर्षावर्णनम्—हे धीराः, गच्छत्वपसरतु । किम् । तन्मेघकृतं तमो मेघतमः कीदृशम् । दुर्धरा दुर्वारा वार्षिका वर्षासु भवा दस्यवश्चोरा यत्र । यदि वा वार्षिका मेघा एव दस्यवश्चौरास्तेजसो हरणाद्यत्र । तथा यस्य मेघतमसस्ते रविकिरणाः सूर्यकरा हरणं हर्तारः । कीदृशाः । अभ्रमदप्रसरा

एक सखी गौरी को उसकी सपत्नी गङ्गा की विपत्ति का हाल सुनाकर आनन्दित करती है—

हे गौरि ! अब प्रसन्न होओ । क्योंकि आकाश में पहले जिस गङ्गा का वेगपूर्ण जल-प्रवाह प्रसारित होता था अब उस गङ्गा को भेड़ की भाँति घर से निर्वासित कर दिया गया है । इस कारण उसका सारा सुख मिट्टी में मिल गया है । वह क्षीणकाय होकर समुद्र-जल में स्थित वडवानल के मुख में जा गिरी है ।१५।

द्वितीय अर्थ (अपभ्रंश के अनुसार)

अन्वय—[हे] धीराः ! दुर्धर-वार्षिक-दस्यु मेघतमः गच्छतु । अभ्रम-द-प्रसराः रविकिरणः यस्य हरणम् ।

इससें वर्षा-वर्णन है—हे बुद्धिमान्, धीर व्यक्तियो ! अब मेघजनित अन्धकार का नाश हो, जिसमें वर्षाकाल में होने वाले अनेक भयंकर चोर-लुटेरे बसते हैं । पदार्थों का यथार्थ प्रकाशन करने वाली सूर्य की किरणें जिस अन्धकार का नाश करती हैं ।

भ्रमो भ्रान्तिर्न भ्रमो निश्चयस्तं ददातीत्यभ्रमदः प्रसरो येषां ते तथाविधाः । यथावस्थितं वस्तुस्वरूपं ये प्रकाशयन्तीत्यर्थः ।।

अथ भाषाश्लेषस्य प्रकारान्तरमाह—

वाक्ये यत्रैकस्मिन्ननेकभाषानिबन्धनं क्रियते ।
अयमपरो विद्वद्भिर्भाषाश्लेषोऽत्र विज्ञेयः ।।१६।।

वाक्य इति । यत्रैकस्मिन्नेव वाक्येऽनेकभाषा निबध्यन्ते सोऽयमपरः पूर्वस्मादन्यो भाषाश्लेषोऽत्र ज्ञातव्यः । पूर्वत्रानेकार्थोऽनेकाभिर्भाषाभिरुक्तः, इह त्वेक एवार्थो बह्वीभिर्भाषाभिरुच्यत इति तात्पर्यार्थः ।।

उदाहरणम्—

समरे भीमारम्भं विमलासु कलासु सुन्दरं सरसम् ।
सारं सभासु सूरिं तमहं सुरगुरुसमं वन्दे ।।१७।।

समर इति । तमहं सूरिं वन्दे स्तौमि कीदृशम् । समरे रणे भीमारम्भं भीषणोद्योगम् । विमलासु कलासु सुन्दरं निर्मलकलाविषये शोभनम् । सरसं शृङ्गारादिरसोपेतम् । तथा सभासु सदःसु सारमुत्कृष्टम् । अत एव सुरगुरुसमं बृहस्पतितुल्यम् ।

भाषा-श्लेष का एक अन्य प्रकार

जहाँ एक ही वाक्य में [एक अर्थ को प्रतिपादित करने वाली] अनेक भाषाओं का प्रयोग हो वह एक अन्य भाषा-श्लेष है।१६।

पूर्वोक्त भाषा-श्लेष के उदाहरणों में अनेक भाषाओं से अनेक अर्थ व्यक्त थे, किन्तु निम्नोक्त उदाहरणों में अनेक भाषाओं से एक ही अर्थ प्रकट होता है ।

उदाहरण (संस्कृत और प्राकृत के समान शब्दों से बना श्लोक)

अन्वय—अहं समरे भीमारम्भं, विमलासु कलासु सुन्दरं, सरसं, सभासु सारं, सुरगुरुसमं तं सूरिं वन्दे ।

मैं बृहस्पति-तुल्य विद्वान् का अभिवादन करता हूँ जो रणभूमि में प्रचण्ड वीरता से युद्ध करता है । सुन्दर कलाओं में निष्णात तथा शृङ्गारादि रस-वर्णन में पटु है, जो सभाओं का तो मानो प्राण है ।१७।

यह श्लोक संस्कृत और प्राकृत के समान शब्दों से विरचित है । दोनों भाषाओं से एक ही अर्थ व्यक्त होता है ।

अन्य उदाहरण (संस्कृत और मागधी के समान शब्दों से बना श्लोक)

अन्वय—[यतः] दुःशीलाः खलाः काले अशमदशं अशिवम् दिशन्ति । [अतः ते] शबलाः शूलं शलन्तु, वा शं विशन्तु, [वा] वशं (यान्तु), वा विशङ्का [भवन्तु] ।

अयमेकत्रार्थे संस्कृतप्राकृतश्लेषः समसंस्कृतप्राकृतशब्दरचितत्वात् । एवमुत्तरत्रापि समसंस्कृतमागधशब्दरचितत्वादित्यादि द्रष्टव्यम् ॥

समसंस्कृतमागधशब्दोदाहरणमाह—

शूलं शलन्तु शं वा विशन्तु शबला वशं विशङ्का वा ।
अशमदशं दुःशीला दिशन्ति काले खला अशिवम् ॥१८॥

शूलमिति । दुःशीला दुष्टचारित्राः खलाः शलवोऽशिवं पीडादिकं दिशन्ति ददति यतोऽतस्ते शबलाः पातकिनः शूलं वा शलन्त्वधिरोहन्तु । शं वा सुखं वा विशन्त्वधिगच्छन्तु । वशं पराधीनतां वा यान्तु । विशङ्काः स्वच्छन्दा वा भवन्तु तच्चिन्तामपि न कुर्मः । कीदृशमशिवम् । अविद्यमानः शम उपशमो यस्यां सा तथाविधा दशावस्था यत्र तदशमदशम् ॥

संस्कृतपैशाचिकयोः श्लेषोदाहरणमाह—

चम्पककलिकाकोमलकान्तिकपोलाथ दीपिकानङ्गी ।
इच्छति गजपतिगमना चपलायतलोचना लपितुम् ॥१९॥

चम्पकेति । काचिन्नायिका गजेन्द्रसमगमना चञ्चलदीर्घलोचना च । तथा चम्पककलिकावत्कोमलकान्ती रम्यरुची कपोलौ यस्याः सा तथाविधा । तथानङ्गस्येयमानङ्गी दीपिका । तया कामस्य प्रकाशितत्वात् । सा लपितुं वक्तुमिच्छति ॥

दुष्ट लोग इस प्रकार दुःख देते हैं कि मानसिक शान्तिविहीन मरणावस्था का-सा कष्ट होता है। वे पातकी शूली पर चढ़ें या सुख भोगें, पराधीन बनें अथवा स्वच्छन्द विहार करें हम इस बात की चिन्ता नहीं करते ।१८।

उदाहरण (संस्कृत और पैशाची के समान शब्दों से बना श्लोक)

अन्वय—चम्पककलिकाकोमलकान्तिः, अथ आनङ्गी दीपिका, गजपतिगमना, चपलायत लोचना (सा काचित्) लपितुम् इच्छति ।

चम्पा की कली के समान कोमलकान्त कपोलों से युक्त, काम की दीपिका रूप (प्रकाशिका), गजेन्द्र के समान धीर गति वाली तथा चञ्चल एवं दीर्घ नेत्रों वाली यह नायिका कुछ कहना चाहती है ।१९।

उदाहरण (संस्कृत और शौरसेनी (सूरसेनी) से बना श्लोक)

अन्वय—मदिरामद मधुरवाणि ! सुपीवर-परिणाहिपयोधरारम्भे ! तरुणाः ते सामोदं अधरदलं साधु पिबन्तु ।

अथ संस्कृतसूरसेनीश्लेषमाह—

अधरदलं ते तरुणा मदिरामदमधुरवाणि सामोदम् ।
साधु पिबन्तु सुपीवरपरिणाहिपयोधरारम्भे ॥२०॥

अधरेति । मदिरामदेन मधुरा वाणी यस्याः सा संवोध्य भण्यते । ते तवाधरदलमोष्ठपल्लवं तरुणा युवानः साधु यथा भवत्येवं पिबन्तु चुम्बन्तु । कीदृशम् । सामोदं सुगन्धि । किंविशिष्टे । सुष्ठु पीवरो मांसलः परिणाही परिमण्डलः पयोधरारम्भः कुचाभोगो यस्याः सैवमामन्त्र्यते ॥

संस्कृतापभ्रंशश्लेषमाह—

क्रीडन्ति प्रसरन्ति मधु कमलप्रणयि लिहन्ति ।
भ्रमरा मित्र सुविभ्रमा मत्ता भूरि रसन्ति ॥२१॥

क्रीडन्तीति । कश्चित्कंचिदाह—हे मित्र, भ्रमरा मत्ताः सन्तः क्रीडन्ति विचरन्ति । प्रसरन्तीतस्ततो गच्छन्ति । तथा मधु मकरन्दं कमलप्रणयि पद्मसंबद्धं लिहन्त्यास्वादयन्ति । कीदृशाः । सुष्ठु विभ्रमो येषां ते तथाविधाः । तथा भूरि प्रभूतं रसन्ति शब्दायन्ते । अन्योऽपि मत्त एवंविधो भवति ॥

भाषाश्लेषमुपसंहरन्नाह—

एवं सर्वासामपि कुर्वीत कविः परस्परं श्लेषम् ।
अनयैव दिशा भाषास्त्र्यादी रचयेद्यथाशक्ति ॥२२॥

एवमिति । तथा संस्कृतभाषाया अन्याभिर्भाषाभिः सह श्लेषः कृत एवमन्यासामपि परस्परं कर्तव्योऽसौ । तद्यथा—प्राकृतभाषाया मागधिकापैशाचीसूरसेन्यपभ्रंशैः

हे मदिरा के मद से मधुर बोलने वाली तथा अतिस्थूल एवं विशाल स्तनों वाली ! युवक-जन तुम्हारे सुगन्धित अधरों का रुचिपूर्वक पान करें ।२०।

उदाहरण (संस्कृत और अपभ्रंश के समान शब्दों से बना श्लोक)

अन्वय—हे मित्र ! सुविभ्रमाः भ्रमराः मत्ताः (सन्तः) क्रीडन्ति, प्रसरन्ति, कमलप्रणयि मधु लिहन्ति, भूरि रसन्ति ।

हे मित्र ! भौंरे मदमत्त होकर इधर-उधर घूम रहे हैं, कमलों के मधु का स्वाद लेकर अनेक प्रकार से सुन्दर विलास करते हुए सतत शब्द कर रहे हैं ।२१।

इस प्रकार न केवल संस्कृत अपितु अन्य सभी भाषाओं का भी कवि उपर्युक्त विधि से यथाशक्ति (एक वाक्य तथा अनेक वाक्यों में) परस्पर श्लेष करें । इसमें तीन, चार, पाँच अथवा छः तक भाषाएँ संश्लिष्ट की जा सकती हैं ।२२।

सह, मागधिकायाः पैशाच्याः सूरसेन्यपभ्रंशैः पैशाच्याः सूरसेन्यपभ्रंशाभ्याम्, सूरसेन्या अपभ्रंशेन । एते दश भेदाः प्राच्यैः सह द्वियोगे सर्व एव पञ्चदश भेदा भवन्ति। तथानयैव दिशानेनैव न्यायेन त्र्यादीस्तिस्रश्चतस्रः पञ्च षड्वा युगपच्छ्लिष्टा भाषा यथासामर्थ्यमेकवाक्यतया भिन्नवाक्यतया वा रचयेत्। तत्र त्रियोगे विंशतिर्भेदाः। यथा—सं० प्रा० मा० १, सं० प्रा० पै० २, सं० प्रा० सू० ३, सं० प्रा० अ० ४, प्रा० मा० पै० ५, प्रा० मा० सू० ६, प्रा० मा० अ० ७, मा० पै० सू० ८, मा० पै० अ० ९, पै० सू० अ० १०, सं० मा० पै० ११, सं० मा० सू० १२, सं० मा० अ० १३, प्रा० पै० सू० १४, प्रा० पै० अ० १५, प्रा० सू० अ० १६, सं० पै० सू० १७, सं० पै० अ० १८, प्रा० सू० अ० १९, सं० सू० अ० २०। चतुर्योगे तु पञ्चदश। तद्यथा—सं० प्रा० मा० पै० १, सं० प्रा० मा० सू० २, सं० प्रा० मा० अ० ३, प्रा० मा० पै० सू० ४, प्रा० मा० पै० अ० ५, मा० पै० सू० अ० ६, सं० मा० पै० सू० ७, सं० मा० पै० अ० ८, सं० पै० सू० अ० ९, प्रा० पै० सू० अ० १०, सं० प्रा० सू० अ० ११, सं० मा० सू० अ० १२, सं० प्रा० पै० सू० १३, सं० प्रा० पै० अ० १४, प्रा० मा० सू० अ० १५। पञ्चयोगे षट्। तद्यथा—सं० प्रा० मा० पै० सू० १, सं० प्रा० मा० पै० अ० २, सं० मा० पै० सू० अ० ३, सं० प्रा० पै० सू० अ० ४, सं० प्रा० मा० सू० अ० ५, प्रा० मा० पै० सू० अ० ६। षड्योगे त्वेक एव भेदः ॥

तत्र षड्योगादिकप्रदर्शनायैकार्थश्लेषमेकमुदाहरणमाह—

अकलङ्ककुल कलालय बहुलीलालोल विमलबाहुबल।
खलमौलिकील कोमल मङ्गलकमलाललाम लल ॥२३॥

अकलङ्केति। हे एवंविध, त्वं लल क्रीड। कीदृश। अकलङ्ककुल निर्मलान्वय। कलालय कलावास। बहुलीलालोल प्रचुरविलासलम्पट। विमलबाहुबल प्रकटभुजपराक्रम। खलमौलिकील दुर्जनशिरःशङ्को। कोमल कमनीय। मङ्गलकमलाललाम जयलक्ष्मीचिह्न। अत्रैकस्मिन्नर्थे भाषाषट्कस्यापि समानं रूपम् ॥

उदाहरण

अन्वय—हे अकलङ्ककुल ! कलालय ! बहुलीलालोल ! विमलबाहुबल ! खलमौलिकील ! कोमल ! मङ्गलकमलाललाम ! (त्वम्) लल !

हे निर्मल वंशरत्न ! कलाओं के मन्दिर ! अनेकविध विलासों में आसक्त ! भुजबल द्वारा यशोपार्जन करने वाले ! दुष्टों के मस्तक पर कील के सदृश ! सुन्दर ! जयलक्ष्मी के चिह्न ! तुम सदा क्रीडा में रत रहो।२३।

छः भाषाओं के समान शब्दों से बने इस श्लोक से एक ही अर्थ व्यक्त हुआ है।

अथ प्रकृतिश्लेषमाह—

सिद्ध्यति यत्रानन्यैः सारूप्यं प्रत्ययागमोपपदैः ।
प्रकृतीनां विविधानां प्रकृतिश्लेषः स विज्ञेयः ॥२४॥

सिद्ध्यतीति । यत्र प्रत्ययैरागमैरुपपदैश्चानन्यैस्तैरेव प्रकृतीनां तु नानाप्रकाराणां सारूप्यं समानरूपता सिद्ध्यति स प्रकृतिश्लेषः ॥

तत्रोदाहरणमाह—

परहृदयविदसुरहितप्राणनमत्काव्यकृत्सुधारसनुत् ।
सौरमनारं कलयति सदसि महत्कालचित्सारम् ॥२५॥

परेति । देवासुरयुद्धं वर्ण्यते—सौरं सुरसमूहः कर्तृ कलयति कलिं गृह्णाति । युद्ध्यत इत्यर्थः । क्व सन्तः । अस्यन्ते क्षिप्यन्ते यत्र तत्सदस्तत्र सदसि युद्धे । सौरं कीदृशम् । परहृदयानि रिपुवक्षांसि विध्यतीति परहृदयवित् । यथासुरहितानां दानवपक्षपातिनां प्राणनं जीवनं मथ्नातीत्यसुरहितप्राणमत् । तथा काव्यं दानवगुरुं कृन्तति पीडयतीति काव्यकृत् । तथा सुधारसममृतरसं नौति स्तौतीति सुधारसनुत् । तथा देवत्वान्न विद्यते नारं नरसमूहो यत्र तदनारम् । तथा महत्प्रभूतम् तथा काले कृत्य-

---

प्रकृतिश्लेष

जहाँ विविध प्रकृतियों की अनन्य प्रत्यय, आगम और उपपदों के साथ समानरूपता हो उसे प्रकृतिश्लेष कहते हैं ।४२।

उदाहरण

प्रथम अर्थ

अन्वय—परहृदय-वित्, असुर-हित-प्राणन-मत्, काव्यकृत्, सुधा-रस-नुत्, अनारं, महत् कालचित् सौरं सदसि सारं कलयति ।

देवासुर संग्राम का वर्णन है—देवता लोग युद्ध में शत्रु-दानवों के हृदय को बींधते हैं, शत्रुओं के पक्षपातियों के प्राणों का मंथन करते हैं (हरण करते हैं) । दानवों के गुरु शुक्राचार्य को पीड़ित करते हैं तथा अमृत की प्रशंसा करते हैं । कार्य करने के समय उनकी चेतना-शक्ति अत्यन्त प्रबुद्ध रहती है । देवताओं के यहाँ मनुष्यों का वास नहीं होता । इस प्रकार वे अपने शत्रुओं के साथ युद्ध करते हैं ।२५।

द्वितीय अर्थ

अन्वय—महत्, पर-हृदय-वित्, असु-रहित-प्राणन-मत्, काव्यकृत्, सुधार-स-नुत्, अनारं, कालचित् सौरं सदसि सारं कलयति ।

विद्वान् लोग सभा में उत्कृष्ट अथवा उचित वस्तु का विश्लेषण करते हैं । पूज्य-जन का समादर करते हैं । सज्जनों को सताने वाले दुष्टों को सुधारते हैं । कलाओं का

करणसमये चिच्चैतन्यं ज्ञानं यस्य तत्कालचित् तथा सहारेणारिसमूहेन वर्तते यत्तत्सारं यथा भवत्येवं कलयति । एष एकस्य वाक्यस्यार्थः ।। परस्यापि तादृशान्येव पदानि । सौरं सूरिसमूहः सारमुत्कृष्टं वस्तु न्याय्यं वा सदसि सभायां कलयति परिच्छिनत्ति । किं कुर्वत्सौरम् । महत्पूजयत्पूज्यजनम् । तथा परहृदयवित्परचित्तज्ञम् । तथासुरहितानां प्राणवर्जितानां प्राणनेन प्रत्युज्जीवनेन माद्यति हृष्यतीत्यसुरहितप्राणनमद् । तथा काव्यं कविकर्म करोतीति काव्यकृत् । तथा शोभनो धारो मर्यादादिधारणं येषां ते सुधाराः सुजनास्तान्स्यन्ति घ्नन्ति ये ते सुधारसाः खलास्तान्नुदति प्रेरयतीति सुधारसनुत् । तथा न विद्यत आरमरिसमूहो यस्य तदनारम् । तथा कलानां समूहः कालं चिनोत्यर्जयतीति कालचित् । अत्र प्रकृतयो व्यधिविदिप्रभृतयो भिन्नाः । प्रत्ययाः क्विबादय उभयत्रापि त एव । परहृदयादीन्युपपदानि च तान्येव । आगमश्च कालचिदादिपदेऽतोऽन्तागमादिकोऽनन्यः । ननु चैकत्र पक्षेऽतोऽन्तोऽस्ति द्वितीये नास्तीति कथमनन्यः । सत्यम् । नास्यान्योऽस्तीत्यनन्यो द्वितीयपक्षेऽन्यागमाभावादुच्यत इति सुस्थम् ।।

अथ प्रत्ययश्लेषः—

यत्र प्रकृतिप्रत्ययसमुदायानां भवत्यनेकेषाम् ।
सारूप्यं प्रत्ययतः स ज्ञेयः प्रत्ययश्लेषः ।।२६।।

यत्रेति । यत्र प्रकृतिप्रत्ययसमुदायानां बहूनां प्रत्ययात्सकाशात्सारूप्यं समानरूपता भवति स प्रत्ययश्लेषो ज्ञातव्यः ।।

उपार्जन (शिक्षण) करते हैं, तथा सबमें समान चित्त होने से उनके शत्रु नहीं होते ।२५।

यहाँ विदि आदि प्रकृतियों, क्विबादि प्रत्ययों, परहृदय आदि उपपदों, कालचित् आदि आगमों की अनन्यता है।

प्रत्ययश्लेष

जहाँ प्रकृति और प्रत्यय के अनेक समुदायों की प्रत्यय के कारण समानरूपता हो उसे प्रत्ययश्लेष कहते हैं ।२६।

उदाहरण

प्रथम अर्थ

अन्वय—दासेयः तापनम्, आजं, पावनमारं हारं पराप । [अथ च] बहुशः [सः] कारं, चारणं, आहितं साधनं दरम् आज ।

इस दुष्ट चोर ने [पकड़े जाने की अवस्था में] संताप देने वाले तथा [दण्ड-रूप में चोर के फेंक दिये जाने के कारण] दुःखदायी, मृत्युदण्ड-तुल्य इस हार को चुराया है । इसने हार चुराते समय इसके स्वामी का डर नहीं माना । हड़बड़ी में भागते समय हाथ-पैरों के टूटने की भी परवाह नहीं की । [वस्तुतः] यह बहुत से धनियों

उदाहरणम्—

तापनमाजं पावनमारं हारं पराप दासेयः ।
कारं चारणमाहितमाज दरं साधनं बहुशः ॥२७॥

तापनमिति । एष दासेयो दासीपुत्रश्चौरो हारं मुक्ताकलापं ह्रियमाणं वा वस्तु पराप मुषित्वा प्राप्तवान् । कीदृशम् । तापयतीति तापनम् । बन्धादिहेतुत्वात् । तथा अज्यते क्षिप्यतेऽनेनेत्याजयतीति वा आजम् । चौरो हि चारकादौ क्षिप्यते तथा पावयतीति पावनः शुद्धिकृन्मारो मरणं यत्र तत्पावनमारम् । तथा स दासेयो हरणकाले दरं भयमाज चिक्षेप त्यक्तवान् । कीदृशं दरम् । सधनादीश्वरादागतं साधनम् । आहितं हृदये निहितम् । पुनः कीदृशं दरम् । करयोरिदं कारम् । तथा चरणयोः पादयोरिदं चारणम् । करचरणखण्डनादिभयं नाजीगणदित्यर्थः । यतोऽसौ बहून्शयतीति बहुशः । बह्वस्तेन धनाढ्यपहारतस्तनूकृता इत्यर्थः । एष एकोऽर्थः ॥ द्वितीयस्तु—आसेय आरं गतिं परापत्प्राप्तवान् । 'षिञ् बन्धने' । आसेतव्य आसेयो मोक्षमप्राप्तो ज्ञानी भण्यते । ईषत्कर्मबन्धनात् । कीदृशमारम् । तपनस्येमं तापनम् । अजस्येममाजम् । पवनस्येमं पावनम् । हरस्येमं हारम् । सूर्यविष्णुवायुरुद्राणां संबन्धिनीं गतिं लेभ इत्यर्थः । यतोऽसौ कारं क्रियामाजत्त्यक्तवान् । कीदृशं कारम् । चारयति गमयति संसारे प्राणिनमिति चारणम् । पुनः कीदृशम् । अहितानां रागादीनामिदमाहितम् । किं तत् । साध्यतेऽनेनेति साधनम् । रागादीनामुपकरणमित्यर्थः । कथं साधनम् । बहुशोऽनेकशः । अरं शीघ्रम् । अत्र प्रत्ययवशात्प्रकृतिप्रत्ययसमुदायानां सारूप्यम् ॥

अथ विभक्तिवचनश्लेषः—

सारूप्यं यत्र सुपां तिङां तथा सर्वथा मिथो भवति ।
सोऽत्र विभक्तिश्लेषो वचनश्लेषस्तु वचनानाम् ॥२८॥

को लूटकर निर्धन बना चुका है, अतः अभ्यस्त हो गया है ।२६।

द्वितीय अर्थ

अन्वय—आसेयः तापनम्, आजं, पावनं, हारं आरं पराप । चारणं, आहितं, बहुशः साधनं, कारं अरम् आजत् ।

ज्ञानी व्यक्ति ने सूर्य, विष्णु, वायु तथा रुद्र की गति को प्राप्त किया । क्योंकि उसमें जन्म-मरण बन्धनहेतुक सभी क्रियाओं का परित्याग कर दिया था, तथा शीघ्र ही अनेक प्रकार के रागादि विषय एवं उनके साधनों को छोड़ दिया था ।२७।

यहाँ प्रत्यय के कारण प्रत्यय और प्रकृति की एकरूपता स्पष्ट है ।

विभक्तिश्लेष और वचनश्लेष

जहाँ सुबन्त और तिङन्त पदों के रूप सब प्रकार से परस्पर एक-समान हों

सारूप्यमिति । यत्र सारूप्यं समानरूपता सुपां स्यादीनां तिङां त्यादिनां मिथः परस्परं सर्वथा सर्वप्रकारैर्भवति सोऽत्र श्लेषाधिकारे विभक्तिश्लेषो ज्ञेयः । वचनानां त्वेकवचनादीनां मिथः सारूप्ये वचनश्लेष. ।।

तत्र तावद्विभक्तिश्लेषोदाहरणम् —

आयामो दानवतां सरति बले जीवतां न नाकिरताम् ।
नयदानवाँल्ललामः किमभूरसि दारुणः सहसा ।।२६।।

आयाम इति । जीवतां प्राणभृतां दानवतां दानं ददतां सतां संबन्धिनि बले सैन्य आयामो विस्तारः सरति प्रसरति । न नाकिरतां न विक्षिपताम् । कार्पण्येन गलेऽर्थिनं गृह्णतां नेत्यर्थः । कुतः । यतो नयश्च दानं च ते विद्येते यस्यासौ नयदानवान्पुरुषो ललामो भूषणं जगतः । तथा किमः कुत्साया अभूरस्थानं किमभूः । तथा सहसा बलेनासिदारुणः खड्गभीषणश्च ललामः । इत्येकोऽर्थः ।। अपरस्तु—केचित्सुरा बलिनामानमसुरमूचुः—हे बले वैरोचन, दानवतामसुरत्वमायाम आगच्छामः । कथम् । सरति सप्रीतीति कृत्वा । न पुनर्जीवतां वृहस्पतिताम् । किंभूताम् नाकिषु देवेषु रतां सक्तां नाकिरताम् । तस्मान्नय प्रापय दानवानसुरान् । येन तेषां मध्ये ललामो विलसामः । किमसि त्वं दारुणः काष्ठादभूः संजातः सहसा । येनास्माकं वचनं न शृणोषीत्यर्थः । अत्रायाम इत्यादयो य एव स्याद्यन्तास्त एव त्याद्यन्ताः शब्दा इति सारूप्यम् ।

वहाँ विभक्ति श्लेष होता है और जहाँ वचन (एकवचन, द्विवचन अथवा बहुवचनों के रूप परस्पर) एक-समान हों वहाँ वचनश्लेष जानना चाहिए ।२८।

उदाहरण

प्रथम अर्थ

अन्वय—जीवतां, दानवतां बले आयामः सरति, न नाकिरताम् । [यतः] नयदानवान् ललामः । किम् अभूः सहसा असि-दारुणः ।

दान देनेवाले अर्थात् उदार प्राणियों का सैन्यबल विस्तार को प्राप्त होता है, कृपण व्यक्तियों का नहीं । क्योंकि नीतिज्ञ दानी पुरुष ही जगत् का भूषण होता है । उसका चरित्र अनिन्द्य होता है तथा वह बल में खड्ग के समान दारुण होता है ।२६।

द्वितीय अर्थ

अन्वय—हे बले ! स-रति दानवताम् आयामः, न [पुनः] नाकि-रतां जीवताम् । असुरान् नय, ललामः । किं असि (त्वम्) दारुणः अभूः सहसा ।

कुछ देवता बलि से कह रहे हैं—हे बलि ! हम प्रसन्नता से दानवता की ओर आते हैं, देवों के विशेष प्रिय वाचस्पतित्व की ओर नहीं । हमें राक्षसों के पास ले

अथ वचनश्लेषोदाहरणम्—

आर्योऽसि तरोमाल्यः सत्योऽनतकुक्षयः स्तवावाच्यः ।
सन्नाभयो युवतयः सन्मुख्यः सुनयना वन्द्यः ।।३०।।

आर्य इति । कश्चिदुत्साह्यते—असि त्वं वन्द्यो वन्दनीयः, यत आर्यो विशिष्टः । तथा तरो बलं माल्यमलंकरणं यस्यासौ तरोमाल्यः । सत्योऽवितथवाक् । अनतानामप्रणतानां कोर्भूमेः क्षयो नाशहेतुरनतकुक्षयः । स्तवैः स्तुतिभिरवाच्यो वक्तुमशक्यः । तथा सन्नानां क्षीणानामभयो न विद्यते भयं यस्मादिति सन्नाभयः । तथा यूनस्तरुणांस्तयतेऽभियुङ्क्त इति युवतयः । सतां साधूनां मुख्य आद्यः । तथा शोभनो नयोऽस्येति सुनयः स चासौ ना च । सुनीतिपुरुष इत्यर्थः । एष एकवचनेनैकस्य वाक्यस्यार्थः ।। अपरस्य तु—कश्चिद्राजानमाह—तव संबन्धिन्य आर्योऽरिसक्ता युवतयः स्त्रियो वन्द्यो ग्रहानीता एवंविधाः । असिता रोमाली यासां तास्तथाभूताः । तथा सत्यः साध्व्यः । नतकुक्षयः कृशोदर्यः । अवाच्योऽधोमुख्यः तथा सती रम्या नाभिर्यासां ताः सन्नाभयः । तथा सच्छोभनं मुखं यासां ताः सन्मुख्यः । शोभने नयने यासां ताः सुनयनाः । अत्रार्य इत्यादीनि पदानि बहुवचनान्तानीति वचनश्लेषः ।।

चलो, जिससे हम उनके बीच विहार कर सकें । अरे, क्या तुम लकड़ी के बने हो [जिससे हमारी बात नहीं सुनते] ।२९।

उदाहरण

प्रथम अर्थ

अन्वय—[त्वम्] वन्द्यः असि, [यतः] आर्यः, तरो-माल्यः, सत्यः, आनत-कुक्षयः, स्तव-अवाच्यः, सन्न-अभयः, युव-तयः, सत्-मुख्यः, सुनयना च ।

तुम वन्दनीय तथा सच्चरित्र हो । विक्रम ही तुम्हारा भूषण है । तुम सत्यवादी और दुष्टों के विनाशक हो । तुम स्तुति से परे हो । दुर्बलों को तुमसे कोई भय नहीं है, अर्थात् उन्हें अभय दान देने वाले हो । तुम युवकों से युद्ध करने वाले, सज्जनों में अग्रगण्य तथा सुनीतिमान् पुरुष हो ।३०।

द्वितीय अर्थ

अन्वय—असित-रोमाल्यः, सत्यः नतकुक्षयः, अवाच्यः, सन्नाभयः, सन्मुख्यः, सुनयनाः, तव आर्यः युवतयः वन्द्यः ।

हे राजन् ! आपके शत्रुओं की युवती स्त्रियों को बन्दी बना लिया गया है । वे युवतियाँ काली रोमावली से युक्त हैं । साध्वी हैं तथा कृशोदरी हैं । उन्होंने मुख नीचे किया हुआ है, उनकी नाभि, मुख और नेत्र-युगल सुन्दर एवं मनोहर हैं ।३०।

एवं श्लेषलक्षणमभिधाय पूर्वकविलक्ष्यसंग्रहाय लक्षणशेषमाह—

भाषाश्लेषविहीनः स्पृशति प्रायोऽन्यमप्यलंकारम् ।
धत्ते वैचित्र्यमयं सुतरामुपमासमुच्चययोः ।।३१।।

भाषेति । अयं पूर्वोक्तश्लेषो भाषाश्लेषरहितः प्रायो बाहुल्येनान्यमप्यलंकारमर्थविषयं व्यतिरेकादिकं स्पृशति । श्लेषस्याप्यौपम्यादिभिः सह संकरो भवतीत्यर्थः । अपिशब्दो विस्मये । प्रायोग्रहणमसाकल्यप्रतिपादनार्थम् । अन्यमलंकारं स्पृशति परं न सर्वमेवेत्यर्थः । तत्रापि सुतरामतिशयेन वैचित्र्यं रम्यत्वमयं श्लेष उपमासमुच्चययोर्धत्ते धारयति उपमासाहचर्यात्समुच्चयोऽप्यत्रौपम्यभेदो गृह्यते ।

नन्वत्र श्लेषवाक्यद्वये शब्दमात्रं श्लिष्टं भवति, न त्वर्थ इतिसाम्याभावस्ततश्च कथमुपमासमुच्चयाभ्यां स्पर्शो घटत इत्याशङ्क्याह—

स्फुटमर्थालंकारावेतावुपमासमुच्चयौ किं तु ।
आश्रित्य शब्दमात्रं सामान्यमिहापि संभवतः ।।३२।।

स्फुटेति । स्फुटं सत्यमर्थालंकारावेतावुपमासमुच्चयौ न कदापि स्वरूपं त्यजतः । किंतु शब्दमात्ररूपं सामान्यं साधारणं धर्ममाश्रित्य संभवतः । ताभ्यां योगो घटत

[यहाँ आर्यादि पद बहुवचनान्त होने से वचनश्लेष है ।]

भाषाश्लेष को छोड़कर [अपने शेष सभी प्रकारों से युक्त] यह श्लेष अलंकार प्रायः अन्य (कई, न कि सभी) अलंकारों के साथ भी स्पष्ट (समन्वित अथवा सम्बद्ध, शास्त्रीय शब्दावली में कहें तो संकरित) रहता है। उपमा और समुच्चय नामक अलंकारों के साथ इसका संकर तो [बहुत ही] रमणीय होता है ।३१।

इस कारिका का उत्तरार्द्ध भामह से प्रभावित जान पड़ता है । उन्होंने श्लेष के तीन रूप बताये हैं—सहोक्ति द्वारा निर्दिष्ट, उपमा द्वारा निर्दिष्ट और हेतु द्वारा निर्दिष्ट (भामहालंकार ३।१७) । यहाँ 'सहोक्ति' से भामह का तात्पर्य प्रख्यात सहोक्ति अलंकार न होकर समुच्चय अलंकार से है जैसा कि उनके निम्नोक्त उदाहरण से स्पष्ट है:

छायावन्तो गतव्यालाः स्वारोहाः फलदायिनः ।
मार्गद्रुमाः महान्तश्च परेषामेव भूतये ।।

भा० अ० १३।१८

इधर रुद्रट ने 'हेतु निर्दिष्ट' नामक भेद की चर्चा न करके प्रथम दो अलंकारों की चर्चा की है ।

यद्यपि उपमा और समुच्चय ये दोनों स्पष्टतः अर्थालंकार हैं, किन्तु ये दोनों अलंकार [प्रकृत और अप्रकृत दोनों पक्षों के लिए] सामान्य अर्थात् एक समान शब्दों को धारण करते हुए भी सम्भव होते हैं ।३२।

इत्यर्थः । अर्थतो न साहश्यं किं तु वाक्यद्वयसाधारणशब्दाश्रयं सादृश्यं विद्यत इति तात्पर्यार्थः ।

उदाहरणमाह—

यदनेकपयोधिभुजस्तवैव सहशोऽस्यहीनसुरतरसः ।

ननु बलिजितः कथं ते सदृशस्तदसौ सुराधिकृतः ।।३३।।

उदाहरण

श्लिष्ट पदों का अर्थ

अनेकपयोधिभुजः (क) अनेकप-योधि-भुजः (अनेकापानां द्विपानां हस्तीनामिति यावत्, योद्धा भुंजः बाहुः यस्य सः ।

(ख) अनेकान्—चतुरः, पयोधीन्—समुद्रान्, भुनक्ति—रक्षति यः तस्य अनेकपयोधिभुक्तस्य ।

अहीनसुरतरसः (क) अहीनः—पूर्णः, सुरत-रसः—निधु-वन-आनन्दो यस्य सः ।

(ख) अहीनां—नागानां, इनः—स्वामी, सुराः—देवाः तेषामिव तरः—बलं यस्य सः ।

बलिजितः (क) बलिनः समर्थान् जयतीति बलिजित् तस्य ।

(ख) बलिना—बलिनामधेयेन दानवेन, जितः—पराभूतः ।

सुराधिकृतः (क) सुराणामाधीन् मनः पीडाः क्रन्ततीति सुराधिकृत् तस्य ।

(ख) सुरैः—देवैः, अधिकृतः—(राज्ये) नियोजितः ।

अन्वय—यत् अनेकप-योधि-भुजः अहीन-सुरत-रसः त्वम् अनेक-पयोधि-भुजः अहि-इन-सुर-तरसः तव एव सदृशः असि । ननु बलि-जितः सुर-आधि-कृतः ते बलि-जितः सर-अधिकृतः असौ [इन्द्रः] तत् कथं सदृशः ।

हाथियों से युद्ध करने में समर्थ भुजाओं वाले तथा सुरत के आनन्द का पूर्ण उपभोग करने वाले तुम अपने सहश आप ही हो । क्योंकि तुम चारों समुद्रों की रक्षा करने वाले हो तथा नागराज वासुकि और देवताओं के समान शक्तिमान् हो । तुम इन्द्र के सहश न होकर अपनी उपमा स्वयं हो, क्योंकि तुम बलवानों को भी जीतने वाले हो तथा देवों की मानसिक चिन्ताओं का अपहरण करने वाले हो, जबकि इन्द्र बलि से पराजित है और देवताओं ने उसे अपना राजा माना हुआ है ।३३।

उपमा और संमुच्चय [से समन्वित श्लेष] का उदाहरण

निम्नोक्त पद्य के प्रथम दल में समुच्चय समन्वित श्लेष है और दूसरे दल में उपमा समन्वित श्लेष ।

यदिति । कश्चिदुच्यते—त्वं तवैव सदृशो नान्यस्येत्यनन्वयानामुपमाविशेषण-द्वारेण साम्यमाह—कीदृशस्त्वम् । अनेकपानां द्विपानां योद्धा भुजो बाहुर्यस्यासावनेक-पयोधिभुजः । तथाहीनः परिपूर्णः सुरतरसो निधुवनरसो यस्यासावहीनसुरतरसः । तव कीदृशस्य । अनेकांश्चतुरः पयोधीन्समुद्रान्भुनक्ति रक्षतीत्यनेकपयोधिभुक्तस्य । तथा-हीनामिनो नागराजः सुरा देवास्तेषामिव तरो बलं यस्यासावहीनसुरतरास्तस्य । अत्र प्रथमानिर्दिष्टमुपमेयं षष्ठीनिर्दिष्टमुपमानमनयोस्तु न वस्तुतः किंचिदपि साम्यमस्ति, किंतु तत्प्रतिच्छायशब्दप्रयोगात्साम्यं प्रतिभासते । एवमुत्तरत्रापि योज्यम् । किमिति । त्वं तवैव सदृशो न त्विन्द्रस्येत्याह—नन्वित्यादि । ते तव कथमसौ सदृश इति व्यति-रेकोऽलंकारः । कीदृशस्य ते । बलिनः समर्थाञ्जयत्यभिभवतीति बलिजित्तस्य बलि-जितः । तथा सुराणामाधीन्मनःपीडाः क्रन्ततीति सुराधिकृत्तस्य सुराधिकृतः । इन्द्रस्तु कीदृशः । बलिनाम्ना दानवेन जितः पराभूतः । तथा सुरैरधिकृतो राज्ये नियोजितः । एवं त्वं सुराणामाधीञ्छिनत्सि, स तु सुरैरधिकृत इति स्फुट एव तवेन्द्रस्य च विशेषः । यत्तच्छब्दौ हेत्वर्थौ । नन्वमर्षे । यस्मात्त्वं तवैव सदृशस्तस्मात्तव कथमिन्द्रः सदृशो भवतीत्यर्थः ।।

उदाहरण

श्लिष्ट पदों का अर्थ

वेसुधामहितसुराजितनीरागमना—

(क) वसु—धनम्, धाम—तेजः, [ताभ्यां] हितं—अनुकूलं, सुरैः—देवैः, अजितं—अपराभूतम्, नीरागं—रागरहितम्, मनः, चित्तं यस्य सः ।

(ख) वसुधायां—पृथिव्याम्, महितम्—पूजिताम्, सुराजितम्—सुष्ठु राजितं—शोभितं, नीरागमनम्—नीरस्य, जलस्य, आगमनम्—संप्राप्ति यासु ताः ।

सुरचितवराहवपुषः—

(क) सुष्ठु रचितं—निर्मितम्, वरं—श्रेष्ठं, आहवं—समरं, पुष्णाति—पुष्टिं नयति इति यः, तस्य ।

(ख) सुरैः—देवैः, चित्तं-व्याप्तम्, वराहवपुः—शूकरशरीरम् यस्य सः ।

प्रथम अर्थ

अन्वय—वसु-धाम-हित-सुर-अजित-नीराग-मनाः भवांश्च वर्षाश्च । सु-रचित-वर-आहव-पुषः तव च हरेः च उपमा घटते ।

उपमासमुच्चयोदाहरणमाह—

वसुधामहितसुराजितनीरागमना भवांश्च वर्षाश्च ।
सुरचितवराहवपुषस्तव च हरेश्चोपमा घटते ।।३४।।

वसुधेति। त्वं वर्षाश्च सदृशौ। त्वं तावत्कीदृशः। वसु धनम्, धाम तेजः, ताभ्यां हितमनुकूलं सुरैर्देवैरजितमपराभूतं नीरागं रागरहितं मनश्चित्तं यस्य स तथोक्तस्त्वम्। वर्षास्तु वसुधायां भुवि महितं पूजितं सुष्ठु राजितं शोभितं नीरागमनं जलागतिर्यासु तास्तथोक्ताः। चशब्दावत्र समुच्चयार्थौ। साधारणविशेषणादौपम्यस्य सद्भावः। शुद्धाया उपमाया उदाहरणमाह—सुरचितेत्यादि। तव विष्णोश्च साम्यं घटते। कीदृशस्य तव सुष्ठु रचितं वरं श्रेष्ठमाहवं समरं पुष्णाति पुष्टिं नयतीति यस्तस्य सुरचितवराहवपुषः। हरेस्तु सुरैर्देवैश्चितं व्याप्तं वराहवपुः सूकरशरीरं यस्य स तथा तस्य। अत्रापि साधारणशब्दयोगात्साम्यम्, न त्वर्थतः ।।

द्वितीय अर्थ

अन्वय—वसुधा-महित-सुराजित-नीर-आगमना भवांश्च वर्षाश्च। सुर-चित-वराह-वपुषः तव च हरेः च उपमा घटते।

समुच्चय समन्वित श्लेष

तुम और वर्षा एक समान हो। [क्योंकि] तुम्हारा मन, धन और तेज से युक्त है, तथा देवों से अपराजित तथा राग-रहित है [और उधर] वर्षा संसार में सत्कार होने तथा सुन्दर लहराते हुए जल के लाने के कारण अभिनन्दनीय होती है।३४।

उपमा-समन्वित श्लेष

तुम में और विष्णु में समानता है। [क्योंकि तुम] सुन्दर रीति से युद्ध-संचालन करते हो [और उधर] विष्णु देवों से व्याप्त वराह रूप को धारण करने वाला है।३४।

श्लेष के उपर्युक्त आठ भेदों के निरूपण के उपरान्त इन चार (३१-३४) कारिकाओं में श्लेष की क्षेत्रसीमा और अधिक बढ़ायी गयी है। ३१-३२ कारिका का उद्देश्य यह है कि उपमा और समुच्चय यद्यपि अर्थालंकार हैं, किन्तु यदि उनका चमत्कार श्लेष पर आधारित है तो वहाँ श्लेष अलंकार ही स्वीकृत करना चाहिए, इनमें से कोई एक अथवा दोनों अलंकार नहीं, क्योंकि इसीका चमत्कार उपमा [अथवा उपमा से सम्बद्ध रूपक-व्यतिरेक आदि अलंकारों] तथा समुच्चय अलंकार के चमत्कार को आच्छादित कर देता है। ३३वीं कारिका में व्यतिरेक के, ३४वीं कारिका के पूर्वार्द्ध में समुच्चय के और इसी के उत्तरार्द्ध में उपमा के चमत्कार को श्लेष का चमत्कार आच्छादित किये है।

इस सम्बन्ध में निम्नोक्त प्रश्न विचारणीय हैं—

(१) क्या श्लेष अलंकार के प्रसंग में अन्य अलंकारों की सत्ता अनिवार्य है ? शास्त्रीय शब्दावली में कहें तो—क्या श्लेष अलंकार अन्य अलंकारों से विविक्त (रहित)—नितान्त स्वतन्त्र रूप से—नहीं हो सकता ?

(२) इसी प्रश्न से मिलती-जुलती अन्य समस्या यह है कि रुद्रट ने उपमा और समुच्चय को 'शब्द' पर आश्रित भी माना है तो क्या 'शब्दसाम्य' भी उपमा [तथा समुच्चय] का प्रयोजक है। वस्तुतः यही समस्या ही इसी प्रसंग में विवेच्य है।[1]

उद्भट और रुय्यक का मन्तव्य यह है कि श्लेष अलंकार स्वतन्त्र रूप से कभी नहीं रहता। जहाँ इसकी स्थिति होगी वहाँ कोई-न-कोई अलंकार अनिवार्यतः रहेगा, किन्तु इसका चमत्कार अन्य अलंकार के चमत्कार को बाधित कर देता है और वहाँ श्लेष अलंकार स्वीकृत किया जाता है। इस सम्बन्ध में उनका प्रमुख तर्क यह है कि यदि श्लेष के होते हुए अन्य अलंकार माने जाएँगे तो श्लेष अलंकार निर्विषय हो जाएगा, अर्थात् इसके उदाहरण नहीं मिलेंगे। काव्यशास्त्र के [अथवा किसी भी शास्त्र के] इस नियम से वे भलीभाँति परिचित हैं कि 'जो सबसे अन्त्य में प्रतीत हो वही प्रधान, पोष्य एवं उपस्कार्य माना जाता है', किन्तु उनके विचार में श्लेष अलंकार के प्रसंग में यह नियम शिथिल करना पड़ेगा, अन्यथा किसी अन्य अलंकार की स्वीकृति कर लेने पर 'श्लेष' सदा अप्रधान एवं पोषक बना रहने के कारण अलंकार-पद से च्युत हो जाएगा।

इधर मम्मट और विश्वनाथ इस स्थिति को सदा स्वीकार नहीं करते। इनके मत में श्लेष अलंकार कभी अन्य अलंकारों से स्वतन्त्र रहता है और कभी नहीं रहता। जहाँ वह स्वतन्त्र नहीं रहता वहाँ कभी तो इसका चमत्कार अन्य अलंकारों के चमत्कार को बाध देता है और कभी स्वयं बाधित होकर उसका पोषक बन जाता है। इस प्रकार इन आचार्यों के मत में श्लेष अलंकार की स्थिति तीन विकल्पों में सम्भव है—

(१) श्लेष स्वतन्त्र रूप में रहता है।

(२) श्लेष अन्य अलंकारों का बाधक बन जाता है।

(३) श्लेष अन्य अलंकारों का पोषक बन जाता है।

इनमें से प्रथम दो विकल्प ही श्लेष अलंकार से सम्बद्ध हैं।

सर्वप्रथम ऐसे उदाहरण प्रस्तुत हैं जहाँ केवल श्लेष अलंकार का चमत्कार है।

---

१. **विशेष विवरण के लिए देखिए काव्यप्रकाश, नवम उल्लास, साहित्यदर्पण, दशम परि०, काव्यानुशासन (हेमचन्द्र) पृ० सं० २३१, २३२।**

(१) है पूतनामारण में सुदक्ष, जघन्य काकोदर या विपक्ष।
की किन्तु रक्षा उसकी दयालु, शरण्य ऐसे प्रभु हैं कृपालु॥

[अर्थात् (राम और कृष्ण) ये दोनों प्रभु शरण देने वाले और कृपालु हैं। राम पूतनामा अर्थात् पवित्र नाम वाले हैं और रण में सुदक्ष (निपुण हैं), कृष्ण पूतना के मारण में दक्ष (निपुण) हैं। राम अपने विपक्षी काकोदर (इन्द्र के पुत्र जयन्त) की रक्षा करने वाले हैं, और कृष्ण अपने विपक्षी कालिय सर्प की रक्षा करने वाले हैं।]

इस पद्य में उद्‌भट और रुय्यक के अनुसार वस्तुतः तुल्ययोगिता अलंकार होना चाहिए, क्योंकि इसमें दोनों प्रकृतों—राम और कृष्ण—का एक धर्म से सम्बन्ध बताया गया है। पर श्लेष का चमत्कार तुल्ययोगिता के चमत्कार पर आच्छादित हो गया है। अतः यहाँ श्लेष अलंकार है। किन्तु मम्मट और विश्वनाथ के मत में यहाँ केवल श्लेष का ही चमत्कार है। यहाँ तुल्ययोगिता अलंकार प्राप्त ही नहीं है। एक तो राम और कृष्ण इन दोनों प्रकृत पक्षों का यहाँ एक धर्म से सम्बन्ध स्थिर नहीं किया गया। जैसे राम 'पूतनामा और रण में सुदक्ष हैं, तो कृष्ण पूतना-मारण में सुदक्ष हैं, इत्यादि, और दूसरे, इस पद्य में कवि को उक्त दोनों पक्षों के वाच्यार्थ अभीष्ट हैं, और यही श्लेष का विषय है। अतः यहाँ श्लेष अलंकार पूर्णतः स्वतन्त्रत रूप से है। इसी प्रकार—

(२) येन ध्वस्तमनोभवेन बलिजित्कायः पुरास्त्रीकृतो।
यश्चोद्‌वृत्तभुजंगहारवलयोगंगां च योऽधारयत्॥
यस्याहुः शशिमच्छिरोहर इति स्तुत्यं च नामामराः।
पायात् स स्वयमन्धकक्षयकरस्त्वां सर्वदोमाधवः॥

[अलंकारसर्वस्व पृष्ठ १२२, सा० द० दशम परि०]

इस पद्य में भी कवि को दोनों पक्षों [माधव-विष्णु, और उमाधव-उमा का धव (पति) अर्थात् महादेव] के अर्थ अभीष्ट हैं और ये दोनों ही वाच्यार्थ हैं। इसके अतिरिक्त यहाँ कोई अन्य अलंकार भी नहीं है। अतः यहाँ मम्मट और विश्वनाथ के मत में श्लेष अलंकार है। उद्भट और रुय्यक के मत में भी यहाँ श्लेष अलंकार है, किन्तु वस्तुतः यहाँ तुल्ययोगिता अलंकार प्राप्त था, क्योंकि दो प्रस्तुत विषयों का एक धर्म से सम्बन्ध बताया गया है। जैसे—विष्णुपक्ष में : 'अगं गां च योऽधारयत्', जिसने [कृष्ण रूप से] अगं—गोवर्द्धन पर्वत को, और कूर्मरूप से गां—पृथ्वी को धारण किया था। महादेव-पक्ष में : 'गंगां च यो ऽधारयत्', जिसने गंगा को धारण किया था, किन्तु तुल्ययोगिता का यह चमत्कार श्लेष के चमत्कार द्वारा बाधित हो जाता है। निष्कर्षतः दोनों प्रकार के आचार्य यहाँ श्लेष अलंकार ही स्वीकार करते हैं, किन्तु अपने-अपने ढंग से।

अब दूसरे प्रकार के ऐसे उदाहरण प्रस्तुत हैं जहाँ किसी अन्य अलंकार के

रहते हुए भी—श्लेष अलंकार का चमत्कार प्रमुखतः स्वीकार किया जाने के कारण उन्हें इसी अलंकार का ही उदाहरण माना जाता है—

नीतानामाकुलीभावं लुब्धैर्भूरिशिलीमुखैः ।
सदृशे वनवृद्धानां कमलानां तदीक्षणे ॥

अर्थात् इस [सुन्दरी] की आँखें कमलों अर्थात् पद्मों और हरिणियों के सदृश हैं (मृग-भेदेऽपि कमलः इति मेदिनी-कोशः)। एक ओर पद्म लुब्ध (लोभी) बहुत शिलीमुखों (भ्रमरों) से आकुलीभाव (संकुलता) को प्राप्त वन (जल) में बढ़े हुए हैं, तो दूसरी ओर मृग अधिक शिलीमुखों (बाणों वाले लुब्धों) (शिकारियों) द्वारा आकुलीभाव (त्रासभाव) को प्राप्त तथा वन (जंगल) में पड़े हुए हैं।]

उद्भट और रुय्यक के अनुसार इस पद्य में भी यद्यपि तुल्ययोगिता अलंकार प्राप्त है, क्योंकि यहाँ दो अप्रकृतों—पद्म और हरिणी का एक धर्म से सम्बन्ध स्थापित किया गया है[1], किन्तु श्लेष का चमत्कार इस अलंकार के चमत्कार को आच्छादित कर देता है। तुल्ययोगिता का चमत्कार श्लेष के आगे गौण है, वह इस अलंकार के चमत्कार का पोषण करता है। अतः यहाँ श्लेष अलंकार है। ठीक यही स्थिति मम्मट और विश्वनाथ को भी स्वीकृत है। इस प्रकार श्लेष की इस दूसरी स्थिति में ये दोनों प्रकार के आचार्य परस्पर सहमत हैं।

अब तीसरे प्रकार के उदाहरण लीजिए जहाँ श्लेष स्वयं गौण बनकर किसी अन्य अलंकार की पुष्टि करता है। विरोधाभास और परिसंख्या अलंकारों के उदाहरण इसी श्रेणी में आते हैं—

(क) सन्निहितबालान्धकारा भास्वन्मूर्तिश्च ।

इस कथन में विरोध यह है कि 'बाल (अप्रौढ़) अन्धकार जिसके पास रहता है, ऐसे भास्वान् (सूर्य) की मूर्ति।' इसका परिहार यह है कि 'वह [सुकन्या] बाल (केश) रूप अन्धकार, जिसके पास रहता है ऐसी भास्वत् (चमकदार) मूर्ति वाली है। इस प्रकार यहाँ 'बाल' और 'भास्वत्' शब्दों में श्लेष का चमत्कार विरोधाभास के चमत्कार का पोषक है। अतः यहाँ 'श्लेष' की स्वीकृति न होकर विरोधाभास अलंकार माना जाता है। इसी प्रकार—

(ख) यस्मिंश्च राजनि जितजगति चित्रकर्मसु वर्णसंकराश्चापेषु गुणच्छेदाः × × ×, इत्यादि ।

[अर्थात् जगत् को जीतने वाले उस राजा के राज्य में चित्रकारी में ही वर्णों

---

१. साहित्यदर्पण की विमला टीका में इसे दीपक अलंकार का उदाहरण बताया गया है।

(रंगों) का संकर (सम्मिश्रण) होता था (अन्यथा 'वर्णसंकर' नहीं था), धनुषों में ही गुणों (रस्सियों) का विच्छेद होता था (अन्यथा गुणों का कहीं नाश नहीं होता था)।]

इस कथन में भी श्लेष का चमत्कार परिसंख्या के चमत्कार का पोषक है। अत: यहाँ परिसंख्या अलंकार ही है।

इसी प्रसंग के सन्दर्भ में अब रुद्रट के उक्त कथन (४।३२) को लें कि यद्यपि उपमा और समुच्चय अलंकार स्पष्टत: अर्थालंकार हैं, किन्तु ये दोनों शब्दगत समानता पर [भी] आधारित रहते हैं। इसी कथन को उद्धृत करते हुए मम्मट और उनके अनुकरण पर विश्वनाथ ने यह निष्कर्ष निकाला कि उपमा अलंकार के अन्तर्गत उपमेय और उपमान में गुण अथवा क्रिया का साम्य तो होता ही है, साथ ही उसमें 'शब्द-साम्य' भी रहता है। उदाहरणार्थ—

सकलकलं पुरमेतज्जातं सम्प्रति सुधांशुबिम्बमिव।

[अर्थात् यह नगर अब चन्द्रबिम्ब के समान हो गया है, [क्योंकि एक ओर] चन्द्रबिम्ब 'सकल-कल'—सकल कलाओं से युक्त है, [तो दूसरी ओर] यह नगर भी 'सकलकल' अर्थात् कलकल (शोर) से युक्त है।]

यह उदाहरण रुद्रट-प्रस्तुत नहीं है, इसे मम्मट और विश्वनाथ ने प्रस्तुत करते हुए कहा है कि यहाँ उपमा अलंकार मानना चाहिए, श्लेष अलंकार नहीं। यह उपमा 'सकलकल' इस शब्द-साम्य पर आधारित है, किन्तु हमारा विचार है कि यहाँ श्लेष का ही चमत्कार है। निस्सन्देह यहाँ कवि का उद्दिष्ट उपमा की स्थापना है, किन्तु सहृदय श्लेष से ही चमत्कृत होता है, उपमा का चमत्कार उसे गौण प्रतीत होता है, यहाँ तक कि सुरुचिपूर्ण पाठक को ऐसे स्थलों में उपमा हास्यास्पद-सी प्रतीत होती है। वस्तुत: कवि की विवक्षा से बढ़कर सहृदय का भावोद्वेलन ही काव्यगत सौन्दर्य का निर्णायक होता है। अत: उक्त कथन में उपमा के स्थान पर श्लेष अलंकार ही मानना चाहिए। वस्तुत: यहाँ भी वही स्थिति मान्य है, जो 'नीतानामाकुलीभावम्···' उपर्युक्त पद्य में दोनों प्रकार के आचार्यों ने स्वीकार करते हुए तुल्ययोगिता के स्थान पर श्लेष का चमत्कार माना था। अस्तु! हाँ, 'सकलकलम्···' इस कथन में यदि हम चाहें, तो श्लेष को उपमापुष्ट, उपमाश्रित, उपमाजन्य, उपमामूलक, उपमागर्भित आदि में से किसी एक विशेषण के साथ समन्वित कर सकते हैं। जब श्लेषमूलक विरोधाभास, परिसंख्या आदि अलंकार स्वीकृत किये जाते हैं, तो उपमामूलक श्लेष स्वीकृत करने में भी कोई आपत्ति नहीं होनी चाहिए। ठीक यही स्थिति रहीम के निम्नोक्त दोहे की भी समझनी चाहिए—

ज्यों रहीम गति दीप की, कुल कपूत गति सोय।
बारे उजियारो करै, बढ़े अन्धेरो होय॥

वस्तुतः मम्मट और विश्वनाथ को उक्त उद्धृत कारिका से पूर्व रुद्रट की इससे पहली कारिका (४।३१) भी उद्धृत करनी चाहिए थी कि 'भाषा-श्लेष को छोड़कर [अपने इतर प्रकारों से युक्त] यह [श्लेष अलंकार] अन्य अलंकारों का भी प्रायः स्पर्श करता है, [और जब वह] उपमा और समुच्चय का [स्पर्श करता है तो अत्यधिक] वैचित्र्य (चमत्कार) को धारण कर लेता है। वस्तुतः रुद्रट यहाँ दण्डी के इस कथन से ही प्रभावित हैं कि श्लेष अलंकार प्रायः सभी वक्रोक्तियों (अर्थात् अलंकारों) की शोभा को बढ़ा देता है—**श्लेषः सर्वासु पुष्णाति प्रायः वक्रोक्तिषु श्रियम्।** (काव्यादर्श २।२६३)।

इस प्रकार हमने देखा कि रुद्रट के उक्त कथन में मूल प्रसंग श्लेष का है, और इसी के ही अधिक चमत्कार धारण करने की चर्चा उन्हें अभीष्ट है। स्वयं उनका उक्त उदाहरण—**'सुरचितवराहवपुषस्तव च हरेश्चोपमा घटते'** इसी तथ्य की पुष्टि करता है कि यहाँ उपमामूलक श्लेष है—प्रस्तुत नृप और अप्रस्तुत विष्णु के औपम्य से बढ़कर यहाँ श्लेष का ही चमत्कार सहृदयहृदयहारी है।

इसी प्रसंग से सम्बद्ध एक शंका मम्मट एवं विश्वनाथ ने उपस्थित की है कि यदि 'सकलकलम्······'इत्यादि स्थलों में उपमा के स्थान पर शब्दश्लेष का चमत्कार माना जाए तो **कमलमिव मुखं मनोज्ञमेतत्'** इस उदाहरण में पूर्णोपमा के स्थान पर अर्थश्लेष ही मानना चाहिए, क्योंकि 'मनोज्ञ' शब्द द्व्यर्थक न सही, पर कमल की 'मनोज्ञता' और मुख की 'मनोज्ञता' में तो अन्तर है ही, अर्थश्लेष की परिभाषा भी यही है—

शब्दैः स्वभावादेकार्थैः श्लेषोऽनेकार्थवाचनम्। (सा० द० १०।५८)

स्पष्ट है कि 'मनोज्ञ' शब्द का यहाँ 'सौन्दर्य' की ओर संकेत है जो कि कमलगत सौन्दर्य और मुखगत सौन्दर्य दोनों का वाचक है। इन दोनों सौन्दर्यों में निस्सन्देह पार्थक्य एवं अन्तर है। अतः जिस प्रकार 'सकलकलम्······' इस उपर्युक्त उदाहरण में उपमा को गौण समझकर शब्दश्लेष माना जाता है, उसी प्रकार 'कमलमिव मुखं मनोज्ञम्' में भी उपमा को गौण समझकर अर्थश्लेष मानना चाहिए। किन्तु मम्मट का यह तर्क अत्यन्त सूक्ष्म होते हुए भी इस दृष्टि से अमान्य है कि यहाँ भी सहृदय का भावोद्वेलन ही निर्णायक आधार है। स्वयं मम्मट और विश्वनाथ के अनुसार **'कमलमिव मुखं मनोज्ञम्'** में यदि उपमा अलंकार का चमत्कार मान्य है, और निम्नोक्त पद्य—

स्तोकेनोन्नतिमायाति स्तोकेनायात्यधोगतिम्।
अहो सुसदृशी वृत्तिस्तुलाकोटेः खलस्य च॥

में अर्थश्लेष का, (यद्यपि दोनों में साम्य-तत्त्व लगभग एक समान है, तो इसका एक-

अथ श्लेषमुपसंहरन्नाह—

शब्दानुशासनमशेषमवेत्य सम्य-
गालोच्य लक्ष्यमधिगम्य च देशभाषाः ।
यत्नादधीत्य विविधानभिधानकोषा-
ञ्श्लेषं महाकविरिमं निपुणो विदध्यात् ।। ३५ ।।

शब्दानुशासनमिति । इदमिदं च कृत्वा ततो महाकविरिमं श्लेषं कुर्यात् । किं कृत्वा । शब्दानुशासनं व्याकरणं समग्रं सम्यग्ज्ञात्वा । तथा लक्ष्यमुदाहरणं महाकविकृतमालोच्य । तथा सूरसेन्यादिदेशभाषा विदित्वा । तथाभिधानकोषान्नाममाला अधीत्य पठित्वेति एतच्च कृत्वा निपुणः कुशलो महाकविश्च यः स श्लेषं कुर्यादिति ।।

इति श्रीरुद्रटकृते काव्यालंकारे नमिसाधुविरचितटिप्पणसमेत-
श्चतुर्थोऽध्यायः समाप्तः ।

मात्र कारण सहृदय का भावोद्वेलन ही है । अतः केवल इसी आधार पर 'सकलकलम्'······आदि कथनों में कवि द्वारा साम्यता के उद्दिष्ट रहने पर भी सहृदय का पलड़ा अत्यधिक भारी मानकर शब्दश्लेष स्वीकार करना चाहिए, उपमा नहीं ।

निष्कर्षतः—

१. श्लेष अलंकार का क्षेत्र स्वतन्त्र भी रहता है, तथा अन्य अलंकारों से युक्त भी ।

२. जहाँ श्लेष के साथ अन्य अलंकार रहते हैं वहाँ कभी यह उनसे पुष्ट होता है और कभी उनका पोषक रहता है ।

३. किन्तु उक्त तीनों स्थितियों का निर्णायक आधार सहृदय का भावोद्वेलन है, न कि कवि की विवक्षा ।

श्लेष-विषयक प्रसंग का उपसंहार

व्याकरण-शास्त्र के परिनिष्ठित अध्ययन, महाकवियों के लक्ष्यग्रन्थों (प्रबन्ध-ग्रन्थों) के सम्यक् अनुशीलन, [शूरसेनी आदि] देशीय भाषाओं के ज्ञानोपार्जन एवं अनेक शब्दकोशों के सयत्न परिशीलन के अनन्तर निपुण महाकवि श्लेष-रचना में प्रवृत्त हों । ३५ ।

इति 'अंशुप्रभा'ऽऽख्य-हिन्दी-व्याख्यायां चतुर्थोऽध्यायः समाप्तः ।

पञ्चमोऽध्यायः

वक्रोक्त्यनुप्रासयमकश्लेषान्निरूप्य क्रमप्राप्तं चित्रं प्रतिपादयितुमाह—

भङ्ग्यन्तरकृततत्क्रमवर्णनिमित्तानि वस्तुरूपाणि ।
साङ्कानि विचित्राणि च रच्यन्ते यत्र तच्चित्रम् ॥ १ ॥

भङ्ग्यन्तरेति । यत्र काव्ये वस्तूनां चक्रदीनां रूपाणि संस्थानानि रच्यन्ते निबध्यन्ते तच्चित्रसादृश्यादाश्चर्याद्वा चित्रं नामालंकारः । काव्ये कथं वस्तुरूपाणि रच्यन्त इति प्रश्ने विशेषणद्वारेण युक्तिमाह—भङ्ग्यन्तरेण चक्रादिविच्छित्तिलक्षणेन प्रकारेण कृतः स सकललोकप्रसिद्धः क्रमो रचनापरिपाटी येषां ते च ते वर्णाश्चाक्षराणि च ते

पंचम अध्याय

इस अध्याय में चित्र नामक शब्दालंकार का निरूपण है। 'चित्र' अलंकार का लक्षण प्रस्तुत करने के उपरान्त रुद्रट ने इसके अनेक रूपों की गणना करते हुए उनमें से अधिकांश का स्वरूप-निर्देश किया है।

रुद्रट से पूर्व चित्र का निरूपण दण्डी के ग्रंथ में उपलब्ध होता है। वहाँ इस अलंकार को गोमूत्रिका, अर्धभ्रम तथा सर्वतोभद्र नामक बन्धचित्रों तथा स्वर, स्थान और वर्णों के नियमों के रूप में दिखाया गया है। (काव्यादर्श ३।७८-९५) इधर जैसा कि हम आगे देखेंगे रुद्रट ने भी इसे इन्हीं रूपों में प्रस्तुत किया है—चक्र, खड्ग आदि बन्धचित्रों के रूप में तथा अनुलोम, प्रतिलोम आदि वर्णविन्यास-जन्य वैचित्र्य के रूप में। आगे चलकर रुद्रट के पश्चात् भोजराज तक आते-आते इससे मिलते-जुलते अन्य तीन अलंकारों की भी गणना हो गयी—वाकोवाक्य, गूढ़ोत्तर और प्रश्नोत्तर। भोज के 'सरस्वतीकण्ठाभरण' के दूसरे परिच्छेद में इन चारों अलंकारों का विस्तृत निरूपण है। इनके भेदोपभेदों की संख्या ६० से भी ऊपर जा पहुँची है। यहाँ 'चित्र' से तात्पर्य बन्ध-चित्रों के अतिरिक्त पद्मबन्ध आदि आकारों (रेखा-चित्रों) से भी है। स्वर, व्यंजन, उच्चारण-स्थान के अतिरिक्त गति की कलाबाज़ियाँ भी इसमें सम्मिलित हैं। इसी प्रकार वाको-वाक्य आदि शेष तीन अलंकारों का परिवार भी कुछ कम बड़ा नहीं है। मम्मट और विश्वनाथ ने यद्यपि केवल 'चित्र' अलंकार का उल्लेख किया है, 'वाकोवाक्य' आदि अन्य तीन अलंकारों का उल्लेख नहीं किया, पर उन्हें ऐसी प्रायः सभी चमत्कृतियों और आश्चर्यकृतियों को 'चित्र' शब्द के ही व्यापक अर्थ में अन्तर्भूत करना अभीष्ट था।

इस प्रकार अब चित्र अलंकार एक ओर बन्धचित्रों का वाचक बन गया और दूसरी ओर प्रश्नोत्तर, गूढोत्तर आदि वर्णबद्ध अथवा शब्द-बद्ध वैचित्र्य का—**वर्णानामथ पद्माद्याकृतिहेतुत्वमुच्यते चित्रम् ।** (एकावली ७।८) इसके दूसरे रूप को तो

निमित्तं कारणं येषां वस्तुरूपाणां तानि तथोक्तानि । तथा सहाङ्केन स्वनामचिह्नेन वर्तन्त इति साङ्कानि । तथा विचित्राणि चान्यानि च सर्वतोभद्रानुलोमप्रतिलोमादीनि । चकारो वस्तुरूपेषु मध्ये सर्वतोभद्रादिसमुच्चयार्थः ॥

सामान्यतश्चित्रलक्षणमभिधाय विशेषेणाभिधातुं तद्भेदानाह—

तच्चक्रखड्गमुसलैर्बाणासनशक्तिशूलहलैः ।
चतुरङ्गपीठविरचितरथतुरगगजादिपदपाठैः ॥ २ ॥
अनुलोमप्रतिलोमैरर्धभ्रममुरजसर्वतोभद्रैः ।
इत्यादिभिरन्यैरपि वस्तुविशेषाकृतिप्रभवैः ॥ ३ ॥

अन्वयव्यतिरेक के आधार पर शब्दालंकार न मानने का प्रश्न ही उपस्थित नहीं होता; गोमूत्रिका, पद्मबन्ध आदि कोष्ठक (रेखा-) चित्रों को भी कारणकार्य-सम्बन्ध से उपचार द्वारा शब्दालंकार मान लिया गया। (अलंकारसर्वस्व, पृष्ठ ३०, सा० द०, १०म परि०, पृष्ठ १०७)।

चित्र अलंकार के सम्बन्ध में यह उल्लेखनीय है कि संस्कृत के प्रत्येक शब्दालंकार-निरूपक आचार्य ने, यहाँ तक कि भोजराज ने भी जिन्होंने अन्य आचार्यों की अपेक्षा इसका कई गुणा अधिक विस्तृत निरूपण किया है, इसे अवहेलना की दृष्टि से देखा है—

दुष्करत्वात्कठोरत्वाद् दुर्बोधत्वाद्विनावधेः ।
दिङ्मात्रं दर्शितं चित्रे शेषमूलं महात्मभिः ॥ स० क० २।१३०

दण्डी ने इसे 'दुष्कर', मम्मट ने 'कष्ट काव्य', विद्याधर और विश्वनाथ ने 'काव्यान्तर्गड्डुभूत' और केशवमिश्र ने तुच्छता-प्रदर्शनार्थ इसे 'कौतुकविशेषकारी' कहा है,[1] और विद्याधर ने इसे रस-पुष्टि में बाधक माना है—

प्रायशो यमके चित्रे रसपुष्टिर्न दृश्यते । (एकावली)

इन कथनों से इन प्रसिद्ध आचार्यों की चित्र के प्रति अवहेलना स्पष्ट है।

चित्र अलंकार उसे कहते हैं जहाँ [चक्र, खड्ग आदि] वस्तुओं के रूप अपने चिह्न के साथ इस प्रकार रचे जाते हैं कि इनमें इनका क्रम (रचनाविन्यास) भङ्ग्यन्तर से—विशेष विच्छित्ति रूप से—वर्णों के द्वारा किया गया हो। [इसके अतिरिक्त चित्र के अन्य भी कई] विचित्र [रूप] रहते हैं [जैसे सर्वतोभद्र, अनुलोम-प्रतिलोम आदि] ।१।

हे कविगण ! वस्तु-विशेष की आकृति के आधार पर चित्रकाव्य के रचना-

---

१. का० द० ३।७८; का० प्र० ९।८५ (वृत्ति); सा० द० १०म परि०, पृष्ठ १०८; अ० शे० पृष्ठ २९।

भेदैर्विभिद्यमानं संख्यातुमनन्तमस्मि नैतदलम् ।
तस्मादेतस्य मया दिङ्मात्रमुदाहृतं कवयः ॥ ४ ॥

तदिति । अनुलोमेति । भेदैरिति । तदेतच्चित्रं यस्मादित्यादिभिरुक्तैरन्यैरनुक्तैरपि । भेदैः कीदृशैः । वस्तुविशेषाकारात्प्रभवन्ति जायन्ते ये तैर्विभिद्यमानं भेदेन व्यवस्थाप्यमानमनन्तमसंख्यातं तत्संख्यातुं संख्यया प्रतिपादयितुं नालं न समर्थोऽस्म्यहम् । तस्मादेतस्य मया दिङ्मात्रमुदाहृतं दर्शितं हे कवयः । इत्यादिभिर्भेदैरित्युक्तं तानेव दर्शयति—तच्चक्रेत्यादि । चक्रादीनि प्रतीतानि न वरम् । वाणासनं धनुः । चतुरङ्गपीठं द्यूतकारिविदितचतुरङ्गफलकस्तत्र रचितै रथतुरगगजादिपदपाठैः । पठ्यतेऽनेनेति पाठः श्लोकः । आदिग्रहणान्नरपदसंग्रहः । क्रमव्युत्क्रमाभ्यां यः सदृशः सोऽनुलोमप्रतिलोमश्लोकः । अर्धभ्रमणादर्धभ्रमः । सर्वतस्तु भ्रमणात्सर्वतोभद्रः । आदिग्रहणात्पद्मगोमूत्रिकादिसंग्रहः ।

किं पुनस्तेषां वस्तुरूपाणां विरचने लक्षणमित्याह—

यन्नाम नाम यत्स्यात्तदाकृतिर्लक्षणं मतं तस्य ।
तल्लक्ष्यमेव दृष्ट्वावधार्यमखिलं तदन्यदपि ॥ ५ ॥

यदिति । चक्रादिकं प्रसिद्धं नाम संज्ञा यस्येति विग्रहः । तद्यन्नाम । द्वितीयस्तु नामशब्दः प्राकाश्ये । तदेवंविधं वस्तु यत्स्यात्तदाकृतिस्तदाकारस्तस्य चित्रस्य लक्षणम-

---

विषयक खड्ग, मुसल, धनुष, शक्ति, शूल, हल रूप में तथा चतुरङ्ग पीठ (सम चतुष्कोण चौकी) पर बने हुए रथ, घोड़े, गज आदि रूपों में कई भेद हैं तथा अनुलोम, प्रतिलोम, अर्धभ्रम, मुरज और सर्वतोभद्र आदि अन्य भी अनेक भेद हैं। इन सब भेदों की गणना करना सम्भव नहीं है। इसलिए मैंने इसके कुछ भेदों के ही उदाहरण प्रस्तुत किये हैं।२-४।

इस प्रकार रुद्रट के अनुसार चित्र के प्रमुख दो रूप हैं—(१) खड्ग, मुसल आदि आकृतियों को प्रकट करने वाला चित्र, (२) अक्षरों के विभिन्न क्रम-विन्यास के आधार पर अनुलोम, प्रतिलोम आदि विभिन्न विच्छित्तियों को प्रकट करने वाला चित्र।

चक्रबन्ध आदि का लक्षण

जिस आकृति का जो नाम हो, वही आकृति ही उस [नाम] का लक्षण है। महाकवियों के काव्यों में इनके उदाहरण देखकर ही इनका स्वरूप निर्धारण करना चाहिए। जो भेद उनमें न मिले, उनका अपनी बुद्धि से स्वरूप निर्धारण कर लेना चाहिए।५।

इसका तात्पर्य यह है कि जिस वर्णरचना प्रकार से जो आकृति बन जाए उसे वही नाम देना चाहिए, जैसे चक्रबन्ध चित्र, मुरजबन्ध चित्र आदि।

भिहितम् । यदनुकार्यस्य चक्रादेर्नाम संस्थानं च तदेवानुकरणस्य करणीयमित्यर्थः । तच्च चित्रलक्षणमखिलं समग्रं माघादिमहाकविरचितं लक्ष्यमुदाहरणमेव दृष्ट्वावधार्य ज्ञेयम् । ततो वस्तुरूपादन्यदपि सर्वतोभद्रादिकं लक्ष्यमेव दृष्ट्वावधार्यम् । अथवा ततो लक्ष्योक्ताद्वस्तुरूपादन्यदपि मत्स्यबन्धादिकं स्वधियैवाभ्यूह्यम् । मार्गं दृष्ट्वान्यथापि करणं न दोषायेत्यर्थः । तेन चक्रारनेमिपद्मदलादावनियम उक्तो भवतीति स्थितमेतत् ।।

तत्राष्टभिः श्लोकैर्गर्भीकृतखड्गादिवस्तुरूपान्तरैश्चक्रमाह—

मारारिशक्ररामेभमुखैरासाररंहसा ।
साराब्धस्तवा नित्यं तदर्तिहरणक्षमा ।। ६ ।।
माता नतानां संघट्टः श्रियां बाधितसंभ्रमा ।
मान्याथ सीमा रामाणां शं मे दिश्यादुमादिजा ।। ७ ।।

खड्गबन्धः ।। (युग्मम्)

मारेति । मातेति । उमा गौरी शं सुखं मे मह्यं दिश्याद्देयात् । कीदृशी । आदिजा जगदादिभवा । तथा मारारिः शंभुः, शक्र इन्द्रः, रामो जामदग्न्यो दाशरथिर्वा, इभमुखो गणाधिपस्तैरासाररंहसा वेगवर्षवद्वेगेनादरावेशात्सार उत्कृष्ट आरब्धः प्रकृतः स्तवः स्तुतिर्यस्याः सा । तथा नित्यं सदा तेषां मारारिप्रभृतीनामर्तेः पीडाया हरणेऽपनयने क्षमा समर्था । तथा नतानां मातेव माता । वत्सलत्वात् । तथा संघट्टः समूहः । कासां श्रियामृद्धीनाम् । तथा बाधितो नाशितो भक्तानां संभ्रमो भयं यया सा तथा-

---

अन्वय—(सा) उमा शं मे दिश्यात् (या) आदिजा, माररिशक्र-इभमुखैः आसाररंहसा साराऽऽरब्धस्तवा, नित्यं तदर्तिहरणक्षमा, नतानां माता, श्रियां संघट्टः, बाधितसम्भ्रमा, मान्या, अथ रामाणां सीमा (अस्ति) ।

कठिन शब्दों के अर्थ

मारारिः—मारस्य कामदेवस्य अरिः, महादेवः । इभमुखः—हस्तिमुखः गणेशः । आसाररंहसा—आदरस्याऽऽवेशात् । सारः—उत्कृष्टः । संघट्टः—समूहः । रामा—नारी ।

वह पार्वती जी मुझे सुख-समृद्धि प्रदान करें जो सृष्टि के आदि में उत्पन्न हुई हैं, जिनका उत्कृष्ट स्तवन महादेव, इन्द्र, गणेश ये सभी अत्यन्त आदरावेश से करते हैं और जो इन सब [महादेव आदि] के दुःखों को दूर करने में समर्थ हैं, जो विनीत व्यक्तियों की माता हैं, लक्ष्मी का केन्द्र-स्थान हैं तथा सब [प्रकार के] भयों को दूर करने वाली हैं, जो समादरणीया हैं तथा नारियों में सर्वोत्तम हैं ।६, ७।

१. खड्गबन्ध, श्लोक-संख्या ६,७

इस खड्गचित्र में खड्ग के दो भाग हैं—फल और मुष्टि। प्रथम श्लोक 'फल' में चित्रित किया गया है और द्वितीय श्लोक मुष्टि में। 'सा' फल के अन्त में चित्रित है और 'दिजा' मुष्टि के उपरिभाग में। एक 'मा' मुष्टि के मध्य में चित्रित है और दूसरा 'मा' मुष्टि और फल के मध्य में। अब दोनों श्लोकों को यथाक्रम पढ़ सकते हैं—**मारारि·········रहंसा। साराब्धस्तवा······मा। माता············संभ्रमा। मान्याथ·········जा॥**

अन्वय—(हे) मातः! (सा त्वं) मां संत्रासात् त्रासीष्ठाः, आरम। (या त्वं) महिषमहाहावा, लसद्भुजा, जातलीला, मायाविनं, रसायातं, अयथासारवाचं, महिषमावधीः। (अथ च त्वं) अभीदा, शरण्या, मुत्, सदैवारुक्प्रदा, धीः, धीरा पवित्रा (असि)।

मा धीः
या व
वि मा
न्नं ष
स्म हि
हा म
ह्मा चं
वा
र
सा
या था
तं य
रु ला
स ली
द्रु त
जा

२. मुसलबन्ध, श्लोक-संख्या ८

इस मुसलचित्र में मुसल के तीन भाग हैं। मध्य भाग, दो पार्श्वभाग और अन्त भाग।

(१) मध्य भाग (तनुभाग)—इसमें 'वा रसा' ये वर्ण चित्रित हैं।

(२) दो पार्श्व-भाग—एक ऊपर, एक नीचे। ये दोनों दो-दो खण्डों में विभक्त हैं—एक बाईं ओर और दूसरा दाईं ओर। बाईं ओर श्लोक का पहला और दूसरा पाद चित्रित हैं, और दाईं ओर तीसरा और चौथा पाद।

(३) अन्त भाग—इसमें 'जा' चित्रित है। श्लोक को यथाक्रम पढ़ने से 'जा' की आवृत्ति दो बार होती है, तथा ऊपर से नीचे की ओर पढ़ते समय मध्य भाग में चित्रित 'वारसा' को पहले इस क्रम से पढ़ते हैं, पुनः नीचे से ऊपर पढ़ते समय 'सा र वा' इस क्रम से।

•

भी दा श र ण्या मु त्स दै वा रु क्त्र दा च
म र रा त मा ष्ठा सी ल्ल सा त्रा सं त्रा वि प रा धीः
मा

३. धनुर्बन्ध, श्लोक-संख्या ९

इस धनुश्चित्र में धनुष के दो भाग हैं—कुटिल वंश भाग और गुण-भाग। श्लोक का प्रथमार्द्ध वंश-भाग में चित्रित है और द्वितीयार्द्ध गुण-भाग में। वंश के निम्नतम भाग में 'मा' चित्रित है, वंश के एक सिरे (अधस्तन कोटि प्रान्त) पर 'म' है और दूसरे सिरे पर (शिखा रूप में) 'धीः' है। 'धी' और 'म' की आवृत्ति दो-दो बार की जाती है, और श्लोक के द्वितीयार्द्ध को दाएँ से बाईं ओर पढ़ा जाता है।

भूता। तथा मान्या पूज्या। अथ सीमा मर्यादा रामाणां स्त्रीणाम्। सर्वोत्तमेत्यर्थः। अनेन संदानितकेन खड्ग उत्पद्यते। आद्यः श्लोकः फलरूपोऽपरो मुष्टिरूपः। 'सा' शब्दः फलान्ते तैक्ष्ण्याकारी 'दिजा' इति मुष्टेरुपरि 'मा' शब्दौ तत्र साधारणौ। अस्य न्यासः॥

अथ मुसलधनुषी—

मायाविनं महाहावा रसायातं लसद्भुजा।
जातलीलायथासारवाचं महिषमावधीः ॥८॥मुसलम्॥
मामभीदा शरण्या मुत्सदैवारुक्प्रदा च धीः।
धीरा पवित्रा संत्रासात्त्रासीष्ठा मातरारम ॥९॥धनुः॥ (युग्मम्)

मायाविनमिति। मामिति। हे मातः, सा त्वं संत्रासाद्भयान्मां त्रासीष्ठा रक्ष। आरम व्यापारान्तरान्निवर्तस्व। पश्य मामित्यर्थः। या त्वं महिषं महिषासुरमावधीर्हतवतीति संबन्धः। कीदृशं महिषम्। मायाविनं छद्मपरम्। त्वं तु महाहावा महान्हावश्चेष्टाविशेषो यस्याः सा। रसेन दर्पेणायातं महिषम्। त्वं लसद्भुजा लसन्तौ भुजौ यस्याः। तथा जातलीला संपन्नविलासा। महिषमयथासारवाचमयथासारा मर्यादोल्लङ्घिनी वाग्यस्य। तथा त्वमभियमभयं ददासीत्यभीदा। शरणे साधुः शरण्या। मुत्प्रहृष्टा। सदैव सर्वकालमरुक्प्रदा नीरोगत्वदायिनी। चः समुच्चये। धीर्बुद्धिः। तद्धेतुत्वात्। धीरा निर्भया। पवित्रा पावनी। अत्राद्यश्लोकेन मुसलम्—मध्ये तनु पार्श्वयोः स्थूलमेकत्र प्रान्ते तीक्ष्णम्। तत्र मध्ये 'वारसा' इत्यक्षरत्रयं साधारणमन्ते 'जा' इति।

कठिन शब्दों के अर्थ

महाहावा—प्रचुरचेष्टायुक्ता। रसायातम्—दर्पेण समागतम्, अयथासारवाचम्—मर्यादाहीनवचसम्। अभीदा—अभयप्रदा। मुत्—प्रसन्ना। अरुक्प्रदा—आरोग्यदात्री। धीः—शरीरिणी बुद्धिः। आरम—कार्यान्तरात् निवर्तस्व।

हे माता! शेष कार्य छोड़कर मेरी ओर देखो और मुझे भय से बचाओ। आपने बड़े दर्प से आक्रमण के लिए आये हुए और दुर्वचन बोलते हुए महिषासुर को खेल-खेल में, हावभाव दिखाते हुए अपनी सुन्दर भुजाओं से मार दिया। आप ही मुझे अभय देने वाली हैं, आप ही मेरी शरण्य हैं। प्रसन्नता, आरोग्य और बुद्धि की दात्री भी आप ही हैं। आप परम-पवित्र और धीर-स्वभाव हैं।८ ९।

अन्वय—अङ्ग (हे) सद्रस! सर्वदा सादरं मनसा दास्यं गत्वा तां माननापरुषं लोकदेवीं सन्नम।

कठिन शब्दों के अर्थ

माननापरुषम्—पूजनेन विगतकोपाम्। सद्रस—भक्तिभरेण आर्द्रहृदय! सन्नम—सम्यक् प्रणामं कुरु।

४. शरबन्ध, श्लोक-संख्या १०

इस शर-चित्र में शर के चार भाग हैं—दण्ड, फल, दो वाज (पक्ष), और अटनी (शर का एक सिरा)। यहाँ दण्ड में प्रथम पाद चित्रित है और फल में द्वितीय पाद। दो पक्षों तथा अटनी में तृतीय और चतुर्थ पाद चित्रित हैं। 'सा' और 'दा' की आवृत्ति दो बार होती है।

द्वितीयश्लोकेन धनुः—तत्राद्यमर्धं कुटिलं वंशभागे, द्वितीयं गुणाकारं 'मा' शब्दोऽधस्तनकोटिप्रान्ते, तदुपान्ते च मकारो द्विरावृत्ति, 'धी' शब्दश्च शिखारूपः। न्यासः॥

अथ शरः—

माननापरुषं लोकदेवीं सद्रस सन्नम।

मनसा सादरं गत्वा सर्वदा दास्यमङ्गताम्॥१०॥शरः॥

माननेति। अङ्गेति कोमलामन्त्रणे। हे सद्रस सुभक्तिभरेणार्द्रहृदय, सर्वदा सदा सोदरं सप्रयत्नं मनसा चेतसा तां लोकदेवीं भुवनदेवतां सन्नम सम्यक्प्रणम। दासभावं गत्वाभ्युपेत्य। माननया पूजनयापगता रुट् क्रोधो यस्यास्तां माननापरुषम्। सापराधेऽपि पूजया सप्रसादामित्यर्थः। अत्र प्रथमपादेन दण्डः, द्वितीयेन फलम्, तृतीयचतुर्थाभ्यां वाजात्रटनी च। न्यासः॥

अथ शूलम्—

मा मुषो राजस स्वासूंल्लोककूटेशदेवताम्।

तां शिवावाशितां सिद्ध्याध्यासितां स्तुतां स्तुहि॥११॥शूलम्॥

मा मुष इति। हे राजस रजोगुणयुक्त, स्वासूनात्मप्राणान्मा मुषो मा हार्षीः। तां लोककूटानां जनसमूहानामीशा राजानस्तेषां देवतां स्तुहि नुहि। कीदृशीम्। शिवेन शंभुना वाशितामाहूतां शिवाभिर्वा वाशितां कृतकलकलाम्। सिद्ध्या कार्यसिद्ध्याध्या-

---

हे भक्तिपूरितहृदय वाले सौम्य ! तुम सदा बड़े आदर सहित दासभाव से उस भुवनदेवी को मन से प्रणाम किया करो। पूजा तथा अनुनय से उसके क्रोध को शान्त करो।१०।

अन्वय—(हे) राजस ! स्वासून् मा मुषः। लोककूटेशदेवतां शिवावाशितां सिद्ध्याध्यासितां स्तुतां तां हि स्तुहि।

कठिन शब्दों के अर्थ

मुषः—हर (हृ धातु, लोट्, मध्यम० एकवचन)।

राजस—रजोगुणयुक्त।

स्व-असून्—निजप्राणान्।

लोककूटेशः—जनसमूहस्वामी।

शिवावाशिताम्—शिवेन आहूताम्।

सिद्ध्याध्यासिताम्—कार्येषु सिद्धिप्रदात्रीम्।

हे रजोगुण-युक्त पुरुष ! तुम व्यर्थ में प्राण-त्याग न करके प्रजावत्सल राजाओं की सम्मान्य देवी, लोकवन्दनीया, सिद्धिप्रदात्री पार्वतीजी की स्तुति करो। स्वयं शिव भी उनका स्मरण करते हैं।११।

५. शूलबन्ध, श्लोक-संख्या ११

इस शूलचित्र के दो भाग हैं—दण्ड-भाग और त्रिशिखा-भाग। श्लोक का प्रथमार्द्ध दण्ड-भाग में चित्रित है, और द्वितीयार्द्ध त्रिशिखा-भाग में। द्वितीयार्द्ध दाएँ-बाएँ, ऊपर-नीचे आवृत्त हुआ है, और प्रथमार्द्ध का अन्तिम शब्द 'तां' भी द्वितीयार्द्ध में आवृत्त हुआ है। इस प्रकार 'तां शि वा सि द्व्या स्तु हि' ये सभी आवृत्त होकर द्वितीयार्द्ध को पूरा कर देते हैं।

सितां समधिष्ठिताम् । स्तुतां जगतेति । त्रिशिखमेतेन शूलमुत्पद्यते । प्रथममर्ध दण्डभागे द्वितीयं त्वावर्तपरावर्तैः शिखासु । तत्र सर्वशिखामूले 'तां' शब्दो वारपञ्चकमुच्चार्यते । शिखायामेकस्यां 'शिवा', द्वितीयायां 'सिद्धचा', मध्यमायां 'स्तुहि' । न्यासः ।।

अथ शक्त्यादीनि—

माहिषाख्ये रणेऽन्या नु सा नु नानेयमत्र हि ।
हिमातङ्कादिवामुं च कं कम्पिनमुपप्लुतम् ।।१२।।शक्तिः।।
मातङ्गानङ्गविधिनामुना पादं तमुद्यतम् ।
तङ्गयित्वा शिरस्यस्य निपात्याहन्ति रंहसा ।।१३।।हलम् ।।
इतीक्षिता सुरैश्चक्रे या यमाममभायया ।
महिषं पातु वो गौरी सायतासिसितायसा ।।१४।। रथपदम्।।
(विशेषकम्)

माहिषेति । मातङ्गेति । इतीति । सा गौरी वो युष्मान्पातु रक्षतु । या सुरैरित्यमीक्षिता सती महिषं यमामं यमगामिनं मृतममायया च्छद्मना चक्रे कृतवती । किंभूता । आयतैर्दीर्घैरसिभिः सितो बद्ध आयोऽर्थागमो यैस्तान्दानवादीन्स्यति हिनस्ति या सा तथोक्ता । क्वेक्षिता । माहिषाख्ये रणे महिषासुरसंबन्धिनि समरे । कथमीक्षिता ।

अन्वय—सा (गौरी) वः पातु । या आयतासिसितायसा, माहिषाख्ये रणे, 'अत्र अन्या नु सा नु' (इति) नाना सुरैरीक्षिता (सती) हिमातङ्कादिव कं कम्पिनं उपप्लुतम् अमुं महिषं यमामं चक्रे । (सा) अमुना मातङ्गानङ्गविधिना तं उद्यतं पादं तङ्गयित्वा अस्य शिरसि रंहसा निपात्य आहन्ति ।

कठिन शब्दों के अर्थ

माहिषाख्ये—महिषासुरसम्बन्धिनि । हिमातङ्कात्—हिमजनितपीडायाः । कं—कुत्सितम् । उपप्लुतम्—मदेनोद्धतम् । मातङ्गानङ्गविधिना—सदर्पत्वात् मातङ्ग-(गज-) विधिना, सलीलत्वात् अनङ्ग-(काम-) विधिना । तङ्गयित्वा—भ्रामयित्वा । यमामम्—यमगामिनं, यमनगरीपथिकम् । आयत-असि-सित-आय-सा—दीर्घखड्गैः अवरुद्ध-अर्थागमानां (दानवानाम्) हन्त्री ।

महिषासुर के साथ संग्राम में प्रवृत्त भगवती गौरी को देखकर संशय होने लगता था कि यह गौरी हैं, अथवा कोई अन्य । उस समय वे अनेक रूपों में दिखायी पड़ती थीं । अपने दीर्घ खड्गों से धन की संप्राप्ति को बाँधने वाले दानवों के विनाश में दक्ष गौरी ने महिषासुर को अनायास ही यमनगर का अतिथि बना दिया ।

नानानेकप्रकारम्। तदेव नानात्वमाह—अन्या नु सा न्विति। नुर्वितर्के। अत्र रण इयं देवी किमन्या स्यादुत सैव। भयानकत्वादनिश्चयः। तथैवंवादिभिः सुरैरीक्षिता यथामुं महिषं कं कुत्सितम्। कम्पिनं कम्पयुक्तम्। कुत इव हिमातङ्कादिव हिमर्तेरिव। तथोपप्लुतं मदोद्धतमाहन्ति मारयति। केनाहन्ति। अमुना प्रत्यक्षदृष्टेन मातङ्गानङ्गविधिना। सदर्पत्वाद्गजविधिना, सलीलत्वादनङ्गविधिना। किं कृत्वा। तं लोकप्रसिद्धं पादमुद्यतमुत्पाटितं तङ्गयित्वा भ्रामयित्वा। तदनन्तरं चास्य महिषस्य शिरसि रंहसा

[देवता लोग इस युद्ध को देखकर इस प्रकार संलाप करने लगे—] देखो यह नीच और उद्धत महिषासुर इस प्रकार काँप रहा है, मानो सर्दी से आक्रान्त हो। भगवती गौरी ने [दर्प के कारण] हाथी की-सी चेष्टा से युक्त तथा [लीला के कारण] कामदेव-सदृश मृदु चेष्टा से युक्त अपने पैर को उठाकर तथा घुमाकर वेग से महिषासुर के सिर पर आघात करके उसे मार डाला, इस प्रकार [संलाप करते हुए] देवों से [विस्मय के साथ] देखी जाती हुई भगवती गौरी आप सब की रक्षा करें।१२-१४।

६. *शक्तिबन्ध-श्लोक-संख्या १२*

इस शक्ति-चित्र में शक्ति के तीन भाग हैं—मध्यभाग, उपरिभाग और अधोभाग। उपरिभाग में एक शिखा है और अधोभाग में एक तीक्ष्ण प्रान्त। मध्य भाग में 'तं मा हि' ये तीन अक्षर चित्रित हैं। शिखा-भाग में 'कं' और तीक्ष्ण प्रान्त में 'नुसा' ये अक्षर चित्रित हैं। ऊपर और नीचे के दोनों भाग दो-दो खण्डों में विभक्त हैं। श्लोक को मध्य भाग में चित्रित 'मा' से प्रारम्भ करते हुए नीचे की ओर आते हैं, फिर ऊपर की ओर जाते हैं। इस प्रकार प्रान्त भाग में चित्रित 'नु सा' अक्षर दूसरी वार 'सा नु' के रूप में आवृत्त होते हैं। मध्य भाग में चित्रित अक्षर 'हि मा तं' इस रूप में आवृत्त होते हैं। शिखा-भाग में चित्रित 'कं' अक्षर दो बार आवृत्त होता है। इस प्रकार यह श्लोक पूर्ण रूप से उच्चरित हो जाता है।

वेगेन निपात्य निःक्षिप्य। इत्यादि जल्पद्भिः सुरैरीक्षिता यमामं चक्र इति संबन्धः। देवतास्तुत्या चैतदत्र सूच्यते—यथा प्रायेण चित्रस्य देवतास्तुर्तिविषयो न सरसं काव्यमिति। अत्राद्यश्लोकेन मध्यतन्वी तीक्ष्णप्रान्ता शक्तिरुत्पद्यते। तत्र 'हिमातं' इत्यक्षरत्रयं मध्ये, 'नुसा' अधः, 'कं' उपरि। तत्र 'हि' द्विरावृत्तिः, 'मातंनुकं' एते द्विरावृत्तयः। द्वितीयश्लोकेन हलम्। तत्र हलप्रविष्टेषाशल्यभागे 'तं' शब्दः, 'मा' तस्य पृष्ठे, 'नामु' फलतीक्ष्णाग्रे, 'गानङ्गविधि पादं तमुघ' वर्णाः फलेऽनुलोमविलोमश्रेणिद्वयस्थाः, 'गयित्वा शिरस्यस्यां इतीषयाम्, 'निपात्या' हलोर्ध्वभागे, हकारो हलोर्ध्वभागे कीलिकाशल्यमध्ये, हकारोर्ध्वे 'न्ति', हकाराग्रे 'रं', हकारपृष्ठे 'सा'। माराारिप्रमुखैरेभिरष्टभिः श्लोकैरष्टारं चक्रमुत्पद्यते। अत्र पूर्वार्धान्यष्टाराः अन्त्यार्धानि त्वेका नेमिः। 'मा' शब्दो नाभिः सर्वसाधारणः। अर्धान्त्यश्लोकान्त्याक्षराणि च। अत्र च न चक्रे स्वनामाङ्कभूतोऽयं श्लोकः कविनान्तर्भावितो यथा—

७. हलबन्ध, श्लोक-संख्या १३

इस हलचित्र में हल के ७ भाग हैं—(१) ईषाशल्य भाग, (२) ईषाशल्य भाग का पृष्ठभाग, (३) फल का तीक्ष्णाग्र भाग, (४) फल के दाएँ और बाएँ के दो खण्ड, (५) ईषाभाग, (६) ऊर्ध्वभाग, (७) ऊर्ध्वभाग में कीलिका शल्य—इसके चार खण्ड हैं—(क) मध्य, (ख) ऊर्ध्व, (ग) दाएँ और (घ) बाएँ। इन भागों में क्रमशः ये अक्षर चित्रित हैं— (१) तं, (२) मा, (३) नामु, (४) 'गा नं ग वि धि' तथा 'पा दं त मु घ', (५) ग यि त्वा शि र स्य स्य, (६) निपात्या, (७) ह, न्ति, रं, सा। इस प्रकार 'ना मु' की आवृत्ति 'मु ना' के रूप की जाती है, तथा 'तं' और 'इ' भी दो-दो बार आवृत्त होते हैं।

'शतानन्दापराख्येन भट्टवामुकसूनुना ।
साधितं रुद्रटेनेदं सामाजा धीमतां हितम् ॥'

अस्यार्थः—वामुकाख्यभट्टसुतेन शतानन्द इत्यपरनाम्ना रुद्रटेन कविना साधितं निष्पादितमिदं चक्रं काव्यं वा । कीदृशेन । साम गीतविशेषमजति प्राप्नोतीति सामाक्, तेन

८. *चक्रबन्ध, श्लोक-संख्या ६-१३*

इस चक्र-चित्र में एक नाभि है, जिसमें 'मा' अक्षर चित्रित है । चक्र का भीतरी भाग आठ अरों से युक्त है [इनके नीचे संख्या १, ३, ५, ७, ९, ११, १३, १५ लगी है] चक्र का बाहरी भाग आठ नेमियों से निर्मित है । [इनके बाहर संख्या २, ४, ६, ८, १०, १२, १४, १६ लगी है ।] अर और नेमि के संयोग-स्थल भी संख्या में आठ हैं ।

इस चक्रचित्र में आठ श्लोक (संख्या ६-१३) चित्रित हैं । इन सभी श्लोकों के प्रथमार्द्ध आठों अरों में चित्रित हैं और द्वितीयार्द्ध आठों नेमियों में । सभी प्रथमार्द्धों का प्रारम्भ 'मा' से होता है, अतः ये सभी नाभि में चित्रित 'मा' से सम्बद्ध हैं । सभी प्रथमार्द्धों का अन्तिम अक्षर वही है जो सभी द्वितीयार्द्धों का आदिम अक्षर है, अतः संयोग-स्थलों में चित्रित आठों अक्षर दो-दो बार आवृत्त हुए हैं ।

सामाजा । सामवेदपाठकेनेत्यर्थः तच्च । धीमतां बुद्धिमतां हितमुपकारकम् । न्यासः । तृतीयश्लोकेन रथपदानि पूर्यन्ते । रथपदन्यायेन युक्पादयोरावृत्तिनिवृत्तिभ्यां पाठः ॥

अथ तुरगपदपाठः—

सेना लीलीलीना नाली लीनाना नानालीलीली ।
नालीनालीले नालीना लीलीली नानानानाली ॥१५॥

सेनेति । तत्र—सेना, लीलीलीनः, न, आली, लीनानाः, नानालीलीली, न, आलीनाली, ईले, ना, आलीनाः, लीलीली, नानाना, अनाली, इति पदानि। पदार्थस्त्वयं यथा—कश्चिद्वक्ति—अहं ना पुरुषः सेनाः पृतना ईले स्तौमि। 'ईड स्तुतौ' । वर्तमानायां ए। सेनाः स्तौम्यहमिति संवन्ध । यद्वा परोक्षायां 'इले' इति रूपम् । वहुलत्वादाम्प्रत्ययाभावः । ततः कश्चिन्ना सेना ईले । तुष्टावेत्यर्थः । कीदृशीः सेनाः । लीला विद्यते येषां लीलिनस्तौतीत्येवंशीलो लीलीली स इनः स्वामी यासां ता लीलीलीनाः । ना कीदृशः आलमनर्थोऽसत्यं वा विद्यते यस्य स आली एवंविधो न । तथा लीनानि संवद्धान्यनांसि शकटानि शकटारूढा वा जना यस्य स लीनानाः । तथा नानाप्रकारा आलयः पंक्तयो नानालयस्तासां लीः श्लेषस्तां लान्ति गृह्णन्ति ये ते नानालीलीलाः

अन्वय—नाली, ना, लीनानाः, नानालीलीली, नालीनाली, लीलीली, नानानानाली, लीलीलीनाः, आलीनाः सेनाः ईले ।

कठिन शब्दों के अर्थ

सेनाः—सैन्यानि ।

लीलीलीना—लीलायुक्तपुरुषाणां

स्तुतिकर्ता स्वामिना युक्ताः (द्वि० बहु०) ।

न-आली—न असत्यवक्ता ।

लीनाना—शकटारूढपुरुषोपेतः ।

नाना-आली-ली-ली—अनेकपंक्तिस्थितपुरुषाणां नायकः, व्यूहाश्रितनरनायकः ।

न-आलीन-आली—न आश्रितानामनर्थकरः, सेवकानुकूलः । ईले-स्तौमि ।

ना-पुरुषः । आलीनाः—संबद्धाः (द्वि० बहु०) । लीलीली—सुखदायिन्याः भूमेः अधिपतिभिः नृपैर्युक्तः ।

नाना-ना-अनेकविधपुरुषैरुपेतः ।

अनाली—न मूर्खः, प्राज्ञः ।

मैं उस सेना की स्तुति करता हूँ जिसका स्वामी अनेक लीलाएँ करने वाला है, जो असत्य भाषण नहीं करता, जिसकी सेना में अनेक रथादि हैं, जहाँ पर अनेक पुरुष सेना के व्यूह बनाकर उसके सेनापति हैं । जिस सेना के राजा प्रजावत्सल हैं । जो सेना में अनेक भूमिपतियों से युक्त हैं । जिस सेना में सभी व्यक्ति बुद्धिमान् हैं ।१५।

पुरुषा विद्यन्ते यस्य स नानालीलीली । व्यूहाश्रितनरनायक इत्यर्थः । तथा आलीनानामाश्रितानामाली अनर्थकरः आलीनाली एवंविधो न । सेवकानुकूल इत्यर्थः । कीदृशीः सेनाः । आलीना आश्लिष्टाः । ना कीदृशः । लीलिनी लीलावती सुखितत्वात्प्राणिनामिला भूर्येषां ते लीलीला नृपास्ते यस्य सन्ति स लीलीली । तथा नानाप्रकारो ना मनुष्यो यस्य स नानाना । तथा आली मूर्ख उच्यते आलमस्यास्तीति वा न आली अनाली । प्राज्ञ इत्यर्थः । अत्र तुरगपदपरिज्ञानाय श्लोको यथा—'कशझेनागभटाय तथखेवेञराघवे । षजेयाढेपचेमेठे दोणसछलडेपडे ॥' अमुं श्लोकं 'सेनाली' इत्यादि प्रस्तुतश्लोकोपरिभागे यथाक्रमाक्षरं लिखित्वा ततः एतच्छ्लोकगतमातृकापठितकादिवर्णक्रमानुमिततुरगपदक्रमेण प्रस्तुतः श्लोक उच्चेय इति ।

---

१ से	३० ना	९ ली	२० ली	३ ली	२४ ना	११ ना	२६ ली
१६ ली	१९ ना	२ ना	२९ ना	१० ना	२७ ली	४ ली	२३ ली
३१ न	८ ली	१७ ना	१४ ली	२१ ले	६ ना	२५ ली	१२ ना
१८ ली	१५ ली	३२ ली	७ ना	२८ ना	१३ ना	२२ ना	५ ली

९. *तुरगपदबन्ध, श्लोक-संख्या १५*

इस तुरगपदबन्ध चित्र में निर्दिष्ट १, २, ३, ४ आदि संख्याओं का क्रम तुरग के चारों पदों के धारण के सूचक हैं। ये संख्याएँ निम्नोक्त रूप में निर्धारित की गयी हैं—दाईं ओर दो अंक छोड़कर नीचे का कोष्ठक अगली संख्या का सूचक है। [उदाहरणार्थ—१ के उपरान्त दो अंक (३०, ९) छोड़कर नीचे का कोष्ठक संख्या 'र' है।] फिर दाईं ओर दो अंक छोड़कर ऊपर का कोष्ठक अगली संख्या का सूचक है। [उदाहरणार्थ अंक २ के उपरान्त दाईं ओर के दो अंक (२९, १०) छोड़कर ऊपर का कोष्ठक '३' है।] इसके उपरान्त यथापूर्व ५, ६, ७, ८ संख्याएँ, पुनः ९, १०, ११, १२ संख्याएँ आदि तुरग के चारों पदों की सूचक हैं।

अन्वय—ये नानाधीनावाः, धीराः, नाधीवाः राधीराः [सन्ति], ते किं नानाशं नाकं शं [आशङ्कन्ते]। [ते] ते तेजोऽशं नाशङ्कन्ते।

कठिन शब्दों के अर्थ

नाना आधि-इन-अवाः—विविधमानसिकपीडायुक्ताः स्वामिनः रक्षकाः। धीराः—सत्त्वयुक्ताः। न-अधी-वाः—न दुष्टबुद्धि-आश्रयिणः, निष्कपटमानसाः।

अथ गजपदपाठमाह—

ये नानाधीनावा धोरा नाधीवा राधीरा राजन् ।
किं नानाशं नाकं शं ते नाशंकन्तेऽशं ते तेजः ॥१६॥

य इति । अत्र—ये, नानाधीनावाः, धीराः, न, अधीवाः, राधीराः, राजम् किं, नानाशं, नाकं, शं, ते, न, आशङ्कन्ते, अशं, ते, तेजः, इति पदानि । पदार्थस्त्वेवम्—यथा कश्चिद्राज्ञः कस्यापि सेवकानभिनन्दति—हे राजन्, ये तदीयभृत्या एवंगुणयुक्तास्ते किं नाकस्येदं नाकं स्वर्गसक्तं शं शिवं सुखमाशङ्कन्ते । नञ उत्तरत्र संबन्धः । किंशब्द-काक्वावश्यं तेषां स्वर्गसुखं भवतीत्यर्थः । कीदृशा ये । नानाविधा आधयो यस्य स नानाधिः स चासाविनश्च प्रभुस्तमवन्ति विनाशाद्रक्षन्तीति नानाधीनावाः तथा धीराः

राधीराः—हिंसकानां विनाशकाः । नानाशम्—विविधसुखाभिलाषैः पूर्णम् । नाकं—स्वर्गसम्बन्धि । शं—शिवं, सुखम् । ते—उपर्युक्त गुणविशिष्टाः सेवकाः । अशं—दुःख रूपम् । ते—तव ।

कोई व्यक्ति किसी राजा के सेवकों की प्रशंसा करते हुए कहता है—हे राजन् ! आपके उत्तम गुणों से युक्त ये सेवक अनेकविध आशाओं से पूर्ण स्वर्गसुख भोगने के योग्य हैं; क्योंकि ये विविध मानसिक तापों से पीड़ित राजा की रक्षा करने वाले हैं, सत्त्व गुणयुक्त हैं तथा इनकी बुद्धि निष्कपट एवं पापरहित है । वे हिंसकों को दण्ड देनेवाले हैं तथा आप से अभयदान पाकर सर्वथा आश्वस्त हैं ।१६।

१ ये	२ ना	३ ना	४ धी	५ ना	६ वा	७ धी	८ रा
९ ना	१० धी	११ वा	१२ रा	१३ धी	१४ रा	१५ रा	१६ जन्
१७ किं	१८ ना	१९ ना	२० शं	२१ ना	२२ कं	२३ शं	२४ ते
२५ ना	२६ श	२७ ङ्क	२८ न्ते	२९ ऽशं	३० ते	३१ ते	३२ जः

१०. गजपद-बन्ध, श्लोक-संख्या १६

यह चित्रबन्ध गजपद-क्रम का सूचक है । इसमें प्रत्येक पाद को [यथाक्रम अक्षरों के अनुसार पढ़ने के अरिरिक्त] निम्नोक्त कोष्ठक संख्या के अनुरूप भी यथा-वत् पढ़ सकते हैं :

प्रथम पाद—१, ९, २, १०, ३, ११, ४, १२
द्वितीय पाद—५, १३, ६, १४, ७, १५, ८, १६
तृतीय पाद—१७, २५, १८, २६, १९, २७, २०, २८
चतुर्थ पाद—२१, २९, २२, ३०, २३, ३१, २४, ३२

सम्भवतः यह क्रम गज के चारों पदों के धारण का सूचक है ।

सत्त्वयुक्ताः । तथा दुष्टा धीर्बुद्धिरधीस्तां वान्ति गच्छन्त्याश्रयन्त्यधीवा एवंविधा न । तथा 'राधो हिंसायाम्' । राधिनो हिंसकास्तानीरयन्तीति राधीराः । शं कीदृशम् । नानाविधा आशाः सुखाभिलाषा यत्र तन्नानाशम् । किंच ते तव संबन्धि यत्तेजस्तदशं दुःखरूपमित्येवं नाशङ्कन्ते । प्रभुतेजोऽस्माकं नाशयेति चेतसि नैव कुर्वन्वीत्यर्थः अत्र गजपदन्यायेन श्लोक उत्पद्यते । स च श्लोकगतप्रथमनवमद्वितीयदशमतृतीयैकादश-चतुर्थद्वादशादिक्रमेण उच्चेय इति ।।

अथ प्रतिलोमानुलोमपाठं स्रग्धरावृत्तमाह—

वेदापन्ने स शक्ले रचितनिजरुगुच्छेदयत्नेऽरमेरे
देवासक्तेऽमुदक्षो बलदमनयदस्तोददुर्गासवासे ।
सेवासर्गादुदस्तो दयनमदलवक्षोदमुक्ते सवादे
रेमे रत्नेऽयदच्छे गुरुजनितचिरक्लेशसन्नेऽपदावे ।।१७।।

वेदापन्न इति । स कश्चिद्गुणिप्रियो रत्ने गुणवति जने रेमे ननन्द । 'जातौ जातौ यदुत्कृष्टं तद्रत्नमभिधीयते' । वेदानापन्नो वेदापन्नस्तत्र । अधीतवेद इत्यर्थः । तथा शक्ले प्रियंवदे । तथा रचितः कृतो निजाया रागद्वेषात्मिकाया रुजो बाधाया उच्छेद उन्मूलने यत्नो येन तस्मिन्रचितनिजरुगुच्छेदयत्ने । तथा न रमन्ते सुजनेषु धर्मे

अन्वय—स अमुदक्षो, बलदमनयदः, सेवासर्गादुदस्तः, वेदापन्ने, शक्ले, रचित-निजरुगुच्छेदयत्ने, अरमेरे, देवासक्ते, तोददुर्गासवासे, दयनमदलवक्षोदमुक्ते, सवादे, अयदच्छे, गुरुजनितचिरक्लेशसन्ने, अपदावे रत्ने रेमे ।

कठिन शब्दों के अर्थ

वेदापन्ने—अधीतवेदे । शक्ले—प्रियंवदे । रुक्—रागद्वेषात्मिका बाधा । अरम-ईरे—अधार्मिकानां, दुर्जनानां विनाशके । अमुत्-अक्षः—जितेन्द्रियः । बल-दम-नयदः—शक्ति-उपशमनीतेरुपदेष्टा । तोददुर्गास-वासे—दुःखदुर्ग भञ्जकानामाश्रयभूते । सेवासर्गात् उदस्तः—सेवावृत्तौ शिथिलोत्साहः, स्वाधीनताप्रियः । दयन-मदलव-क्षोद-मुक्ते—धनदानादिजनितगर्वलेशाद् रहिते । सवादे—वादचातुरीसमुपेते, प्रमाण-शास्त्रज्ञे । रत्ने—श्रेष्ठे नरे । अयदच्छे—अनिर्गत-नैर्मल्ये, पवित्र-मानसे । गुरुजनित-चिर-क्लेश-सन्ने—गुरुजनशुश्रूषा-जनित-श्रान्तिमुक्ते । अपदावे—उपताप-रहिते ।

वह जितेन्द्रिय, शक्ति और सामनीति का उपदेष्टा, स्वाधीनवृत्ति पुरुष, उस गुणी व्यक्ति से प्रेम करता है, वह व्यक्ति वेदवित्, मधुरभाषी, रागद्वेषादि चित्त-वृत्तियों के उन्मूलन में तत्पर, दुर्जनों को सत्प्रेरणा देनेवाला, देवोपासक, बड़े-बड़े शूरों के आश्रयदाता, दानादि के गर्व से सर्वथा शून्य, शास्त्र-प्रमाणज्ञ, शुद्धाचार, गुरुओं के सेवाकार्य में आसक्त और शान्तचित्त है ।१७।

वा ये ते अरमा दुर्जनास्तानीरयति यस्तस्मिन्नरमेरे। तथा देवेश्वासक्तो देवासक्त-स्तस्मिन्देवासक्ते। देवपूजोद्यत इत्यर्थः। स कीदृशः। न मोदन्ते प्रमोदं यान्तीत्यमुन्दि अक्षाणीन्द्रियाणि यस्य सोऽमुदक्षो जितेन्द्रियः। तथा बलदमनयदः शक्त्युपशमनीतिदाता। रत्ने कीदृशे। तोदस्य व्यथाया दुर्गा इव दुर्गाः परानभिभूतास्तानध्यस्यन्ति क्षिपन्तीति तोददुर्गासास्तेषां वासे निलये। शूराणामपि शूरा यमाश्रिता इत्यर्थः। स कीदृशः। सेवायां परप्रणतौ सर्ग उत्साहस्तत उदस्तो निवृत्तः। स्वाधीन इत्यर्थः। रत्ने कीदृशे। दयनं दानं रक्षा वा तेन यो मदलवो गर्वकणिका तेन यः क्षोदः परिकत्थनं तेन मुक्ते रहिते। प्रियं कृत्वाप्यगर्वित इत्यर्थः। यद्वा अदयनेन निर्दयत्वेन मदलवेन गर्वलेशेन क्षोदेन हिंसया च मुक्ते। तथा सह वादेन वर्तते सवादस्तस्मिन्। प्रमाणशास्त्रज्ञ इत्यर्थः। तथा अयन्नगच्छन्नच्छो नैर्मल्यं यस्य तत्रायदच्छे। शुद्धिमतीत्यर्थः तथा। गुरुभिः पूज्यै-र्जनितो यश्चिरं क्लेशः शुश्रूषाश्रमस्तेनैव सन्ने श्रान्ते। न त्वेन्येन। तत्र वा सन्ने सक्ते। तथा अपदान्पदभ्रष्टानवतीत्यपदावः। यदि वापगतो दाव उपतापो यस्य तस्मिन्निति। यथैवायं श्लोकः क्रमेण पठ्यते, एवं व्यतिक्रमेणापीति प्रतिलोमानुलोमः॥

अथार्धभ्रममाह—

सरसायारिवीरालीरसनव्याध्यदेश्वरा।
सा नः पायादरं देवी याव्यायागमदध्यरि ॥१८॥

सरसेति। सा ईश्वरा देवी गौरी नोऽस्मानरं शीघ्रं पायादव्यात्। या अगमद्-गता। कथम्। अध्यरि रिपूनधिकृत्य। कीदृश्यगमत्। अव्याया विगत आयोऽर्थागमो यस्याः सा व्याया, न व्याया अव्याया। सलाभेत्यर्थः। तथा अयनमायः, सरसः सरोष आयो रणे गमनं यस्याः सा सरसाया, सा चासावरिवीराली च शत्रुसुभटपंक्तिस्तस्या रसनेनास्वादनेन हिंसया विशेषेण भक्तानामाधीर्मनोदुःखान्यत्ति नाशयतीति सरसायारि-वीरालीरसनव्याध्यदा। यदि वा सरसाया अरिवीराल्या रसेन भावेन नव्या स्तुत्या। आध्यदा दुःखनाशिका। अर्धभ्रमणादर्धभ्रमोऽयम्। न तु सर्वतोभद्रवत्सर्वत्र भ्राम्यति॥

अन्वय—सा ईश्वरा देवी नः अरं पायात्, या अव्याया, सरसायारिवीराली-रसनव्याध्यदा अध्यरि अगमत्।

कठिन शब्दों के अर्थ

स-रस-आया—[रणे] सरोषअभिगमन युक्ता। अरि-वीर-आली-रसन-वि-आधि-अदा—शत्रुवीराणां हिंसया [भक्तानां] मनोदुःखस्य विशेषेण विनाशिका।

वह देवी गौरी हमारी शीघ्र रक्षा करें। वह वैभव-सम्पन्न हैं तथा रोषपूर्वक युद्ध के लिये आये हुए शत्रु-वीरों के विनाश द्वारा भक्तों के मानसिक संताप को शान्त करने वाली हैं। वह भगवती गौरी शत्रुओं के सम्मुख युद्धार्थ चली गयीं।१८।

अथ मुरजबन्धः—

सरलाबहलारम्भतरलालिबलारवा ।

वारलाबहलामन्दकरला बहलामला ॥१९॥

सरलेति । सर्वभाषाभिरमागधिकाभिः शरद्वर्णने श्लोकोऽयम् । तत्र कीदृशी शरद्वर्तते । सरलो दीर्घ आ समन्ताद्बहलेन प्रभूतेनारम्भेण तरलानां चञ्चलानामलिबलानां भ्रमरसैन्यानामारवः शब्दो यस्यां सा सरलाबहलारम्भतरलालिबलारवा । तथा

	१	२	३	४	१	२	३	४	
१	स	र	सा	या	रि	वी	रा	ली	४
२	र	स	न	व्या	ध्य	द	श्व	रा	३
३	सा	नः	पा	या	द	रं	दे	वी	२
४	या	व्या	या	ग	म	द	ध्य	रि	१

११. अर्द्धभ्रम-बन्ध, श्लोक-संख्या १८

(प्रथम खण्ड) (द्वितीय खण्ड)

यह चित्रबन्ध अर्द्धभ्रम का सूचक है । इस चित्र के दो खण्ड हैं । इन दोनों खण्डों में प्रत्येक पाद के अर्द्धभाग को [यथाक्रम अक्षरों के अनुसार पढ़ने के अतिरिक्त] बाण-चिह्नों एवं कोष्ठक संख्या के अनुरूप भी यथावत् पढ़ सकते हैं । अर्द्धभ्रम और सर्वतोभ्रम में अन्तर जानने के लिए चित्र-संख्या १३ देखिए ।

अन्वय—सरलाबहलारम्भतरलालिबलारवा, वारलावहला, अमन्दकरला, बहलामला ।

कठिन शब्दों के अर्थ

सरल-आबहल-आरम्भ-तरल-अलि-बल-आरवा—समन्तात् प्रचुरसमारम्भेण भ्रमरसैन्यस्य दीर्घगुंजनशब्दैः युक्ता । वारलावहला—हंसीसमूहेन व्याप्ता । अमन्द-करला—सोत्साहैः नृपतिभिः अधिष्ठिता । बहलामला—प्रकर्षेण निर्मला, यद्वा प्रभूत-आमलकीफलैः समृद्धा ।

यह शरद् ऋतु सुदूर तक फैलने वाले भ्रमर-समूह के गुञ्जन से युक्त है । इस ऋतु में हँसिनियों के झुण्ड दिखायी पड़ते हैं । राजा लोग विजय-यात्रा के लिये सोत्साह हैं तथा पृथ्वी, दिशा, आकाश आदि मेघ, धूलि, पंक आदि उपद्रवों से रहित तथा निर्मल हैं ।१९।

वारलाभिर्हंसीभिर्बहला संतता । यदि वा वारेण परिपाट्या लावो लवनं येषां तानि तथाविधानि हलानि हलकृष्टधान्यक्षेत्राणि यस्यां सा तथाविधा । तथा करं लान्ति गृह्णन्ति ये ते करला नृपा: । अमन्दा यात्रायां सोद्यमा: करला यस्यां सा तथाविधा । तथा बहलानि प्रभूतान्यामलान्यामलकीफलानि यस्यां सा तथाविधा । यदि वा बहल-मत्यर्थममला निर्मला बहलामला । अत्र मुरजत्रयमर्धमुरजौ चान्ते भवत: । न्यास: ॥

१२ मुरजबन्ध, श्लोक-संख्या १६

मुरज कहते हैं ढोल को । उक्त चित्र में 'सरलाबहला···' आदि श्लोक पूरा-का-पूरा तथा ज्यों-का-त्यों लिख देने से तीन मुरज तो बीच में बन गये हैं और आधा-आधा मुरज दोनों सिरों पर । [किन्तु हमें इस बन्ध में कोई विशेष चमत्कार प्रतीत नहीं होता ।]

अन्वय—[हे] सार ! अतक्षर !! तव रक्षत: [सत:] तु सा रसा साररसा अस्तु । [हे] आयताक्ष । [सा] क्षतायसा, सातावा [अस्तु] । हे अत ! [सा] अतासा [भवतु] ।

कठिन शब्दों के अर्थ

रसा—पृथ्वी । साररसा—उत्कृष्ट-रसोपेता । [हे] सार—[हे] उत्कृष्ट ! [हे] आयताक्ष ! विशाललोचन ! क्षतायसा—अर्थागमलुण्ठकानां चौराणां विनाशनी । सातावा—सुख-रक्षिका, श्रेयस्करी । [हे] अत—[नित्यम्] उद्यमशील ! तव—भवत: । अतासा—अक्षया । रक्षत:—पालयत:, तु, अस्तु—भवतु । [हे] अतक्षर—न तनूकर्त: ! पुष्टिसम्पादक !

अथ सर्वतोभद्रमाह—

रसा साररसा सार सायताक्ष क्षतायसा ।
सातावात तवातासा रक्षतस्त्वस्त्वतक्षर ॥२०॥

कोई व्यक्ति राजा से कहता है—हे भूपशिरोमणे ! प्रजापालक ! आपके संरक्षण में यह पृथ्वी उत्कृष्ट वस्तुओं से सम्पन्न हो । हे विशालनेत्र ! आपके राज्य में सम्पत्ति का नाश करने वाले चोर-लुटेरों का विनाश हो । यह पृथ्वी सबका कल्याण-सम्पादन करती रहे । हे उद्यमशील राजन् ! इस पृथ्वी की सम्पत्ति का कभी नाश न हो ।२०।

र	सा	सा	र	र	सा	सा	र
सा	य	ता	क्ष	क्ष	ता	य	सा
सा	ता	वा	त	त	वा	ता	सा
र	क्ष	त	स्त्व	स्त्व	त	क्ष	र
र	क्ष	त	स्त्व	स्त्व	त	क्ष	र
सा	ता	वा	त	त	वा	ता	सा
सा	य	ता	क्ष	क्ष	ता	य	सा
र	सा	सा	र	र	सा	सा	र

१३. सर्वतोभद्र बन्ध, श्लोक-संख्या २०

सर्वतोभद्र से यहाँ तात्पर्य है सब ओर से ग्राह्य । इस चित्रबन्ध से स्पष्ट है है कि श्लोक का प्रत्येक पाद निम्नोक्त रूप में पढ़ा जा सकता है—

प्रथम पाद —पहली और आठवीं पंक्तियाँ　　दाएँ से बाएँ तथा
द्वितीय पाद—दूसरी और सातवीं पंक्तियाँ　　बाएँ से दाएँ और
तृतीय पाद— तीसरी और छठी पंक्तियाँ　　ऊपर से नीचे तथा
चतुर्थ पाद — चौथी और पाँचवीं पंक्तियाँ　　नीचे से ऊपर

'सर्वतोभद्र' चित्र में जिस प्रकार इतना अधिक 'भ्रमण' किया जा सकता है, 'अर्द्धभ्रम' चित्र में यह आधा ही सम्भव है, जैसा कि ऊपर चित्रसंख्या ११ से स्पष्ट है ।

रसेति । कश्चिद्राजानमाह—हे सार उत्कृष्ट, तव रक्षतः पालयतः सतः सा रसा पृथ्वी साररसा उत्कृष्टरसास्तु भवतु । हे आयताक्ष दीर्घलोचन, तथा सा क्षतायसा चास्तु । क्षतो नाशित आयोऽर्थागमो यैस्ते क्षतायाश्चौरादयस्तान्त्यत्यन्तं नयतीति कृत्वा । तथा सातं सुखमवतीति सातावा । श्रेयस्करीत्यर्थः अस्त्विति सर्वत्र योज्यम् । हे अत । अतति नित्यमेवोद्यमं भजत इत्यर्थः । तथा अतासा अक्षया रसा । भवत्विन्त्यत्रापि योगः । तुर्नियमे । रक्षत एव, न त्ववलिप्तस्य । तथा हे अतक्षर तक्षणं तक्षस्तनूकरणं तं राति ददातीति तक्षरः, तक्षरोऽतक्षरः । पुष्टिद इत्यर्थः । चतुर्दिशं वाच्यत्वात् सर्वतोभद्रोऽयं श्लोकः ।।

आदिग्रहणसंगृहीतं पद्याद्युदाहरणमाह—

या पात्यपायपतितानवतारिताया
यातारिपावपति वाग्भुवनानि माया ।
यामानिना वपतु वो वसु सा स्वगेया
यागे स्वसासुररिपोर्जयपात्यपाया ।।२१।।

येति । सा इना स्वामिनी गौरी वो युष्मभ्यं यामानष्टावपि प्रहरान्नित्यं वसु धनं वपतु जनयतु । या अपायपतितानापद्गतान्प्राणिनः पाति रक्षतीति । किंभूता सती ।

अन्वय—सा इना वो यामान् वसु वपतु, या अवतारिताया, यातारिता अपाय पतितान् पाति । [या] वाक् भुवनानि आवपति । [या] माया, यागे स्वगे या, असुररिपोः स्वसा, जयपा, अत्यपाया [अस्ति] ।

कठिन शब्दों के अर्थ

अपायपतितान्—आपद्गतान् प्राणिनः । अवतारिताया—अर्थागमस्य प्रापिका, संपत्तिप्रदा । यातारिता—विगतशत्रुभावा । आवपति—व्याप्नोति । वाक्—वचनरूपा, वाणीरूपा । माया—दुर्बोधत्वात् मायारूपिणी । यामान्—अष्टौ प्रहरान् । इना—स्वामिनी गौरी । वपतु—जनयतु । स्वगेया—आत्मनैव स्तुत्या, वाग्रूपत्वात् । स्वसा—भगिनी । असुररिपोः—विष्णोः । जयपा—भक्तानां समृद्धिरक्षिका । अत्यपाया—अनर्थविध्वंसकर्त्री ।

वह स्वामिनी गौरी आपको आठों पहर धन-सम्पत्ति से सम्पन्न करती रहें, जो वैभव की प्रदात्री हैं, शत्रुभाव से सर्वथा निर्मुक्त एवं निर्मत्सर हैं, और विपद्ग्रस्त प्राणियों की रक्षा करने वाली हैं । वह देवी गौरी वाग्रूप होकर सारे भुवन में व्याप्त हैं, अज्ञेय होने से माया-रूप हैं । स्वयं वाग्रूप होने से यज्ञ में अपनी स्तुति आप ही हैं । [वह देवी गौरी] भगवान् विष्णु की बहिन हैं । भक्तों के उत्कर्ष अथवा जय की रक्षा करने वाली हैं, तथा विघ्न-विनाशिनी हैं ।२१।

अवतारितः प्रापित आयोऽर्थागमो यया सावतारितायाः। तथा याता निवृत्तारिता शत्रुभावो यस्यां सा यातारिता। निर्मत्सरेत्यर्थः। या तथा वाक् वचनरूपा सती भुवनानि जगन्त्यावपति व्याप्नोति। या च तत्त्वतो ज्ञातुमशक्यत्वान्मायेव माया। या च यागे यज्ञे स्वेनात्मनैव गेया स्तुत्या। वाग्रूपत्वात्तस्याः। तथा या चासुररिपोर्विष्णोः स्वसा भगिनी। या च जयं सर्वोत्कर्षवर्तनं भक्तानां पाति रक्षतीति जयपा। तथातिक्रान्ता

१४. पद्मबन्ध, श्लोक-संख्या २१

इस पद्मचित्र में चार दल हैं। प्रस्तुत श्लोक के प्रत्येक पाद में पहला और अन्तिम वर्ण 'या' है। इसे पद्मचित्र के मध्य में 'कर्णिका' रूप में चित्रित किया गया है। प्रत्येक पाद के अन्तिम चार वर्ण अगले पाद के आरम्भिक चार वर्ण हैं, किन्तु विलोम रूप में। इसी प्रकार चौथे पाद के अन्तिम चार वर्ण भी पहले पाद के आरम्भिक चार वर्ण हैं—विलोम रूप में। इस प्रकार पूरा श्लोक पढ़ने से 'या' (कर्णिका) की आवृत्ति ८ बार हो जाती है, तथा प्रत्येक पाद के अन्तिम चार वर्ण भी विलोम रूप से दो-दो बार आवृत्त हो जाते हैं। प्रतीत ऐसा होता है कि प्रत्येक दल में १२-१२ वर्ण हैं, और इस प्रकार ४८ वर्ण होने चाहिए, किन्तु वस्तुतः हैं ३२ वर्ण। ३३वाँ वर्ण कर्णिका रूप में है। १४ वर्णों वाले इस छन्द के कुल ५६ वर्णों में से ३३ वर्ण इस चित्र में चित्रित हैं, शेष २३ वर्ण आवृत्त रूप में ग्राह्य हैं।

अपाया अनर्था यया सात्यपाया । निरापदेत्यर्थः । इदमष्टदलं पद्ममिति पूर्वे भणन्ति तन्न सम्यग्बुध्यते । चतुर्दलं तु बुध्यते । यथा 'या' शब्दोऽत्र कर्णिका अष्टवारान्परावर्त्यते । दलानि द्वादशाक्षरणि । तत्र पार्श्ववर्तिनश्चत्वारश्चत्वारो वर्णा दलसंधिगतत्वाद्द्विरावर्त्यन्ते ।।

अथानुलोमविलोमविपर्यस्ताक्षरपाठेन श्लोकाच्छ्लोकान्तरोत्पत्तिमाह । तत्राद्यः श्लोकः—

समरणमहितोपा यास्तनामारिपाता
वनरतिसरमाया वानरा मापसारम् ।
अमरततवरालीमानमासाद्य नेदू
रणमहिमतताशा धीरभावेऽसिराते ।।२२।।

समरणेति । सुग्रीवाङ्गदप्रभृतयोऽत्र वानरा वर्ण्यन्ते—वानरा नेदुः । जगदुरित्यर्थः । कीदृशाः । समौ तुल्यौ रणमहौ संग्रामोत्सवौ येषां ते समरणमहा इन्द्रजित्प्रभृतयस्ते विद्यन्ते येषां ते समरणमहिनो रावणादयस्तांस्तुपन्ति हिंसन्ति ये ते समरणमहितोपाः। तथा यान्ति गच्छन्तीति या अभियोगिनः, अस्तः परित्यक्तो नामो नतिर्यैस्तेऽस्तनामा, याश्च तेऽस्तनामाश्च ते च तेऽरयश्च शत्रवश्च तान्पातयन्ति नाशयन्तीति यास्तनामारिपाताः । यदि वा समशब्दः सर्वनामसु । ततः समरणेषु सर्वसमरेषु महितः पूजित उपायो येषां ते च तेऽस्तनामारिपाताश्चेति समासः । तथा वने रतिर्येषां ते वनरतयो मुनय-

---

अन्वय—समरणमहितोयाः, यास्तनामारिपाताः, वनरतिसरमायाः, रणमहिमतताशाः वानराः अमरततवरालीमानम् आसाद्य असिराते धीरभावे मापसारं नेदुः ।

कठिन शब्दों के अर्थ

सम-रण महि-तोपाः—युद्धमुत्सवं च समानं [कलयतां] (रावणादीनां) हिंसकाः (सुग्रीवादयः) । या-अस्तनाम-अरि-पाता—आक्रामकानां, नमस्कारम् अकुर्वतां, शत्रूणां विनाशकाः । वनरतिसरमाया—वनेषु वासमभिरोचमानानां मुन्यादीनां हन्तुमिच्छया उपसर्पतां (राक्षसानां) हिंसकाः । माऽपसारम्—पलायनेच्छां विहाय । अमरततवरालीमानम्—देवैः दत्तं वरसमूहरूपमादरम् । नेदुः—शब्दं कृतवन्तः । रणमहिम-ततआशाः—युद्धमाहात्म्येन व्याप्तदिशाः । असिराते—खड्गेन दत्ते [सति] ।

युद्ध और उत्सव को समान समझनेवाले मेघनाद आदि वीरों से युक्त रावणादि के हन्ता, युद्ध में निर्भय तथा हार न मानने वाले शत्रुओं के विनाशक, वनवासी मुनियों के घातक राक्षसों का नाश करने वाले वानरगण देवों से वरदान पाने का मान अर्जित करके, खड्गहस्त होने के कारण धैर्यभाव में आस्थित तथा युद्ध की बातों से सब दिशाओं को गुञ्जाते हुए विसपष्ट स्वर में बोले ।२२।

स्तान्सरन्ति जिघांसयाभिगच्छन्तीति वनरतिसरा राक्षसादयस्तान्मीनन्तीति कर्मण्यणि वनरतिसरमायाः । कथं नेदुः । मापसारम् । मा प्रतिषेधे ततश्चविद्यामानोऽपसारश्छेदो यत्र कर्मणि तन्मापसारम् । किं कृत्वा नेदुः । अमरैर्देवैस्तता विस्तारिता दत्ता या वराली वरपरम्परा तया मानं पूजां गर्वं वासाद्य प्राप्य । तथा रणमहिम्ना युद्धमाहात्म्येन तता व्याप्ता आशा दिशो यैस्ते तथोक्ताः । कदा नेदुः । धीरभावे धैर्येऽसिना खड्गेन राते दत्ते सति ।।

अस्माच्छ्लोकादेकाक्षरव्यवधानेन द्वयोर्द्वयोश्च विपर्ययपाठेनायं श्लोको निर्याति ।

यथा—

सरमणहिमतोयापास्तमानारितापा
वरनतिरसमावायानमारा परं सा ।
अरमत बत रामा लीनसामाद्यदूने
रमणहितमताधीशारवे भासितेरा ।। २३ ।।

अन्वय—सा रामा आद्यदूने अधीशारवे बत परम् अरमत । [या] सरमण-हिमतोया, अपास्तमानारितापा, वरनतिः, असमा, अवा, अयानमारा, लीनसामा, रमणहितमता, भासितेरा [अस्ति] ।

कठिन शब्दों के अर्थ

सरमणहिमतोया—पतिरूपेण शीतलजलेनयुक्ता ।
अपास्तमान-अरि-तापा—मानरूपशत्रुजनितसंतापं दूरीकृत्य ।
वरनतिः—श्रेष्ठप्रणतियुक्ता, [विगतमानत्वात्] प्रणामपरा ।
असमा—सर्वोत्कृष्टा ।
अवा—स्वस्य पत्युर्वा रक्षिका ।
अयान-मारा—अविगतकन्दर्पा, अपरित्यक्तकामा ।
लीनसामा—संबद्धप्रियवचना, प्रियभाषिणी ।
आद्यदूने—गद्गदप्रधाने, विशेषेण गद्गदिका-गृहीते [वचसि] ।
रमणहितमता—पत्युः मङ्गलाकांक्षिणी, प्रिया च ।
अधीशारवे—पत्युः वचसि ।
भासितेरा—शोभनया वाचा युक्ता, प्रियभाषिणी ।

आश्चर्य की बात है कि वह मानगर्विता भी अपने प्रिय के सन्तप्त एवं गद्गद वचन सुनकर परम प्रसन्न हो गयी है, क्योंकि वह अब सन्तापहारक प्रियरूपी शीतल जल से संयुक्त है। वह अपने मानरूपी शत्रु द्वारा जनित ताप छोड़कर पति से विनीत व्यवहार करने लगी है, इसलिए वह सर्वोत्कृष्ट है तथा अपनी या पति की रक्षा में तत्पर है। उसमें काम-विकार भी अपने पूर्णता पर हैं, प्रियभाषिणी होने के

सरमणेति । काचिन्मानिनी प्रसन्नात्र वर्ण्यते—सा रामा युवतिरधीशारवे दयितवचसि परमतिशयेनारमत प्रीतिं कृतवती । बत विस्मये । चित्रं मानिन्यपि प्रसन्ना यत् । कीदृशी । रमणो दयितः स एव संतापापहारित्वाद्धिमतोयं नीहारजलम्, सह तेन वर्तते या सा सरमणहिमतोया । अत एवापास्तो निरस्तो मानारितापो गर्वशत्रुजनितोपतापो यया सापास्तमानारितापा । तथा वरा श्रेष्ठा नतिर्मानपरित्यागेन प्रणतिर्यस्याः सा वरनतिः । यद्वा वरे भर्तरि नतिर्यस्याः । तथा असमा सर्वोत्कृष्टा । तथा अवति रक्षत्यात्मानं प्रियं वेत्यवा । न विद्यते यानं गमनमस्येत्ययानः स्थिरो मारः कामो यस्याः सायानमारा । तथा लीनं सम्बद्धं साम कोमलवचनं यस्याः सा लीनसामा । प्रियभाषिणीत्यर्थः । कीदृशेऽधीशारवे । आद्यः प्रधानभूतः, दून उपतप्तो गद्गदः, आद्यश्च दूनश्च तत्राद्यदूने । रामा कीदृशी । रमणस्य प्रियस्य हिता च मता च । अनुकूलत्वादिष्टेत्यर्थः । तथा भासिता शोभिता इरा वाणी यस्याः सा भासितेरा । मधुरवागित्यर्थः । अस्माच्छ्लोकात्तथैव पूर्वश्लोको निर्याति । एवमन्येऽपि चित्रप्रकारा महाकाव्येभ्योऽवधार्याः । सर्वेषां स्वरूपदर्शनं कर्तुमशक्यमानन्त्यादिति । एतेषु यमकश्लेषचित्रोदाहरणेषु व्याख्यानान्तराण्यपि महामतिकृतानि दृष्टानि, परमेकैकमेव चावित्येकैकमेव लिखितम् । यत उक्तं सुधीभिः—व्याख्यानमनेकविधं लिङ्गमबोधस्य धूम इव वह्नेः । स्पष्टं मार्गमजानन्स्पृशत्यनेकान्पथो मुह्यन्' इति ।।

अथ य एते मात्राच्युतादयस्ते किमलंकाराः, उत नेत्याशङ्क्याह—

मात्राबिन्दुच्युतके प्रहेलिका कारकक्रियागूढे ।
प्रश्नोत्तरादि चान्यत्क्रीडामात्रोपयोगमिदम् ।। २४ ।।

मात्रेति । च्युतकशब्दो गूढशब्दश्चोभयत्र संबध्यते । ततश्च मात्राच्युतकबिन्दुच्युतकप्रहेलिकाकारकगूढक्रियागूढानि प्रश्नोत्तरादि । चः समुच्चये । अन्यत्पूर्वालंकारेभ्यो व्यतिरिक्तं तत्क्रीडामात्रोपयोगम् । मात्रग्रहणेनाल्पप्रयोजनतां सूचयति । अल्पप्रयोजनत्वादेवालङ्कारमध्ये न संगृहीतम् । काव्येषु च दर्शनाद्वक्तव्यमिति ।

तल्लक्षणं यथाक्रममाह—

मात्राबिन्दुच्यवनादन्यार्थत्वेन तच्च्युतं नाम ।
स्पष्टप्रच्छन्नार्था प्रहेलिका व्याहृतार्था च ।। २५ ।।

साथ-साथ पति की हितचिन्तका होने से वह पति को प्यारी है । उसकी वाणी अत्यन्त मधुर है ।२३।

मात्राच्युतक, बिन्दुच्युतक, प्रहेलिका, कारकगूढ़, क्रियागूढ़, प्रश्नोत्तर आदि तथा इसी प्रकार के अन्य रूप केवल मात्र मनोविनोद के लिए ही होते हैं । [इसलिए अलंकारों में इनकी गणना नहीं होती] ।२४।

प्रच्छन्नत्वाद्भवतस्तद्गूढे कारकक्रियान्तरयोः ।
प्रश्नानां च बहूनामुत्तरमेकं भवेद्यत्र ।। २६ ।।

प्रश्नोत्तरं तदेतद् व्यस्तसमस्तादिभिर्भवेद् बहुधा ।
भेदैरनेकभाषं..................च भिद्यते ।। २७ ।।

मात्राबिन्दुच्यवनादिति । प्रच्छन्नत्वादिति । प्रश्नोत्तरमिति मात्रायाः स्वरस्य, तथा बिन्दोरनुस्वारस्य च्यवनाद्भ्रंशाद्धेतोरन्यार्थत्वेन भिन्नाभिधेयत्वेन तच्च्युते मात्राबिन्दुच्युते भवतो नाम । प्रहेलिका द्विधा । स्पष्टप्रच्छन्नार्था व्याहृतार्था च । तत्र स्पष्टः पदारूढत्वात्प्रच्छन्नश्च प्रश्नवाक्य एवान्तर्गतत्वेन भ्रमकारित्वादर्थो यस्याः सा तथाविधा । तथासाधारणविशेषणोपादानादेवाधिगतत्वेनाव्याहृतः । साक्षादनुक्तोऽर्थो यस्यां सा तथाभूता द्वितीया । तथा कर्त्रादिकारकाणां गूढत्वादप्रकटत्वात्कारकगूढम् । क्रियापदानां तु प्रच्छन्नत्वात्क्रियागूढम् । तथा प्रश्नोत्तरमेतद्यत्र बहूनां प्रश्नानां वचनस्यातन्त्रत्वादेकस्य द्वयोर्वैकमेवोत्तरं भवेत् । एतच्च प्रश्नोत्तरं व्यस्तसमस्तादिभिः आदिग्रहणाद्गतप्रत्यागतैकालापकप्रतिलोमानुलोमादिभिर्भेदैर्बहुधा भवेत् । तथैकभाषत्वेनानेकभाषत्वेन च भिद्यते ।।

अधुनैतेषामेव यथाक्रममेकैकमुदाहरणं दिक्प्रदर्शनार्थमाह—

नियतमगम्यमदृश्यं भवति किल त्रस्यतो रणोपान्तम् ।
कान्तो नयनानन्दी बालेन्दुः खे न भवति सदा ।। २८ ।।

मात्रा (स्वर) के अंश [हटा देने] से जहाँ अर्थ बदल जाए उसे मात्राच्युतक कहते हैं, और अनुस्वार के हटा देने से जहाँ अर्थ भिन्न हो जाए, उसे बिन्दुच्युतक कहते हैं, प्रहेलिका के दो भेद हैं—१. स्पष्ट-प्रच्छन्नार्था और २. व्याहृतार्था । जिसमें स्पष्ट होते हुए भी [प्रश्न रूप होने से] अर्थ गूढ हो उसे स्पष्ट-प्रच्छन्नार्था कहते हैं । इसमें प्रश्न वाक्य में ही उत्तर छिपा हुआ है । जिसमें अर्थ स्पष्टतया न बतलाया जाए किन्तु उसमें ऐसा असाधारण विशेषण दिया हुआ हो, जिसमें अर्थ स्वयं ध्वनित हो जाए उसे व्याहृतार्था प्रहेलिका कहते हैं । इसमें ध्वनित होने वाले अर्थ का वाचक शब्द नियत नहीं होता, उसका पर्यायवाची शब्द भी लिया जा सकता है ।

जिसमें कर्ता आदि कारक प्रच्छन्न हों उसे कारक गूढ कहते हैं और जिसमें क्रिया गुप्त हो उसे क्रियागूढ कहते हैं ।

जहाँ बहुत से प्रश्नों का एक ही उत्तर हो उसे प्रश्नोत्तर कहते हैं । व्यस्त, समस्त आदि (गतप्रत्यागत, एकालापक, प्रतिलोम, अनुलोम आदि) इसके अनेक भेद हैं । भाषा की दृष्टि से इसके [एकभाषागत,] अनेकभाषागत कई भेद हैं ।२५-२७।

नियतेति । त्रस्यतो बिभ्यतो नरस्य । किलेति सत्ये । रणोपान्तं समरनिकटं नियतं निश्चितमगम्यमप्राप्यमदृश्यमनवलोकनीयं भवति । इत्येकवाक्यार्थः । अत्र मात्रया ककारगतेकाररूपया च्युतयान्य एवार्थो भवति मात्राच्युतके च सर्वत्र मात्रापगमेऽप्य-कारान्तरत्वावस्थितिः । उच्चारणार्थत्वादकारस्य । तत्रान्योऽर्थो यथा—कलत्रस्य दाराणां तो रणोपान्तं तोरणनिकटं राजपथो नियतगम्यमदृश्यं च भवति । कुलवधूत्वादिति । बिन्दुच्युतकमाह—कान्त इत्यादि । कश्चित्कंचिदाह—एष बालेन्दुरपूर्णचन्द्रः खे वियति

भेदों के उदाहरण—

अन्वय—**प्रथम दो पाद**

त्रस्यतः किल रणोपान्तं नियतम् अगम्यम् अदृश्यं भवति ।

मात्रा-च्युति में अन्वय—

कलत्रस्य तोरणोपान्तं नियतम् अगम्यम् अदृश्यं भवति ।

अन्वय—**अन्तिम दो पाद**

कान्तः नयनानन्दी बालेन्दुः खे सदा न भवति ।

बिन्दुच्युति में अन्वय—

बाले ! नयनानन्दी कान्तः सदा दुःखेन भवति ।

कठिन पदों के अर्थ

नियतम्—अवश्यम् ।

रणोपान्तं—समरसमीपेऽवस्थानम् ।

तोरणोपान्तम्—तोरण-निकटम् ।

कान्तः—सुन्दरः, पतिः । बालेन्दुः—अपूर्णचन्द्रः ।

प्रथम दो पाद—

भीरु मनुष्य के लिए युद्ध के समीप रहना अथवा उसे देखना भी कठिन तथा भयकारी होता है।

'किल' शब्द की 'इ' मात्रा हटा देने पर द्वितीय अर्थ—

किसी कुलवधू का नगरद्वार के पास राजपथ पर चलना कठिन होता है। ऐसे स्थान को देखने मात्र से भी उसे डर लगता है।

अन्तिम दो पाद—

नेत्रों को आनन्द देने वाला सुन्दर बाल-चन्द्रमा सदा आकाश में नहीं रहता।

'बालेन्दुः' शब्द में बिन्दु (न्) हटा देने से द्वितीय अर्थ—

हे बाले ! नयनों के लिए आनन्ददायी नायक (पति) कठिनता से मिलता है [इसलिए कभी इसका तिरस्कार न करना] ।२८।

सदा न भवति । कान्तः कमनीयः । अतएव नयनानन्दी नयनानन्दकरः । अत्र बिन्दौ च्युतेऽर्थान्तरं भवति । इदं काचित्सखीमाह—हे बाले मुग्धे, कान्तो वल्लभो नयनानन्दी दु:खेन क्लेशेन भवति सदा । तस्मान्मैनं तिरस्कार्षीरिति शेषः । व्यञ्जनच्युतकाक्षर-च्युतकेत्यादिग्रहणात्संगृहीते तदुदाहरणे अप्यनयैव दिशा द्रष्टव्ये ॥

अथ स्पष्टप्रच्छन्नार्थप्रहेलिकामाह—

कानि निकृत्तानि कथं कदलीवनवासिना स्वयं तेन ।
कथमपि न दृश्यतेऽसावन्वक्षं हरति वसनानि ॥२९॥

कानीति । कदलीवनवासिना रम्भावनगतेन नरेण कानि निकृत्तानि कानि च्छिन्नानि । कथं केन प्रकारेणेति प्रश्ने । स्पष्टोऽपि प्रच्छनोऽर्थः । स चायम्—कानि शिरांसि मस्तकानि निकृत्तानि । कथम् । कदलीव रम्भेव । केन । असिना खड्गेन । कियन्ति । नव नवसंख्यानि । स्वयमात्मना । तेन दशाननेन । कथंशब्दोऽत्र विस्मये । चित्रमिदं यस्स्वयं तृणराजवदात्मनः शिरांसि च्छिन्नानीत्यर्थः । प्रश्नोत्तरात्त्वस्या अयमेव

स्पष्ट-प्रच्छन्नार्थ प्रहेलिका का उदाहरण—

अन्वय—**प्रथम दो पाद**

(प्रश्न) कदलीवनवासिना तेन स्वयं कानि कथं निकृत्तानि ।

(उत्तरम्) कथं तेन स्वयं असिना नव कानि कदलीव निकृत्तानि ।

अन्वय—**अन्तिम दो पाद**

असौ अन्वक्षं वसनानि हरति, कथमपि न दृश्यते ।

कठिन पदों के अर्थ

कानि—कानि वस्तूनि ? शिरांसि (कम्=शिरः) । निकृत्तानि—छिन्नानि ।

कथं—केन प्रकारेण; अहो चित्रम् ।

कदलीव—रम्भेव । अन्वक्षम्—प्रत्यक्षम् ।

प्रथम दो पाद

प्रथम अर्थ—**कदली वन-निवासी उस मनुष्य ने स्वयं किस प्रकार क्या वस्तुएँ काट दीं ।**

दूसरा अर्थ—**[रावण ने] स्वयं ही खड्ग द्वारा अपने नौ सिर कदली वृक्ष की भाँति काट दिये ।**

अन्तिम दो पाद

वह कौन है जो आँखों के सामने ही वस्त्र चुरा लेता है और दिखाई भी नहीं देता । (उत्तर=वायु) २९ ।

विशेषो यत्प्रश्नवाक्येनैवोत्तरदानम्। अथ व्याहृतार्थामाह—कथमपीत्यादि। असौ कश्चिदन्वक्षं प्रत्यक्षमेव वसनानि वस्त्राणि हरति। अथ च कथमपि न दृश्यते नावलोक्यते। अतः कोऽयं स्यात्। अत्रासाधारणविशेषणोपादानाद्वायुरिति गम्यते। नान्यस्य चौरादेरेवंविधा शक्तिरिति। प्रश्नोत्तराच्चास्या वायुर्वातः समीर इत्याद्यनियतशब्दत्वं विशेषः ॥

अथ कारकगूढमाह—

पिबतो वारि तवास्यां सरिति शरावेण पातितौ केन।
वारि शिशिरं रमण्यो रतिखेदादपुरुषस्येव ॥३०॥

पिबत इति। कश्चित्कंचिदाह—तवास्यां सरिति नद्यां शरावेण वर्धमानकेन भाजनविशेषेण जलं पिबतः केन पातितौ। कौ पातिताविति साकाङ्क्षत्वात्कर्मात्र गूढम्। तच्चैवं प्रकटम्—हे एण मृग, तवास्यां सरिति वारि पिबतः केन शरौ बाणौ पातिता-

---

कारकगूढ का उदाहरण—

अन्वय—**प्रथम दो पाद (कर्मगूढ)**

तव अस्यां सरिति शरावेण वारि पिबतः केन पातितौ ?

कर्मस्पष्टता—एण ! तव अस्यां सरिति वारि पिबतः केन शरौ पातितौ।

अन्वय—**अन्तिम दो पाद (क्रियागूढ)**

रमण्यः रतिखेदात् शिशिरं वारि अपुरुषस्येव।

क्रियास्पष्टता—रमण्यः रतिखेदात् उषसि एव शिशिरं वारि अपुः।

कठिन पदों के अर्थ

सरिति—नद्याम्।

शरावेण—वर्धमानकेन, पात्रविशेषेण। शरौ—बाणौ।

एण—हे मृग। शिशिरम्—शीतलम्।

अपुः—पीतवत्यः। उषसि—प्रभाते।

प्रथम दो पाद

इस नदी में शराव (पात्र) से तुम्हारे जल पी रहे होने पर किसने [दोनों को] गिराया। 'किन दोनों को' इस आकांक्षा में उत्तर है कि हे मृग ! तुम्हारे इस नदी में जल पी रहे होने पर किसने दो बाण गिराये हैं।

अन्तिम दो पाद

प्रथम अर्थ—**रमणियों ने रति-श्रम के कारण अपुरुष की भाँति शीतल जल पिया।**

दूसरा अर्थ—**रमणियों ने रतिश्रम के कारण प्रातःकाल ही शीतल जल पिया।३०।**

विति । अथ क्रियागूढम्—वारि शिशिरमित्यादि । वारि जलम्, शिशिरं शीतलम्, रमण्यो नार्यः, रतिखेदान्निधुवनायासादपुरुषस्येव । अत्र क्रिया गुप्ता । सा चेयम्—रमण्यो रतिखेदाद्वारि शिशिरमुषस्येव प्रभात एवापुः पीतवत्यः ॥

अथ प्रश्नोत्तरमाह—

उद्यन्दिवसकरोऽसौ किं कुरुते कथय मे मृगायाशु ।
कथयानिन्द्राय तथा किं करवाणि क्वणितुकामः ॥३१॥
अहिणवकमलदलारुणिण माणु फुरत्तिण केण ।
जाणिज्जई तरुणीअणस्स निद्धा (?) भण अहरेण ॥३२॥

उद्यन्निति । अहिणवेति । कश्चिन्मूर्खत्वेन मृगः सन्कंचन पृच्छति—यथा मह्यं मृगाय त्वं कथय । एष दिवसकरः सूर्य उद्यन्नुदयं प्राप्नुवन्किं कुरुत इत्येकः प्रश्नः । अपरमाह—अनिन्द्रायाशक्राय मह्यं कथय निवेदय । क्वणितुकामः शब्दितुकामः सन्नहं किं करवाणि किं करोमीति द्वितीयः । उत्तरानुरोधेन चात्र मृगायेत्यनिन्द्रायेति च प्रश्नवाक्येऽभिहितम् । वक्तृबहुत्वख्यापनार्थमनेकभाषत्वख्यापनार्थं तृतीयप्रश्नोऽयं प्राकृते च यथा—अहिणवेत्यादि । कश्चित्सुहृदमाह—अभिनवकमलदलारुणेन स्फुरता केन तरुणीजनस्य मानो लक्ष्य इति भण वद । निद्धेत्यामन्त्रणपदम् (?) । अत्र यथाक्रमं यथाभाषं

प्रश्नोत्तर का उदाहरण—

अन्वय—(प्रश्नाः) मृगाय मे आशु कथय, असौ दिवसकरः उद्यन् किं कुरुते ? तथा अनिन्द्राय (मे) कथय, क्वणितुकामः किं करवाणि । अभिनवकमल-दल-अरुणेन स्फुरता केन तरुणीजनस्य मानः जाणिज्जई, निद्धा ! भण । (उत्तराणि–) 'अहरेण' ।

कठिन शब्दों के अर्थ—

अनिन्द्राय—न इन्द्राय । क्वणितुकामः—शब्दितुकामः ।

अहरेण—

१. अहः+एण—दिनम्, हे मृग !

२. अहरे+अण—हे अनिन्द्र (न इन्द्र), शब्दं कुरु ।

३. अहरेण—अधरेण ।

(१) मुझे (मृग को) शीघ्र बताओ कि सूर्य उदय होकर क्या करता है ।

(२) मुझ अनिन्द्र (न इन्द्र) को बताओ कि शब्द करने के लिए इच्छुक मैं क्या करूँ ।

(३) एक व्यक्ति अपने मित्र से पूछता है—नवीन कमलदल के समान अरुण तथा शोभायमान किसने तरुणियों के मान को लक्ष्य बनाया है ।

चोत्तरमाह—अहरेणेति । तत्र—अहर्दिनम् । एण हे मृग । तथा अहरेऽनिन्द्र । अण शब्दं कुरु । तथा प्राकृतोत्तरम्—अहरेणाधरेण । ओष्ठेनेत्यर्थः इत्युत्तरत्रयं युगपदुक्तम् । एतदनेकवक्तृकमनेकभाषं व्यस्तसमस्तं च प्रश्नोतरम् । एकवक्तृकं त्र्यादिभाषं च प्रश्नोत्तरजातमन्यत्र विस्तरादवगन्तव्यम् ॥

अथाध्यायमुपसंहरन्नाह—

इत्थं स्थितस्यास्य दिशं निशम्य शब्दार्थवित्क्षोदितचित्रवृत्तः ।
आलोच्य लक्ष्यं च महाकवीनां चित्रं विचित्रं सुकविर्विदध्यात् ॥ ३ ३॥

इत्थमिति । अस्य चित्रस्येत्थं पूर्वोक्तप्रकारेण स्थितस्य दिशं मार्गं निशम्य श्रुत्वा तथा महाकवीनां लक्ष्यमुदाहरणं चालोच्य विमृश्य ततः सुकविश्चित्रमलंकारं चित्रं नानाविधं विदध्यात्कुर्यात् । किंविशिष्टः सन् । शब्दार्थौ वेत्ति शब्दार्थवित् । तथा क्षोदितानि पर्यालोचितानि चित्राणि नानाविधानि वृत्तानि तनुमध्यादीनि येन स तथाविधः । यतः किल न सर्वेण वृत्तेन सर्वं चित्रं कर्तुं पार्यते । तथालोच्य वीक्ष्य, लक्ष्यमुदाहरणम्, महाकवीनां सुकवीनाम् । चित्रकरणे किल लक्षणाभावाल्लक्ष्यदर्शनमेव महानुपाय इति कृत्वा ॥

इति श्रीरुद्रटकृते काव्यालंकारे नमिसाधुविरचितटिप्पणसमेतः
पञ्चमोऽध्यायः समाप्तः ।

इन प्रश्नों का उत्तर एक ही शब्द (अहरेण) में यथाक्रम दिया गया है :

(१) अहरेण (अहः+एण) ।
हे मृग ! सूर्य उदित होकर दिन करता है ।

(२) अहरेण (अहरे+अण)
हे अहरे ! (अनिन्द्र) । अण (शब्द करो) ।

(३) अहरेण (अधरेण)
अर्थात् ओष्ठ ने [चुम्बन द्वारा] तरुणियों के मान को लक्ष्य बनाया है ।३१-३२।

इति 'अंशुप्रभा'ऽऽख्य हिन्दी-व्याख्यायां पञ्चमोऽध्यायः समाप्तः ।

षष्ठोऽध्यायः

शब्दस्यालंकारानभिधायेदानीं तद्दोषानाभिधित्सुराह—

पदवाक्यस्थो दोषो वाक्यविशेषप्रयोगनियमेन ।
यः परिहृतस्ततोऽन्यस्तदतिव्याप्तिश्च संह्रियते ।।१।।

पदवाक्यस्थ इति । पूर्वम् 'अन्यूनाधिक–' (२।८) इत्यादिना ग्रन्थेन काव्योपयोगिनो वाक्यविशेषस्य प्रयोगे नियमेन यः पदस्थो वाक्यस्थश्च दोषः परिहृतः ततो दोषा-

षष्ठ अध्याय

रुद्रट ने (का० अ० २/८ में) वाक्य का लक्षण निर्दिष्ट करते हुए कहा था कि किसी वाक्य में न्यूनपद अथवा अधिक पद नहीं होने चाहिए । अब वह उक्त दो दोषों के अतिरिक्त कतिपय अन्य दोषों की चर्चा करते हैं ।

इस अध्याय में असमर्थ, अप्रतीत, विसन्धि, विपरीतकल्पन, ग्राम्य और देश्य नामक [पदगत दोषों तथा संकीर्ण, गर्भित और गतार्थ नामक वाक्य-दोषों का निरूपण किया गया है, तथा दोष किस स्थिति में दोष नहीं रहते, इस पर भी किञ्चित् प्रकाश डाला गया है।]

काव्यशास्त्रीय ग्रन्थों में भरत के समय से ही दोष के सम्बन्ध में चर्चा प्रारम्भ हो चली थी । रुद्रट से पूर्व भरत ने १० दोष माने थे, भामह ने २५, दण्डी ने १० और वामन ने २० ।[१] रुद्रट ने २६ दोष गिनाये हैं ।[२] इनके उपरान्त आनन्दवर्द्धन ने रस-विरोधी ६ तत्त्व गिनाये[३] । महिम भट्ट ने दोष के स्थान पर 'अनौचित्य' शब्द का प्रयोग करते हुए इसके दो प्रकार बताये—अन्तरंग (अर्थविषयक) और बहिरंग (शब्दविषयक) । अन्तरंग अनौचित्य से उनका तात्पर्य है—रसों में विभाव, अनुभाव और व्यभिचारिभाव का अनुचित विनियोग (प्रयोग) । बहिरंग अनौचित्य के अन्तर्गत उन्होंने पाँच दोषों का निरूपण किया है ।[४] इनके उपरान्त मम्मट ने उक्त सभी आचार्यों से दोष-विषयक सामग्री ग्रहण करते हुए उसे व्यवस्थित रूप प्रदान किया । उन्होंने कुल ७० दोष गिनाये हैं—१६ पदगत, २१ वाक्यगत, २३ अर्थगत और १० रसगत ।[५]

१. (क) नाट्यशास्त्र १।३७, ४७; ४।१; ५।६७, (ख) काव्यादर्श ३।१२६, (ग) काव्यालंकारसूत्र २।१, २ ।
२. देखिए प्रस्तुत ग्रन्थ २।८; ६।२, ४०; ११।२ ।
३. ध्वन्यालोक ३।१८, १९ ।
४. व्यक्तिविवेक २य विमर्श ।
५. काव्यप्रकाश सप्तम उल्लास । [विशेष विवरण के लिए देखिए काव्यप्रकाश सप्तम उल्लास]

रुद्रट ने 'दोष' का लक्षण कहीं भी स्पष्ट शब्दों में प्रस्तुत नहीं किया। इनसे पूर्ववर्ती आचार्यों में से भरत ने भी इसका स्पष्ट लक्षण प्रस्तुत नहीं किया। उनके कथनानुसार गुण दोषों से विपर्यस्त हैं। (नाट्यशास्त्र १७।९५), पर वामन की धारणा भरत से विपरीत है। इनके कथनानुसार दोष का स्वरूप गुण से विपर्यय है: **'गुण-विपर्य्यात्मनो दोषाः'** का० सू० २।१।१'। दण्डी ने भी दोष का स्वरूप गुण के विपरीत भाव पर अवस्थित किया है—"गुण यदि काव्य की सम्पत्ति अर्थात् सौन्दर्य-विधायक तत्त्व है तो दोष उसकी विपत्ति अर्थात् सौन्दर्य-विघातक तत्त्व है—'दोषाः विपत्तये तत्र गुणाःसम्पत्तये यथा।' (का० द०, प्रभाटीका, पृष्ठ ३७४) आगे चलकर आनन्दवर्धन ने दोष का स्वरूप रस के अपकर्ष पर स्वीकृत किया। जो दोष रस का सदा अपकर्ष करता है, उसे उन्होंने नित्य दोष माना और जो दोष रस का सदा अपकर्ष नहीं करता उसे अनित्य दोष माना। (ध्वन्यालोक २।११; ३।१८, १९) इनसे प्रेरणा प्राप्त कर मम्मट ने दोष का लक्षण इस प्रकार स्थिर किया—'मुख्यार्थहतिर्दोषः।' यहाँ 'मुख्य' शब्द रस का पर्याय है और 'हति' शब्द अपकर्ष का। विश्वनाथ ने इस लक्षण को स्पष्ट शब्दों में निरूपित किया—**रसापकर्षकाः दोषाः।**

दोष के सम्बन्ध में एक शंका उपस्थित होती है कि क्या यह सदा अग्राह्य है? इस सम्बन्ध में आचार्यों का एकमत नहीं है। दण्डी के अनुसार काव्य में दोष का लेश-मात्र भी सह्य नहीं है। श्वेत कुष्ठ के एक [छोटे से] चिह्न के कारण सुन्दर शरीर भी अपनी कान्ति खो बैठता है:

तदल्पमपि नोपेक्ष्यं काव्ये दुष्टं कथंचन।
स्याद् वपुः सुन्दरमपि श्वित्रेणैकेन दुर्भगम्॥ का० द० १।७

इसी प्रकार केशवमिश्र और वाग्भट भी इसी पक्ष में हैं। केशवमिश्र के शब्दों में—दोष रस का हानिकर होने के कारण सर्वथा त्याज्य है: 'दोषः सर्वात्मना त्याज्यो, रसहानिकरो हि सः।' (अलंकारशेखर ६।४०), और वाग्भट के शब्दों में—दोष विष के समान है:

इति दोषविषनिषेकैरकलंकितमुज्ज्वलं सदा विबुधैः।
कविहृदयसागरोत्थितममृतमिवास्वाद्यते काव्यम्॥

प्रस्तुत ग्रन्थकार रुद्रट भी निरलंकृत काव्य को भी मध्यम काव्य तभी मानने को उद्यत हैं जब वह दोषरहित हो:

यत्पुनरनलंकारं निर्दोषं चेति तन्मध्यमम्। का० अ० ६।४

किन्तु उधर भरत का दृष्टिकोण उदार और क्षमापूर्ण रहा। सदोष नाटक (काव्य) के सम्बन्ध में उनका कथन है कि दोषों के सम्बन्ध में किसी [आलोचक] को अधिक संवेदनशील नहीं हो जाना चाहिए, क्योंकि संसार का कोई भी पदार्थ

गुणहीन अथवा दोषहीन नहीं है :

> **न च किंचित् गुणहीनं दोषैः परिवर्जितं न वा किंचित् ।**
> **तस्मान्नाट्यप्रकृतौः दोषाः नात्यर्थतो ग्राह्याः ।। नाट्यशास्त्र १७।४७**

और आगे चलकर विश्वनाथ भी [चाहे उनका लक्ष्य मम्मट के काव्यलक्षण का जान-बूझकर बुरी तरह से खण्डन करना था] सदोष काव्य को सर्वथा अग्राह्य नहीं मानते। अनार के दो-चार गले-सड़े दानों के कारण सारा अनार फेंक नहीं दिया जाता। उनके कथनानुसार यदि निर्दोषता को काव्य का आवश्यक तत्त्व ठहराया जाएगा तो काव्य या तो अविरलविषय बन जाएगा अथवा निर्विषय। क्योंकि किसी काव्य का सर्वथा निर्दोष होना नितान्त असम्भव है—"किंच एवं काव्यमविरलविषयं निर्विषयं वा स्यात्, सर्वथा निर्दोषस्यैकान्तमसम्भवात्।" (सा० द० प्रथम परि० पृष्ठ १४) निस्सन्देह कोई भी अनतिवादी उदारचेता व्यक्ति भरत और विश्वनाथ की उक्त धारणाओं से असहमत नहीं होगा, और किसी अज्ञात आचार्य के निम्नोक्त कथन से भी शायद सहमत न होगा कि **अन्यो गुणोऽस्तु वा माऽस्तु, महान् निर्दोषता गुणः**" क्योंकि एक तो निर्दोषता का निर्वाह एक असम्भव-सा कार्य है, और दूसरे शास्त्रीय दृष्टि से किसी रसयुक्त रचना में गुण के अभाव का प्रश्न ही उपस्थित नहीं होता।

दोष-प्रस्तावना

[काव्योपयोगी] वाक्य-विशेष के प्रयोग के नियम से पदगत और वाक्यगत दोषों के परिहार के सम्बन्ध में पहले कह चुके हैं (देखिए २।८)। इन दोषों के अतिरिक्त अब अन्य [असमर्थ अप्रतीत आदि] दोषों और उनकी अतिव्याप्ति के परिहार के सम्बन्ध में कहा जाता है।१।

'अतिव्याप्ति' से तात्पर्य है वह तत्त्व जो अभीष्ट से अधिक कहा जाए। इस स्थल में 'अतिव्याप्ति' शब्द उस प्रसंग का सूचक प्रतीत होता है जहाँ ये असमर्थ, अप्रतीत आदि दोष 'दोष' नहीं रहते—क्योंकि इस प्रसंग की भी चर्चा इसी अध्याय में की गयी है।

नमिसाधु ने यहाँ एक शंका उपस्थित की है कि पहले (२।८ में) वाक्यगत दोष ही निर्दिष्ट किये हैं पदगत नहीं, अतः इस कारिका में 'पदवाक्यस्थो दोषः' ऐसा कहना ठीक नहीं है। इसका उत्तर उन्होंने यह दिया है कि यही दोष पदगत भी होते हैं।

प्रसंगवशात् इसी आक्षेप के भी ठीक विपरीत एक अन्य आक्षेप भी विचारणीय है कि वाक्यदोषों का अन्तर्भाव पददोषों में ही किया जाना सम्भव है, क्योंकि एक तो पदसमूह का ही नाम वाक्य है : 'पदसमूहो वाक्यम्', और दूसरे, किसी भी वाक्य-दोष द्वारा वाक्य के अनिवार्य तत्त्वों—आकांक्षा, योग्यता और आसत्ति—में से किसी

दन्योऽसमर्थाप्रतीतादिकः समिति संप्रति ह्रियते परिह्रियते । तथा तस्मान्न्यूनादिकस्या-समर्थादिकस्य च दोषस्य यातिव्याप्तिरतिप्रसक्तिः सा च संह्रियते संकोच्यते । ननु पूर्वत्र वाक्यस्थ एव दोषः परिहृतो न पदस्थस्तत्कथमिहोच्यते पदवाक्यस्थ इति । सत्यम् । अन्यूनाधिकविशेषणविशिष्टैः पदैर्वाक्यस्य नियमितत्वात्पदस्थोऽपि दोषस्तेन परिहृत एवेति । तर्हि पदग्रहणमत्र न कर्तव्यमाशङ्कानिरासार्थम् । यतः कश्चिदाशङ्क्येत यथा वाक्यस्थ एव दोषस्ते परिहृतो न पदस्थ इति । तथा पदग्रहणाभावे ततोऽन्य इति । वक्ष्यमाणदोषोऽपि पदस्योक्तो न स्यादिति । पृथक्करणं तु तस्य दोषस्य महीयस्त्वख्या-पनार्थम् । न्यूनाधिकादिदोषो हि नेत्रोत्पाटतुल्यः । असमर्थादिकस्तु पटलनिभः ॥

अथ तानेवान्यान्दोषानाह—

असमर्थमप्रतीतं विसंधि विपरीतकल्पनं ग्राम्यम् ।
अव्युत्पत्ति च देश्यं पदमिति सम्यग्भवेद् दुष्टम् ॥२॥

असमर्थमिति । इतिशब्दो हेतौ, स च प्रत्येकं संबध्यते । असमर्थमिति हेतोः पदं दुष्टं भवेत् । एवमप्रतीतमित्यादौ बोध्यम् । सम्यक्शब्दो नियमार्थः । अवश्यं दुष्टमित्यर्थः। चशब्दः समुच्चये । अन्यैरनुक्तं व्युत्पत्तिहितं देश्यमसमर्थादिदोषमध्ये समुच्चीयतइत्यर्थः॥

यथोद्देशस्तथा लक्षणमिति पूर्वमसमर्थलक्षणमाह—

पदमिदमसमर्थं स्याद्वाचकमर्थस्य तस्य न च वक्तुम् ।
तं शक्नोति तिरोहिततत्सामर्थ्यं निमित्तेन ॥३॥

को भी हानि नहीं पहुँचती, जिससे शाब्द-ज्ञान में देर होने की सम्भावना हो जाए । इस आपत्ति का समाधान भी 'रस' की ही अनुत्कृष्टता पर आधृत है । साधारण वाक्यों की अपेक्षा काव्यगत सरस वाक्यों की वस्तुगत सामग्री और अर्थप्रतीति में सदा विलक्षणता रहती है । वाक्यदोषों के उदाहरणों में आकांक्षा आदि तीनों तत्त्वों के विद्यमान रहने पर भी वे रसोत्पादन में समर्थ अनुकूलता से शून्य होते हैं :

ननु कथममीषां दोषता, आकांक्षादिज्ञानसत्त्वे शाब्दज्ञानाविलम्बादिति चेन्न । वाक्यान्तरापेक्षया काव्ये सामग्रीवैलक्षण्यात् । अन्यथा प्रतीतिवैलक्षण्याऽनुपपत्तेः । तथा चाऽन्वयबोधानुकूलाकांक्षासत्त्वेऽपिरसोत्पत्त्यनुकूलाकांक्षादिविरहो दोष इति ध्येयम् ।
—अ० शे० पृष्ठ २०

वाक्य-दोषों को पददोष भी नहीं कह सकते हैं, क्योंकि इन उदाहरणों में सभी पदों के निर्दोष रहते हुए भी वाक्य सदोष होते हैं ।

पदगत दोषों के नाम

असमर्थ, अप्रतीत, विसन्धि, विपरीत-कल्पन, ग्राम्य और अव्युत्पत्तिपरक देश्य—ये (छह) पदगत दोष हैं ।२।

पदमिति । यत्पदं तस्य निर्दिष्टार्थस्य वाचकम् । अथ च तमेवार्थं वक्तुं न शक्नोति तदसमर्थम् । वाचकं चेत्कथं न शक्नोतीत्याह--निमित्तेन केनचिच्छब्दान्तर-संबन्धादिना तिरोहितं स्थगितं तत्रार्थे सामर्थ्यं वाचकत्वं यस्य तत्तमभिधातुं न शक्नो-तीति । एतेनावाचकत्वदोषादसामर्थ्यं दोषभेद उक्तः ॥

सामान्येनाभिधायैतदेव विशेषेणाह—

धातुविशेषोऽर्थान्तरमुपसर्गविशेषयोगतो गतवान् ।
असमर्थः स स्वार्थे भवति यथा प्रस्थितः स्थास्नौ ॥४॥

धातुविशेष इति । धातुविशेषस्तिष्ठत्यादिरुपसर्गविशेषेण प्रादिना योगतः संबन्धाद्धेतोरर्थान्तरं गतिनिवृत्त्यादिलक्षणादन्यमर्थं गतवान्प्राप्तः सन्स्वार्थेऽसमर्थो भवति । तमर्थं वक्तुं न शक्नोतीत्यर्थः यथा प्रस्थितशब्दः स्थास्नावर्थे । विशेषग्रहणमुभयत्र न सर्वो धातुः सर्वेणोपसर्गेण संबन्धे सत्यर्थान्तरं याति । अपि तु कश्चिदेव केनचिदेवेत्य-स्यार्थस्य सूचनार्थम् । तथाहि प्रेण योगे तिष्ठत्यादिरेवार्थान्तरं याति न तु यातिप्रभृतिः । तथा तिष्ठतिरपि प्रेण योगे न त्ववादिना । आकुलनिधनादीनि कलधौतकार्तस्वरवच्छ-ब्दान्तराण्येव । न नामोपसर्गयोग उदाहृतः ॥

---

१. असमर्थ

जो पद किसी अभीष्ट अर्थ का वाचक होता हुआ भी [किसी दूसरे शब्द के आ पड़ने के कारण] अपनी शक्ति खो जाने से उस अर्थ को कहने में समर्थ न रहे, वहाँ 'असमर्थ' दोष होता है ।३।

असमर्थ का विशेष निरूपण

कोई विशेष धातु किसी विशेष उपसर्ग के योग से अन्य अर्थ को प्राप्त हो जाती है, [किन्तु] उसका अपने ही अर्थ में [प्रयोग] 'असमर्थ' दोष कहाता है । जैसे 'प्रस्थित' शब्द का अर्थ ['चल पड़ा' न होकर] 'ठहरा हुआ' मानना ।४।

धातु और उपसर्ग के साथ 'विशेष' विशेषण जोड़ने का अप्रिप्राय यह है कि कोई धातु किन्हीं उपसर्गों के योग से अन्य अर्थ को प्राप्त नहीं भी होतीं । उदाहरणार्थ स्था धातु के साथ 'प्र' उपसर्ग अन्य अर्थ 'प्रस्थान' को सूचित करता है, किन्तु 'या' धातु के साथ 'प्र' उपसर्ग का योग उसी ही अर्थ 'जाना' (प्रयाति, प्रयाण) का ही सूचक है किसी अन्य अर्थ का नहीं । स्वयं उक्त 'स्था' धातु के साथ 'अव' उपसर्ग का योग ठहरने अर्थ का सूचक है जैसे—'अवतिष्ठते', न कि किसी अन्य अर्थ का । अस्तु, उक्त नियम सापवाद है ।

प्रकारान्तरेणासमर्थमाह—

इदमपरमसामर्थ्यं धातोर्यत्पठ्यते तदर्थोऽसौ ।
न च शक्नोति तमर्थं वक्तुं गमनं यथा हन्ति ॥५॥

इदमिति । इदमन्यदसामर्थ्यं धातोः, यत्तदर्थोऽसौ धातुः पठ्यते न च तं निर्दिष्ट-मर्थं वक्तुं शक्नोति । यथा 'हन् हिंसागत्योः' इति पाठेऽपि । हन्तीत्युक्ते हिनस्तीति प्रतीयते न च गच्छतीति । यमकश्लेषचित्रेषु गत्यर्थोऽपि दृश्यते । अत एवाल्पोऽयं दोषः ॥

पुनः प्रकारान्तरमाह—

शब्दप्रवृत्तिहेतौ सत्यप्यसमर्थमेव रूढिबलात् ।
यौगिकमर्थविशेषं पदं यथा वारिधौ जलभृत् ॥६॥

शब्देति । यौगिकं संबन्धजं क्वचिदर्थविशेषेऽसमर्थमेवावाचकमेव पदम् । तत्र तदर्थस्याभाव इति चेन्न । शब्दप्रवृत्तिहेतौ सत्यपि विद्यमानेऽपि । अपिर्विस्मये । चित्रमिद-मित्यर्थः । यदि शब्दप्रवृत्तिहेतुत्वं कथं तर्ह्यसमर्थत्वमित्याह—रूढिबलात्प्रसिद्धिबलात् । क्वचिदेव किंचिदेव शब्दरूपं वाचकत्वेन रूढमतस्तत्रैव प्रवर्तते नान्यत्र । एवकारोऽवधा-रणे । असमर्थमेव न तु समर्थम् । उदाहरणं यथा वारिधौ जलभृदिति । जलधारण-क्रियालक्षणे प्रवृत्तिनिमित्ते सत्यपि जलभृच्छब्दो वारिधिं समुद्रमभिधातुमसमर्थः । मेघ एव तस्य रूढित्वादिति ॥

असमर्थ दोष का एक अन्य रूप

किसी अर्थ-विशेष के लिए पठित होने वाली भी जो धातु उस अर्थ को बताने में असमर्थ होती है वहाँ [भी] असमर्थ दोष माना जाता है। जैसे 'हन्ति' गमन अर्थ में ।५।

यद्यपि हन् धातु का अर्थ हिंसा और गति दोनों है, किन्तु हिंसा अर्थ में ही इसका प्रयोग किया जाता है अतः 'हन्ति' का 'गच्छति' अर्थ में प्रयोग असमर्थ दोष का सूचक है। 'हन्ति' शब्द के सुनते ही 'हिनस्ति' का बोध होने लगता है। फिर भी गति अर्थ में इस धातु का प्रयोग यमक, श्लेष और चित्र अलंकारों में प्रायः देखा जाता है, और वहाँ यह दोष सह्य भी है।

'असमर्थ' का एक और प्रकार

किसी अर्थ-विशेष के प्रतिपादन के शब्द की योग्यता होने पर रूढि (प्रसिद्धि) के कारण जब यौगिक शब्द अपने अभीष्ट अर्थ को बताने में असमर्थ सिद्ध होता है, वहाँ भी असमर्थ दोष होता है—जैसे 'वारिधि' अर्थ में 'जलभृत्' ।६।

भूयोऽपि भेदान्तरमाह—

निश्चीयते न यस्मिन्वस्तु विशिष्टं पदे समानेन ।

असमर्थं तच्च यथा मेघच्छविमारुरोहाश्वम् ।।७।।

निश्चीयत इति । यस्मिन्पदे तदर्थाभिधायिन्यपि विशिष्टं वस्तु न निश्चीयते तदप्यसमर्थम् । कथं न निश्चीयत इत्याह—समानत्वात् । समानस्तुल्यो मानः परिच्छेदो विवक्षितेऽन्यत्र च वस्तुनि येन पदेन तत्तथा तद्भावस्तत्त्वम् । तस्मादनेकार्थवाचकत्वादित्यर्थः । यथा मेघच्छविमारुरोहाश्वमित्युक्ते मेघानामनेकवर्णानां दर्शनान्न निश्चयः कर्तुं पार्यते । यत्र तु निश्चयस्तत्समानार्थमपि साध्वेव । यथा—

'लक्ष्मीकपोलसंक्रान्तकान्तपत्त्रलतोज्ज्वलाः ।
दोर्द्रुमाः पान्तु वः शौरेर्घनच्छाया महाफलाः ।।'

अत्र हि शौरिः कृष्णवर्ण इति ।

'वारिधि' और 'जलभृत' ये दोनों यौगिक शब्द है और समानार्थवाची (समुद्रवाची) हो सकते हैं, किन्तु रूढि के कारण 'जलभृत्' शब्द 'मेघ' के अर्थ में और 'वारिधि' शब्द 'समुद्र के अर्थ में नियत है ।

असमर्थ का एक और प्रकार

अभीष्ट अर्थ को बतलाने पर भी जिस पद में समानता के कारण विशेष वस्तु का निश्चय न हो सके, वहाँ असमर्थ दोष होता है । जैसे—उस व्यक्ति ने मेघ के समान वर्ण वाले अश्व पर आरोहण किया ।७।

उक्त वाक्य में अश्व का वर्ण मेघ-सदृश कहा गया है, किन्तु मेघ के अनेक वर्ण हैं । अतः अश्व के वर्ण का निश्चय नहीं हो सकता । इसलिए यहाँ असमर्थ दोष है ।

इसी प्रसंग में नमिसाधु द्वारा प्रस्तुत श्लोक "लक्ष्मीकपोल……" का अर्थ है—शौरि (विष्णु) की भुजा-रूपी वृक्ष आप सब की रक्षा करें, जिनके सुन्दर पत्ते और लताएँ लक्ष्मी के कपोलों पर प्रतिबिम्बित होने के कारण उज्ज्वल हैं, तथा जो घनों की छाया के समान हैं तथा फलदायक हैं ।

'शौरि' शब्द का अर्थ है कृष्ण, जोकि कृष्णवर्ण का सूचक है । यहाँ एक निश्चित वर्ण का उल्लेख है, अतः यहाँ असमर्थ दोष नहीं है ।

'असमर्थ' दोष का स्वरूप परवर्ती आचार्यों मम्मट और विश्वनाथ के अनुसार संक्षिप्त रूप में इस प्रकार है :

असमर्थं यत्तदर्थं पठ्यते न च तत्राऽस्य शक्तिः । (का० प्र० ७।१४४)

यथा—

कुञ्जं हन्ति कृशोदरी । (सा० द० सप्तम परि०, पृष्ठ २३५)

इदानीमस्यैवासमर्थदोषस्यातिव्याप्तिं संहर्तुमाह—

यत्पदमभिनयसहितं कुरुतेऽर्थविशेषनिश्चयं सम्यक् ।
नैकमनेकार्थतया तस्य न दुष्येदसामर्थ्यम् ।।८।।

यदिति । यत्पदं विशेषणभूतमनेकार्थतया विवक्षितविशिष्टार्थविशेषनिश्चयं सम्यक्कुरुते । किंभूतं सदभिनयसहितम् । तस्य । सामर्थ्य 'निश्चीयते न यस्मिन्' (६।७) इत्यनेन प्राप्तं दोषाय न भवति ।।

नन्वर्थस्य शब्दो वाचको न त्वभिनयः, तत्कथं तेनार्थविशेषनिश्चयः क्रियत इत्याह—

शब्दानामत्र सदानेकार्थानां प्रयुज्यमानानाम् ।
निश्चीयते हि सोऽर्थः प्रकरणशब्दान्तराभिनयैः ।।९।।

शब्दानामिति । हि यस्मादत्र काव्येऽनेकार्थानां शब्दानां प्रयुज्यमानानां स विवक्षितोऽर्थः प्रकरणेन प्रस्तावेन शब्दान्तरसंनिधानेन वाभिनयेन वा निश्चीयते तत्र प्रकरणे यथा—

'महीभृतः पुत्रवतोऽपि दृष्टिस्तस्मिन्नपत्ये न जगाम तृप्तिम्'

इत्यत्र हिमवानेव महीभृदुच्यते । शब्दान्तरेण यथा—

'कोपादेकतलाघातनिपतन्मत्तदन्तिनः ।
हरेर्हरिणयुद्धेषु कियान्व्याक्षेपविस्तरः ।।'

अत्र दन्तिहरिणशब्दसंनिधानात्सिंह एव हरिर्निश्चीयते । अभिनयने त्वर्थविशेषप्रतीतावुदाहरणं सूत्रकार एव दास्यति । यतः प्रकरण-शब्दान्तरे प्रसिद्धत्वादुपमाने । अभिनयस्तु प्रस्तुतत्वादुपमेयः । तथा ताभ्यां विवक्षितार्थनिश्चयस्तथाभिनयेनापीत्यर्थः ।।

अर्थात् असमर्थ दोष उसे कहते हैं जहाँ कोई पद उस अर्थ में प्रयुक्त किया जाए जहाँ उसकी शक्ति (समर्थता) न हो । जैसे 'वह कृशोदरी कुन्ज को जाती है ।' 'हन्' धातु का अर्थ 'हिंसा' और 'गति' दोनों हैं, किन्तु 'हन्ति' रूप [प्रयोगाभाव के कारण] 'गच्छति' अर्थ को बताने में असमर्थ है ।

असमर्थ दोष की अतिव्याप्ति का संहार

यदि किसी अनेकार्थक पद का अभीष्ट अर्थ अभिनय के द्वारा निश्चित होने में समर्थ हो जाए तो वहाँ असमर्थ दोष नहीं होता, [क्योंकि] अनेकार्थक शब्दों के प्रयुक्त होने पर उनका अभीष्ट अर्थ प्रकरण (अर्थात् प्रसंग), शब्दान्तर (अर्थात् अन्य शब्दों की समीपता) और अभिनय (हस्तचालन आदि) द्वारा भी निश्चित किया जाता है ।८,९।

तदेवोदाहरणमाह—

सा सुन्दर तव विरहे सुतनुरियन्मात्रलोचना सपदि ।
एतावतीमवस्थां याता दिवसैरियन्मात्रैः ।।१०।।

सेति । अत्रेयन्मात्रैतावच्छब्दौ महति स्वल्पे च वर्तेते । ततोभिनयेन विशेषप्रतीतिर्यथा—हे सुन्दर, सा सुतनुस्तव विरहे इयन्मात्रलोचना । प्रसृत्यभिनयेन विशाललोचनेति निश्चीयते । तथैतावतीमवस्थां यातेति । अत्रोर्ध्वीकृतकनिष्ठिकाङ्गुल्या कृशत्वं प्रतीयते । दिवसैरियन्मात्रैरित्यत्र पञ्चाङ्गुलिदर्शनेन स्वल्पत्वं चेति ।।

अथाप्रतीतमाह—

युक्त्या वक्ति तमर्थं न च रूढं यत्र यदभिधानतया ।
द्वेधा तदप्रतीतं संशयवदसंशयं च पदम् ।।११।।

युक्त्येति । तदप्रतीतं यद्युक्त्या गुणक्रियायोगेन तं विवक्षितमर्थं वक्ति प्रतिपादयति । अथ च तत्रार्थाभिधानतया वाचकत्वेन न रूढं न प्रसिद्धं तच्चाप्रतीतं द्वेधा । कथं संशयवदसंशयं चेति ।।

नमिसाधु ने इसी प्रसंग में दो उदाहरण प्रस्तुत किये हैं—

प्रकरण—'पुत्रवान् भी उस महीभृत् (पृथ्वी को धारण करने वाले) की दृष्टि उस सन्तान पर (उसे देखने से) तृप्त न हुई ।' यहाँ प्रकरण से ज्ञात हो जाता है कि 'महीभृत्' का अर्थ कोई राजा विशेष न होकर हिमालय पर्वत है । (कुमारसम्भव १।२७)

शब्दान्तर—'क्रोध में आकर मस्त हाथियों को हथेली के एक ही प्रहार से गिरा देने वाले हरि (सिंह) को मृगों के साथ युद्ध करने में भला कितनी कठिनाई होगी ।' यहाँ 'हरि' शब्द हाथी, हरिण शब्दों के सन्निधान से सिंह का वाचक है ।

उदाहरणार्थ

हे सुन्दर ! उस कोमलाङ्गी के नेत्र तुम्हारे वियोग में (हथेली दिखाते हुए) इतने विशाल हो गये हैं, तथा (पाँच उँगलियाँ दिखाते हुए) इतने दिनों में उसकी अवस्था (कनिष्ठिका उँगली दिखाते हुए) ऐसी हो गयी है ।१०।

इन संकेतों के विना यदि उक्त कथन कहा जाता तो वह अभीष्ट अभिप्राय को प्रकट करने में 'असमर्थ' होता, किन्तु इन संकेतों के द्वारा अब इसमें यह दोष नहीं रहा । 'हथेली दिखाने' से आँखों की विशालता, 'पाँच उँगलियों को दिखाने' से पाँच दिनों—थोड़े से दिनों—का, और 'कनिष्ठिका उँगली दिखाने' से कृशता का बोध होता है ।

२. अप्रतीत

जो पद [गुण और क्रिया के] योग से तो किसी अर्थ-विशेष का प्रतिपादन

तत्र संशयवद्यथा—

साधारणमपरेष्वपि गुणादि कृत्वा निमित्तमेकस्मिन् ।
यत्कृतमभिधानतयार्थे संशयवद्यथा हिमहा ॥१२॥

साधारणमिति । यत्पदं गुणक्रियादिनिमित्तमुद्दिश्यान्येष्वप्यर्थेषु साधारणं सदेकस्मिन्विशिष्टेऽर्थेऽभिधानतया संज्ञात्वेन कृतं न तु विशेषणत्वेन तदनेकार्थतयैकत्र निश्चयानुत्पादनात्संशयवद तीतम् । उदाहरणं यथा—हिमहेति। अत्र हिमहननलक्षणया क्रिययैतत्पदं रवौ वह्नौ च साधारणम् । अभिधानतया चैकत्रापि न रूढम् । अत एकत्र प्रयुज्यमानं संशयं कुर्वीत । अथ किमेतत् 'शब्दप्रवृत्तिहेतौ सत्यपि' (६।६) इत्यनेनासमर्थलक्षणेन न परिहृतम् । नेत्युच्यते । यतो यदेकत्र रूढमन्यत्र तु तदर्थसद्भावेऽपि न प्रयोगार्हं तत्तस्य विषयः । इह तु यत्क्वचिदपि न रूढं युक्त्या च तदर्थवाचकत्वं तदेकत्रार्थेऽनुचितमिति स्फुट एव भेदः । तथा 'निश्चीयते न यस्मिन्' (६।७) इत्यस्याप्ययमविषयः । यतस्तत्र विशेषणपदं संशयकारि निषेध्यम् ॥

अथासंशयमाह—

पदमपरमप्रतीतं यद्यौगिकरूढशब्दपर्यायैः ।
कल्पितमर्थे तस्मिन्यथाश्वयोषिन्मुखार्चिष्मान् ॥१३॥

पदमिति । अपरमिदं पदमप्रतीतं यद्यौगिकानां संबन्धजानामथ च रूढानां संज्ञात्वेन प्रसिद्धानां पर्यायैस्तस्मिन्विवक्षितेऽर्थे कल्पितमभिधानतया प्रयुक्तम् । यथा

करे किन्तु वाचक रूप से प्रसिद्ध न हो, वह (अर्थात् उसका प्रयोग) अप्रतीत [दोष कहाता है ।] इस दोष के दो भेद हैं—संशयवत् और असंशयवत् ।११।

मम्मट और विश्वनाथ के अनुसार इस दोष का स्वरूप इससे किञ्चिद् भिन्न है—**अप्रतीतत्वमेकदेशमात्रप्रसिद्धत्वम् ।**

उदाहरणार्थ

'योगेन दलिताशयः ।' 'आशय' शब्द का वासना अर्थ में प्रयोग योगशास्त्र में ही होता है । अतः अर्थ-प्रसंगों में इसका प्रयोग 'अप्रतीत' दोष का सूचक है ।

(क) संशयवद् अप्रतीत

जो पद गुण [क्रिया] आदि को लक्ष्य में रखते हुए अन्य [अर्थों] में सामान्य होता हुआ भी अर्थ-विशेष में अभिधानता (वाचकता) के लिए प्रयुक्त किया जाए, वहाँ संशयवद् [अप्रतीत दोष] होता है, उदाहरणार्थ 'हिमहा' ।१२।

'हिमहा' का अर्थ है हिम हनन (नाश) करने वाला अर्थात् सूर्य अथवा अग्नि । यह शब्द यद्यपि इन दोनों अर्थों में रूढ नहीं है, परन्तु इसे प्रयुक्त कर लिया जाए तो यह संशय बना रहेगा कि यह शब्द सूर्य का वाचक है अथवा अग्नि का ।

वडवामुखानलशब्दे वाच्येऽश्वयोषिन्मुखार्चिष्मानिति शब्दः । स ह्यश्विमुखसादृश्यादौ-र्वाग्नौ यौगिको रूढिशब्दश्च । तत्र वडवापर्यायोऽश्वयोषिदिति, अनलस्यार्चिष्मानिति । मुखशब्दः स्वरूपेण प्रयुक्तः । केचित्त्वश्वयोषिद्वदनवह्निरिति पठन्ति । एवंविधं पदं विवक्षितमर्थं निर्विकल्पमेव प्रत्यापयति । केवलं न तथा रूढमिति दुष्टम् । यथा माघस्य—**'तुरङ्गकान्तामुखहव्यवाहज्वालेव भित्त्वा जलमुल्ललास'** । अल्पश्चायं दोषः, महाकविभिरपि प्रयुक्तत्वात् । अथ किमेतावसमर्थप्रतीतदोषाववाचकत्वेन परिहृतौ । नेत्युच्यते । यतो यत्किंचिदपि तमर्थं नाभिधत्ते तदवाचकम् । इह तु पदमर्थाभिधायक-मेव । केवलं पदान्तरसंनिधानादसामर्थ्यमरूढ्या चाप्रतीतत्वमागतमिति ॥

(ख) असंशय अप्रतीत

जो पद यौगिक अथवा रूढ़ शब्दों के पर्यायों द्वारा उस [अभीष्ट] अर्थ में प्रयुक्त हुआ हो उसे असंशय अप्रतीत कहते हैं । जैसे—'अश्वयोषिन्मुखार्चिष्मान्' पद ।१३।

'अश्वयोषित्' का अर्थ है अश्व की योषित् (पत्नी) अर्थात् अश्वा = वडवा । अर्चिष्मान् का अर्थ अनल । अतः सम्पूर्ण पद का अर्थ हुआ—वडवामुखानल । किन्तु वडवा और अनल के पर्याय पदों के प्रयुक्त होने पर भी यह पद अभीष्ट अर्थ को नहीं बताता । अतः यहाँ अप्रतीत दोष है ।

नमिसाधु ने माघ के उपर्युक्त पद्यांश 'तुरंग कान्ता···' के सम्बन्ध में कहा है कि यहाँ यह असंशय नामक दोष अल्प है, क्योंकि ऐसे प्रयोग महाकवियों द्वारा प्रयुक्त होते रहे हैं—तुरंगकान्ता = अश्वा = वडवा के मुख से निकली हुई हव्य-वाह (हवि को खाने वाली अर्थात् अग्नि) की ज्वाला के समान । पद्यांश का अर्थ है—[वह द्वारिकापुरी] पानी को चीरकर इस प्रकार अवस्थित थी, जैसे वडवा (अश्वा) के मुख से आग की लपटें ऊपर को उठी हुई हों ।

किन्तु मम्मट ने ऐसे स्थलों में क्लिष्टता नामक दोष स्वीकार किया है । यथा—

'अत्रिलोचनसम्भूतज्योतिरुद्गमभासिभिः सदृशम्' अर्थात् अत्रेर्मुनिविशेषस्य लोचनात् सम्भूतं यज्ज्योतिश्चन्द्रस्तस्योद्गमेनोदयेन भासिभिर्भासनशीलैः कुमुदैः सदृशम् । अत्रिमुनि के नेत्रों से उत्पन्न ज्योति अर्थात् चन्द्रमा, उसके उदय से चमकने वाले अर्थात् कुमुदों के सदृश ।

मम्मट ने अप्रतीत दोष वहाँ स्वीकार किया है जहाँ केवल किसी एक शास्त्र में प्रयुक्त अर्थ वाले शब्द का प्रयोग इसी अर्थ में अन्यत्र भी कर दिया जाए—**अप्रतीतं यत्केवले शास्त्रे प्रसिद्धम्** । यथा—

अथ विसंधिपदमाह—

यस्यादिपदेन समं संधिर्न भवेद्भवेद्विरुद्धो वा ।
तदिति विसंधि स इत्थं मन्थरया भरत आहूतः ॥१४॥

यस्येति । यस्य द्वितीयपदस्यादिपदेन सार्धं संधिः संधानं न भवेद्भवन्नपि विरुद्धार्थत्वाद्विरुद्धो वा भवेत्तत्पदं विसंधि । विरुद्धार्थो विशब्दः । ननूभयाश्रयत्वात्संधेः किमिति द्वितीयपदमेव विसंधि भण्यते, न त्वाद्यम् । सत्यम् । यतो द्वितीयपदे सत्येव विसंधित्वमायाति । ततस्तस्य तदुक्तम् । उभयत्रोदाहरणमाह—स इत्यादि । स भरतो मन्थरया कुब्जयेत्थमाहूत आकारितः । स इत्थमिति, भरत आहूत इति चासंध्युदाहरणम् । मन्थरया भरत इति तु विरुद्धसंधिनिदर्शनम् । संहितापाठे सति पदभङ्गवशान्मन्थरे याभे मैथुने रत इति प्रतीपोऽर्थो गम्यते ॥

सम्यग्ज्ञानमहाज्योतिर्दलिताशयताजुषः । विधीयमानमप्येतन्न भवेत्कर्म बन्धनम् ॥

यहाँ आशय शब्द का अर्थ वासना है, किन्तु यह अर्थ केवल योगशास्त्र में ही प्रचलित है । इस प्रसंग में इस शब्द का प्रयोग अप्रतीत दोष का वाचक है । (का० प्र० ७/१५५) ।

३. विसन्धि

जिस [द्वितीय] पद की आदि पद के साथ सन्धि न हो अथवा होने पर भी विरुद्धार्थ वाली हो या विरुद्ध हो जाए, उस पद को विसन्धि कहते हैं ।

जैसे 'स इत्थं मन्थरया आहूतः, अर्थात् इस प्रकार मन्थरा से बुलाया हुआ वह भरत ।१४।

नमिसाधु इस उदाहरण का समन्वय करते हुए कहा है **'स इत्थम् ।'** **'भरत आहूतः'** ये दोनों असन्धि के उदाहरण हैं, तथा, **'मन्थरया भरत'** यह विरुद्ध सन्धि का उदाहरण है । क्योंकि इस कथन को इस प्रकार का सन्धिपाठ—'मन्थर-याभ-रत' मान लेने पर यदि इसके पदों का भंग किया जाए तो 'मन्थरे याभे (मैथुने) रतः' अर्थात् 'मन्द मैथुन-कार्य में रत'—इस प्रकार का विपरीत अर्थ प्रतीत होता है ।

किन्तु हमारे विचार में न तो पाठक का ध्यान ऐसे विलष्ट पदभङ्ग की ओर जाता है और न ही इस प्रकार के पदभङ्गों से किसी प्रकार की काव्य-चमत्कृति ही उपलब्ध होती है ।

जहाँ तक विसन्धि के उक्त उदाहरणों का प्रश्न है, 'स इत्थम्' और 'भरत आहूतः' में भी वस्तुतः सन्धि-नियम ही लागू होते हैं । 'तद्' शब्द के प्रथमा विभक्ति के एकवचन के रूप 'सः' के विसर्ग का लोप 'एतत्तदोः सुलोपोऽकोरनञ्समासे हलि' से नित्य रूप से होता है, और 'पूर्वत्रासिद्धम्' सूत्र के अनुसार 'स इत्थम्' में पुनः सन्धि नहीं हो सकती । इसी प्रकार 'भरत आहूतः' में भी 'भरतः' के विसर्ग-लोप हो

नन्वेवं विसंधिपदे दूषिते सति सर्वमेव पूर्वकविलक्ष्यं दूषितं स्यादित्याशङ्क्य विशेषमाह—

तत्रासत्संधि पदं कृतमसकृदयुक्तितो भवेद् दुष्टम् ।
दूरं तु वर्जनीयं विरुद्धसंधि प्रयत्नेन ॥१५॥

तत्रेति । तत्र द्वयोर्मध्याद्यदसंधि तदसकृत्कृतं पुनःपुनः प्रयुक्तमयुक्तितः पूर्वोत्तरपदासंश्लेषाद्दुष्टं भवति । यथा—

'कान्ते इन्दुशिरोरत्ने आदधाने उदंशुनी ।
पातां वः शंभुशर्वाण्याविती दुःखाकुलाद्भवात् ॥' इत्यादि । विरुद्धसंधि पुनःपदं दूरमतिशयेन प्रयत्नतो वर्जनीयमेव ॥

अथ विपरीतकल्पनमाह—

पूर्वार्थप्रतिपन्थी यस्यार्थः स्पष्ट एव संभवति ।
विपरीतकल्पनं तद्भवति पदमकार्यमित्रमिव ॥ १६ ॥

पूर्वार्थेति । यस्य पदस्य पूर्वार्थप्रतिपन्थी विवक्षितार्थविरोधी स्पष्ट एवाव्याख्यात एवार्थः संभवति तद्विपरीतार्थप्रतिभासनाद्विपरीतकल्पनम् । निदर्शनमाह—अकार्यमित्रमिवेति । अत्र ह्यकार्यमकृत्रिमं मित्रमकारणबन्धुरित्ययमर्थो विवक्षितोऽप्यकार्ये पापे

जाने के उपरान्त 'पूर्वत्रासिद्धम्' उक्त सूत्र से पुनः सन्धि नहीं हो सकती ।

इन दोनों—असन्धि और विरुद्ध सन्धि में से 'असन्धि' का अनेक बार प्रयोग दोषपूर्ण होता है, क्योंकि इसमें पूर्व और उत्तर पदों का असंश्लेश [-सा प्रतीत होता] रहता है । विरुद्ध-सन्धि को तो प्रयत्नपूर्वक दूर ही रखना चाहिये ।१५।

उदाहरणार्थ—'कान्ते इन्दुशिरोरत्ने आदधाने उदशुनी' में कहीं सन्धि नहीं की गयी, अतः यह स्थल असंश्लिष्ट होने के कारण संस्कृत भाषा की प्रकृति के विपरीत प्रतीत होता है ।

स्पष्टतः नमिसाधु द्वारा उदाहृत उक्त पद्य 'कान्ते इन्दुशिरोरत्ने···' में निम्नोक्त तीन स्थलों पर सन्धि नहीं की गयी—कान्ते इन्दुशिरोरत्ने आदधाने उदंशनी । अनेक बार असन्धि सदोष है । प्रस्तुत पद्य का अर्थ है—ऊपर को उठती हुई प्रभा से युक्त चन्द्रमा-रूपी सुन्दर रत्न को सिर पर धारण करने वाले भगवान् शिव एवं देवी पार्वती इस दुःखसंकुल संसार-बन्धन से आपकी रक्षा करें ।

४. विपरीतकल्पन

जिस पद का अर्थ अभीष्ट अर्थ से स्पष्टतः विरुद्ध हो उसे विपरीतकल्पन

मित्त्रमिति विरोध्यर्थो झगित्येव प्रतिभाति । ननु विरुद्धसंधित्वेन किं न परिहृतमेतत् । न परिहृतम् । तत्र हि पदद्वयसंधिविषयं पूर्वार्थविरोधित्वम्, इह तु संध्यभावेऽपीति ॥

अथ ग्राम्यमाह—

यदनुचितं यत्र पदं तत्तत्रैवोपजायते ग्राम्यम् ।
तद्वक्तृवस्तुविषयं विभिद्यमानं द्विधा भवति ॥ १७ ॥

यदिति । यत्पदं यत्र विषयेऽनुचितमयोग्यं तत्तत्रैव ग्राम्यमुपजायते । एतदुक्तं भवति, न स्वाभाविकं पुरुषस्येव शब्दस्य ग्राम्यत्वम्, अपि तु विषयभेदेन । तच्च ग्राम्यं वक्तृवस्तुविषयत्वेन भिद्यमानं सद्द्विधा द्विभेदं भवति । अत्र यद्वस्तुनि वक्तुमुचितं वक्तरि त्वनुचितं तद्वक्तृविषयं ग्राम्यम् । विपरीतं तु वस्तुविषयमिति ॥

तत्र वक्तृग्राम्यमाह—

वक्ता त्रिधा प्रकृत्या नियतं स्यादधममध्यमोत्तमया ।
तत्र च कश्चित्किंचिन्नैवार्हति पदमुदाहर्तुम् ॥ १८ ॥

वक्तेति । वक्ताधममध्यमोत्तमया प्रकृत्या स्वभावेन त्रिधा त्रिप्रकारो भवति । तत्राधमा हीनजातयो दासचेटादयः, मध्यमाः प्रतीहारपुरोहितसार्थवाहादयः, उत्तमा

दोष कहते हैं जैसे—'अकार्यमित्त्र' पद का अभीष्ट अर्थ तो है 'अकारण बन्धु' (सच्चा मित्र), किन्तु अर्थ निकलता है अकार्यों—पाप-कर्मों—में मित्र—सहायक ।१६।

मम्मट ने 'विपरीतकल्पन' दोष को 'विरुद्धमतिकृत' नाम दिया है, उनका उदाहरण भी यही है—

अकार्यमित्रमेकोऽसौ तस्य किं वर्णयामहे । का० प्र० ७।१६५

५. *ग्राम्य—*

जो पद जिस विषय में अनुचित हो, वह वहीं ग्राम्य दोष से दुष्ट हो जाता है । इसके दो भेद हैं—वक्तृग्राम्य और वस्तुग्राम्य ।१७।

नमिसाधु के कथनानुसार जो पद वस्तु (वर्ण्य-विषय) में तो उचित हो, किन्तु वक्ता में उचित न हो उसे वक्तृ-ग्राम्य कहते हैं और जो वक्ता में उचित हो, वस्तु में अनुचित हो उसे वस्तुग्राम्य कहते हैं ।

वक्तृग्राम्य—

वक्ता के अधम, मध्यम और उत्तम प्रकृति से तीन भेद हैं । इन तीनों में से कोई भी स्वेच्छा से कोई पद नहीं बोल सकता ।१८।

नमिसाधु के अनुसार अधम वक्ता हीन जाति वाले दास, चेट आदि होते हैं, मध्यम वक्ता प्रतिहार, पुरोहित, सार्थवाह आदि, और उत्तम वक्ता मुनि, भूपति आदि ।

मुनिनृपतिप्रभृतयः । अथ बालयुववृद्धलक्षणादिकापि प्रकृतिः किं नोच्यते ! तत्रापि हि परस्परं व्यवहाराद्यनौचित्यमस्त्येव । सत्यम् । अर्थविषयमेव तद्ग्राम्यत्वम् । तच्च तत्रैव परिहरिष्यते 'ग्राम्यत्वमनौचित्यं व्यवहाराकारवेषवचनानाम्' इत्यनेन । तत्र तेष्वधमम-ध्यमोत्तमेषु वक्तृषु मध्ये कश्चिद्वक्ता किंचित्पदमुदाहर्तुं वक्तुं नैवार्हति न योग्यो भवति ।।

तत्र दिङ्मात्रप्रदर्शनायाह

तत्रभवन्भगवन्निति नार्हत्यधमो गरीयसो वक्तुम् ।
भट्टारकेति च पुनर्नैवैतानुत्तमप्रकृतिः ।। १९ ।।

तत्रभवन्निति । गरीयस उत्तमान्सुरमुनिप्रभृतींस्तत्रभवन्भगवन्शब्दवाच्या-नप्यधमो वक्तैवमादिभिः शब्दैर्वक्तुं नार्हति न योग्यो भवति । वक्तृविषयं पदमिदमनु-चितम् । तथैतान्गरीयसो भट्टारकशब्दयोग्यानप्यन्य उत्तमस्वभावो राजादिर्वक्तुं नार्हति । इतिशब्दौ स्वरूपनिर्देशार्थौ । चशब्दोऽनुक्तस्वामिप्रभृतिशब्दसमुच्चयार्थः । भट्टारकेति स्वामिन्नित्यादि वेत्यर्थः ।।

इदानीं वस्तुविषयं ग्राम्यमाह—

तत्रभवन्भगवन्निति नैवार्हत्युत्तमोऽपि राजानम् ।
वक्तुं नापि कथंचिन्मुनिमपि परमेश्वरेशेति ।। २० ।।

तत्रभवन्निति । उत्तमो मुनिमन्त्रिप्रभृतिस्तत्रभवदादिपूजापदानि वक्तुं योग्योऽपि राजानमेभिः पूजापदैर्वक्तुं नार्हति । वस्तुविषयमेतदनौचित्यम् । राजा हि परमेश्वरादिभिः शब्दैर्वाच्यो न तु तत्रभवदादिभिरिति । तथा स एवोत्तमो राजा मुनिं तपोधनं परमे-श्वरेशेत्यादिभिरामन्त्रणपदैः कदाचिदपि वक्तुं नार्हति नियतविषया हि शब्दास्तेऽन्यत्र

सामान्य नियम यह है कि—

अधम [प्रकृति वाला] वक्ता [देव, मुनि आदि] उत्तम वक्ताओं को [भी] 'तत्रभवन्', 'भगवन्' आदि सम्बोधन पदों से आमन्त्रित नहीं कर सकता । इसी प्रकार ['भट्टारक' पद से सम्बोधन-योग्य होने पर भी] इन उत्तम वक्ताओं को [राजा आदि] उत्तम प्रकृति वाला [वक्ता] 'भट्टारक' पद से सम्बोधित नहीं कर सकता ।१९।

वस्तुविषय ग्राम्य

उत्तम वक्ता (मुनि, मन्त्री) आदि 'तत्रभवन्', 'भगवन्' आदि सम्मानसूचक पदों के प्रयोग में अधिकारी होने पर भी राजा को इन पदों से सम्बोधित नहीं कर सकता । [इसी प्रकार] उत्तम-प्रकृति [राजा] भी मुनि को 'परमेश्वर', 'ईश' आदि पदों से आमन्त्रित नहीं कर सकता ।२०।

इस सम्बन्ध में विशेष विवरण के लिए भरत-प्रणीत नाट्यशास्त्र १९।१-३७ द्रष्टव्य है ।

केलिं विना प्रयुज्यमाना अनौचित्यज्ञतां गमयेयुरिति ग्राम्यत्वं तेषाम् । आस्तां तावदधम उत्तमोऽपि नार्हतीत्यपिशब्दार्थः । दिङ्मात्रप्रदर्शनं चैतत् । विस्तरस्तु भरतादवगन्तव्यः ॥

भूयोऽपि ग्राम्यविशेषमाह—

पदमिदमनुचितमपरं सभ्यासभ्यार्थवाचि सभ्येऽर्थे ।

तद्धि प्रयुज्यमानं निदधाति मनस्यसभ्यमपि ॥ २१ ॥

पदमिति । इदमपरं पदमनुचितं ग्राम्यं यत्सभ्यासभ्यार्थवाचकं सत्सभ्येऽर्थे प्रयुज्यमानम् । सभायां पर्षदि वक्तुं योग्यः सभ्यस्ततोऽन्योऽसभ्योऽर्थः । कुतोऽनुचितम् । हिर्यस्मादर्थे । यतस्तत्प्रयुज्यमानं सन्मनसि चेतस्यसभ्यमप्यर्थं निदधाति स्फुरयति । नन्वेवंविधस्य पदस्योभयार्थवाचकत्वादसभ्योऽपि प्रयोगो न स्यात्ततश्चास्य प्रयोगोच्छेद एवागतः । नैतत् । अदुष्टो ह्यर्थो दुष्टेन दूष्यते न तु दुष्टः साधुनेति ॥

निदर्शनमाह—

वारयति सखी तस्या यथा यथा तां तथा तथा सापि ।

रोदितितरां वराकी वाष्पभरक्लिन्नगण्डमुखी ॥२२॥

वारयतीति । तस्या नायिकायाः सखी यथा यथा तां वारयति तथा तथा सा वराकी रोदितितराम् । कीदृशी । वाष्पभरेण क्लिन्नगण्डमार्द्रकपोलं मुखं यस्याः सा तथाविधा । अत्र क्लिन्नगण्डशब्दावार्द्रकपोले सभ्येऽर्थे प्रयुक्तावपि पूययुक्तपिटकत्वलक्षण-मसभ्यमप्यर्थं स्फुरयतः । यतोऽसभ्यद्वययोगाच्चात्र विशेषणविशेष्यभावे सति दुष्ट-तरार्थत्वम् ॥

'ग्राम्य' दोष के विषय में कुछ और ज्ञातव्य—

जहाँ सभ्य और असभ्य—दोनों अर्थों के वाचक शब्द का सभ्य अर्थ में प्रयोग किया जाए वहाँ भी अग्राम्य दोष होता है, क्योंकि ऐसा प्रयोग मन में असभ्य अर्थ की भी प्रतीति कराता है ।२१।

उदाहरणार्थ—

सखी उसे ज्यों-ज्यों रोकती है, त्यों-त्यों उस बेचारी का चेहरा लगातार रोने के कारण क्लिन्न अर्थात् आर्द्र बना रहता है । २२ ।

यहाँ 'क्लिन्नगण्ड' शब्द 'आर्द्र कपोल' इस सभ्य अर्थ में प्रयुक्त होने पर भी 'पूययुक्तपिटकत्वलक्षणम्' (पीव से भरे फोड़े रूप) असभ्य अर्थ की प्रतीति भी करता है ।

ग्राम्यत्व दोष का स्वरूप मम्मट के अनुसार इस प्रकार है—**ग्राम्यं यत्केवले लोके स्थितम् ।** जो प्रयोग केवल सामान्य भाषा में होते हों उनका साहित्य में प्रयोग 'ग्राम्यत्व' कहाता है । उदाहरणार्थ—**'कटिस्ते हरते मनः'**—तुम्हारी कटि मेरे मन को आकृष्ट करती है' इस वाक्य में 'कटि' शब्द ।

अथैतदतिव्याप्तिपरिहारार्थमाह—

अर्थविशेषवशाद्वा सभ्येऽपि तथा क्वचिद्विभक्तेर्वा ।
अनुचितभावं मुञ्चति तथाविधं तत्पदं सदपि ॥२३॥

अर्थेति । ग्राम्यं यत्पदं तत्तथाविधं ग्राम्यं सदपि क्वचित्सभ्येऽर्थे उचितभावं ग्राम्यत्वं मुञ्चति । कुतोऽर्थविशेषवशाद्वा, विभक्तेर्वा । वाशब्दौ विकल्पार्थौ । विशिष्ट-सभ्यार्थप्रयोगाद्वा विभक्तिविशेषाद्वेत्यर्थः । अपिर्विस्मये संभावने वा । तथाशब्दः समुच्चयार्थः । पदमेतद्दोषाभावमध्ये समुच्चीयते । क्वचिच्छब्दो विरलत्वप्रतिपादनार्थः । क्वचिदेवार्थविशेषे न सर्वत्रेत्यर्थः ॥

निदर्शनमाह—

कथमिव वैरिगजानां मदसलिलक्लिन्नगण्डभित्तीनाम् ।
दुर्वारापि घटासौ विशांपते दारिता भवता ॥२४॥

कथमिति । निगदसिद्धम् । अत्रार्थविशेषो गजो वीररसश्च । कथं तर्हि नायिकायां बाहुल्येन दृश्यते । यथा—**'धृतबिसवलये निधाय पाणा मुखमधिरूषितपाण्डुगण्डलेखम् । नृपसुतमपरा स्मराभितापादमधुमदालसलोचनं निदध्यौ ॥'** कामिनी-

---

ग्राम्य दोष की अतिव्यप्ति का परिहार—

सभ्य अर्थ में प्रयुक्त ग्राम्य-पद भी कहीं-कहीं अर्थ-विशेष के कारण, अथवा विभक्ति के कारण ग्राम्यत्व छोड़ देता है ।२३।

उदाहरणार्थ—

हे राजन् ! आपने मदजल से क्लिन्न (आर्द्र) गण्डस्थल वाले शत्रु के हाथियों की भयंकर घटा को किस प्रकार विदीर्ण किया ।२४।

[विशांपते=विट्-प्रजा, उनका स्वामी, (सम्बोधन) हे राजन् !]

यहाँ वीररस के प्रसंग में 'क्लिन्न गण्ड' शब्द ग्राम्यत्व का सूचक नहीं है ।

इसी प्रकार नमिसाधु-प्रस्तुत उक्त श्लोक, 'धृतबिसवलये······' में भी 'गण्ड' शब्द ग्राम्यदोष का सूचक नहीं है । किन्तु यह दोषाभाव यदि इस कारण माना जाए कि 'पाण्डुगण्ड···' में पाण्डु शब्द के प्रयोग से अनुप्रास-जन्य सौन्दर्य आ गया है तो यह उचित नहीं है, क्योंकि 'दैत्यस्त्रीगण्डलेखानाम्···' में भी 'गण्ड' शब्द 'पाण्डु' शब्द के प्रयुक्त न होने पर भी ग्राम्य दोष का सूचक नहीं है । वस्तुतः 'वारयति सखी तस्या···' में 'क्लिन्न' शब्द के साथ प्रयुक्त होने के कारण 'गण्ड' शब्द ग्राम्य दोष का सूचक बन गया है । यह प्रयोग सर्वत्र सदोष नहीं होता । निष्कर्षतः इस दोष की कसौटी है सहृदय की रुचि में व्याघात उत्पन्न होना । धृतबिसवलये···' श्लोक का अर्थ इस प्रकार है—

लक्षणोऽर्थविशेषोऽत्रापीति चेत्तर्हि 'वारयति सखी तस्याः' (६।२२) इति दुष्टत्वे कथमुदाहरणम्। पाण्डुशब्दसंनिधानादत्रानुप्रासत्वेन रम्यत्वाददोष इति नोत्तरम्। विनापि पाण्डुशब्दप्रयोगं दर्शनात्। 'दैत्यस्त्रीगण्डलेखानां मदरागविलोपिभिः' इत्यादिषु। तस्मात्पूर्वकविलक्ष्याणां बाहूनां दुष्टत्वमायाति। अत्रोच्यते—क्लिन्नशब्दसंनिधानादेव गण्डशब्दस्यासभ्यत्वं स्फुरति न त्वन्यदा। इत्येतदेव दर्शयितुमुदाहरणे तथैव प्रयुक्तवानिति। विशांपते इत्यत्र षष्ठीबहुवचनवशान्न विट्शब्देन विष्ठालक्षणोऽसभ्यार्थो मनसि निधीयते॥

भूयोऽपि ग्राम्यविशेषानाह—

मञ्जीरादिषु रणितप्रायान्पक्षिषु च कूजितप्रभृतीन्।
मणितप्रायान्सुरते मेघादिषु गर्जितप्रायान्॥२५॥
दृष्ट्वा प्रयुज्यमानानेवंप्रायांस्तथा प्रयुञ्जीत।
अन्यत्रैतेऽनुचिताः शब्दार्थत्वे समानेऽपि॥२६॥ (युग्मम्)

मञ्जीरादिष्विति। दृष्ट्वेति। वाच्येऽर्थे तुल्येऽप्येतेष्वेतान्धातून्पूर्वकविभिः प्रयुज्यमानान्दृष्ट्वा तेष्वेव निबध्नीयात्। नान्यत्र। यतस्तल्लक्ष्यमेवान्यत्र व्यवस्थाकारि मञ्जीरं नूपुरम्। आदिग्रहणाद्रशनाघण्टाभ्रमरादिसंग्रहः। रणितप्रायानिति प्रायग्रहणं सदृशार्थवृत्तिक्वणिशिञ्जिगुञ्जत्याद्यर्थम्। प्रभृतिग्रहणं वाशत्याद्यर्थम्। सुरतग्रहणं व्यापारान्तरनिवृत्त्यर्थम्। मेघादिष्वित्यत्रादिग्रहणं सिंहगजाद्यर्थम्। प्रायग्रहणं ध्वनत्याद्यर्थम्। एवं प्रायानिति ये शास्त्रेषु सामान्येन पठ्यन्ते। अथ च विशेष एव दृश्यन्ते। यथा—हेषतिरश्वेषु। भणतिः पुरुषेषु। कणतिः पीडितेषु। वातिर्वायौ। न त्वन्यत्र। नहि दृश्यते पुरुषो वातीति। एवमन्येऽपि द्रष्टव्याः। अन्यत्रैतेऽनुचिताः।

एक अन्य रमणी काम-संताप के कारण पीतवर्ण कपोल से युक्त मुख को बिसकंकण से भूषित हाथ पर रखकर बिना मधुपान के ही मदपूर्ण एवं निर्निमेष नेत्रों से राजपुत्र को देखने लगी।

ग्राम्य के विषय में एक अन्य ज्ञातव्य विषय—

नूपुर [रशना, घण्टा, भ्रमर] आदि शब्द के लिए रणित [क्वणित, शिञ्जित, गुञ्जित] आदि पद, पक्षियों के शब्द के लिए कूजित आदि पद, सुरत में मणित प्रभृति पद, मेघ [सिंह, गज] आदि के शब्द के लिए गर्जित आदि पदों का प्रयोग करना चाहिए।२५।

प्रयोगों की साधुता के लिए महाकवियों द्वारा काव्यों में प्रयुक्त पदों को प्रमाण मानना चाहिए। इन सभी शब्दों के समानार्थक शब्द प्रयुक्त करना भी उचित नहीं होता।२६।

मेघादिषु रणत्यादय इत्यर्थः। अपिशब्दो विस्मये। चित्रमिदं यच्छब्दार्थे समानेऽपि ग्राम्यत्वमेषां वस्तुविषयेणैव। ग्राम्यत्वेनास्मिन्दोषे परिहृते पुनर्वचनं प्रपञ्चार्थम् ॥

अथ देश्यमाह—

प्रकृतिप्रत्ययमूला व्युत्पत्तिर्नास्ति यस्य देश्यस्य।
तन्मडहादि कथंचन रूढिरिति न संस्कृते रचयेत् ॥२७॥

प्रकृतीति। विशिष्टदेशे भवं देश्यम्। महाराष्ट्रादिदेशप्रसिद्धम्। देशीयं पदं संस्कृते न रचयेत्। यस्य पदस्य प्रकृतिप्रत्ययमूला व्युत्पत्तिर्न विद्यते तच्च मडहादि। तत्र मडहडहहोरणघुंघुलमकंदोट्टएलहुक्कसयरुयअलंबकुसुमालवाणवालादिकं यथाक्रमं सूक्ष्मश्रेष्ठ-वस्त्रपटमण्डपपद्महरिद्राञ्जलिसुवर्णकारकुक्कुटचौरशक्रादिवाचकं कथंचिदपि नैव रचयेदित्यर्थः। ननु देश्यप्राकृतभेदत्वात्कथं संस्कृते प्रयोगप्रसङ्ग इत्याह—रूढिरिति। रूढिभ्रान्त्या न बध्नीयात्। कश्चिद्व्यात्मदेशप्रसिद्धार्थं शब्दं सर्वत्रायं वाचक इति मन्यमानः प्रयुञ्जीत। 'व्युत्पत्तिर्यस्य नास्ति' इति वचनात्तु सव्युत्पत्तिकं देश्यं कदाचित्प्रयुञ्जीतेत्युक्तं भवति। यथा दूर्वायां छिन्नोद्भवाशब्दः। ताले भूमिपिशाचः। शिवे महानटः। वृक्षे परशुरुजः। समुद्रनवनीतं चन्द्रामृतयोः। जले मेघक्षीरशब्दः। एवमन्येऽपि ॥

अथ दोषानुपसंहर्तुमाह—

इत्थं पददोषाणां दिङ्मात्रमुदाहृतं हि सर्वेषाम्।
तस्मादनयैव दिशा ततोऽन्यदभ्यूह्यमभियुक्तैः ॥२८॥

इत्थमिति। इत्थमनेन पूर्वोक्तप्रकारेण पददोषाणां सर्वेषां दिगेव दिङ्मात्रं हिर्यस्मादुदाहृतं निर्दशितं तस्मादनयैव दिशान्यदपि दोषजातं स्वयमूहनीयम् ॥

---

६. *देश्य—*

देश विशेष में रूढ उन 'मडह' आदि पदों का, जिनकी प्रकृति और प्रत्यय-मूलक व्युत्पत्ति नहीं है, संस्कृत भाषा में प्रयोग न किया जाए।२७।

किन्तु नमिसाधु के अनुसार जिन शब्दों की प्रकृति-प्रत्यय-मूलक व्युत्पत्ति विद्यमान है, ऐसे देशीय शब्दों का प्रयोग किया जा सकता है। जैसे दूर्वा, ताल, शिव और वृक्ष शब्दों के अर्थ में क्रमशः छिन्नोद्भवा, भूमिपिशाच, महानट, परशुरुज आदि शब्द।

इस प्रकार सभी पदगत दोषों के सामान्य अवलोकनार्थ उदाहरण प्रस्तुत किये गए हैं। इसी रीति से विद्वान् लोग स्वयं अन्य दोषों को भी जान लें।२८।

पूर्वमुक्तमधिकपदं वाक्यं न प्रयोक्तव्यमथ च दृश्यते क्वचिदसकृत्प्रयोगस्तदतिव्याप्तिसंहारमाह—

वक्ता हर्षभयादिभिराक्षिप्तमनास्तथा स्तुवन्निन्दन् ।
यत्पदमसकृद् ब्रूयात्तत्पुनरुक्तं न दोषाय ॥२९॥

वक्तेति । वक्ता प्रतिपादको हर्षभयादिभिराक्षिप्तचित्तः सन्यत्पदमेकस्मिन्नेवार्थे पुनः पुनर्वक्ति तत्पुनरुक्तत्वं दोषाय न भवति । अपि त्वलंकारायेत्यर्थः । आदिग्रहणाद्विस्मयशोकादिसंग्रहः । तथाशब्दः समुच्चये ॥

निदर्शनमाह—

वद वद जितः स शत्रुर्न हतो जल्पंश्च तव तवास्मीति ।
चित्रं चित्रमरोदीद्धा हेति परा हते पुत्रे ॥३०॥
जय जय वैरिविदारण कुरु कुरु पादं शिरःसु शत्रूणाम् ।
धिग्धिक्तमरिं यस्त्वामप्रणमन्स्वं विनाशयति ॥३१॥

वदेति । जयेति । अत्र वद वदेति । हर्षे । तव तवास्मीति भये । चित्रं चित्रमिति विस्मये । हा हेति शोके । जय जयेति स्तुतौ । कुरु कुर्विति त्वरायाम् । धिग्धिगिति निन्दायाम् । अन्यन्निगदसिद्धम् ॥

अधिकपदता दोष की अतिव्याप्ति

वक्ता हर्ष, भय आदि से विह्वलचित्त होकर स्तुति अथवा निन्दा करते हुए, एक ही अर्थ में किसी एक पद की बार-बार पुनरुक्ति करता है किन्तु यह दोष न होकर अलंकार ही है।२९।

उदाहरणार्थ

कहो, कहो ! जीत लिया उस शत्रु को ? अरे क्या, 'मैं तेरी शरण में हूँ, मैं तेरी शरण में हूँ', यह कहने पर शत्रु को मारा नहीं ? इस प्रकार पुत्र के मारे जाने पर हाय-हाय करता हुआ तथा आश्चर्य में पड़ा हुआ वह रोने लगा। हे शत्रुहन्ता ! तुम्हारी जय हो, जय हो ! तुम शत्रुओं के मस्तक पर पैर रखो, पैर रखो (अर्थात् उन्हें अपने अधीन करो)। उस शत्रु को धिक्कार है, जो तुम्हारी अधीनता स्वीकार न करके अपना विनाश चाहता है।३०, ३१।

इस पद में 'कहो, कहो', 'मैं तेरी शरण में हूँ', 'मैं तेरी शरण में हूँ,' 'हाय हाय,' 'जय हो, जय हो', 'पैर रखो, पैर रखो', आदि पद 'पुनरुक्त' दोष से दूषित नहीं हैं।

भूयोऽप्याह—

यत्पदमर्थेऽन्यस्मिंस्तत्पर्यायोऽथवा प्रयुज्येत ।
वीप्सायां च पुनस्तन्न दुष्टमेवं प्रसिद्धं च ॥३२॥

यदिति । यत्पदमन्यमर्थमभिधातुं द्विः प्रयुज्यते तत् । तथा तस्य प्रयुक्तपदस्य पर्यायो वाचको यः प्रयुज्येत । तथा वीप्साप्रतिपादनार्थं वा यत्पुनः पदं प्रयुज्येत तत्पदं न पुनरुक्तदोषदुष्टं भवति । एवं प्रसिद्धं च । इत्येवं वीप्सातुल्यरूपेण प्रकारेण यत्क-विलक्ष्येषु प्रसिद्धं तदपि पुनरुक्तं न दोषाय । यथा कलकलरणकादिकम् । तथैव लोके प्रसिद्धत्वादिति । ननु तुल्यपदस्य तत्पर्यायपदस्य वान्यार्थत्वेन वीप्सावाचकस्य वीप्साप्रतिपादकत्वेन तदर्थत्वादेव पुनरुक्तिर्न दुष्टा तत्किमनेनेति सत्यम् । किं तु कश्चिदतिमन्दमतिः पुनः प्रयोगं दृष्ट्वा दुष्टत्वमाशङ्केतेति ॥

क्रमेण निदर्शनमाह—

गजरक्तरक्तकेसरभारः सिंहोऽत्र तनुशरीरोऽपि ।
दिशि दिशि करिकुलभङ्गं वारंवारं खरैः कुरुते ॥३३॥

इसी प्रसंग में और भी ज्ञातव्य—

पुनरुक्त दोष वहाँ भी नहीं माना जाता—(१) जहाँ कोई पद [अपने] अन्य अर्थ में प्रयुक्त हो, (२) जहाँ किसी प्रयुक्त पद के पर्यायवाची पद का प्रयोग किया जाए, अथवा जहाँ वीप्सा के कारण अथवा [कविजनों अथवा लोक में] प्रसिद्धि के कारण किसी पद की पुनरुक्ति की जाए ।३२।

उदाहरण

हाथियों के रक्त से अपनी ग्रीवा के बालों को रक्त-वर्ण बनाने वाला सिंह आकार में छोटा होने पर भी बार-बार अपने नखों से सर्वत्र हाथियों को विदीर्ण करता रहता है ।३३।

(१) इस पद्य में प्रयुक्त प्रथम रक्त शब्द तो 'लहू' के अर्थ का वाचक है और द्वितीय रक्त शब्द 'लाल रंग' अर्थ का, अतः यहाँ पुनरुक्त दोष नहीं है ।

(२) तनु और शरीर शब्द पर्यायवाची हैं, परन्तु यहाँ तनु का अर्थ 'छोटा' है, अतः यहाँ पुनरुक्त दोष नहीं है ।

(३) 'दिशि दिशि' में वीप्सा (बलद्योतन) के कारण यह दोष नहीं है।

(४) 'वारं वारं' लोक-प्रसिद्ध प्रयोग है, अतः इसमें भी यह दोष नहीं है ।

लोक-प्रसिद्धि का एक अन्य उदाहरण—'मानिनीजनविलोचन···' नसिसाधु ने भी प्रस्तुत किया है, जिसका अर्थ है—

मानिनी स्त्रियों के नेत्रों की सुन्दरता का पान करता हुआ तथा उनके शीतल

गजेति । प्रथमेऽत्र पादे रक्तशब्दावन्यार्थौ । एका रुधिरवाचकोऽपरस्तु रञ्जन-क्रियाभिधायी । तनुशरीर इत्यत्र तनुशब्दस्तानवाभिधायी तत्पर्यायः शरीरशब्दः काय-वाचकः । दिशि दिशीति वीप्सायाम् । सर्वस्यां दिशीत्यर्थः । वारंवारमिति लोकप्रसि-द्धम् । अन्यदपि लोकप्रसिद्धं दृश्यते । यथा—

'मानिनीजनविलोचनपातानुष्णबाष्पकलुषान्प्रतिगृह्णन् ।
मन्दमन्दमुदितः प्रययौ खं भीत भीत इव शीतमयूखः ॥'

तथा—

'ता किंपि किंपि ता कह वीअब्बो निमीलियच्छीहिम् ।
कडुओसहं व पिज्जइ अहरो घेरस्य तरुणीहिम् ॥'

उद्भटस्तु सर्वत्रात्र पुनरुक्ताभासालंकारत्वमाचष्टे ॥

अश्रु-बिन्दुओं को ग्रहण करता हुआ चन्द्रमा मानो भयभीत-सा होकर धीरे-धीरे आकाश में उदित हुआ ।

यहाँ 'मन्दं मन्दम्' और 'भीत भीतः' शब्दों में पुनरुक्ति दोष नहीं है ।

नमिसाधु ने इसी प्रसंग के अन्त में संकेत किया है कि उद्भट ऐसे सभी स्थलों में पुनरुक्तवदाभास अलंकार मानते हैं । उद्भट के उपलब्ध ग्रन्थ 'काव्यालंकारसार-संग्रह' में इस अलंकार का लक्षण है—

पुनरुक्तवदाभासमभिन्नवस्त्विवोद्भासिभिन्नरूपपदम् ।

अर्थात् जहाँ भिन्न रूपों वाले पद भी अभिन्न वस्तु (एक ही पदार्थ) के द्योतक-से प्रतीत हों वहाँ पुनरुक्तवदाभास अलंकार होता है । प्रतिहारेन्दुराज (अथवा स्वयं उद्भट) ने उदाहरणार्थ निम्न पद्य प्रस्तुत किया है—

तदाप्रभृति निःसङ्गी नागकुञ्जरकृत्तिभृत् ।
शितिकण्ठः कालगलत्सतीशोकानलव्यथः ॥

तब से (सती के वियोग से लेकर) नाग-कुञ्जर (श्रेष्ठ गज) के चर्म को धारण करने वाले नीलकण्ठ शिव निःसंगी (विषयों से पराङ्मुख) हैं, और काल द्वारा विनष्ट सती की विरहाग्नि से संतप्त हैं ।

यहाँ 'नाग' और 'कुञ्जर' शब्द हस्तिवाची प्रतीत होते हैं और 'शितिकण्ठ' और 'कालगल' शब्द महादेव-वाची । अतः यहाँ पुनरुक्तवदाभास अलंकार है ।

अस्य वास्तवत्वं न भवति । अविपरीतग्रहणं विवक्षितविपरीतार्थस्य वास्तवत्वनिवृत्त्यर्थम् । यथा—

दन्तान्निर्दलयद्रसां च जडयत्तालु द्विधा स्फोटयन्
नाड्यः संघटयद् गलद्गलबिलादान्त्राणि संकोचयत् ।
इत्थं निर्मलकर्करीस्थमसहप्रालेयवाताहतं
नाधन्याः प्रचुरं पिबन्त्यनुदिनं प्रोन्मुक्तधारं पयः ।।

अत्र हि पयसः शीतलत्वमाह्लादकत्वं च विवक्षितम् । तद्वैपरीत्यं च प्रतीयते । निरुपमादिग्रहणं त्वनुवादमात्रम् । न तूपमातिशयश्लेषाणां वास्तवत्वनिवृत्तये । पृथगुपादानादेव तेषामन्यत्वसिद्धेः ।।

अथ वास्तवप्रभेदानाह—

तस्य सहोक्तिसमुच्चयजातियथासंख्यभावपर्यायाः ।
विषमानुमानदीपकपरिकरपरिवृत्तिपरिसंख्याः ।।११।।
हेतुः कारणमाला व्यतिरेकोऽन्योन्यमुत्तरं सारम् ।
सूक्ष्मं लेशोऽवसरो मीलितमेकावली भेदाः ।।१२।।
(युग्मम्)

वस्तु का स्वरूप-कथन तो है किन्तु पुष्ट (सुन्दर) रूप में प्रस्तुत नहीं किया गया ।

अविपरीत से तात्पर्य है विवक्षित अर्थ का प्रतिपादक । उदाहरणार्थ—

वे जन अधन्य नहीं है, अर्थात् धन्य हैं जो इस उन्मुक्त धारा वाले जल को प्रतिदिन पीते हैं जो कि दाँतों को तोड़ता हुआ, जिह्वा को जड़ बनाता हुआ, तालु के दो टुकड़े करता हुआ, नाड़ियों को परस्पर मिलाता हुआ, आँतों को संकुचित करता हुआ, स्वच्छ सुराही में स्थित और तुषारयुक्त वायु से शीतल है ।

यहाँ कवि को अभीष्ट तो है जल की शीतलता की आह्लादकता का वर्णन करना, परन्तु प्रतीत होता है उससे विपरीत अर्थ—अत्यधिक शीतलता के कारण कष्टप्रदता ।

वास्तव के २३ भेद

सहोक्ति, समुच्चय, जाति, यथासंख्य, भाव, पर्याय, विषय, अनुमान, दीपक, परिकर, परिवृत्ति, परिसंख्या, हेतु, कारणमाला, व्यतिरेक, अन्योन्य, उत्तर, सार, सूक्ष्म, लेश, अवसर, मीलित और एकावली ।११-१२।

तस्य वास्तवस्य वक्ष्यमाणलक्षणाः सहोक्त्यादयस्त्रयोविंशतिरिमे भेदा भवन्ति ।।

साम्प्रतमेषां परिपाट्या लक्षणमाह । तत्र सहोक्तिः—

भवति यथारूपोऽर्थः कुर्वन्नेवापरं तथाभूतम् ।
उक्तिस्तस्य समाना तेन समं या सहोक्तिः सा ।। १३ ।।

भवतीति । योऽर्थः कर्तृभूतः प्रधानं यथारूपो यादृगात्मा यद्गुणयुक्तो भवति । कथं भवति—अपरमन्यमर्थं कर्मलक्षणमप्रधानं तथाभूतम् । तथाशब्दः प्रकारे । तथाप्रकारमात्मगुणसदृशं कुर्वन्नेवेति । एवकारोऽन्यकालनिवृत्त्यर्थः । कुर्वन्नेव भवति । न तु भूत्वा करोति, कृत्वा भवतीत्यर्थः अतस्तस्य कुर्वतोऽर्थस्य तेन कार्येणार्थेन समं समाना तुल्या योक्तिः सा सह सार्धमुक्तिः सहोक्तिः । हेतुहेतुमद्भावोऽत्र सहार्थः । एकवचनमिहातन्त्रम् । तेन बहूनामप्यर्थानां सहोक्तिर्भवतीति ।।

निदर्शनमाह—

कष्टं सखे क्व यामः सकलजगन्मन्मथेन सह तस्याः ।
प्रतिदिनमुपैति वृद्धिं कुचकलशनितम्बभित्तिभरः ।। १४ ।।

कष्टमिति । कश्चिद्विरही मित्रमिदमाह—हे सखे, कष्टं क्व व्रजामः । यतस्तस्यास्तरुण्याः स्तनकलशभरो नितम्बभित्तिभरश्चानुदिनं सकलस्य जगतो यो मन्मथस्तेन सह वृद्धिमुपैति । तां प्रति कामो वर्धत इत्यर्थः । अत्र प्रधानभूतः कुचकलशनितम्बभित्तिभरो वृद्धिगुणयुक्तोऽपरमर्थं मन्मथाख्यं वृद्धियुक्तं करोतीति । ततस्तस्य तथा कुर्वतः सहोक्तिरिति लक्षणयोजना ।।

---

१. सहोक्ति

जो अर्थ जिस गुण से युक्त हो, वह यदि दूसरे अर्थ को भी उसी गुण से युक्त कर दे, तो [इस प्रकार] उस [अर्थ] के उस [दूसरे अर्थ] के साथ समान (तुल्य) कथन को सहोक्ति कहते हैं ।१३।

इस लक्षण का स्पष्टीकरण करते हुए नमिसाधु ने कहा है कि पहला अर्थ कर्तृ-भूत अर्थात् प्रधान होना चाहिए और दूसरा अर्थ कर्मभूत अर्थात् अप्रधान ।

उदाहरण

कोई विरही अपने मित्र से कहता है—हे मित्र ! कहो ! हम कहाँ जाएँ, क्योंकि उस [कामिनी] का स्तनकलशद्वय और अतिशय भारी नितम्ब-भाग जगद्-व्यापी काम के साथ-ही-साथ बढ़ रहा है ।१४।

दोनों पदार्थों का एक साथ बढ़ना सहोक्ति अलंकार का सूचक है ।

अस्या एव प्रकारान्तरमाह—

योवा येन क्रियते तथैव भवता च तेन तस्यापि ।
अभिधानं यत्क्रियते समानमन्या सहोक्तिः सा ।। १५ ।।

य इति। योऽर्थः कर्मभूतो येन कर्तृभूतेन क्रियते तस्य कर्मभूतस्य तेन कर्तृभूतेनार्थेन। कीदृशेन। तथैव तादृशधर्मयुक्तेन भवता। सहाभिधानं यत्क्रियते सान्या सहोक्तिः। वाशब्दः प्रकारार्थः। प्रकारान्तरेण सहोक्तिरित्यर्थः ।।

उदाहरणमाह—

भवदपराधैः सार्धं संतापो वर्धतेतरां तस्याः ।
क्षयमेति सा वराकी स्नेहेन समं त्वदीयेन ।। १६ ।।

भवदिति। कस्याश्चिन्मानिन्याः सखी नायकमन्यचित्तमिदमाह—तस्यास्त्वत्कान्तायाः संतापस्त्वदीयापराधैः सहातीव वर्धते। अत एव सा वराकी त्वदीयेन स्नेहेन सार्धं क्षयं गच्छति। अत्र संतापस्य वराकीक्षयस्य च शब्देन प्राधान्यम्। अपराधस्नेहयोस्तु तत्कारणयोरप्राधान्यम्। अत एव तृतीया। तत्त्वतस्तु भवदपराधा वर्धन्ते तस्याः संतापेन सह। भवत्स्नेहश्च क्षीयते तया सहेति। यदा त्वेवमुच्यते तदा पूर्वेव सहोक्तिरिति। पूर्वस्यां कर्तुः प्राधान्यं क्रियमाणस्य गुणभावः। इह तु क्रियमाणस्य प्राधान्यं कुर्वतस्त्वप्राधान्यमिति भेदः ।।

सहोक्ति का अन्य प्रकार—

जिस [अप्रधान] अर्थ का जिस [प्रधान] अर्थ के साथ उसी [गुण अथवा धर्म] से युक्त करके सहकथन होता है, वहाँ [भी] सहोक्ति अलंकार होता है।१५।

इसका तात्पर्य यह है कि एक पदार्थ के गुण अथवा धर्म को दूसरे पदार्थ के साथ [उससे सम्बद्ध गुण अथवा धर्म के अनुरूप] सम्बन्ध जोड़ने को भी सहोक्ति अलंकार कहते हैं।

उदाहरण—

किसी मानिनी नायिका की सखी अन्य स्त्री में आसक्त उसके पति को कहती है—

आपके अपराधों के साथ ही उसका सन्ताप भी बढ़ता जा रहा है और तुम्हारे स्नेह के साथ-ही-साथ वह बेचारी भी क्षीण होती जा रही है।१६।

प्रकारान्तरमाह—

अन्योन्यं निरपेक्षौ यावर्थावेककालमेकविधौ ।
भवतस्तत्कथनं यत्सापि सहोक्तिः किलेत्यपरे ।। १७ ।।

अन्योन्यमिति । यावर्थौ पूर्वोक्तसहार्थाभावात्परस्परं निरपेक्षावेकविधौ समानधर्मयुक्तौ तुल्यकालं भवतस्तयोर्यत्सहकथनं सापि किल सहोक्तिरित्यपरे केचित् । किलशब्दोऽत्रारुचौ । अरुचिश्चोक्तसहार्थाभावादिति ।।

निदर्शनमाह—

कुमुददलैः सह संप्रति विघटन्ते चक्रवाकमिथुनानि ।
सह कमलैर्ललनानां मानः संकोचमायाति ।। १८ ।।

कुमुददलैरिति । प्रदोषवर्णनमेतत्सुगममेव । अत्र न कुमुददलैश्चक्रवाकाणां तैर्वा तेषां विघटना क्रियते । अपि तु कालेन । तथा न कमलैर्मानस्य मानेन वा तेषां संकोचो जन्यते । अपि तु रात्र्या, शशिना वा । औपम्यं न विवक्षितम् ।।

अथ समुच्चयमाह—

यत्रैकत्रानेकं वस्तु परं स्यात्सुखावहाद्येव ।
ज्ञेयः समुच्चयोऽसौ त्रेधान्यः सदसतोर्योगः ।। १९ ।।

यत्रेति । यत्र समुच्चये एकत्राधारेऽनेकं वस्तु द्रव्यगुणक्रियाजातिलक्षणं परमुत्कृष्टं

सहोक्ति का एक अन्य प्रकार—

एक-दूसरे से निरपेक्ष (असम्बद्ध) होते हुए भी जो दो [प्रधान और अप्रधान] अर्थ एक काल और एक विधि से कहे जाएँ उसे [भी] कई [आचार्य] सहोक्ति अलंकार मानते हैं ।१७।

जैसे—

कुमुद पत्रों के विघटन (खिलने) के साथ-साथ चकवों के जोड़ों का भी विघटन (वियोग) हो रहा है और कमलों के संकोच के साथ कामिनियों का मान भी संकुचित हो रहा है ।१८।

२. समुच्चय

जहाँ [एक ही आधार पर] अनेक सुखदायक आदि वस्तुओं का एक साथ कथन किया जाए वहाँ समुच्चय अलंकार होता है । सत् (पदार्थों) और असत् पदार्थों के योग से इसके तीन भेद होते हैं ।१९।

नमिसाधु ने 'आदि' शब्द से तात्पर्य लिया है दुःखदायक । उनके अनुसार इस अलंकार के तीन भेद इस प्रकार हैं—

शोभनत्वेन वा स्यात्स समुच्चयः। तथा सुखावहाद्येवेति। सुखमावहत्युत्पादयतीति सुखावहम्। आदिग्रहणाद् दुःखावहादिपरिग्रहः। एवशब्दः समुच्चये। सुखावहादि च यत्रानेकं द्रव्यादि स्यात्सोऽपि समुच्चय इत्यर्थः। तथा त्रेधान्यः सदसतोर्योगः त्रेधा त्रिविधः, अन्यः प्रकारान्तरेण समुच्चयः। कीदृशः। सदसतोर्योग इति। सतोः सुन्दरयोर्योग इत्येकः। असतोरसुन्दरयोर्योग इति द्वितीयः। सदसतोः सुन्दरासुन्दरयोर्योगस्तृतीयः। अत्र च सदसतां योग इति बहुवचनेन निर्देशे न्याय्ये द्विवचननिर्देशो द्वयोरेव सतोरसतोः सदसतोर्वा समुच्चयो नान्यथा इति ख्यापनार्थः॥

एतदुदाहरणानि क्रमेणाह—

दुर्गं त्रिकूटं परिखा पयोनिधिः प्रभुर्दशास्यः सुभटाश्च राक्षसाः।
नरोऽभियोक्ता सचिवैः प्लवंगमैः किमत्र वो हास्यपदे महद्भयम्॥२०॥

दुर्गमिति। निगदसिद्धमेव। अत्रैकं वस्त्वत्र शब्दवाच्यम्। अनेकं तु त्रिकूटदुर्गादिकम्। शोभनत्वेनोत्कृष्टं यथा—

उमा वधूर्भवान्दाता याचितार इमे वयम्।

इत्यादि अशोभनत्वेन यथा—

क्लीबो विरूपो मूर्खश्च मर्महा मत्सरान्वितः।
चित्रं तथापि न धनी दुर्भगः खलु मानवः॥ इति

---

(१) दो सत् (सुन्दर) पदार्थों का एक साथ वर्णन।

(२) दो असत् (असुन्दर) पदार्थों का एक साथ वर्णन।

(३) सत् और असत् पदार्थों का एक साथ वर्णन।

उदाहरण—

त्रिकूट पर्वत तुम्हारा दुर्ग है, सागर परिखा (खाई) है, महापराक्रमी रावण स्वामी है, और विकराल राक्षस वीर योद्धा हैं। (इन सबका) प्रतिद्वन्द्वी है एक मनुष्य (राम), जिसके सहायक हैं वानर। ऐसी हँसी की बात पर तुम्हें क्या डर है? अर्थात् उस व्यक्ति से डरने की कोई बात नहीं है।२०।

यहाँ एक आधार (राम) को लक्ष्य में रखकर अनेक पदार्थों (रावण के उपकरणों) का वर्णन करने से समुच्चय अलंकार है।

नमिसाधु ने इस प्रसंग में दो अन्य उदाहरण प्रस्तुत किये हैं—

(१) "उमा वधूर्भवान्......" अर्थात् उमा (पार्वती) वधू है, आप दाता हैं और हम [उसके विवाह के लिए] प्रार्थना करने वाले हैं। (कु० स० ६।४)

यहाँ सभी शोभन पदार्थों का समुच्चय है।

(२) "क्लीबो विरूपो मूर्खश्च......" अर्थात् यह बेचारा व्यक्ति नपुंसक,

गुणाद्युत्कर्षोदाहरणानि स्वयमूह्यानि ॥

सुखावहाद्युदाहरणान्याह—

सुखमिदमेतावदिह स्फारस्फुरदिन्दुमण्डला रजनी ।
सौधतलं काव्यकथा सुहृदः स्निग्धा विदग्धाश्च ॥२१॥

सुखमिति । एष सुखावहद्रव्यसमुच्चय आधारोऽत्रेहशब्दवाच्यः । वस्तूनि सित रजनीप्रभृतीनि ॥

तरलत्वममालिन्यं पक्ष्मलतामायतिं सुमाधुर्यम् ।
आधास्यन्नस्त्रत्वं मदनस्तव नयनयोः कुरुते ॥२२॥

तरलत्वमिति । कामस्त्वदीयनयनयोरस्त्रत्वं करिष्यंस्तरलत्वादीनि कुरुत इति तात्पर्यार्थः । एष गुणसमुच्चयः । तरलत्वादिगुणानां सुखावहानां नयनाधारे समुच्चितत्वादिति ॥

प्रस्फुरयन्नधरोष्ठं गात्रं रोमाञ्चयन्गिरः स्खलयन् ।
मण्डयति रहसि तरुणीः कुसुमशरस्तरलयन्नयने ॥२३॥

प्रस्फुरयन्निति । एष क्रियासमुच्चयः । तरुणीष्वाधारेषु स्फुरणादिक्रियाणां समुच्चितत्वादिति । द्रव्यादीनां तूद्देशो वस्तुग्रहणेन कृतः । जातिसमुच्चयस्तु न संभवति । नह्येकत्रानेका जातिर्विद्यते । दुःखावह इत्याद्युदाहरणानि तु—

कुरूप, मूर्ख, मर्मघाती और ईर्ष्यालु होने के साथ-साथ निर्धन भी है ।

यहाँ सभी अशोभन पदार्थों का समुच्चय है ।

सुखदायक वस्तुओं का एक साथ कथन—

पूर्ण चन्द्रमा की ज्योत्स्ना से धवलित निशा, प्रासाद तल में निवास, काव्य की सरस कथाएँ और स्निग्ध एवं चतुर मित्रों की गोष्ठी—ये सब संसार में सुखद वस्तुएँ हैं ।२१।

कामदेव तुम्हारे नेत्रों को अस्त्र बनाने की इच्छा से उनमें चञ्चलता, निर्मलता, पलकों रूपी लता, विशालता तथा मधुरता का आधान करता है ।२२।

उक्त दोनों पद्यों में सुखावह पदार्थों का समुच्चय है ।

अनेक क्रियाओं का समुच्चय—

कामदेव एकान्त में युवतियों के अधरों को फड़फड़ाकर, शरीर को रोमांचित करके, शब्दों को अटपटा बनाकर और नेत्रों को चञ्चल करते हुए उन्हें विभूषित करता है ।२३।

राज्यभ्रंशो वने वासो दूरे माता पिता मृतः ।
एकैकमपि तद्दुःखं यदब्धिमपि शोषयेत् ।।

इत्यादीनि द्रष्टव्यानि ।।

अथ सतोर्योगः—

सामोदे मधु कुसुमे जननयनानन्दने सुधा चन्द्रे ।
क्वचिदपि रूपवति गुणा जगति सुनीतं विधातुरिदम् ।।२४।।

सामोद इति । स्रष्टुरिदं सुनीतं सुकृतं भद्रकं यत्सामोदकुसुमादिषु मध्वादीनां सतां योगः कृत इत्यर्थः ।।

अथासतोर्योगः—

आलिङ्गिताः करीरैः शम्यस्तप्तोषपांसुनिचयेन ।
मरुतोऽतिखरा ग्रीष्मे किमतोऽन्यदभद्रमस्तु मरौ ।।२५।।

आलिङ्गिता इति । ग्रीष्मकाले मरुदेशे यत्करीरैः शमीवृक्षा मिश्रीभूताः । तथा तप्तानामूषपांसूनां चयैर्मिश्राः प्रचण्डा वायवः । किमतोऽन्यदपरमभद्रमशिवम् । इत्यसतोर्योगः ।।

रुद्रट ने समुच्चय अलंकार के प्रसंग में 'सुखावह आदि' शब्द का प्रयोग किया है । 'आदि' शब्द से नमिसाधु ने 'दुःखावह' अर्थ लिया है । अब वे दुःखावह पदार्थों के समुच्चय का उदाहरण प्रस्तुत करते हैं—

"राज्यभ्रंशो वने वासो······" अर्थात् राज्य से भ्रष्ट होना, वनों में निवास करना, माता का दूर [अयोध्या में] होना तथा पिता की मृत्यु—इन सबमें से एक दुःख भी समुद्र को सुखा देने की शक्ति रखता है ।

सुन्दर पदार्थों का एक साथ कथन—

विधि ने संसार में यह अच्छा ही किया है कि सुरभित पुष्प में मधु, लोगों के नेत्रों को आह्लादित करने वाले चन्द्र में अमृत और किसी-किसी रूपवान् में गुण भर दिये हैं ।२४।

असुन्दर पदार्थों का एक साथ कथन—

ग्रीष्म काल में इस मरुस्थल में शमीवृक्ष करील के कांटों से घिरे हुए हैं और तपी हुई बालू को उड़ाती हुई प्रचण्ड लू चल रही है, इससे बढ़कर और क्या अनर्थ हो सकता है ?२५।

अथ सदसतोर्योगः—

कमलवनेषु तुषारो रूपविलासादिशालिनीषु जरा ।
रमणीष्वपि दुश्चरितं धातुर्लक्ष्मीश्च नीचेषु ।।२६।।

कमलेति । सुगममेव योजनम् ।।

प्रकारान्तरमाह—

व्यधिकरणे वा यस्मिन्गुणक्रिये चैककालमेकस्मिन् ।
उपजायेते देशे समुच्चयः स्यात्तदन्योऽसौ ।।२७।।

व्यधिकरण इति । वाशब्द एवशब्दार्थे भिन्नक्रमः । ततश्च यस्मिन्समुच्चये गुणक्रिये भिन्नाधिकरणे एकस्मिन्देशे समकालमुपजायेते असौ समुच्चयस्तदन्यः । ततः पूर्वसमुच्चयादपर इत्यर्थः । गुणक्रिये एव व्यधिकरणे इत्यवधारणं तु गुणक्रियाधिकरण-योर्वस्तुनोर्देशाधिकरणमेकमेवेति कृत्वा ।।

निदर्शनमाह—

विदलितसकलारिकुलं तव बलमिदमभवदाशु विमलं च ।
प्रखलमुखानि नराधिप मलिनानि च तानि जातानि ।।२८।।

विदलितेति । अत्र नैर्मल्यगुणस्य बलमाधारो मालिन्यस्य तु खलमुखानीति । चशब्दावेककालत्वसूचनार्थौ । एवं गुणसमुच्चयः ।।

सुन्दर और असुन्दर पदार्थों का एक साथ कथन—

कमलवनों में हिमपात, रूप और विलासयुक्त रमणियों में वृद्धावस्था और नीच जनों को लक्ष्मी की प्राप्ति--यह सब धाता (विधाता) की ही नीचता [का परिणाम] है ।२६।

समुच्चय का एक अन्य प्रकार—

जिसमें भिन्न स्थानों में स्थित गुण और क्रिया एक देश में एक ही समय आवें उसे समुच्चय अलंकार कहते हैं ।२७।

गुण-समुच्चय का उदाहरण—

हे राजन् ! इधर तुम्हारी सेना रिपुकुल का विध्वंस करके विजय की प्रसन्नता से विमल आकार धारण कर रही हैं, उधर तुम्हारे शत्रुओं के मुख मलिन पड़ गये हैं ।२८।

'विमल' होना और 'मलिन' पड़ना—यहाँ इन दोनों गुणों का समुच्चय है ।

क्रियासमुच्चयस्तु यथा—

दैवादहमत्र तया चपलायतनेत्रया वियुक्तश्च ।
अविरलविलोलजलदः कालः समुपागतश्चायम् ॥२९॥

दैवादिति । अत्र वियोगक्रिया वियोगिनि स्थिता, समुपागमनक्रिया तु वर्षाकाले ॥

अथ जातिः—

संस्थानावस्थानक्रियादि यद्यस्य यादृशं भवति ।
लोके चिरप्रसिद्धं तत्कथनमनन्यथा जातिः ॥ ३० ॥

संस्थानेति । यस्य पदार्थस्य यत्संस्थानादि यादृशं भवति तस्य यदनन्यथा तेनैव प्रकारेण कथनं सा जातिरिति योगः । यच्छब्दस्तु सर्वनामत्वात्सामान्येन सर्वसंग्रहार्थः । विशेषरूपतया हि तत्संस्थानादि कथयितुमानन्त्यान्न शक्यते । अनुक्तं तर्हि कथं कविना ज्ञातव्यमित्याह—लोके चिरप्रसिद्धमिति । यद्यपि पुराणादिषु किंचिदुक्तं तथापि लोकरूढिवशात्सम्यक्तदवगम इति । तत्र संस्थानं स्वाभाविकं रूपम् । यथा—

एतत्पूतनचक्रमक्रमकृतग्रासार्धमुक्तैर्वृका-
नुत्पुष्णत्परितो नृमांसविघसैराघर्घरं क्रन्दतः ।
खर्जूरद्रुमदघ्नजङ्घमसितत्वग्बद्धविष्वक्तत-
स्नायुग्रन्थि घनास्थिपञ्जरजरत्कङ्कालमालोक्यते ॥ इत्यादि ।

अवस्थास्थानं स्थानकादि । यथा—

स दक्षिणापाङ्गनिविष्टमुष्टिं नतांसमाकुञ्चितसव्यपादम् ।
ददर्श चक्रीकृतचारुचापं प्रहर्तुमभ्युद्यतमात्मयोनिम् ॥

इत्यादि । क्रियाव्यापारो यथा—

प्रहरकमपनीय स्वं निदिद्रासतोच्चैः प्रतिपदमुपहूतः केनचिज्जागृहीति ।
मुहुरविशदवर्णां निद्रया शून्यशून्यां दददपि गिरमन्तर्बुद्ध्यते नो मनुष्यः ॥

इत्यादि । आदिग्रहणाद्विभववेषादिकं च द्रष्टव्यम् । यथा—

क्रिया-समुच्चय का उदाहरण—

इधर भाग्यहीन मैं उस चञ्चल और विशाल नेत्रों वाली प्रिया से वियुक्त हुआ उधर निरन्तर उमड़ती हुई घटाओं से युक्त वर्षाकाल आ पहुँचा ।२९।

३. जाति

जिस पदार्थ का जो संस्थान, अवस्थान एवं क्रिया आदि जिसके सदृश होता है,

वल्लीवल्कपिनद्धधूसरशिराः स्कन्धे दधद् दण्डकं
ग्रीवालम्बितमृन्मणिः परिकुथत्कौपीनवासाः कृशः।
एकः कोऽपि पटच्चरं चरणयोर्बद्ध्वाध्वगः श्रान्तवा-
नायातः क्रमुकत्वचा विरचितां भिक्षापुटीमुद्वहन्॥

इत्यादि। अथ वास्तवस्य जातेश्च को विशेषः, यो वृक्षस्य धवस्य च। वास्तवं हि वस्तुस्वरूपकथनम्, तच्च सर्वेष्वपि तद्भेदेषु सहोक्त्यादिषु स्थितम्। जातिस्त्वनुभवं जनयति। यत्र परस्थं स्वरूपं वर्ण्यमानमेवानुभवमिवैतीति स्थितम्।

अथैतद्विशेषप्रतिपादनार्थमाह—

शिशुमुग्धयुवतिकातरतिर्यक्संभ्रान्तहीनपात्राणाम्।
सा कालावस्थोचितचेष्टासु विशेषतो रम्या॥३१॥

शिश्विति। सा जातिः शिशुप्रभृतीनां याः कालोचिता अवस्थोचिताश्च चेष्टाः क्रियास्तास्वतिशयतो रम्या भवति॥

तत्र शिशूनां यथा—

धूलीधूसरतनवो राज्यस्थितिरचनकल्पितैकनृपाः।
कृतमुखवाद्यविकाराः क्रीडन्ति सुनिर्भरं डिम्भाः॥३२॥

उसे उसी रूप में कहना 'जाति' नाम से लोक में चिरकाल से प्रसिद्ध है। तथा यह जाति शिशु, मुग्धा युवतियों, कातर [व्यक्तियों], तिर्यक् [योनि के प्राणियों] तथा सम्भ्रान्त (मद-विलसित) एवं हीन पात्रों की कालोचित तथा अवस्थोचित चेष्टाओं में विशेषतः रमणीय होती है।३०-३१।

नमिसाधु ने इस प्रसंग में संस्थान (स्वाभाविक रूप) अवस्थान (स्थान), क्रियाव्यापार आदि ('आदि' से उन्होंने 'विभववेषादि' अर्थ ग्रहण किया है।) के उदाहरण प्रस्तुत किये हैं। यहाँ केवल 'संस्थान' का उदाहरण अनूदित किया जा रहा है—

'एतत्पूतनचक्रमक्रमकृतग्रास......' अर्थात् अतिशय तृष्णा से लिये गये कौर से ज़मीन पर आधा गिरे हुए नरमांस के खाने से अवशिष्ट भागों से चारों ओर कुछ 'घर्घर' शब्द के साथ चिल्लाते हुए भेड़ियों को पुष्ट करता हुआ, खजूर के पेड़ जैसी लम्बी जाँघवाला, काले चमड़े से बाँधी गयी और चारों तरफ व्याप्त नसों के सन्धिभागों में निविड अस्थिपंजर वाले जीर्ण कंकालों से युक्त यह पिशाच आदियों का समूह देखा जा रहा है।

(क) बच्चों की चेष्टा, जैसे—

धूलिधूसरित शरीर वाले बच्चे अनेक प्रकार से मुँह बनाते हुए और [सीटी के समान] बाजा-सा बजाते हुए मग्न होकर खेल रहे हैं। [इसी खेल में उन्होंने] एक

धूलीति । एषा शिशूनामवस्थोचिता चेष्टा । कालोचिता तु स्वयं द्रष्टव्या ।।

मुग्धयुवतीनां यथा—

हरति सुचिरं गाढाश्लेषे यदङ्गकमाकुला
स्थगयति तथा यत्पाणिभ्यां मुखं परिचुम्बने ।
यदतिबहुशः पृष्टा किंचिद्ब्रवीत्यपरिस्फुटं
रमयतितरां तेनैवासौ मनोऽभिनवा वधूः ।।३३।।

हरतीति । एषा मुग्धयुवतीनामवस्थोचिता चेष्टा । मुग्धग्रहणं मुग्धयुवतीनामेव जातिसौन्दर्यं न प्रौढानां चेष्टास्विति ज्ञापनार्थमिति । कातराद्युदाहरणानि ग्रन्थान्तराद् द्रष्टव्यानि ।

नष्टं वर्षवरैर्मनुष्यगणनाभावादकृत्वा त्रपा-
मन्तः कञ्चुकि कञ्चुकस्य विशति त्रासादयं वामनः ।
त्रस्यद्भिः सहसा निजस्य सदृशं नाम्नः किरातैः कृतं
कुब्जा नीचतयैव यान्ति शनकैरात्मेक्षणाशङ्किनः ।।

राज्य की स्थिति की रचना करते हुए एक [बालक] को राजा बना दिया है ।३२।

(ख) मुग्ध युवतियों की चेष्टा, जैसे—

गाढ आलिङ्गन के समय यह व्याकुल होकर अपने अङ्ग (शरीर) को हटा लेने की चेष्टा करती है । चुम्बन के समय दोनों हाथों से मुख ढक लेती है, और बहुत बार पूछने पर कुछ अस्पष्ट वचन बोलती है—इन्हीं बातों से ही नव-विवाहिता पत्नी मन को और भी प्रमुदित करती है ।३३।

नमिसाधु ने इसी प्रसंग में कतिपय अन्य उदाहरण भी प्रस्तुत किये हैं । प्रथम पद्य में कातर व्यक्तियों की चेष्टा का वर्णन है—

"नष्टं वर्षवरैर्मनुष्यगणना······"

मनुष्यों में गणना न होने से हिजड़े लज्जा छोड़कर भाग गये । भयत्रस्त यह बौना कंचुकी के अंगरखे के भीतर घुस गया । भयातुर किरातों ने अपने नाम के अनुरूप ही आचरण किया । अपने देख लिये जाने के भय से कुबड़े झुके होने के कारण धीरे-धीरे जा रहे हैं ।

निम्नोक्त पद्य में एक घोड़े का वर्णन है—

"उत्खाय दर्पचलितेन······"

अपनी दर्दभरी चाले से रस्सी के साथ ही कील को भी उखाड़कर तथा [पकड़ने के लिए] यत्न करते हुए व्यक्तियों से न पकड़े जाने वाले घोड़े ने एक [दूसरे] भागते हुए घोड़े के पीछे भागते हुए शीघ्र ही सेना को व्याकुल कर दिया ।

एषा कातरचेष्टा । तिरश्चां यथा—

उत्खाय दर्पचलितेन सहैव रज्ज्वा कीलं प्रयत्नपरमानवदुर्ग्रहेण ।

आकुल्यकारि कटकस्तुरगेण तूर्णमश्वेति विद्रुतमनुद्रवतान्यश्श्वम् ॥

अतर्कितोपनतभयसुखदुःखकुतूहलादिहृतचित्तानां संभ्रान्तानां यथा—

प्रसाधिकालम्बितमग्रपादमाक्षिप्य काचिद्द्रवरागमेव ।

उत्सृष्टलीलागतिरागवाक्षादलक्तकाङ्कां पदवीं ततान ॥

इत्यादि । हीनपात्राणां यथा—

उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूच्छोफभूयांसि मांसा-

न्यंसस्फिक्पृष्ठपिण्डाद्यवयवसुलभान्युग्रपूतीनि जग्ध्वा ।

आर्तः पर्यस्तनेत्रः प्रकटितदशनः प्रेतरङ्कः करङ्कात्

अङ्कास्थादस्थिसंस्थं स्थपुटगतमपि क्रव्यमव्यग्रमत्ति ॥

एवमन्यदपि द्रष्टव्यमिति ॥

अथ यथासंख्यमाह—

निर्दिश्यन्ते यस्मिन्नर्था विविधा यथैव परिपाट्या ।

पुनरपि तत्प्रतिबद्धास्तयैव तत्स्याद्यथासंख्यम् ॥३४॥

निर्दिश्यन्त इति । यत्र विविधा नानारूपा अर्था यथैव परिपाट्या येनैव क्रमेण

इस पद्य में एक सम्भ्रान्त विलासिनी का वर्णन है—

"प्रसाधिकालम्बितम्......"

किसी रमणी ने प्रसाधन करने वाली सेविका द्वारा गृहीत एवं गीली महावर-वाले चरण को उससे खींचकर और अपनी विलासपूर्ण गति छोड़कर खिड़की तक सारे मार्ग को महावर के चिह्नों से अंकित कर दिया ।

इस पद्य में एक हीन पात्र (दरिद्र पिशाच) का वर्णन है—

"उत्कृत्योत्कृत्य......"

व्याकुल, इधर-उधर देखता हुआ, और दाँतों को दिखाता हुआ यह दरिद्र पिशाच पहले शव के चमड़े को काट-काटकर तदनन्तर बहुत शोथ से युक्त उत्कट दुर्गन्ध वाले, कन्धे, कटिस्थ मांसपिण्ड, पीठ आदि विशाल अवयवों में सुलभ मांसों को खाकर अपनी गोद में पड़े हुए शव के सिर की हड्डी में विद्यमान और ऊँचे-नीचे स्थानों में चिपके हुए माँस को भी धैर्यपूर्वक खा रहा है ।

४. यथासंख्य

जिस अलंकार में विविध अर्थ (वस्तुएँ) जिस क्रम से निर्दिष्ट किये गये हों, उसी क्रम से फिर [उन्हीं पूर्व निर्दिष्ट अर्थों के] अनुयायी पदार्थों का विशेषण-विशेष्य

पूर्वं निर्दिश्यन्ते पुनरपि तयैव परिपाट्या तत्प्रतिबद्धास्तेषु पूर्वनिर्दिष्टेषु विशेष्यस्य विशेषणभावेन प्रतिबद्धास्तदनुयायिनो निर्दिश्यन्ते तद्यथासंख्यं स्यात् । अर्था इति बहुवचनस्यातन्त्रत्वाद् द्वयोरपि यथासंख्यं भवति । ययैव परिपाट्येति परिपाटी कवेः क्रमविवक्षा गृह्यते ॥

अथैतस्यैव विशेषार्थमाह—

तद्द्विगुणं त्रिगुणं वा बहुषूद्दिष्टेषु जायते रम्यम् ।
यत्तेषु तथैव ततो द्वयोस्तु बहुशोऽपि बध्नीयात् ॥३५॥

तदिति । तद्यथासंख्यं बहुषूद्दिष्टेषु प्रधानार्थेषु यद्यस्माद् द्विगुणं वा रम्यं जायते, तस्माद्धेतोस्तेषूद्दिष्टेषु तथैव द्विस्त्रिर्वा बध्नीयात् नान्यथा । द्वयोः पुनरुद्दिष्टयोर्बहुशोऽपि बध्नीयात् । सुखावहत्वादिति ॥

तत्र त्रिगुणोदाहरणमाह—

कज्जलहिमकनकरुचः सुपर्णवृषहंसवाहनाः शं वः ।
जलनिधिगिरिपद्मस्था हरिहरचतुराननाः ददतु ॥३६॥

कज्जलेति । अत्र हरिहरब्रह्माणस्त्रयः उद्देशिनः । त्रिविशेषणयोगाच्च त्रैगुण्यम् ॥

द्वयोर्बहुगुणोदाहरणमाह—

दुग्धोदधिशैलस्थो सुपर्णवृषवाहनौ घनेन्दुरुची ।
मधुमकरध्वजमथनौ पातां वः शार्ङ्गशूलधरौ ॥३७॥

भाव से कथन यथासंख्य अलंकार कहाता है ।३४।

वह यथासंख्य बहुत-से प्रधान अर्थों में दो-दो अथवा तीन-तीन [क्रमबद्ध] विशेषणों से बहुत रमणीय हो जाता है, अतः उनमें उसे दो-दो अथवा तीन-तीन विशेषणों से अलंकृत करना चाहिए । जहाँ प्रधान अर्थ दो हों, वहाँ बहुत से विशेषणों से भी उसे विशेषित करना चाहिए ।३५।

तीनों गुणों का उदाहरण—

[क्रमशः] कज्जल, हिम और कनक के समान कान्ति वाले [क्रमशः] गरुड़, बैल और हंस की सवारी करने वाले, तथा [क्रमशः] समुद्र, [कैलाश] पर्वत और पद्म में निवास करने वाले [क्रमशः] विष्णु, महादेव और ब्रह्मा आपके लिए कल्याणकारी हों ।३६।

दो गुणों का उदाहरण—

क्षीरसागर में निवास करने वाले गरुड़वाहन, मेघ के समान कान्ति वाले, मधुदर्शन, शार्ङ्ग-धनुषधारी भगवान विष्णु तथा कैलाशधामवासी, वृषभवाहन, चन्द्रो-

दुग्धेति। अत्र मधुमथनमकरध्वजमथनौ द्वावुद्देशिनौ, चत्वारि तद्विशेषणानीति।।

अथ भावः—

यस्य विकारः प्रभवन्नप्रतिबद्धेन हेतुना येन।
गमयति तदभिप्रायं तत्प्रतिबन्धं च भावोऽसौ ।।३८।।

यस्येति। यस्य विकारवतो येनाप्रतिबद्धेनानैकान्तिकेन हेतुना विकारः कार्यं प्रभवन्नुत्पाद्यमानस्तस्य विकारवतः संबन्धिनमभिप्रायं प्रतिपत्तुर्गमयति, तथा स एव विकारस्तयोर्विकारहेतुविकारयोः प्रतिबन्धं च कार्यकारणभावं गमयति, असावेवंरूपो भावनामाऽलंकारो भण्यते। भवत्यस्मादभिप्रायनिश्चय इति कृत्वा। ननु विरुद्धमिदम्। अप्रतिबद्धश्चेत्कथं हेतुरथ हेतुः कथमप्रतिबद्धो नाम। अपि च योऽप्रतिबद्धेन हेतुना जन्यते स कुतस्तत्प्रतिबन्धं गमयति, विद्यते चेत्प्रतिबन्धो न तर्ह्यप्रतिबद्धो हेतुरिति। सत्यमेतत्। किं तु महाकविलक्ष्यमेवंविधं दृश्यतेऽनुभूयते च। न च दृष्टे किंचिदनुपपन्नं नाम।।

निदर्शनमाह—

ग्रामतरुणं तरुण्या नववञ्जुलमञ्जरीसनाथकरम्।
पश्यन्त्या भवति मुहुर्नितरां मलिना मुखच्छाया ।।३९।।

ग्रामेति। कस्याश्चित्तरुण्या नववञ्जुलमञ्जरीसनाथकरं ग्रामतरुणं पश्यन्त्या मुखमालिन्यमभवदित्यर्थः। वञ्जुलो वृक्षविशेषः। अत्र विकारो मुखमालिन्यं तस्य हेतुर्वञ्जुलमञ्जरीदर्शनं तच्चाप्रतिबद्धम्। सर्वदा तद्दर्शने तदभावादिति। तच्च मालिन्यं

ज्ज्वल कान्ति वाले, कामसंहारक, त्रिशूलधारी शिव तुम्हारी रक्षा करें।३७।

[इस पद्य का अर्थ करते समय—पूर्वोक्त पद्य के असमान—विशेषण क्रमानुसार विष्णु और शिव के साथ संयुक्त कर दिये गये हैं। सुविज्ञ पाठक यहाँ भी यथासंख्य अलंकार समझ गये होंगे।]

५. भाव

जिस [विकारयुक्त] का विकार (कार्य, चेष्टादि) उत्पन्न होकर जिस अनैकान्तिक हेतु से उस [विकारयुक्त] के अभिप्राय और प्रतिबन्ध का कारण जिज्ञासु पर प्रकट कर देता है, उसे भाव कहते हैं।३८।

उदाहरण—

अशोक वृक्ष की मंजरी को हाथ में लिए हुए ग्रामयुवक को देखकर युवती के मुख की कान्ति मलिन हो रही है, अर्थात् उसका मुख उदास हो रहा है।३९।

संकेतस्थान पर युवती किसी कारणवश स्वयं न पहुँच सकी, किन्तु जब उसने ग्रामयुवक (नायक) को अशोक वृक्ष की मंजरी को हाथ में लिये देखा तो समझ गयी कि वह वहाँ से हो आया है तो उसकी मुख-कान्ति फीकी पड़ गयी। रुद्रट ने

तरुण्या भावं प्रतिपत्तुः प्रकाशयति । नूनमनया तस्य तरुणस्य वञ्जुलगहने संकेतोऽकारि, कर्मान्तरव्यासङ्गाच्च न तत्र संप्राप्ता, तं च मञ्जर्या गतप्रत्यागतं विज्ञाय सुखाद्वञ्चितास्मीति खिन्ना संपन्ना । मुखमालिन्यं चास्य मञ्जरीसनाथकरतवस्य प्रतिबन्धं गमयति । अन्यथा कथं तद्दर्शनेन तदुत्पद्यते ॥

प्रकारान्तरमाह—

अभिधेयमभिदधानं तदेव तदसदृशसकलगुणदोषम् ।
अर्थान्तरमवगमयति यद्वाक्यं सोऽपरो भावः ॥४०॥

अभिधेयमिति । यद्वाक्यं कर्तृ, तदेव पदारूढमेवाभिधेयं वाच्यमभिधानं प्रतिपादयत्तसदर्थान्तरं वक्रभिप्रायरूपं गमयति सोऽपरोऽन्यो भावभेदः । कीदृशमर्थान्तरम् । तेन पदारूढेनार्थेनासदृशा विलक्षणा गुणदोषा विधिप्रतिषेधादयो यस्य तत्तथोक्तम् । एतेन चान्योक्तिसमासोक्तयोर्भावत्वं निषिद्धम् । तत्र हीतिवृत्तसादृश्यं वर्तते । औपम्यभेदात्तयोरिति ॥

निदर्शनमाह—

एकाकिनी यदबला तरुणी तथाह-
मस्मिन्गृहे गृहपतिश्च गतो विदेशम् ।
किं याचसे तदिह वासमियं वराकी
श्वश्रूर्ममान्धबधिरा ननु मूढ पान्थ ॥४१॥

यहाँ भाव अलंकार माना है, क्योंकि मलिन-मुख छाया से उसके प्रतिज्ञा-अनिर्वाह की तथा विप्रलम्भ की प्रतीति होती है ।

मम्मट ने ऐसे पद्यों को गुणीभूतव्यंग्य के उदाहरण-स्वरूप प्रस्तुत किया है ।

यहाँ व्यंग्यार्थ यह है कि युवती संकेतस्थल पर नहीं पहुँच सकी, किन्तु इसकी अपेक्षा वाच्यार्थ का चमत्कार कहीं अधिक है—उसकी मलिन मुखकान्ति द्वारा उसका विप्रलम्भ सूचित होता है ।

भाव का अन्य प्रकार—

जो वाक्य वाच्यार्थ को बताकर उस [वाच्यार्थ] से भिन्न गुण-दोष (विधि-निषेध आदि) से युक्त वक्ता के अभिप्राय का बोध कराता है, उसे [द्वितीय] भाव कहते हैं ।४०।

उदाहरण—

अरे मूर्ख पथिक ! क्या तुम यहाँ निवास करने के लिए प्रार्थना करते हो ?

एकाकिनीति । तरुणपथिकस्य वासं याचमानस्य काचित्साभिलाषा योषिदिदं प्रकटप्रतिषेधार्थं वाक्यमाह । एतेन चोक्तपदार्थेन विलक्षणो वासानुमतिविधिलक्षणो भावोऽवगम्यते ।।

अथ पर्यायः—

वस्तु विवक्षितवस्तुप्रतिपादनशक्तमसदृशं तस्य ।
यदजनकमजन्यं वा तत्कथनं यत्स पर्यायः ।।४२।।

वस्त्विति । यद्वस्तु विवक्षितस्य मनोगतस्य वस्तुतः प्रतिपादनसमर्थं तस्य कथनं यत्स पर्यायोऽलंकारः । समासोक्त्यन्योक्त्योः पर्यायत्वनिवृत्त्यर्थमाह—असदृशं तस्य । तस्य वाच्यस्य वस्तुनोऽसदृशमतुल्यम् । भावसूक्ष्मयोः पर्यायोक्तनिवृत्त्यर्थमाह—अजनकमजन्यं वेति । अयमर्थः—प्रथमभावे विकारलक्षणेन कार्येण विकारवतोऽभिप्रायो यथा गम्यते तथा स्वजनकेन सह प्रतिबन्धश्चेति गमकस्य जन्यतास्ति । द्वितीयभावसूक्ष्मयोस्तु वस्त्वन्तरप्रतीतिजननाज्जनकतेति तेषां व्यवच्छेदकमिदं विशेषणद्वयम् । इह तु विवक्षितवस्तुप्रतिपादकं वस्तु न तथाभूतम् । वाच्यवाचकभावशून्यमित्यर्थः । द्वितीयभावे हि वक्तुरभिप्रायरूपमर्थान्तरं वाक्येन गम्यते । सूक्ष्मे तु युक्तिमदर्थोऽपि शब्दोऽर्थान्तरमुपपत्तिमद् गमयति। इह तु स एवार्थः पर्यायेणोच्यते । न त्वभिप्रायरूपार्थान्तरप्रतीतिरिति ।।

उदाहरणमाह—

राजञ्जहासि निद्रां रिपुबन्दीनिबिडनिगडशब्देन ।
तेनैव यदन्तरितः स कलकलो बन्दिवृन्दस्य ।।४३।।

[पर तुम यहाँ कैसे रहोगे क्योंकि] मैं अबला तरुणी इस घर में अकेली रहती हूँ । मेरे पतिदेव विदेश गये हुए हैं और यह बेचारी मेरी सास बहरी तथा अन्धी है ।४१।

यद्यपि वाच्यार्थ रूप में ग्रामयुवती ने पथिक को उसके घर में निवास करने के लिए प्रकटतः निषेध किया है, किन्तु वस्तुतः वह उसे विधिरूप में आमन्त्रित कर रही है । अतः यहाँ द्वितीय भाव अलंकार है ।

इस प्रकार के पद्यों में मम्मट ने ध्वनि का चमत्कार स्वीकार किया है ।

६. पर्याय

जहाँ जो अर्थ विवक्षित अर्थ के प्रतिपादन में समर्थ हो यदि उससे ऐसे अर्थ का कथन हो जाए जो न तो उसके समान हो और न उसका उत्पादक अथवा उससे उत्पन्न हो, वहाँ पर्याय अलंकार माना जाता है ।४२।

उदाहरण—

हे राजन् ! कैदी शत्रुओं के [हाथ-पैरों में पड़ी] शृङ्खलाओं के शब्द से आप

राजन्निति । राज्ञश्चाटुवचनमिदम् । अत्र बन्दीनिगडरवेण निद्रामोक्षकथनं यद्वस्तु तस्य तावन्मात्रमेव न तात्पर्यमपि तु त्वया रिपूञ्जित्वा तन्नार्यो हृता इति निखिलरिपुविजयः पर्यायेण प्रतिपाद्यते ॥

प्रकारान्तरमाह—

यत्रैकमनेकस्मिन्ननेकमेकत्र वा क्रमेण स्यात् ।
वस्तु सुखादिप्रकृति क्रियेत वान्यः स पर्यायः ॥४४॥

यत्रेति । अनेकस्मिन्नाधारे क्रमेणैकं वस्तु यत्र स्वयमेव स्यात्स पर्यायः । अथवैकस्मिन्नाधारेऽनेकं यत्र स्यात्सोऽपि पर्यायः । कीदृशमेकमनेकं वा वस्त्वित्याह— सुखादिप्रकृति । सुखदुःखादिस्वरूपमित्यर्थः । स्यादिति कर्तृनिर्देशात्कर्मण्यप्राप्तं पर्यायत्वमाह— क्रियेत वेति । तदेवं चतुर्विधः पर्यायः ॥

उदाहरणमाह—

कमलेषु विकासोऽभूदुदयति भानावुपेत्य कुमुदेभ्यः ।
नभसोऽपससार तमो बभूव तस्मिन्नथालोकः ॥४५॥

कमलेष्विति । अत्रैको विकासोऽनेकस्मिन्वस्तुनि कुमुदकमलाख्ये क्रमेण भवति । तथैकस्मिन्नभसि तमः प्रकाशश्च । अनेकवस्तु सुखरूपम् । एते कर्तर्युदाहरणे ॥

निद्रात्याग करते हैं और इसी शब्द से चारण लोगों द्वारा किया हुआ कलकल (प्रभात-वेला का स्तुतिगान) भी दब गया है ।४३।

स्तुतिपाठक चारण के इस कथन से ज्ञात होता है कि इस विजयी राजा ने बहुत अधिक युद्ध-बन्दी बना रखे हैं। यहाँ रुद्रट ने 'पर्याय' अलंकार का चमत्कार माना है, क्योंकि स्तुतिपाठक का यह कथन न तो इस आशय का जनक है और न उक्त कथन में और इस आशय में परस्पर कोई सदृशता है ।

पर्याय का प्रकारान्तर—

जहाँ अनेक आधारों में एक, अथवा एक आधार में अनेक सुखदुःखादिरूप वस्तु क्रम से हों, उसे [द्वितीय] पर्याय अलंकार कहते हैं ।४४।

उदाहरण—

सूर्य के उदय होने पर कुमुदों का विकास कमलों पर आ गया । आकाश से अन्धकार क्षीण हो गया और वहाँ प्रकाश छा गया ।४५।

यहाँ 'एक' विकास को कुमुद और कमल से सम्बद्ध किया गया है, तथा 'एक' आकाश को अन्धकार तथा प्रकाश से । अतः द्वितीय पर्याय अलंकार है ।

कर्मण्याह—

आच्छिद्य रिपोर्लक्ष्मीः कृता त्वया देव भृत्यभवनेषु ।
दत्तं भयं द्विषद्भ्यः पुनरभयं याचमानेभ्यः ॥४६॥

आच्छिद्येति । अत्रैका लक्ष्मीरनेकत्र रिपुषु भृत्येषु च कृता । तथैकस्मिन्द्विषल्लक्षणे वस्तुनि भयाभये च दुःखसुखरूपे क्रमेण दत्ते । पूर्वत्र पर्यायशब्दस्य शब्दान्तरेण कथनमर्थः । इह तु परिपाटी ॥

अथ विषममाह—

विषम इति प्रथितोऽसौ वक्ता विघटयति कमपि संबन्धम् ।
यत्रार्थयोरसन्तं परमतमाशङ्क्य तत्सत्त्वे ॥४७॥

विषम इति । असावलंकारो विषम इति प्रथितो विषमनामा प्रसिद्धो यत्रार्थयोः संबन्धं घटनां वक्ता प्रतिपादको विघटयति । कीदृशं संबन्धम् । असन्तमविद्यमानम् । ननु यद्यसन्संबन्धस्तर्हि स्वयं विघटित एव किमस्य विघटनीयमित्याह—तस्य सत्त्वे सद्भावे परमतं पराभिप्रायमाशङ्क्य । परमतेन सन्तं कृत्वेत्यर्थः ॥

उदाहरणमाह—

यो यस्य नैव विषयो न स तं कुर्यादहो बलात्कारः ।
सततं खलेषु भवतां क्व खलाः क्व च सज्जनस्तुतयः ॥४८॥

उदाहरण—

हे राजन् ! आपने शत्रु से लक्ष्मी छीनकर उसे अनुजीवियों के घरों में प्रतिष्ठित कर दिया । शत्रुओं को भय प्रदान किया, और [उनमें से] क्षमा माँगने वालों को अभयदान दे दिया ।४६।

७. *विषम*

विषम अलंकार वहाँ होता है जहाँ वक्ता दो अर्थों (वस्तुओं) में अविद्यमान [भी] सम्बन्ध की कल्पना किसी दूसरे के मत से करके [पुनः उसे] तोड़ देता है ।४७।

उदाहरण—

एक व्यक्ति ने दूसरे व्यक्ति से कहा कि अमुक दुर्जन ने उस सज्जन की स्तुति की है । दूसरे व्यक्ति ने पहले व्यक्ति को उत्तर दिया कि—

जो जिसके अधिकार की वस्तु नहीं, उसे वह नहीं करनी चाहिए । आपका तो दुष्टों के प्रति बड़ा बलात्कार (पक्षपात) है । भला कहाँ दुष्ट व्यक्ति और कहाँ सज्जनों की स्तुति ? ४८।

य इति। केनचित्कस्यचिदग्रे उक्तममुना खलेनासौ सज्जनः स्तुति इति। स त्वसहमानस्तमाह—अहो भवतां खलेषु दुर्जनविषये बलात्कारः पक्षपातः। यतस्तदनुकूलं ब्रूथ। कस्मात्ते तत्स्तुतिं न कुर्वन्तीत्याह—यस्य खलस्य यो न विषयः सज्जनस्तवादिः स तं नैव कुर्यात्। किमिति खलानां शिष्टस्तवादिर्न विषय इत्याह—क्व खलाः क्व च सज्जनस्तुतय इति। अत्र खलस्तुत्योरसन्नेव संबन्धः परमते सत्त्वाशङ्कया विघटितः। इदं चात्रोदाहरणम्—निसर्गदुर्बोधमबोधविक्लवाः क्व भूपतीनां चरितं क्व जन्तवः। इत्यादि॥

प्रकारान्तरमाह—

अभिधीयते सतो वा संबन्धस्यार्थयोरनौचित्यम्।
यत्र स विषमोऽन्योऽयं यत्रासंभाव्यभावो वा॥४९॥

अभिधीयत इति। यत्रार्थयोर्विद्यमानस्य सम्बन्धस्य केवलमनौचित्यमुच्यते सोऽन्योऽयं विषमाख्योऽलंकारः। अथवा यत्रासंभाव्यस्य भावः सत्ताभिधीयते सोऽपि विषमः। अनुचितार्थोऽत्र विषमशब्दः॥

उदाहरणमाह—

रूपं क्व मधुरमेतत्क्व चेदमस्याः सुदारुणं व्यसनम्।
इति चिन्तयन्ति पथिकास्तव वैरिवधूं वने दृष्ट्वा॥५०॥

इसका आशय यह है कि दुर्जन सज्जनों की स्तुति कर ही नहीं सकते, उनके लिए यह अनधिकार-चेष्टा है। यहाँ दो व्यक्तियों के अविद्यमान सम्बन्ध की कल्पना की गयी है।

इसी प्रकार नमिसाधु-प्रस्तुत 'निसर्गदुर्बोध······' में भी विषम अलंकार है—

कहाँ तो राजाओं का स्वभाव से ही दुर्बोध चरित और कहाँ अज्ञान-पीड़ित [हम-जैसे] जीव!

विषम का प्रकारान्तर—

जहाँ दो अर्थों में विद्यमान सम्बन्ध का अनौचित्य प्रकट किया जाता है, अथवा असम्भव वस्तु की सत्ता बतलायी जाती है, वहाँ द्वितीय विषम अलंकार होता है।४९।

उदाहरण—

आपके शत्रु की वधू को वन में निराश्रय देखकर पथिक उसकी दशा पर करुणार्द्र होकर इस प्रकार कहते हैं—कहाँ तो इसकी अद्भुत रूपच्छटा और कहाँ इस पर यह दारुण विपत्ति।५०।

विषम के भेद—

विषम अलंकार के चार भेद हैं—जहाँ कर्ता किसी कार्यवश (१) थोड़ा-सा

रूपमिति । अत्र रूपव्यसनयोरर्थयोरेकत्र रिपुस्त्रियां विद्यमानयोरनौचित्यम् । यत्र हि रूपं न तत्र व्यसनम् । यदाह—'अलभ्यशोकाभिभवेयमाकृतिः' इति । अथवा-संभाव्यस्य रूपस्यातिव्यसनस्य च भावोऽत्र कथ्यत इति साधारणमेकमुदाहरणम् ॥

भूयोऽपि भेदान्तराण्याह—

तदिति चतुर्धा विषमं यत्राण्वपि नैव गुर्वपि च कार्यात् ।
कार्यं कुर्यात्कर्ता हीनोऽपि ततोऽधिकोऽपि न वा ॥५१॥

तदिति । तद्विषममिति वक्ष्यमाणेन प्रकारेण चतुर्धा चतुष्प्रकारम् । कथमित्याह—यत्र कुतश्चित्कार्याद्धेतोरण्वपि स्वल्पमपि कार्यं कर्ता नैव कुर्यादित्येकः प्रकारः । गुर्वपि कुर्यादिति द्वितीयः । अत्र च हीनाधिकत्वं कर्ता नापेक्षते । तथा हीनोऽशक्तोऽपि कर्ता तत्कार्यं कुर्यादिति तृतीयः । तथाधिकोऽपि न वा नैव कुर्यादिति चतुर्थः । अत्र कार्ययोरणुत्वगुरुत्वापेक्षा न कर्तव्या । कार्यादिति च सर्वेषु योज्यम् । अन्यत्र वैषम्यनिरासार्थम् । अपिशब्दा विस्मयार्थाः । चशब्दः समुच्चये पूर्वापेक्षः । अत्रानौचित्यमशक्यकर्तृत्वं च विषमशब्दार्थः । विषममिति नपुंसकनिर्देशो विषमालंकारयुक्तकाव्यापेक्षयेति ॥

एतदुदाहरणानि चत्वार्यार्याद्वयेनाह—

त्वद्भृत्यावयवानपि सोढुं समरे क्षमा न ते क्षुद्राः ।
असिधारापथपतितं त्वं तु निहन्या महेन्द्रमपि ॥५२॥

भी कार्य नहीं करता, (२) बहुत-सा कार्य करता है, (३) हीन होता हुआ भी कार्य कर देता है, तथा (४) समर्थ होता हुआ भी कार्य नहीं करता ।५१।

इन चारों भेदों को नमिसाधु ने निम्न प्रकार से दिखाया है—

प्रथम प्रकार—किसी कारण से कर्ता छोटा (सुकर) भी काम न करे;

द्वितीय प्रकार—किसी कारण से कर्ता बड़ा काम भी करे;

तृतीय प्रकार—किसी कारण से अशक्त होने पर भी कर्ता काम करे;

चतुर्थ प्रकार—किसी कारण से सशक्त होने पर भी कर्ता काम न करे ।

उदाहरण—

[हे राजन् ! तुम्हारे] वे नीच शत्रु युद्ध में तुम्हारे साधारण सैनिकों को भी नहीं सह सकते ।

आप तो खड्ग चलाते समय सामने आये हुए देवराज इन्द्र को भी मार सकते हैं ।

आप बस दूर ठहरे रहिए, आपके साधारण सैनिक ही शत्रुओं को मार देंगे ।

त्वं तावदास्स्व दूरे भृत्यावयवोऽपि ते निहन्त्यहितान् ।
का गणना तैः समरे सोढुं शक्रोऽपि न सहस्त्वाम् ।।५३।।

त्वदिति । त्वमिति । अत्राणुत्वख्यापनार्थोऽवयवशब्दः । ततोऽण्वपि भृत्यावयवसहनलक्षणं कार्यं रिपवः कर्तुमशक्ताः । नृपभयाशङ्कनात्कार्याद्धेतोः । तथा गुर्वपि शक्रहननं कार्यात्सत्त्वान्नृपेण क्रियते । तथा हीनोऽपि भृत्यावयवो रिपुवधं कार्यं तेजस्विनृपसंपर्कात्कीर्त्याशिया वा करोति । तथाधिकोऽपि शक्रः कर्ता राजसहनलक्षणं तद्भयात् कार्यान्न करोति ।।

भूयोऽप्याह—

यत्र क्रियाविपत्तेर्न भवेदेव क्रियाफलं तावत् ।
कर्तुरनर्थश्च भवेत्तदपरमभिधीयते विषमम् ।।५४।।

यत्रेति । यत्र क्रियाविपत्तेः कर्मनाशाद्धेतोर्न केवलं तावत्कर्तुः क्रियाफलं न भवेद्यावतानर्थश्च भवेत्तदपरमन्यद्विषमभिधीयते । दारुणार्थश्चात्र विषमशब्दः । यथा—'विषममिदं वनम्' इति ।।

निदर्शनमाह—

उत्कण्ठा परितापो रणरणकं जागरस्तनोस्तनुता ।
फलमिदमहो मयाप्तं सुखाय मृगलोचनां दृष्ट्वा ।।५५।।

उत्कण्ठेति । अत्र सुखाय मृगलोचनां स्त्रियं दृष्ट्वा न केवलं सुखं न प्राप्तं यावदनर्थ उत्कण्ठादिकः प्राप्तः । क्रियाविपत्तिरत्र दर्शनच्छेदः ।

समर-भूमि में तुम्हारे शत्रुओं की तुम्हारे सामने ठहरने की क्या शक्ति है ? [यहाँ तक कि] इन्द्र भी आपके सामने नहीं ठहर सकता ।५२-५३।

उपर्युक्त चार वाक्य क्रमशः चारों भेदों के उदाहरण हैं ।

विषम का प्रकारान्तर—

जहाँ कार्य के नाश हो जाने के कारण कर्ता को न केवल क्रिया का फल ही न मिले अपितु अनर्थ भी हो जाए, उसे विषम कहते हैं ।५४।

उदाहरण—

उस मृगनयनी को देखा तो था सुख के लिए, किन्तु मुझे जो फल मिला वह है—उत्कण्ठा, सन्ताप, भय, अनिद्रा और शरीर की दुर्बलता ।५५।

अथानुमानमाह—

वस्तु परोक्षं यस्मिन्साध्यमुपन्यस्य साधकं तस्य ।
पुनरन्यदुपन्यस्येद्विपरीतं चैतदनुमानम् ।। ५६ ।।

वस्त्विति । साध्यं परोक्षं वस्तु यत्र प्रथममुपन्यस्य पुनस्तस्य साधकं हेतुं कविरुपन्यस्येत्तदनुमानमलंकारः । तथापि विपरीतं चेति पूर्वं साधकोपन्यासः पश्चात्साध्यनिर्देशो यत्र तच्चानुमानम् । वास्तवलक्षणेनैवापुष्टार्थस्य परिहृतत्वादग्निरत्र धूमादित्यलंकारत्वं न भवति । साधकमिति जातावेकवचनम् । तेन द्वयोर्बहुषु च साधकेषु भवति । यथा—

स्पष्टाक्षरमिदं यत्नान्मधुरं स्त्रीस्वभावतः ।
अल्पाङ्गत्वादनिर्ह्रादि मन्ये वदति सारिका ।।

साधकग्रहणादेव वस्तुनः साध्यत्वे लब्धे साध्यग्रहणमवस्तुत्वेन सिद्धस्याभावस्यापि वस्तुत्वप्रतिपत्त्यर्थम् । यत्साध्यं तद्भावरूपमभावरूपं वा भवत्विति क्त्वाप्रत्ययेनैव पुनःशब्दार्थे लब्धे साध्यसाधकयोश्च विलक्षणत्वादन्यत्वे सिद्धे पुनरन्यपदग्रहणं बहूनां साधकानामुपन्यासे सत्यनुमानोज्ज्वलत्वख्यापनार्थम् । साधकमुपन्यस्येत्पुनश्चान्यदुपन्यस्येदिति शब्दशक्त्यैव वा भूयस्ताप्रतीतिः ।।

उदाहरणमाह—

सावज्ञमागमिष्यन्नूनं पतितोऽसि पादयोस्तस्याः ।
कथमन्यथा ललाटे यावकरसतिलकपङ्क्तिरियम् ।। ५७ ।।

---

८. अनुमान

जहाँ कवि पहले परोक्ष साध्य वस्तु (कार्य) को बताकर फिर उसका साधक (कारण) बतलाए, अथवा इसके विपरीत करे (अर्थात्, पहले कारण का प्रतिपादन करके पश्चात् परोक्ष साध्यवस्तु का निर्देश करे), वहाँ अनुमान अलंकार होता है ।५६।

उदाहरणार्थ नमिसाधु-प्रस्तुत उक्त पद्य में साधकों (कारणों) के निर्देश द्वारा साध्य (कार्य) का अनुमान होना बताया गया है—

मेरा विचार है कि यह मैना बोल रही है, क्योंकि शिक्षा आदि अभ्यास के कारण अक्षर स्पष्ट हैं, स्त्री होने से आवाज़ मधुर है और शरीर छोटा होने से वह [आवाज़] सूक्ष्म अथवा कोमल है ।

उदाहरण—

तुम कुछ खिन्न-से दिखायी पड़ते हो, अवश्य ही कान्ता के चरणों पर सिर रखकर आये हो, अन्यथा तुम्हारे माथे पर यह मेंहदी का तिलक कैसे लगा ? ।५७।

यहाँ कार्य पहले बताया गया है और उसका कारण बाद में ।

सावज्ञमिति। अत्र पादपतनं साध्यमुपन्यस्य ललाटगतयावकरसतिलकपङ्क्तिः साधकमुपन्यस्तम् ॥

तथा—

वचनमुपचारगर्भं दूरादुद्गमनमासनं सकलम् ।
इदमद्य मयि तथा ते यथासि नूनं प्रिये कुपिता ॥ ५८ ॥

वचनमिति। अत्र वचनादीनि पूर्वं साधकान्युपन्यस्तानि पश्चात्कुपितत्वं साध्यमिति वैपरीत्यम् ॥

अथ भेदान्तराण्याह—

यत्र बलीयः कारणमालोक्याभूतमेव भूतमिति ।
भावीति वा तथान्यत्कथ्येत तदन्यदनुमानम् ॥ ५९ ॥

यत्रेति। यत्रालंकारे बलवत्तरकारणदर्शनेनान्यदिति कार्यमभूतमेवानुत्पन्नमेव भूतत्वेन भावित्वेन वा कथ्येत तत्तथेति पूर्ववद्यथापूर्वं साध्यमुपन्यस्य साधकोपन्यासः साधकं चोपन्यस्य साध्योपन्यास इत्येवं चतुर्धा तदन्यत्पूर्वोक्तादपरमनुमानम् ॥

उदाहरणान्याह—

अविरलविलोलजलदः कुटजार्जुननीपसुरभिवनवातः ।
अयमायातः कालो हन्त मृताः पथिकगेहिन्यः ॥६०॥

अविरलेति। अत्रादौ बलवतः कालस्य साधकस्योपन्यासः पश्चात्साध्यस्य मरणस्य भाविनोऽपि मृता इति भूतत्वेन निर्देशः ॥

हे प्रिये ! आज तुम्हारा कुशल प्रश्न पूछना, दूर से अगवानी के लिए आना, आसन देना, आदि, यह सब इस प्रकार लगता है, जैसे तुम कुपित हो रही हो ।५८।

यहाँ पहले कारण बताये गये हैं, फिर उनका कार्य निर्दिष्ट किया गया है ।

अनुमान का अन्य प्रकार—

जहाँ कारण के प्रबल होने से अभूत (अनुत्पन्न), भूत (उत्पन्न) अथवा भावि (उत्पन्न होने वाले) रूप से कार्य का वर्णन हो, वहाँ अनुमान अलंकार होता है ।५९।

इसमें भी [उपर्युक्त ७।५८ रूप में] पहले साध्य, फिर साधक; अथवा पहले साधक, फिर साध्य निर्दिष्ट करने का क्रम रहता है ।

उदाहरण—

यह घनघोर एवं उमड़ती हुई घटाओं को लिये हुए तथा कुटज, अर्जुन और कदम्ब की सुगन्धि से युक्त पवन वाला वर्षाकाल आ पहुँचा है । हा ! प्रोषित-भर्तृकाओं (वियोगिनी स्त्रियों) की क्या दशा होगी ।६०।

तथा—

दिष्ट्या न मृतोऽस्मि सखे नूनमिदानीं प्रिया प्रसन्ना मे ।
ननु भगवानयमुदितस्त्रिभुवनमानन्दयन्निन्दुः ॥६१॥

दिष्ट्येति । अत्र प्रियाप्रसादस्य साध्यस्य भाविनो भूतत्वेनादावुपन्यासः पश्चाच्चन्द्रोदयस्य बलवतः साधनस्येति भूतोदाहरणम् ॥

भाविन्याह—

यास्यन्ति यथा तूर्णं विकसितकमलोज्ज्वलादमी सरसः ।
हंसा यथैवमेतां मलिनयति घनावली ककुभम् ॥६२॥

यास्यन्तीति । अत्र हंसगमनस्य साध्यस्यादौ भावित्वेन निर्देशः पश्चात्साधनस्य बलवतो घनावलीलक्षणस्येति ॥

तथा—

वहति यथा मलयमरुद्यथा च हरितीभवन्ति विपिनानि ।
प्रियसखि तथेह न चिरादेष्यति तव वल्लभो नूनम् ॥६३॥

वहतीति । अथ पूर्वं बलवतो मलयवातादिकस्य साधकस्य निर्देशः । पश्चाद्वल्लभागमनस्य साध्यस्य भावित्वेनेति ॥

यहाँ बलवान् काल-रूप कारण का निर्देश पहले किया है और मरणरूप अभूत कार्य का निर्देश बाद में ।

हे मित्र ! सौभाग्य से मैं अभी जीवित हूँ । मेरी प्रिया भी अब अवश्य प्रसन्न है, और भगवान् चन्द्रदेव तीनों लोकों को आनन्दित करते हुए उदय हो गये हैं ।६१।

चन्द्रोदय-रूप प्रबल कारण के उपरान्त उक्त दो कार्य हुए हैं । अतः चन्द्रोदय भूत कारण है, जिसका निर्देश बाद में हुआ है और कार्यों का पहले हुआ है ।

ये हंस विकसित कमलों से उज्ज्वल इस तालाब से शीघ्र चले जाएँगे, क्योंकि मेघमाला इस दिशा को मलिन बना रही है ।६२।

यहाँ भावी कार्य पहले निर्दिष्ट हुआ है और उसका प्रबल कारण बाद में ।

हे प्रिय सखि ! दक्षिण दिशा की सुगन्धित पवन चलने लगी है और वन-उपवन हरे होने लगे हैं—इसलिये तुम्हारे प्रिय शीघ्र आने वाले हैं ।६३।

यहाँ प्रबल कारण का निर्देश पहले हुआ है और भावी कार्य का निर्देश बाद में ।

अथ दीपकम्—

यत्रैकमनेकेषां वाक्यार्थानां क्रियापदं भवति ।
तद्वत्कारकपदमपि तदेतदिति दीपकं द्वेधा ॥ ६४ ॥

यत्रेति । यत्रानेकेषां वाक्यार्थानामेकं क्रियापदं भवति तद्वत्कर्त्रादिकारकपदं वा तदित्यमुना प्रकारेण दीपकं द्वेधा । क्रियादीपकं कारकदीपकं चेत्यर्थः ॥

अथास्यान्वर्थभेदान्दर्शयितुमाह—

आदौ मध्येऽन्ते वा वाक्ये तत्संस्थितं च दीपयति ।
वाक्यार्थानिति भूयस्त्रिधैतदेवं भवेत्षोढा ॥६५॥

आदाविति । तदिति द्विविधं दीपकं पद्यादिलक्षणवाक्यस्यादौ मध्येऽन्ते वावस्थितं वाक्यार्थान्दीपयति प्रकाशयतीत्यन्वर्थवलादादिदीपकं मध्यदीपकमन्तदीपकं चेति त्रिविधम् । एवं चैतत्षोढा षड्विधं भवेदिति ॥

तदुदाहरणानि यथाक्रममाह—

कान्ता ददाति मदनं मदनः संतापमसममनुपशमम् ।
संतापो मरणमहो तथापि शरणं नृणां सैव ॥६६॥

---

८. *दीपक*

जहाँ अनेक वाक्यार्थों का एक ही क्रियापद अथवा कारकपद होता है, वहाँ दीपक अलंकार होता है। [इस प्रकार] इसके दो भेद होते हैं--क्रियादीपक और कारकदीपक ।६४।

यह द्विविध दीपक (क्रियादीपक और कारकदीपक) वाक्य के आदि, मध्य अथवा अन्त में आकर वाक्यार्थों को प्रकाशित करता है। इस प्रकार दीपक के छः भेद हैं ।६५।

क्रियादीपक के तीन भेद—आदिगत, मध्यगत और अन्तगत ।

कारकदीपक के तीन भेद—आदिगत, मध्यगत और अन्तगत ।

इस प्रकार कुल छः भेद हुए ।

आदि क्रियादीपक का उदाहरण—

कान्ता काम को देने वाली है, अर्थात् कामोद्दीपक है, कामदेव विषम और असाध्य सन्ताप देने वाला है। सन्ताप से मृत्यु होती है, फिर भी मनुष्य कान्ता की शरण में आते हैं ।६६।

कान्तेति । इदमादिक्रियादीपकम् ॥

तारुण्यमाशु मदनं मदनः कुरुते विलासविस्तारम् ।
स च रमणीषु प्रभवञ्जनहृदयावर्जनं बलवत् ॥६७॥

तारुण्यमिति । इदं मध्यक्रियादीपकम् ॥

नवयौवनमङ्गेषु प्रियसङ्गमनोरथो हि हृदयेषु ।
अथ चेष्टासु विकारः प्रभवति रम्यः कुमारीणाम् ॥६८॥

नवेति । इदमन्तक्रियादीपकम् ॥

निद्रापहरति जागरमुपशमयति मदनदहनसंतापम् ।
जनयति कान्तासंगमसुखं च कोऽन्यस्ततो बन्धुः ॥६९॥

निद्रेति । इदमादिकर्तृदीपकम् ॥

स्रंसयति गात्रमखिलं ग्लपयति चेतो निकाममनुरागः ।
जनमसुलभं प्रति सखे प्राणानपि मंक्षु मुष्णाति ॥७०॥

स्रंसयतीति । इदं मध्यकर्तृदीपकम् ॥

दूरादुत्कण्ठन्ते दयितानां संनिधौ तु लज्जन्ते ।
त्रस्यन्ति वेपमानाः शयने नवपरिणया वध्वः ॥७१॥

मध्य क्रियादीपक का उदाहरण—

युवावस्था तुरन्त ही काम को उत्पन्न करती है, काम अनेक प्रकार के विलासों को जन्म देता है। वह [हाव, भाव आदि विलास] रमणियों में उत्पन्न होकर लोगों के हृदयों को बलात् आकृष्ट कर लेते हैं।६७।

अन्त क्रियादीपक का उदाहरण—

कुमारियों के शरीर में नव-यौवन, हृदय में प्रिय से मिलने का मनोरथ और चेष्टाओं में ललित विकार जन्म लेता है।६८।

आदि कर्तृदीपक का उदाहरण—

निद्रा जागरण का हरण करती है, कामाग्नि के सन्ताप को दूर करती है और कान्ता के साथ समागम का सुख अनुभव कराती है। नींद से बढ़कर बन्धु और कौन होगा।६९।

मध्य कर्तृदीपक का उदाहरण—

अनुराग समस्त शरीर को शिथिल और चित्त को अत्यन्त खिन्न कर रहा है। हे मित्र ! प्रिया के दुर्लभ होने से यह अनुराग शीघ्र प्राणों को हरने वाला है।७०।

दूरादिति । इदमन्तकर्तृदीपकम् ।। एवं कर्मादिषु कारकेषूदाहरणानि द्रष्टव्यानि । अस्य च दीपकस्य प्रायोऽलंकारान्तरैः समावेश इष्यते । तथा ह्याद्ययोरुदाहरणयोः कारणमालायाः सद्भावः । तृतीयचतुर्थपञ्चमेषु वास्तवसमुच्चयस्य । षष्ठे जातेः ।।

अथ परिकरः—

साभिप्रायैः सम्यग्विशेषणैर्वस्तु यद्विशिष्येत ।

द्रव्यादिभेदभिन्नं चतुर्विधः परिकरः स इति ।।७२।।

सेति । यद्द्रव्यगुणक्रियाजातिलक्षणं चतुर्विधं वस्तु साभिप्रायैर्विशेषणैः सम्यग्विशिष्येत स इत्यमुना प्रकारेण चतुष्प्रकारः परिकरालंकारो भवति । साभिप्रायग्रहणं वस्तुस्वरूपमात्राभिधानकल्पितानां विशेषणानां निरासार्थम् । यथा—

न्यस्ताक्षरा धातुरसेन यत्र भूर्जत्वचः कुञ्जरबिन्दुशोणाः ।

इत्यत्र भूर्जत्वचां कुञ्जरबिन्दुशोणा इति विशेषणं वस्तुस्वरूपमात्राख्यापकमिति । सम्यग्ग्रहणं तु कविविवक्षिताभिप्रायाप्रत्यायकविशेषणानां निवृत्त्यर्थम् । तस्य भवन्ति द्रव्यमित्याद्यर्थचातुर्विध्याभिधानादेव तत्त्वावगमे सति द्रव्यादिभेदभिन्नं चतुर्विध इति यत्कृतं तत्कैश्चित्क्रियाया अवस्तुत्वमुक्तं त्रिविधश्च परिकरोऽभ्यधायि तन्मतनिरासार्थमिति ।।

अन्त कर्तृदीपक का उदाहरण—

नव विवाहित स्त्रियाँ पति के दूर होने पर उत्कण्ठित और समीप होने पर लज्जित होती हैं । पति के साथ शयन करने में काँपती और भयाकुल होती हैं ।७१।

इसी प्रकार कर्म आदि अन्य कारकों के भी उदाहरण सम्भव हैं । नमिसाधु के अनुसार कारक-दीपक का अन्य अलंकारों में अन्तर्भाव हो सकता है । जैसे—प्रथम दो उदाहरणों का कारणमाला में, तृतीय, चतुर्थ और पञ्चम का वास्तवगत समुच्चय में तथा छठे का जाति में ।

१०. परिकर

[विशेष] अभिप्राय से युक्त विशेषणों से जिसे विशेषित किया जाए, उसे परिकर कहते हैं । द्रव्य, गुण, क्रिया और जाति—ये इसके चार भेद हैं ।७२।

'विशेषण साभिप्राय होने चाहिए' इसका तात्पर्य यह है कि किसी वस्तु के स्वरूप-मात्र के निर्देश के लिए विशेषण प्रस्तुत नहीं कर देने चाहिए, जैसे कि नमिसाधु-प्रस्तुत निम्नोक्त कथन में—

जिस [हिमालय पर्वत] पर [गैरिक आदि] धातुओं के रस से भोजपत्रों पर अक्षर लिखे गये हैं, वे [भोजपत्र] हाथियों के [शरीर पर वयोवृद्धि के साथ-साथ स्वतःअंकित पद्मक नामक] बिन्दुओं के समान रक्तवर्ण हैं ।

तदुदाहरणानि यथाक्रममाह—

उचितपरिणामरम्यं स्वादु सुगन्धि स्वयं करे पतितम् ।
फलमुत्सृज्य तदानीं ताम्यसि मुग्धे मुधेदानीम् ।।७३।।

उचितेति । काचित्सखीमाह—हे मुग्धे स्वल्पप्रज्ञे, एवंविधं फलं तदानीमुत्सृज्येदानीं मुधैव वृथैव ताम्यसि खिद्यस इत्यर्थः । अत्र फलवस्तुनो विशेषणानि साभिप्रायाणि । अयं चाभिप्रायः—योग्यपरिपाकसुन्दरता सुस्वादुरसता सौगन्ध्यं स्वयं हस्तपतनं चैकैकमपरित्यागकारणम् । त्वया त्वेतत्सकलगुणयुतं फलं त्यजन्त्या स्वयं जानन्त्यैव महाननुतापोऽङ्गीकृत एव । तत्किमिदानीं खेदेनेति । अथवात्रेदमुदाहरणम्—

कर्ता द्यूतच्छलानां जतुमयभवनादीपनो योऽभिमानी
कृष्णाकेशोत्तरीयव्यपनयनपटुः पाण्डवा यस्य दासाः ।
राजा दुःशासनादेर्गुरुरनुजशतस्याङ्गराजस्य मित्रं
क्वास्ते दुर्योधनोऽसौ कथय न तु रुषा द्रष्टुमभ्यागतौ स्वः ।।

इदं द्रव्योदाहरणम् ।।

कार्येषु विघ्नतेच्छं विहितमहीयोपराधसंवरणम् ।
अस्माकमधन्यानामार्जवमपि दुर्लभं जातम् ।।७४।।

कार्येष्विति । मानिनी नायकमिदमाह । अत्रार्जवं गुणस्तद्विशेषणान्यन्यानि साभिप्रायाणि । तथाह्यार्जवे सति मुग्धतया यदेव कार्येषु सुरतेषु युष्मदादिरिच्छति तदेव क्रियते । तथा महीयसां गुरूणामपराधानां संवरणमाच्छादनं भवति । तच्चार्जवमस्मा-

---

द्रव्य परिकर का उदाहरण—

कोई सखी अपनी सखी से कहती है—हे मुग्धे ! उस समय तो तुमने सुन्दर, पके हुए, स्वादु, सुगन्धित और अनायास-प्राप्त फल को फेंक दिया था, अब क्यों व्यर्थ ही दुःखी होती है ।७३।

द्रव्यगत परिकर का एक अन्य उदाहरण नमिसाधु ने भी प्रस्तुत किया है—

जुए में छल करने वाला, लाक्षागृह को जलाने वाला, अभिमानी, द्रौपदी के केशों और वस्त्रों को खींचने में निपुण, पांडवों को दास बनाने वाला, दुःशासन आदि का शासक, सौ भाइयों में बड़ा तथा अङ्गदेशाधीश कर्ण का मित्र वह दुर्योधन कहाँ है ? बताओ ! हम दोनों यों ही उसे मिलने आये हैं, क्रुद्ध होकर नहीं ।

गुण परिकर का उदाहरण—

एक मानिनी नायक से कहती है—अपनी इच्छा तथा अनिच्छा का अनादर करके सुरत आदि में प्रवृत्त कराने वाली, बड़े-बड़े अपराधों पर परदा डालने वाली यह सरलता भी मुझ जैसी हतभागिनी के लिए दुर्लभ हो रही है ।७४।

कमधन्यानां दुष्प्रापं जातम् । अयमभिप्रायः—नाहमृज्वी येनैतानार्जवगुणान्मयि संभाव्य मां प्रसादयसीति ॥

क्रियापरिकरस्तु—

सततमनिर्वृतमानसमायाससहस्रसंकटक्लिष्टम् ।
गतनिद्रमविश्वासं जीवति राजा जिगीषुरयम् ॥७५॥

सततमिति । अत्र जीवतीति क्रिया । तद्विशेषणान्यनिर्वृतमानसमित्यादीनि । तेषामभिप्रायो राज्यगर्हादिकः । एवंविधं राज्ञो जीवनं गर्हितमित्यर्थः ॥

अथ जातिपरिकरमाह—

अत्यन्तमसहनानामुरुशक्तीनामनिघ्नवृत्तीनाम् ।
एकं सकले जगति स्पृहणीयं जन्म केसरिणाम् ॥७६॥

अत्यन्तमिति । अत्र केसरिणामिति सिंहजातिः । तद्विशेषणान्यसहनानामित्यादीनि ।

अभिप्रायस्तु तैः सिंहानां महत्त्वप्रतिपादनमेव । कथमन्यथा तज्जन्मनि स्पृहा भवेत् । अथवात्रैवमुदाहरणम्—

अभिप्राय यह है कि मुझे इतनी सरल मत समझना कि मैं तुम्हारे झाँसे में आ जाऊँगी ।

क्रिया-परिकर का उदाहरण—

दिग्विजय की इच्छा करने वाले इस राजा का मन निरन्तर अशान्त रहता है। हज़ारों संकटों एवं दुविधाओं के कारण इस बेचारे को नींद भी नहीं आती। शत्रु के भय से यह किसी पर विश्वास नहीं करता और इस प्रकार यह जीवन के दिन काट रहा है। अर्थात् ऐसे राजा का जीवन निन्दनीय है।७५।

जाति परिकर—

सारे संसार में केवल सिंहों का ही जन्म प्रशंसनीय है, क्योंकि वे असहनशील होते हैं, अर्थात् किसी का सामना सहन नहीं कर सकते। वे महाशक्तिशाली तथा स्वाधीन-प्रकृति होते हैं।७६।

नमिसाधु-प्रस्तुत जातिगत परिकर का एक अन्य उदाहरण—

कृश शरीर, काना, लंगड़ा, कटे हुए कान वाला, बिना पूंछ का, भूख से दुर्बल, बूढ़ा, तृषा से पीड़ित कण्ठयुक्त, दुर्गन्धपूर्ण रिसते हुए घावों तथा कीड़ों से भरा हुआ, बहुत सोने वाला कुत्ता भी कुतिया का अनुसरण करता है, कामदेव उसे भी काम-विह्वल बनाता है ।

कृशः काणः खञ्जः श्रवणरहितः पुच्छविकलः
क्षुधाक्षामो वृद्धः पिठरककपालार्दितगलः ।
व्रणैः पूतिक्लिन्नैः कृमिकुलचितः स्वापबहुलः
शुनीमन्वेति श्वा तमपि सदयत्येव मदनः ॥

अथ परिवृत्तिः—

युगपद्दानादाने अन्योन्यं वस्तुनोः क्रियेते यत् ।
क्वचिदुपचर्येते वा प्रसिद्धितः सेति परिवृत्तिः ॥ ७७ ॥

युगपदिति । यदन्योन्यं परस्परं वस्तुनोर्युगपत्समकालं दानादाने त्यागग्रहणे क्रियेते सेत्यमुना प्रकारेण परिवृत्तिर्नामालंकारो भवति । अथवा क्वचिदसती दानादाने यदुपचर्येते सा परिवृत्तिः । कथमसत उपचार इत्याह—प्रसिद्धितः । प्रसिद्धया हि न किंचिदपि विरुध्यते । अन्यथा गगनादीनामपि मूर्तधर्मवर्णनमयुक्तं स्यादिति भावः ॥

उदाहरणे द्वाभ्यामार्याधीभ्यामाह—

दत्त्वा दर्शनमेते मत्प्राणा वरतनु त्वया क्रीताः ।
किं त्वपहरसि मनो यद्ददासि रणरणकमेतदसत् ॥ ७८ ॥

दत्त्वेति । कश्चिद्व्यसनी वक्ति । इदमत्र दर्शनसमकालमेव प्राणक्रयस्तथा चित्तहरणसमकालमेव हृदयोत्कलिकादानमुपचरितम् ॥

अथ परिसंख्या—

पृष्टमपृष्टं वा सद्गुणादि यत्कथ्यते क्वचित्तुल्यम् ।
अन्यत्र तु तदभावः प्रतीयते सेति परिसंख्या ॥ ७९ ॥

---

११. परिवृत्ति

जहाँ परस्पर दो वस्तुओं का एक ही समय त्याग और ग्रहण किया जाय, वहाँ परिवृत्ति अलंकार होता है । कहीं-कहीं [त्याग और ग्रहण न होने पर भी] प्रसिद्धि के कारण [भी] ऐसा कर दिया जाता है । वहाँ भी परिवृत्ति अलंकार होता है ।७७।

उदाहरण—

एक कामी नायिका से कह रहा है—हे सुन्दरि ! तुमने दर्शन देने के साथ ही मेरे प्राण ख़रीद लिये हैं, किन्तु अब वह विरह की उत्कण्ठा देकर तुम मेरे चित्त का अपहरण कर रही हो, यह उचित नहीं है ।७८।

१२. परिसंख्या

जहाँ गुण, क्रिया, जाति रूप वस्तु कहीं तो तुल्य (साधारण रूप से) विद्यमान, अर्थात् अन्य स्थानों पर भी विद्यमान, कही जाती है, और कहीं पर उसका

पृष्टमिति । यद्गुणादि गुणक्रियाजातिलक्षणं वस्तु क्वचिन्नियतैकवस्तुन्याधारे विद्यमानं कथ्यते । कीदृशम् । सत्तुल्यं साधारणम् । अन्यत्रापि विद्यमानं सदित्यर्थः यद्येवं कस्मात्क्वचित्कथ्यत इत्याह—अन्यत्र वस्त्वन्तरे तस्याभावः प्रतीयते । कथने कृते सति तच्च क्वचित्पृष्टं कथ्यते क्वचिदपृष्टमिति द्विधा । पृष्टग्रहणं वाक्ये प्रश्नस्योपादानार्थम् । सेत्यमुना प्रकारेण परिसंख्या भण्यते ॥

उदाहरणानि यथा—

किं सुखमपारतन्त्र्यं किं धनमविनाशि निर्मला विद्या ।
किं कार्यं संतोषो विप्रस्य महेच्छता राज्ञाम् ॥८०॥

किमिति । अत्र सुखो गुणं धनं त्वविनाशित्वगुणयुक्तं पृष्टम् । तथा किं कार्यमित्यत्र द्विजनृपकर्तृका क्रिया पृष्टा । तेषां चान्यत्र सत्त्वेऽप्यपारतन्त्र्ये विद्यायां संतोषे महेच्छतायां च सद्भावः कथितः । अन्यत्र तदभाव एव प्रतीयते । अपारतन्त्र्यमेव सुखमित्याद्यवधारणप्रतीतेरिति । जातौ तु के ब्राह्मणा येषां सत्यमित्यादि द्रष्टव्यम् ॥

अपृष्टोदाहरणमाह—

कौटिल्यं कचनिचये करचरणाधरदलेषु रागस्ते ।
काठिन्यं कुचयुगले तरलत्वं नयनयोर्वसति ॥ ८१ ॥

कौटिल्यमिति । इदं कौटिल्यादिषु गुणेषूदाहरणम् । द्रव्यक्रियाजातिषु तु स्वयं द्रष्टव्यानि । लक्षणयोजना च कर्तव्येति ॥

अथ हेतुः—

हेतुमता सह हेतोरभिधानमभेदकृद्भवेद्यत्र ।
सोऽलंकारो हेतुः स्यादन्येभ्यः पृथग्भूतः ॥ ८२ ॥

अभाव होता है, उसे परिसंख्या कहते हैं। पृष्ट (प्रश्नात्मक) तथा अपृष्ट ये इसके दो भेद हैं।७६।

पृष्ट परिसंख्या का उदाहरण—

सुख क्या है ? स्वाधीनता सुख है। अक्षय धन कौन-सा है ? निर्मल विद्या। क्या करना चाहिये ? ब्राह्मण को सन्तोष और राजाओं को महत्त्वाकांक्षा।८०।

अपृष्ट परिसंख्या का उदाहरण—

तुम्हारे केशपाश में कुटिलता, हाथ, पैर और होंठों पर लाली, स्तनयुगल में कठिनता और आँखों में चंचलता निवास करती है।८१।

१२. हेतु

जहाँ कार्य के साथ कारण का अभेद से कथन हो वहाँ यह अन्य अलंकारों से विलक्षण हेतु नामक अलंकार होता है।८२।

हेत्विति । हेतुमता कार्येण सह हेतोः कारणस्य यत्राभिधानमभेदकृदभेदेन भवेत्स हेतुर्नामालंकारः । अन्येभ्योऽलंकारेभ्यः पृथग्भूतो विलक्षणः । अत्र वालंकारग्रहणमन्येभ्यः पृथग्भूत इति च परमतनिरासार्थम् । तथा हि नाम हेतुसूक्ष्मलेशानामलंकारत्वं नेष्टम् । एषां चालंकारत्वं विद्यते । वाक्यार्थालंकरणान्न चान्यत्रान्तर्भावः शक्यते कर्तुमिति ॥

उदाहरणमाह—

अविरलकमलविकासः सकलालिमदश्च कोकिलानन्दः ।
रम्योऽयमेति संप्रति लोकोत्कण्ठाकरः कालः ॥८३॥

अविरलेति । अविरलानां कमलानां विकासहेतुत्वाद्वसन्तकाल एव तथोच्यते । एवं सकलालिमदश्चेत्यादावपि द्रष्टव्यम् । न त्वविरलानां कमलानां विकासो यत्रेत्यादि बहुव्रीहिः कर्तव्यः । तदा त्वभेदो न स्यात् । उदाहरणदिगियम् । इदं तूदाहरणं यथा—

आयुर्घृतं नदी पुण्यं भयं चौरः सुखं प्रिया ।
वैरं द्यूतं गुरुर्ज्ञानं श्रेयो ब्राह्मणपूजनम् ॥

अथ कारणमाला—

कारणमाला सेयं यत्र यथापूर्वमेति कारणताम् ।
अर्थानां पूर्वार्थाद्भवतीदं सर्वमेवेति ॥८४॥

कारणेति । सेयं कविप्रसिद्धा कारणमाला यस्यामर्थानां मध्याद्यथापूर्वं यो यः पूर्वः स स उत्तरेषामर्थानां कारणभावं याति । कथं याति पूर्वस्मादर्थादिदमुत्तरोत्तरार्थजातं सर्वमेव भवतीत्यमुना प्रकारेणेति ॥

उदाहरण—

यह सुन्दर समय (वसन्त) अब आ गया है, जो कमलवनों का विकास है, भौंरों की मस्ती तथा कोयलों का आनन्द है और लोगों के मन की उत्कण्ठा का आकार है ।८३।

नमिसाधु-प्रस्तुत निम्नोक्त कथन में भी हेतु अलंकार है—

घृत आयु है, नदीस्नान पुण्य है, चोर भय है, प्रिया सुख है, जुआ वैर है, गुरु ज्ञान है, और ब्राह्मण पूज्य कल्याण है ।

इस अलंकार से सम्बद्ध विशेष विवरण के लिए देखिए ७।१०३ व्याख्या-भाग ।

१४. कारणमाला

जहाँ अर्थों के बीच पूर्ववर्ती अर्थ परवर्ती अर्थ का कारण बन जाता है और यह [पद्धति] सकल रूप से होती है, अर्थात् आगे भी निभती जाती है, वहाँ कारणमाला अलंकार माना जाता है ।८४।

उदाहरणमाह—

विनयेन भवति गुणवान्गुणवति लोकोऽनुरज्यते सकलः।
अभिगम्यतेऽनुरक्तः ससहायो युज्यते लक्ष्म्या ॥८५॥

विनयेनेति । अत्र पूर्वः पूर्वो विनयादिरुत्तरोत्तरस्य गुणवत्त्वादेर्निमित्तम् ॥

अथ व्यतिरेकः—

यो गुण उपमेये स्यात्तत्प्रतिपन्थी च दोष उपमाने ।
व्यस्तसमस्तन्यस्तौ तौ व्यतिरेकं त्रिधा कुरुतः ॥८६॥

य इति । उपमेये यो गुणः स्यादुपमाने च तस्य गुणस्य प्रतिपन्थी विरुद्धो यो दोषस्तौ गुणदोषौ व्यतिरेकमलङ्कारं त्रिधा त्रिविधं कुरुतः । कथमित्याह—व्यस्तसमस्तन्यस्ताविति । तत्र गुण एवोपमेये न्यस्यते न तूपमाने दोष इत्येकः प्रकारः । तथोपमाने दोषो न्यस्यते, न तूपमेये गुण इति द्वितीयः । एवं व्यस्तभेदौ द्वौ । तथोपमेये गुणोऽपि न्यस्यते, उपमाने च दोषोऽपीति समस्तन्यासे एक एव प्रकार इति त्रैविध्यम् । गुणश्चात्र हृदयावर्जकार्थविशेषो गृह्यते, न तु द्रव्यगुणक्रियाजातिषु प्रसिद्धः । दोषोऽपि

उदाहरण—

मनुष्य विनय से गुणवान् बनता है, गुणी मनुष्य पर लोगों का अनुराग बढ़ता हैं, अनुराग बढ़ने पर सहायक तथा अनुचर मिलते हैं, सहायक मिलने पर मनुष्य लक्ष्मी का कृपापात्र बनता है ।८५।

१५. व्यतिरेक

जो गुण उपमेय में हो यदि उस [गुण] का विरोधी दोष उपमान में [वर्णित हो, तो वहाँ व्यतिरेक अलंकार होता है।] ये दोनों—गुण और दोष—व्यस्त-न्यस्त और समस्त-न्यस्त के रूप में व्यतिरेक अलंकार को तीन भागों में विभक्त करते हैं ।८६।

ये तीन भेद इस प्रकार हैं—

१. जब उपमेय में तो गुण हो किन्तु उपमान में दोष न हो ।

२. उपमान में दोष हो किन्तु उपमेय में गुण न हो ।

ये दोनों व्यस्त व्यतिरेक के भेद हैं ।

३. समस्त-न्यास का एक ही भेद है—उपमेय में गुण हो और उपमान में दोष हो ।

यहाँ गुण से तात्पर्य है—हृदय को चमत्कृत करने वाला अर्थ-विशेष । दोष इससे विपरीत माना जाता है ।

चोक्तगुणविपक्ष एव। न चात्रौपम्यालङ्कारभेदत्वमाशङ्कनीयम्। सादृश्याभावात्। उपमानोपमेयपदोपादानं तु व्यतिरेकसिद्धयर्थम्। नह्यन्यथा संघटते गुणिनः सदोषेण सहौपम्यविघटनं व्यतिरेक इति कृत्वा ॥

तदुदाहरणान्याह—

सकलङ्केन जडेन च साम्यं दोषाकरेण कीदृक्ते।
अभुजंगः समनयनः कथमुपमेयो हरेणासि ॥८७॥

सकलङ्केनेति। सकलङ्केत्यार्यार्धम्। अत्रोपमाने दोषन्यास उपमेये गुणवत्ता प्रतीयते। अभुजंग इत्याद्युत्तरार्धम्। अत्रोपमाने सदोषत्वं गम्यते ॥

तरलं लोचनयुगलं कुवलयमचलं किमेतयोः साम्यम्।
विमलं मलिनेन मुखं शशिना कथमेतदुपमेयम् ॥८८॥

तरलमिति। अत्रोपमेये गुण उपमाने दोषश्च न्यस्त इति समस्तो भेदः ॥

भेदान्तरमाह—

यो गुण उपमाने वा तत्प्रतिपन्थी च दोष उपमेये।
भवतो यत्र समस्तौ स व्यतिरेकोऽयमन्यस्तु ॥८९॥

व्यस्त व्यतिरेक (उपमान में दोष) का उदाहरण—

कलङ्कयुक्त, जड़ एवं दोषों के आकर (दोषाकर) चन्द्र के साथ तुम्हारी क्या तुलना? और साँपों से रहित तथा दो आँखों वाले होने से तुम्हारी उपमा भुजंगवेष्टित त्रिनयनधारी शिव से कैसे दी जा सकती है।८७।

इसी प्रसंग में नमिसाधु-प्रस्तुत एक उदाहरण—

जिस प्रकार रसिकता में मग्न वेश्यासक्त लोग अपशब्द (गालियों), चरित्रनाश और धन-हानि की परवाह नहीं करते, उसी प्रकार कुकवि (अप्रवीण कवि) भी शब्दों के दुष्ट-प्रयोग, छन्दोभंग तथा अभीष्टार्थ प्रतिपादन की परवाह नहीं करते।

समस्त व्यतिरेक (उपमेय में गुण तथा उपमान में दोष) का उदाहरण—

तुम्हारे नेत्रयुगल चञ्चल हैं और कमल स्थिर है—इन दोनों की परस्पर क्या समता? और तुम्हारे निर्मल मुख की मलिन चन्द्र से क्या उपमा दी जा सकती है?।८८।

व्यतिरेक का अन्य प्रकार—

जब उपमान में गुण और उपमेय में गुण का विरोधी दोष हो तो वहाँ भी व्यतिरेक अलंकार होता है, किन्तु ये दोनों समस्त रूप में [वर्णित] होने चाहिए।८९।

यहाँ 'समस्त' से तात्पर्य यह है कि उपमानगत गुण और उपमेयगत तद्विरोधी

य इति । सोऽयं व्यतिरेकोऽन्यः पूर्वविलक्षणः, यत्रोपमाने गुणस्य न्यास उपमेये च दोषस्य तौ समस्तौ न्यसनीयौ । व्यस्तयोरपि केचिदिच्छन्ति । यथा—

अभ्यर्णवर्ति दाह्यं वस्तु तदानीं विदह्याग्निः ।
शाम्यति यस्तेन कथं समो ननु स्यात्प्रियाविरहः ।।

तथा—

स्वदन्नेव तदात्वेऽपि बाधितोऽपि न शाम्यति ।
यः स दासेरकः क्षुद्रक्ष्वेडतुल्यः किमुच्यते ।।

तदेतद्युक्तम् । पूर्वेणैव सिद्धत्वात् । सर्वोऽप्यात्मीयधर्मोत्कर्षो गुणः । स चात्रोपमेये विद्यत इति ।।

उदाहरणमाह—

क्षीणः क्षीणोऽपि शशी भूयो भूयो विवर्धते सत्यम् ।
विरम प्रसीद सुन्दरि यौवनमनिर्वर्ति यातं तु ।।९०।।

क्षीण इति । अत्र शश्युपमानं क्षीणोऽपि वृद्धिगुणयुक्तो निर्दिष्टः । यौवनं तूपमेयं क्षयदोषयुक्तमिति ।।

दोष एक ही कार्य से सम्बद्ध हों । पर नमिसाधु ने इनके व्यस्त होने पर भी इस अलंकार की स्थिति स्वीकृत की है । यथा—

(१) 'अभ्यर्णवर्ति दाह्यं वस्तु···' अर्थात् समीप में स्थित जलने योग्य वस्तुओं को जलाकर जो अग्नि शान्त हो जाती है, प्रिया का वियोग भला उस [अग्नि] के समान कैसे हो सकता है ?

यहाँ उपमान (अग्नि) में अन्ततः शान्त हो जाने का जो गुण वर्णित है उपमेय में उस गुण का विरोधी दोष—शान्ति की प्राप्ति न होना—वर्णित है । ये दोनों कार्य समस्त न होकर व्यस्त हैं ।

उदाहरण

चन्द्रमा तो क्षीण होकर भी फिर वृद्धि को प्राप्त कर लेता है, किन्तु गया हुआ यौवन फिर वापस नहीं आता । इसलिए हे सुन्दरि ! [अब] प्रसन्न हो [कर मान जाओ] ।९०।

क्षीण चन्द्रमा (उपमान) की वृद्धिशीलता एक गुण है, किन्तु क्षीण-यौवन (उपमेय) में इस गुण का विरोधी दोष—एक बार चले जाने पर उसका पुनरावर्तन न होना, क्षीण होते चले जाना—विद्यमान है । ये दोनों कार्य एक ही तत्त्व से सम्बद्ध हैं, अतः समस्त हैं । इसी कारण यहाँ व्यतिरेक अलंकार है ।

अथान्योन्यमाह—

यत्र परस्परमेकः कारकभावोऽभिधेययोः क्रियया ।
संजायेत स्फारिततत्त्वविशेषस्तदन्योन्यम् ॥६१॥

यत्रेति । यत्राभिधेययोः पदार्थयोः परस्परमन्योन्यं क्रियया हेतुभूतयैको निर्विलक्षणः कारकभावः कर्त्रादिकारकत्वं संजायेत । कीदृशः । स्फारितः परिपोषितस्तत्त्वविशेषो विशिष्टधर्मो येन सः तथाभूतः । तदन्योन्यमलङ्कारः । परस्परग्रहणं—

सिंहः प्रसेनमवधीत्सिंहो जाम्बवता हतः ।

इत्यन्योन्यनिवृत्त्यर्थम् । एकग्रहणं तु—

कृष्णद्वैपायनं पार्थः सिषेवे शिष्यवत्ततः ।
असावध्यापयत्तं तु विद्यां योगसमन्विताम् ॥

इत्येतन्निवृत्त्यर्थम् ॥

उदाहरणमाह—

रूपं यौवनलक्ष्म्या यौवनमपि रूपसंपदस्तस्याः ।
अन्योन्यमलंकरणं विभाति शरदिन्दुसुन्दर्याः ॥६२॥

रूपमिति । अत्र रूपयौवनयोरलङ्करणक्रिययैकः कारकभावः कर्तृत्वलक्षणः ।

---

१६. अन्योन्य

जहाँ दो पदार्थों में परस्पर क्रिया के द्वारा विशिष्टता (विशेष अर्थ) को परिपुष्ट करनेवाला एक कारक भाव (कारकत्व) हो, उसे अन्योन्य कहते हैं ।६१।

नमिसाधु ने इसी प्रसंग में दो प्रत्युदाहरण प्रस्तुत किये हैं—

(१) 'सिंहः प्रसेनम्···' अर्थात् सिंह ने प्रसेन को मारा और जाम्बवान् ने सिंह को ।

अन्योन्य के उक्त लक्षण में 'परस्परम्' शब्द का प्रयोग किया गया है । 'सिंहः प्रसेनम्···' में प्रसेन और सिंह की परस्पर एक-दूसरे द्वारा मृत्यु न होने के कारण अन्योन्य अलंकार नहीं है ।

(२) 'कृष्णद्वैपायनं पार्थः······' अर्थात् तब शिष्य के समान अर्जुन ने कृष्ण द्वैपायन व्यास की सेवा की । भगवान् व्यास ने उसे योगविषयक विद्या सिखायी ।

यहाँ भी अन्योन्य अलंकार नहीं है, क्योंकि सेवा करना और विद्या सिखाना ये दोनों क्रियाएँ एक न होकर परस्पर भिन्न हैं ।

उदाहरण—

शरत्कालीन चन्द्रमा के समान उस सुन्दरी का रूप यौवन को अलंकृत कर रहा है और यौवन रूप को ।६२।

तेन च रूपस्य दीर्घनयनत्वादिको विशेषः स्फारितः । यौवनस्यापि वपुर्विभागश्चतुरस्र-शोभादिकत्वविशेषः स्फारितः ।।

अथोत्तरम्—

उत्तरवचनश्रवणादुन्नयनं यत्र पूर्ववचनानाम् ।
क्रियते तदुत्तरं स्यात्प्रश्नादप्युत्तरं यत्र ।।९३।।

उत्तरेति । उत्तरवचनानि श्रुत्वा यत्र पूर्ववचनानि निश्चीयन्ते तदुत्तरम् । तथा प्रश्नाच्चोत्तरं यत्र स्यात्तदप्युत्तरम् । इति द्विधेदम् । अस्य चाद्योत्तरभेदस्यानुमानस्य चायं विशेषो यत्तत्र सामान्येन हेतुहेतुमद्भावः साध्यते । अत्र तु न हेतुहेतुमद्भावो वाक्ये निबध्यते । किं तु श्रोता श्रुत्वोत्तरवचनानि तदनुसारेण पूर्ववचनानि निश्चिनोतीति ।।

उदाहरणम्—

भण मानमन्यथा मे भ्रुकुटिं मौनं विधातुमहमसहा ।
शक्नोमि तस्य पुरतः सखि न खलु पराङ्मुखीभवितुम् ।।९४।।

भणेति । अत्रास्मान्नायिकोक्तादुत्तरात्सखीवचनान्युच्चीयन्ते । नूनमस्याः सखीभिरुक्तं यथा सापराधस्य प्रियस्य भ्रुकुटिमौनपराङ्मुखीभावान्कुरुष्वेति ।।

यौवन और रूप एक-दूसरे की शोभा-वृद्धि कर रहे हैं। यहाँ एक क्रिया 'विभाति' द्वारा उक्त दोनों पदार्थ एक-दूसरे के कारकभाव को प्राप्त कर रहे हैं, अर्थात् यौवन कर्ता है तो रूप कर्म है, और रूप कर्ता है तो यौवन कर्म ।

१७. उत्तर

जहाँ उत्तर के श्रवण से पूर्वकथित वचनों (प्रश्न) का निश्चय हो, तथा प्रश्नों से उत्तर का निश्चय हो, वहाँ उत्तर अलंकार होता है ।९३।

इस प्रकार उत्तर अलंकार के दो प्रकार हुए—

(१) उत्तर से प्रश्न का निश्चय,

(२) प्रश्नपूर्वक उत्तर ।

(१) उत्तर से प्रश्न के निश्चय का उदाहरण—

हे सखि ! मुझे मान करने का और कोई उपाय बताओ, क्योंकि मैं उसके सामने भृकुटि चढ़ाकर, मौन रहकर तथा पराङ्मुख होकर भी देख चुकी हूँ—इनमें से कोई उपाय काम नहीं देता ।९४।

नायिका के इस उत्तर से यह निश्चित हो जाता है कि सखी ने उसे मान करने का उपाय बताया होगा ।

द्वितीयोदाहरणमाह—

किं स्वर्गादधिकसुखं बन्धुसुहृत्पण्डितैः समं लक्ष्मीः ।
सौराज्यमदुर्भिक्षं सत्काव्यरसामृतास्वादः ॥९५॥

किमिति । इति प्रश्नादुत्तरम् । अथास्य परिसंख्यायाश्चायं विशेषो यत्तत्र नियमप्रतीतिरेतदेवात्रैव वेति इह तु प्रश्नादुत्तरमात्रम्, न तु नियमप्रतीतिः ॥

अथ सारम्—

यत्र यथासमुदायाद्यथैकदेशं क्रमेण गुणवदिति ।
निर्धार्यते परावधि निरतिशयं तद्भवेत्सारम् ॥९६॥

यत्रेति । यो यः समुदायो यथासमुदायम्, यो य एकदेशो यथैकदेशमित्यव्ययीभावः । यथासमुदायाद्यथैकदेशं क्रमेण निर्धार्यते पृथक्क्रियते । कथम्, परावधि । परमुत्कृष्टतममेकदेशमवधिं कृत्वा । निर्धारणं च गुणक्रियाजातिभिः संभवति । अत आह—गुणवदिति । गुणवत्त्वेन, न तु क्रियाजातिभ्याम् । क्रमेणेति चाक्रमनिवृत्त्यर्थम् । तेनेह सारत्वं न भवति । यथा—

नदीषु गङ्गा नगरीषु काञ्ची पुष्पेषु जाती रमणीषु रम्भा ।
सदोत्तमत्वं पुरुषेषु विष्णुरैरावणो गच्छति वारणेषु ॥

नह्यत्र शृङ्खलाकटकवन्निर्धारणम् । कस्तर्ह्येषोऽलंकारः साराभास इत्युच्यते । सर्वत्र हि संपूर्णलक्षणा भावे आभासत्वं कविभिर्व्यवस्थापितम् । निरतिशयग्रहणमतिशयालंकारत्वनिवृत्त्यर्थम् । अन्यरूपत्वात्तस्य । सारत्वमुत्कर्षस्तत्र चातिशयालंकाराशङ्केति । अथवाप्याक्षेपिकगुणवत्त्वनिवृत्त्यर्थमिति ॥

---

(२) प्रश्नपूर्वक उत्तर का उदाहरण—

स्वर्ग से बढ़कर अधिक सुखकर क्या है ? बन्धु, मित्र तथा विद्वानों की संगति, लक्ष्मी, अच्छा राज्य, दुर्भिक्ष का अभाव और सत्काव्य के रसामृत का आस्वाद ।९५।

१८. सार

जहाँ समुदाय में से एक देश को क्रम से पृथक् करके गुण-सम्पन्न होने से उसकी उत्कृष्टता की चरम-सीमा निश्चित की जाती है उसे सार कहते हैं ।९६।

इसका तात्पर्य यह है कि किसी एक पदार्थ से सम्बन्धित अनेक सारवान् (गुण-युक्त) वस्तुओं में ये किसी एक का निर्वाचन करके पुनः उससे सम्बन्धित किसी एक सारवान् वस्तु का निर्वाचन करते हुए इसी पद्धति को निभाते चलना सार अलंकार कहाता है । नमिसाधु ने इसी तथ्य को स्पष्ट करते हुए 'नदीषु गंगा···' पद्य के सम्बन्ध में कहा है कि यहाँ सार अलंकार की स्वीकृति न होगी—'नदियों में गङ्गा, नगरियों में

उदाहरणम्—

राज्ये सारं वसुधा वसुंधरायां पुरं पुरे सौधम् ।
सौधे तल्पं तल्पे वराङ्गनानङ्गसर्वस्वम् ॥९७॥

राज्य इति । अत्र सप्ताङ्गराज्यसमुदायाद्वसुधारूपैकदेशस्य, ततोऽपि पुरस्येत्यादिगुणवत्त्वेन निर्धारणम् ॥

अथ सूक्ष्मम्—

यत्रायुक्तिमदर्थो गमयति शब्दो निजार्थसंबद्धम् ।
अर्थान्तरमुपपत्तिमदिति तत्संजायते सूक्ष्मम् ॥९८॥

यत्रेति । प्रतिपाद्योऽर्थे यस्य युक्तिर्न विद्यतेऽसावयुक्तिमदर्थः शब्दो यत्रात्मीयार्थसंबद्धमर्थान्तरं गमयति प्रत्यापयति तत्सूक्ष्मम् । ननु यस्य निजार्थेऽपि युक्तिर्नास्ति तस्य कुतस्तत्संबन्धे स्यादित्याह—उपपत्तिमदिति । इतिर्हेतौ । यतोऽर्थान्तरे तत्संबद्धे घटना विद्यते । अत एव सूक्ष्मावगमकारणात्सूक्ष्ममिति नाम ॥

उदाहरणमाह—

आदौ पश्यति बुद्धिर्व्यवसायोऽकालहीनमारभते ।
धैर्यं व्यूढमहाभरमुत्साहः साधयत्यर्थम् ॥९९॥

आदाविति । व्यवसायः कर्मण्युद्योगः । धैर्यमसंमोहः । उत्साहः शक्तिः । अत्र पुनर्बुद्धेर्दर्शनम्, व्यवसायस्यारम्भः, धैर्यस्य भरवहनम्, उत्साहस्य च साधनमचेतन-

---

कांची, पुष्पों में जाति पुष्प, स्त्रियों में रम्भा, पुरुषों में विष्णु, और हाथियों में ऐरावत सर्वश्रेष्ठ हैं ।' क्योंकि यहाँ एक-के-बाद एक उत्कृष्ट पदार्थों का निर्देश नहीं हुआ ।

उदाहरण

राज्य में भूमि सार होती है । भूमि पर नगर सार होते हैं; नगर में महल सार होते हैं, महल में सुन्दर शय्या सार होती है और शय्या पर कामदेव की सर्वस्वभूत सुन्दर कामिनी सार होती है ।९७।

१९. सूक्ष्म

प्रतिपाद्य अर्थ में युक्तिविहीन अर्थ बताने वाला शब्द जब अपने अर्थ से सम्बन्ध रखने वाले युक्तियुक्त अर्थान्तर का बोध कराता है, तो वहाँ सूक्ष्म अलंकार होता है ।९८।

उदाहरण—

बुद्धि किसी वस्तु को देखती है । उद्योग समय को न खोते हुए कार्य को आरम्भ करता है । धैर्य कार्य में पड़ने वाले विघ्नों को सहता है और उत्साह उस कार्य को सिद्ध करता है ।९९।

त्वान्न घटते । इत्येते शब्दा यथोक्तेऽर्थेऽनुपपन्नाः । करणभावो ह्येषां घटते, न कर्तृत्वम् । बुद्ध्यादिसंबद्धे तु देवदत्तादौ सर्वमुपपद्यत इति कृत्वा । यदा बुद्धिमानर्थं पश्यति तदा बुद्धिः पश्यतीत्याद्युच्यत इति ॥

अथ लेशः—

दोषीभावो यस्मिन्गुणस्य दोषस्य वा गुणीभावः ।
अभिधीयते तथाविधकर्मनिमित्तः स लेशः स्यात् ॥१००॥

दोषीभाव इति । यस्मिन्गुणस्य दोषभावो दोषस्य च गुणभावो विधीयते । कीदृशः । तथाविधं गुणस्य दोषीकरणं दोषस्य गुणीकरणं वा कर्म निमित्तं यस्य स तथोक्तः । वाशब्द एकयोगेऽपि लेशत्वख्यापनार्थः । अन्यथा यत्रोभययोगस्तत्रैव स्यादिति ॥

उदाहरणमाह—

अन्यैव यौवनश्रीस्तस्याः सा कापि दैवहतिकायाः ।
मथ्नाति यया यूनां मनांसि दूरं समाकृष्य ॥१०१॥

अन्येति । अत्र यौवनस्य गुणस्यापि युवचेतोमथनाद्दोषीभावः ॥

अथ दोषस्य गुणभावोदाहरणमाह—

हृदयं सदैव येषामनभिज्ञं गुणवियोगदुःखस्य ।
धन्यास्ते गुणहीना विदग्धगोष्ठीरसापेताः ॥१०२।

इस कथन में सूक्ष्मता यह है कि बुद्धिमान कार्यसिद्धि के लिए सभी कार्य करता है ।

इस अलंकार के विशेष विवरण के लिए देखिए ७।१०२, व्याख्या-भाग ।

२०. *लेश*

जिस [कर्म] में गुण को दोष-रूप से और दोष को गुण रूप से वर्णित किया जाता है, ऐसा कर्म 'लेश' अलंकार का कारण बनता है ।१००।

गुण का दोष में परिवर्तित होने का उदाहरण —

उस अभागिनी की यौवन-शोभा अवश्य कुछ और ही प्रकार की है, जिससे वह युवकों के मन को दूर से खींचकर मथ डालती है ।१०१।

यहाँ यौवन-रूप गुण का यह दोष बताया गया है कि वह युवकों के मन को मथ डालता है ।

दोष का गुण में परिवर्तित होने का उदाहरण—

जिन का हृदय गुणों के वियोग के दुःख से अनभिज्ञ है और जिन्हें विद्वानों की गोष्ठी के आनन्द का अनुभव नहीं, ऐसे गुणहीन लोग धन्य हैं ।१०२।

इसी अध्याय की निम्नोक्त कारिकाओं में क्रमशः हेतु, सूक्ष्म और लेश अलंकारों का निरूपण प्रस्तुत किया गया है—८२-८३, ९८-९९, १००-१०२। ये तीनों अलंकार भामह के समय से ही विवाद-ग्रस्त रहे हैं। भामह ने इन्हें अलंकार-रूप में स्वीकृत नहीं किया था। उनके मत में इनका विषय काव्य से सम्बद्ध न होकर 'लोक-वार्ता' से ही सम्बद्ध है। किन्तु दण्डी ने इन्हें 'वाणी के भूषण रूप' में स्वीकार किया। आगे चलकर प्रस्तुत ग्रन्थ के प्रणेता रुद्रट ने इन तीनों अलंकारों का निरूपण किया, किन्तु इनके द्वारा सम्मत हेतु का लक्षण दण्डि-सम्मत लक्षण से भिन्न हो गया। दण्डी ने कारण और कार्य के एक साथ वर्णन को हेतु-अलंकार माना था, किन्तु रुद्रट ने कारण और कार्य की एकता को हेतु-अलंकार कहा है। आगे चलकर रुद्रट-सम्मत हेतु-अलंकार का मम्मट ने खण्डन प्रस्तुत किया है। उनके खण्डन का मुख्य आधार यह है इसमें 'वैचित्र्य' का अभाव रहता है, तथा इसका अन्तर्भाव इन्होंने काव्यलिंग अलंकार में किया है। किन्तु मम्मट की यह धारणा चिन्त्य है। एक ओर 'आयुर्घृतम्'—जैसे वाक्यों में उनके कथनानुसार वैचित्र्य के अभाव के कारण 'हेतु-अलंकार' के सद्भाव का प्रश्न ही उपस्थित नहीं होता, [यद्यपि 'आयुर्घृतम्' में उन्होंने स्वयं 'सारोपा लक्षणा' की स्वीकृति की है], और दूसरी ओर 'अविरलकमलविकासः' जैसे पद्यों में प्रथम तो उक्त अभाव के कारण 'हेतु' अलंकार नहीं है, और यदि स्वीकृत कर भी लिया जाए तो उनके द्वारा सम्मत काव्यलिंग अलंकार ही 'हेतु' है। किन्तु उनके ये दोनों कथन परस्पर-विरोधी हैं। जब तथाकथित 'हेतु' अलंकार के उदाहरणों में 'वैचित्र्य का अभाव' मान लिया गया तो उन्हें काव्यलिंग का उदाहरण मानना समुचित प्रतीत नहीं होता। अस्तु !

लेश अलंकार का स्वरूप दण्डी ने दो रूपों में प्रस्तुत किया था—

(१) लेश (स्वल्प) मात्र भी प्रकट वस्तु के रूप को छिपाना, अथवा प्रकट वस्तु को लेश (व्याज) द्वारा छिपाना।

(२) लेशतः (व्याज से) स्तुति द्वारा निन्दा, और निन्दा द्वारा स्तुति करना।

आगे चलकर अप्पयदीक्षित ने उक्त दोनों रूपों में से पहले रूप की चर्चा नहीं की। दूसरे रूप की चर्चा अवश्य की है, किन्तु उसे लेश नाम नहीं दिया। इसके पहले प्रकार को व्याजोक्ति माना है और दूसरे को व्याजस्तुति।

रुद्रट ने सर्वप्रथम इस अलंकार का सम्बन्ध उक्त रूप में गुण एवं दोष के साथ जोड़ा और इसका यही रूप भोजराज एवं अप्पयदीक्षित ने भी स्वीकृत किया।

सूक्ष्म अलंकार का स्वरूप दण्डी से लेकर अप्पयदीक्षित-पर्यन्त अधिकतर आलंकारिकों ने लगभग एकसमान प्रस्तुत किया है। इसके जो उदाहरण दिये गये वे इतने अधिक चमत्कारपूर्ण हैं कि इसे भामह के अनुरूप अलंकार न मानने का प्रश्न

हृदयमिति । सुगममेव ।।

अथावसरः—

अर्थान्तरमुत्कृष्टं सरसं यदि वोपलक्षणं क्रियते ।
अर्थस्य तदभिधानप्रसङ्गतो यत्र सोऽवसरः ।।१०३।।

अर्थान्तरमिति । तत्रार्थस्य न्यूनस्य यद्युत्कृष्टमुदात्तं सशृङ्गारादिकं वार्थान्तरमुपलक्षणं क्रियते सोऽवसरालंकारः । किमर्थं क्रियत इत्याह—तस्योत्कृष्टत्वादेरभिधानप्रसङ्गेन । उत्कृष्टत्वं सरसत्वं वा न्यूनस्याभिधातुमित्यर्थः ।।

उदाहरणम्—

तदिदमरण्यं यस्मिन्दशरथवचनानुपालनव्यसनी ।
निवसन्बाहुसहायश्चकार रक्षःक्षयं रामः ।।१०४।।

तदिति । अत्र साक्षाद्रामवासस्तत्कृतश्च राक्षसक्षय उत्कृष्टो वनस्योत्कृष्टत्वख्यापनायोपलक्षणत्वेन कृतः ।।

द्वितीयोदाहरणमाह—

सा सिप्रानाम नदी यस्यां मङ्क्षूर्मयो विशीर्यन्ते ।
मज्जन्मालवललनाकुचकुम्भास्फालनव्यसनात् ।।१०५।।

ही उपस्थित नहीं होता । सर्वाधिक चमत्कारपूर्ण उदाहरण मम्मट प्रस्तुत है—

वक्त्रस्यन्दिस्वेदबिन्दुप्रबन्धैर्दृष्ट्वा भिन्नं कुंकुमं क्वापि कण्ठे ।
पुंस्त्वं तन्व्या व्यञ्जयन्ती वयस्या स्मित्वा पाणौ खड्गलेखां लिलेख ।।

—का० प्र० १०।५३०

[इन तीनों अलंकारों के विशेष विवरण के लिए देखिए : हमारा ग्रन्थ—'काव्यशास्त्रीय निबन्ध ।']

२१. अवसर

जहाँ न्यून अर्थ के प्रसङ्ग में उत्कृष्ट तथा रसपूर्ण दूसरे अर्थ का प्रतिपादन किया जाए वहाँ अवसर नामक अलंकार होता है ।१०३।

उदाहरण—

यह वही वन है, जहाँ दशरथ के वचनों का पालन करने में एकनिष्ठ राम ने अपने भुजबल से राक्षसों का विनाश किया था ।१०४।

यहाँ केवल वन की उत्कृष्टता निर्दिष्ट करने के उद्देश्य से ही उक्त प्रसंग की अवतारणा की गयी है ।

अन्य उदाहरण—

यह सिप्रा नामक नदी है, जिसकी लहरें स्नान करती हुई मालव देश की

सेति। अत्र मालवतरुणीलक्षणं सश्रृंङ्गारं वस्तु सरसत्वाभिधानायोपलक्षणं सिप्रायाः कृतम् ।।

अथ मीलितम्—

तन्मीलितमिति यस्मिन्समानचिह्नेन हर्षकोपादि।
अपरेण तिरस्क्रियते नित्येनागन्तुकेनापि ।।१०६।।

तदिति । तन्मीलितमित्यलंकारः, यत्र हर्षकोपभयाद्यपरेण वस्तुना हर्षादि-तुल्यचिह्नेन स्वाभाविकेन कृत्रिमेण वा तिरस्क्रियते । अपिर्विस्मये । इतिः प्रकारे ।।

उदाहरणम्—

तिर्यक्प्रेक्षणतरले सुस्निग्धे च स्वभावतस्तस्याः ।
अनुरागो नयनयुगे सन्नपि केनोपलक्ष्येत ।।१०७।।

तिर्यगिति । अत्र नयनयुगस्य स्वाभाविकतिर्यक्प्रेक्षणादियुक्तस्य यादृशी चेष्टा तादृश्येवानुरागयुक्तस्येत्यसौ नित्येन तेनापह्नूयते ।।

मदिरामदभरपाटलकपोलतललोचनेषु वदनेषु ।
कोपो मनस्विनीनां न लक्ष्यते कामिभिः प्रभवन् ।।१०८।।

मदिरेति । अत्र कोपसदृशचिह्नेन मदिरामदेनागन्तुकेन कोपस्तिरस्क्रियते ।।

स्त्रियों के कठोर स्तनकलश के आघात से शीघ्र बिखर जाती हैं।१०५।

२२. मीलित

जहाँ हर्ष, कोप आदि को इन हर्ष, कोप आदि के समान चिह्न, चाहे वे नित्य (स्वाभाविक) हों, अथवा आगन्तुक (कृत्रिम) हों, तिरस्कृत कर देते हैं, वहाँ मीलित अलंकार होता है।१०६।

उदाहरण—

तिरछी दृष्टि के कारण स्वभावतः चंचल और सरस उस कामिनी के नेत्र-युगल में अनुराग रहने पर भी [उसे] कौन जान सकता है ?१०७।

अन्य उदाहरण—

मद्यपान के मद से अरुणित, मानिनियों के कपोल, नेत्र और मुखों पर उमड़ते हुए क्रोध को कामी लोग नहीं देख पाते।१०८।

(अर्थात् वे समझते हैं कि उनका मुख क्रोध से नहीं प्रत्युत मद्यपान से ही अरुणित है।)

अथैकावली—

एकावलीति सेयं यत्रार्थपरम्परा यथालाभम् ।
आधीयते यथोत्तरविशेषणा स्थित्यपोहाभ्याम् ॥१०९॥

एकेति । सेयमेकावलीनामालंकारो यत्रार्थानां परम्परा यथालाभमाधीयते न्यस्यते । कीदृशी सा । यो य उत्तरोऽर्थः स स पूर्वस्य विशेषणं यस्यां सा तथाविधा । एतेन समुच्चयस्यैकावलीत्वं निषिद्धम् । कथं यथोत्तरविशेषणा, कथं वाधीयत इत्याह— स्थित्यपोहाभ्यामिति । स्थितिर्विधिरपोहो व्यवच्छेदस्ताभ्यामिति ॥

यथाक्रममुदाहरणे—

सलिलं विकासिकमलं कमलानि सुगन्धिमधुसमृद्धानि ।
मधु लीनालिकुलाकुलमलिकुलमपि मधुररणितमिह ॥११०॥

सलिलमिति । अत्र सलिलाद्यर्थपरम्परा यथोत्तरकमलादिविशेषणा यथालाभं विधिमुखेन निर्दिष्टा ॥

नाकुसुमस्तरुरस्मिन्नुद्याने नामधूनि कुसुमानि ।
नालीनालिकुलं मधु नामधुरक्वाणमलिवलयम् ॥१११॥

नेति । अत्र निषेधरूपेण तर्वादिकार्यपरम्परा यथोत्तरकुसुमादिविशेषणा निहितेति ॥

इति श्रीरुद्रटकृते काव्यालंकारे नमिसाधुविरचितटिप्पणसमेतः
सप्तमोऽध्यायः समाप्तः ।

---

२३. एकावली

जिस अलंकार में अर्थों की परम्परा उत्तरोत्तर उत्कृष्ट रखी जाती है, उसे एकावली अलंकार कहते हैं। इसमें आगे आनेवाला अर्थ अपने से पूर्ववर्ती अर्थ का विशेषण होता है, इस अलंकार में कहीं विधि-रूप से, और कहीं निषेध-रूप से वर्णन होता है ।१०९।

विधि रूप से कथन का उदाहरण—

जल में कमल खिल रहे हैं, कमलों में पराग और मकरन्द में भौंरे चिपटे हुए हैं, और भौंरे मधुर गुंजन कर रहे हैं ।११०।

निषेध रूप से कथन का उदाहरण—

इस उपवन में ऐसा कोई पेड़ नहीं है, जिस पर फूल न लदे हों, ऐसे फूल भी नहीं हैं, जिनमें मधु न भरा हो, ऐसा मधु भी नहीं है, जहाँ भौंरे न लिपटे हों, और ऐसे भौंरे भी नहीं हैं, जो मधुर गुञ्जार न कर रहे हों ।१११।

इति 'अंशुप्रभा'ऽऽख्य-हिन्दीव्याख्यायां सप्तमोऽध्यायः समाप्तः ।

अष्टमोऽध्यायः

वास्तवं सप्रभेदमाख्यायेदानीमौपम्यमाह—

सम्यक्प्रतिपादयितुं स्वरूपतो वस्तु तत्समानमिति ।
वस्त्वन्तरमभिदध्याद्वक्ता यस्मिंस्तदौपम्यम् ॥१॥

सम्यगिति । यत्र प्रस्तुतं वस्तु स्वरूपविशेषेण सम्यगनन्यथा प्रतिपादयितुं वस्त्वन्तरमप्रस्तुतं वक्ताभिदध्यात्तदौपम्यं नामालंकारः । ननु वस्त्वन्तरोक्त्या कथं वस्तुस्वरूपं विशेषतः प्रतिपाद्यत इत्याह—तत्समानमिति । इति हेतौ । यतो वस्त्वन्तरं प्रकृतवस्तुसदृशमतस्तेन तत्सम्यक्प्रतिपाद्यते । 'सर्वः स्वं स्वं रूपम्' (७।७) इत्यादिना सम्यक्त्वे लब्धे सम्यग्ग्रहणं विशिष्टसम्यक्त्वार्थम् । अभिदध्यादिति । कर्तृपदेनैव वक्तरि लब्धे वक्तृग्रहणं रक्तविरक्तमध्यस्थादिवक्तृविशेषप्रतिपत्त्यर्थम् । तेन यो यादृशो वक्ता येन स्वरूपेण वक्तुमिच्छति तादृशमेव वस्त्वन्तरमभिदध्यात् तदौपम्यम् । रक्तो यथा—

अमृतस्येव कुण्डानि सुखानामिव राशयः ।
रतेरिव निधानानि योषितः केन निर्मिताः ॥

इत्यादि । विरक्तो यथा—

एता हसन्ति च रुदन्ति च कार्यहेतोर्विश्वासयन्ति च नरं न च विश्वसन्ति ।
तस्मान्नरेण कुलशीलसमन्वितेन वेश्याः श्मशानसुमना इव वर्जनीयाः ॥

इत्यादि । मध्यस्थस्तु स्वरूपमात्रं वक्ति यथा—

दर्शनादेव नटवद्धरन्ति हृदयं स्त्रियः ।
सुविश्वस्तेऽप्यविश्वस्ता भवन्ति च चरा इव ॥

यत्रोपमानोपमेयभावः श्रौतः प्रातीतिको वा तदौपम्यमिति तात्पर्यम् । तेन संशयादयोऽप्येतद्भेदा एवेति ॥

अष्टम अध्याय

सप्तम अध्याय में अर्थालंकारों को चार वर्गों में विभाजित किया गया था—वास्तव, औपम्य, अतिशय और श्लेष । उसी अध्याय में वास्तवमूलक अर्थालंकारों के निरूपण के उपरान्त इस अध्याय में औपम्यमूलक २१ अलंकारों का निरूपण प्रस्तुत है ।

औपम्य

जिसमें वक्ता किसी वस्तु के स्वरूप का सम्यक् प्रतिपादन करने के लिए उसके समान दूसरी वस्तु का वर्णन करे उसे औपम्य कहते हैं ।१।

सामान्यमभिधाय तद्भेदानाह—

उपमोत्प्रेक्षारूपकमपह्नुतिः संशयः समासोक्तिः ।
मतमुत्तरमन्योक्तिः प्रतीपमर्थान्तरन्यासः ॥२॥
उभयन्यासभ्रान्तिमदाक्षेपप्रत्यनीकदृष्टान्ताः ।
पूर्वसहोक्तिसमुच्चयसाम्यस्मरणानि तद्भेदाः ॥३॥

उपमेति । उभयेति । तस्यौपम्यस्योपमादय एते एकविंशतिर्भेदाः ॥

यथोद्देशस्तथा लक्षणमिति पूर्वमुपमालक्षणमाह—

उभयोः समानमेकं गुणादि सिद्धं भवेद्यथैकत्र ।
अर्थेऽन्यत्र तथा तत्साध्यत इति सोपमा त्रेधा ॥४॥

उभयोरिति । उभयोः प्रस्तावादुपमानोपमेययोः समानं साधारणमेकमद्वितीयं गुणादि गुणसंस्थानादि यथा येन प्रकारेणैकत्रोपमाने सिद्धं प्रतीतम्, तथा तेनैव प्रकारेणान्यत्रार्थ उपमेये साध्यत इत्येवं प्रकारोपमा । सा च त्रेधा—वाक्योपमा, समासोपमा, प्रत्ययोपमेति । अभिधानस्य मानभेदेनेत्यत्र चैकत्रेति सामान्योक्तावपि 'प्रसिद्धमुपमानम्' इति न्यायादुपमानं लभ्यते ॥

अथैतद्भेदत्रयमाह—

वाक्योपमात्र षोढा तत्र त्वेका प्रयुज्यते यत्र ।
उपमानमिवादीनामेकं सामान्यमुपमेयम् ॥५॥

औपम्यगत अलंकार—

औपम्य के ये भेद हैं, अर्थात् औपम्य से सम्बद्ध ये अलंकार हैं—उपमा, उत्प्रेक्षा, रूपक, अपह्नुति, संशय, समासोक्ति, मत, उत्तर, अन्योक्ति, प्रतीप, अर्थान्तरन्यास, उभयन्यास, भ्रान्तिमान्, आक्षेप, प्रत्यनीक, दृष्टान्त, पूर्व, सहोक्ति, समुच्चय, साम्य और स्मरण ।२-३।

१. उपमा

उपमान और उपमेय के एक स्वीकृत समान गुण को जैसा उपमान में कहा जाए, वैसा यदि उसे उपमेय में कहा जाए, तो वहाँ उपमा अलंकार माना जाता है । उपमा तीन प्रकार की होती है ।४।

वाक्योपमा

वाक्योपमा छः प्रकार की है। जहाँ उपमान और उपमेय की समानता 'इव' आदि वाचक शब्दों के द्वारा कही जाती है, वहाँ पहली वाक्योपमा मानी जाती है ।५।

वाक्येति । अत्रोपमायां वाक्योपमा तावत्षट्प्रकारेति । एतच्च ब्रुवता वाक्योपमा प्रथमेत्युक्तं भवति । तेन पृथगुद्देशाभावो न दोषाय । तत्र तासु षट्सु मध्याद् इयमेका प्रथमा, यस्यामुपमानः प्रयुज्यते । तथेवादीनामिववत्सदृशयथातुल्यनिभादीनां साम्यवाचकानां मध्यादेकम् । तथा सामान्यमुपमानोपमेययोः साधारणधर्माभिधायकं पदम् । तथोपमेयमिति चतुष्टयम् । तुशब्दो लक्षणान्तरेभ्योऽस्य विशेषणार्थः । ननु यदीवादीनामेकमेव प्रयुज्यते कथं तर्हि 'दिने दिने सा परिवर्धमाना' इत्यादिष्वनेकेषां प्रयोगः । सत्यम् । औपम्यानामनेकत्वात् । अत्र ह्यनेकं कारकमुपमानोपमेयतया निर्दिष्टम् । यथा—

ततः प्रतस्थे कौबेरीं भास्वानिव रघुर्दिशम् ।
शरैरुस्रैरिवोदीच्यानुद्धरिष्यन्रसानिव ॥

अत्रेवादीनामपि बहूनां प्रयोगो न्याय्यः । एवं हि परिपूर्णमौपम्यं भवति । यत्र तु बहूनामप्यौपम्य एक एवेवादिः प्रयुज्यते तत्र गतार्थत्वादप्रयोगो बोद्धव्यः । यथा—'सा भूधराणामधिपेन तस्याम्' इत्यादौ । अत्र हि नीताविव मेनायाम्, उत्साहगुणेनेव नगेन, संपदिव पार्वती जनितेति व्याख्यानम् । इत्यलं विस्तरेण ॥

उदाहरणमाह—

कमलमिव चारुवदनं मृणालमिव कोमलं भुजायुगलम् ।
अलिमालेव सुनीला तवैव मदिरेक्षणे कबरी ॥६॥

कमलमिति । अत्र कश्चित्कामी मुखादिकं वस्तु सम्यक्स्वरूपतः कमलादिगतचारुत्वादियुक्तं प्रतिपादयितुं वस्त्वन्तरं कमलादिकं तत्समानत्वात्प्रयुक्तवानित्यौपम्यम् । तथोभयोः कमलमुखयोः समानमेकं चारुत्वं यथैकत्र कमले सिद्धं तथोपमेये मुखे साध्यत इत्युपमालक्षणम् । तथा कमलमुपमानम्, इवशब्दः, चार्विति सामान्यम्, वदनमुपमेयम्, इति चतुष्टयं समस्तमिति वाक्योपमालक्षणम् । एवमन्यत्रापि लक्षणयोजना कर्तव्या ॥

अथ द्वितीयामाह—

इयमन्या सामान्यं यत्रेवादिप्रयोगसामर्थ्यात् ।
गम्येत सुप्रसिद्धं तद्वाचिपदाप्रयोगेऽपि ॥७॥

उदाहरण—

हे मदिरेक्षणे ! तुम्हारा मुख कमल के समान सुन्दर है, भुजाएँ मृणाल के समान कोमल हैं, तथा तुम्हारी वेणी भ्रमरपंक्ति के समान अतिशय काली है ।६।

दूसरी वाक्योपमा—

जहाँ सुप्रसिद्ध समान धर्म अपने वाचक शब्दों से न कहा गया भी 'इव' आदि वाचक शब्दों के प्रयोग के बल से ज्ञात हो जाए, वहाँ दूसरी वाक्योपमा मानी जाती है ।७।

इयमिति । इयमन्या द्वितीया वाक्योपमा, यस्यां सामान्यं साधारणो धर्मस्तद्वाचिपदाप्रयोगेऽपि गम्यते । नन्वप्रयुक्तस्य पदस्य कथमर्थो गम्यत इत्याह—इवादिप्रयोगसामर्थ्यात् । इवादयो हि कस्य सादृश्यप्रतिपादनाय प्रयुज्यन्ते । यदि च प्रयुक्तैरपि तैरसौ न गम्यते तदानर्थकस्तेषां प्रयोगः स्यात् । यद्येवमुच्छेद एव सामान्यपदप्रयोगस्येत्याह—सुप्रसिद्धमिति । लोकप्रसिद्धमेव गम्यते नान्यदिति ।।

उदाहरणमाह—

शशिमण्डलमिव वदनं मृणालमिव भुजलतायुगलमेतत् ।
करिकुम्भाविव च कुचौ रम्भागर्भाविवोरू ते ।।८।।

शशीति । अत्र यथाक्रमं चारुत्वकोमलत्वोत्तुङ्गत्वगौरत्वान्यनुक्तान्यपि प्रसिद्धत्वात्प्रतीयन्ते ।।

तृतीयामाह—

वस्त्वन्तरमस्त्यनयोर्न सममिति परस्परस्य यत्र भवेत् ।
उभयोरुपमानत्वं सक्रममुभयोपमा सान्या ।।९।।

वस्त्वन्तरमिति । अनयोर्वस्तुनोर्वस्त्वन्तरं समं तुल्यं नास्तीत्यतः कारणाद्यस्यामुभयोरुपमानोपमेययोः क्रमेण परस्परमुपमानत्वं स्यात्सोभयोपमा । अन्या पूर्वविलक्षणा । इयमपि सामान्यस्य प्रयोगाप्रयोगाभ्यां द्विविधा ।।

प्रयोगोदाहरणं स्वयमाह—

शशिमण्डलमिव विमलं वदनं ते मुखमिवेन्दुबिम्बमपि ।
कुमुदमिव स्मितमेतत्स्मितमिव कुमुदं च धवलमिदम् ।।१०।।

उदाहरण—

हे सुन्दरि ! तुम्हारा मुख चन्द्रमण्डल के समान है, और भुजाएँ मृणाल के सदृश हैं। तुम्हारा स्तनयुगल हाथी के मस्तक के समान है, तथा जाँघें कदली वृक्ष के समान हैं।८।

यहाँ क्रमशः सुन्दर, कोमल, कठोर और वर्तुल समानधर्मों का यद्यपि कथन नहीं किया गया, तो भी प्रसिद्ध उपमानों के प्रयोग के कारण ये स्वतःगम्य हैं।

तीसरी वाक्योपमा—

कोई अन्य वस्तु इन दोनों वस्तुओं (उपमेय और उपमान) के समान नहीं है—इसी कारण जहाँ इन दोनों की क्रमशः एक-दूसरे से समता बतायी जाए, वहाँ उभयोपमा [नामक तीसरी वाक्योपमा] होती है।९।

उदाहरण—

तुम्हारा निर्मलमुख चन्द्रमण्डल के समान है, और चन्द्रबिम्ब तुम्हारे मुख के

शशिमण्डलमिति । अप्रयोगे तु यथा—

खमिव जलं जलमिव खं हंस इव शशी शशाङ्क इव हंसः ।
कुमुदाकारास्तारास्ताराकाराणि कुमुदानि ॥ इति ॥

चतुर्थीमाह—

सा स्यादनन्वयाख्या यत्रैकं वस्त्वनन्यसदृशमिति ।
स्वस्य स्वयमेव भवेदुपमानं चोपमेयं च ॥११॥

सेति । न विद्यतेऽन्वयो वस्त्वन्तरानुगमो यस्यामित्यनन्वयसंज्ञा सोपमा, यस्यामेकमेव वस्तु स्वयमेवोपमानमुपमेयं चात्मन एव भवेत् । कस्मात्, अनन्यसदृशमिति हेतोः । ननु यद्यन्यस्यात्रानुगमाभावस्तत्कथमौपम्यलक्षणमुपमालक्षणं वा घटते । नैष दोषः । यतोऽनन्यसमत्वं लक्षणं वस्तुनः सम्यक्स्वरूपं च यदा युगपद्विवक्षति वक्ता तदा सम्यक्स्वरूपप्रतिपादनं वस्त्वन्तराभिधानं विना न घटते । तदभिधाने चानन्यसमत्वं दुर्घटमिति कृत्वैकमेव वस्तूपमानोपमेयरूपतया विभिद्य वक्ति । अतः सामान्यमौपम्यलक्षणमुपमालक्षणं चास्ति । वस्त्वन्तरानन्वयश्चेत्यनन्वयोपमालक्षणम् ॥

सुश्लिष्टमुदाहरणमाह—

आनन्दसुन्दरमिदं त्वमिव त्वं सरसि नागनासोरु ।
इयमियमिव तव च तनुः स्फारस्फुरदुरुरुचिप्रसरा ॥१२॥

आनन्देति । हे करिकरोरु, त्वमिव त्वं सरसि गच्छसीत्याद्यन्वयः ॥

समान है । तुम्हारी मुस्कान कुमुद की तरह शुभ्र है, और यह शुभ्र कुमुद तुम्हारी मुस्कान के सदृश है ।१०।

जिन पदार्थों का आपस में उपमान-उपमेय रूप में प्रयोग होता हो उन्हें ही रचना में स्थान देना चाहिए, अन्य अप्रयुक्त पदार्थों को नहीं । जैसे नमिसाधु-प्रस्तुत इस उदाहरण में—

पानी आकाश के समान है, आकाश पानी के समान है, चन्द्रमा हंस के समान है, हंस चन्द्रमा के समान है, तारे कुमुदों के समान हैं, कुमुद तारों के समान हैं । चौथी वाक्योपमा—

जहाँ एक वस्तु की दूसरी से सदृशता न हो, [और वह] स्वयं ही अपनी उपमान और उपमेय हो, वहाँ अनन्वयोपमा [नामक चौथी वाक्योपमा] होती है ।११।

उदाहरण—

हे गजशुण्ड-सदृश जाँघों वाली ! तुम अपने ही समान बड़े तालाब में आनन्द एवं सुन्दरता के साथ प्रवेश कर रही हो । जाज्वल्यमान एवं अतिशय कान्तिमान्

पञ्चमीमाह—

सा कल्पितोपमाख्या यैरुपमेयं विशेषणैर्युक्तम् ।
तावद्भिस्तादृग्भिः स्यादुपमानं तथा यत्र ॥१३॥

सेति । यैर्यादृशैर्यत्संख्यैश्च विशेषणैर्युक्तमुपमेयम्, तादृग्भिरेव तत्संख्यैश्चोपमानमपि युक्तं यस्यां सा कल्पितोपमाख्या । कल्पिता चासावुपमा च तथाविधाख्या संज्ञा यस्या इति । विशेषणैरित्यतन्त्रम् । तेनैकस्य द्वयोश्च संग्रहः । किं तु बहुभिरौज्ज्वल्यं भवति ॥

उदाहरणम्—

मुखमापूर्णकपोलं मृगमदलिखितार्धपत्त्रलेखं ते ।
भाति लसत्सकलकलं स्फुटलाञ्छनमिन्दुबिम्बमिव ॥१४॥

मुखमिति । अत्र मुखमुपमेयं परिपूर्णकपोलं मृगमदलिखितार्धपत्त्रलेखमिति विशेषणद्वयोपेतम् । शशिबिम्बमुपमानमपि स्फुरत्षोडशकलं स्फुटकलङ्कं चेति ॥

षष्ठीमाह—

अनुपममेतद्वस्त्वित्युपमानं तद्विशेषणं चासत् ।
संभाव्य सयद्यर्थं या क्रियते सोपमोत्पाद्या ॥१५॥

तुम्हारा यह शरीर अपने सदृश ही है। अर्थात् तुम तथा तुम्हारा शरीर स्वयं अपने ही तुल्य हैं।१२।

पाँचवीं वाक्योपमा—

जहाँ जिस प्रकार के [और जितने] विशेषणों से युक्त उपमेय हों, यदि वैसे और उतने उपमान हों तो वहाँ कल्पितोपमा [नामक पाँचवीं वाक्योपमा] होती है।१३।

उदाहरण—

भरे हुए कपोलों से युक्त तथा कस्तूरी से आधी पत्र-रचना किया हुआ तुम्हारा मुख कलापूर्ण एवं लाच्छनयुक्त चन्द्रमण्डल की भाँति शोभित हो रहा है।१४।

यहाँ मुख और चन्द्रमा दोनों एकसमान विशेषणों से युक्त हैं।

छठी वाक्योपमा—

किसी अनुपम वस्तु (उपमेय) का कोई [सम्भव] न होता हुआ भी उपमान 'सयद्यर्थ' के द्वारा [उपयुक्त] विशेषणों से सम्भावित कर दिया जाए वहाँ उत्पाद्या [नामक छठी वाक्योपमा] होती है।१५।

'सयद्यर्थ' यदि, चेद् आदि शब्दों के प्रयोग को कहते हैं।

अनुपममिति उत्पाद्यत इत्युत्पाद्या । उत्पाद्यानामोपमा सा, प्रा क्रियते । किं कृत्वा । उपमानमुपमानविशेषणं च संभाव्य संभवि कृत्वा । कुतः । अनुपममुपमानविकलमेतद्वस्त्विति कारणात् । कीदृशम् । उपमानमसदविद्यमानम् । असतः कथं संभव इत्याह—सयद्यर्थं यदिचेदादिशब्दसहितमित्यर्थः उपलक्षणं च सयद्यर्थशब्दः । यस्मादभूतपूर्वासंभवादिप्रयोगेऽपि भवति । यथा माघस्य—

मृणालसूत्रामलमन्तरेण स्थितश्चलच्चामरयोर्द्वयं सः ।
भेजेऽभितःपातुकसिद्ध सिन्धोरभूतपूर्वां रुचमम्बुराशेः ।।

इत्यादि ।।

उदाहरणम्—

कुमुददलदीधितीनां त्वक्संभूय च्यवेत यदि ताभ्यः ।
इदमुपमीयेत तया सुतनोरस्याः स्तनावरणम् ।।१६।।

कुमुदेति । अत्र कुमुददलदीधितित्वमुपमानम्, तद्विशेषणं च्यवनं च द्वयमपि सयद्यर्थं संभावितम् । तथा—

सुवृत्तमुक्ताफलजालचित्रितं भवेदखण्डं यदि चन्द्रमण्डलम् ।
श्रमाम्बुबिन्दूत्कर राजितं ततो मुखं रतावित्युपमीयते प्रिये ।।

'ततो मुखं तेन तवोपमीयते' इति वा पाठः । अत्र पूर्णचन्द्रमण्डलस्य सुवृत्तमुक्ताफलजालचित्रितत्वं विशेषणमेव संभावितमिति ।।

एवं वाक्योपमां षड्विधामभिधायेदानीं समासोपमामाह—

सामान्यपदेन समं यत्र समस्येत तूपमानपदम् ।
अन्तर्भूतेवार्था सात्र समासोपमा प्रथमा ।।१७।।

उदाहरण—

यदि कुमुदों के कान्तिमान् पत्तों की त्वचा (छाल) एकत्रित हो जाए, और उन [त्वचाओं] से [रस] स्रुत होने लगे तो इस सुन्दर शरीर वाली [सद्यःस्नाता नायिका] के स्तनावरण की उपमा उससे दी जा सकती है ।१६।

इसी प्रकरण में नमिसाधु ने भी ऐसा ही एक अन्य पद्य उद्धृत किया है :

यदि अखण्डित चन्द्रमण्डल गोल-गोल मोतियों से जटित हो, तभी हे प्रिये ! रतिकाल में श्रमवश पसीने की बूंदों से शोभित तुम्हारे मुख की उपमा उस [चन्द्रमा] से दी जा सकती है ।

किन्तु हमारे विचार में 'सयद्यर्थं' के प्रयोग का यह तात्पर्य कदापि नहीं है कि इसी के बल पर असम्भव परिकल्पनाएँ भी कर ली जाएँ । अतः उक्त दोनों उदाहरण सहृदय-हृदयावर्जक नहीं हैं ।

सामान्येति । उपमानपदं चन्द्रकमलादिकं सामान्यपदेन सुन्दरशब्दादिना यत्र समस्येत सा समासोपमासु मध्ये प्रथमा । तुर्विशेषे । विशेषस्तु वाक्योपमातः समासकृत एव । यद्युपमा कथमिवादिपदं न श्रूयत इत्याह—अन्तर्भूत इवार्थ औपम्यं यस्याः सा तथोक्ता ॥

उदाहरणम्—

मुखमिन्दुसुन्दरमिदं बिसकिसलयकोमले भुजालतिके ।
जघनस्थली च सुन्दरि तव शैलशिलाविशालेयम् ॥१८॥

मुखमिति । अत्रेन्दुरिव सुन्दरमित्यादिविग्रहः ॥

प्रकारान्तरमाह—

पदमिदमन्यपदार्थे समस्यतेऽथोपमेयवचनेन ।
यस्यां तु सा द्वितीया सर्वसमासेति संपूर्णा ॥१९॥

पदमिति । इदं पूर्वोक्तं सामान्योपमानसमासपदमथानन्तरमुपमेयवचनेनान्यपदार्थे यत्र समस्यते सा सर्वपदसमासात्संपूर्णा समासोपमा द्वितीया ॥

उदाहरणम्—

शरदिन्दुसुन्दरमुखी कुवलयदलदीर्घलोचना सा मे ।
दहति मनः कथमनिशं रम्भागर्भाभिरामोरूः ॥२०॥

समासोपमा

जहाँ उपमान पद का सामान्य पद (समानधर्म सूचक पद) के साथ समास करके 'इव' आदि वाचक शब्दों को [उसी समस्त पद में] ही अन्तर्भूत किया जाए, वहाँ प्रथमा समासोपमा होती है ।१७।

उदाहरण—

हे सुन्दरि ! तुम्हारा यह मुख चन्द्र [के समान] सुन्दर है, दोनों भुजलताएँ कमलनाल [के समान] कोमल हैं, तथा जाँघें पर्वत की शिला के समान विशाल हैं ।१८।

यहाँ 'इन्दुसुन्दरम्' और 'त्रिसकिसलयकोमले' इन दोनों समस्त पदों में 'इव' वाचक शब्द स्वतःगृहीत है ।

अन्य प्रकार : सम्पूर्ण समासोपमा—

जहाँ पूर्वोक्त [उपमान-सामान्य समस्त] पदों का उपमेय-वचनों के साथ एक अन्य पदार्थ [के रूप] में समास कर दिया जाए, वहाँ सब पदों के समस्त होने के कारण दूसरी सम्पूर्णा समासोपमा होती है ।१९।

उदाहरण—

शरत्कालीन चन्द्रमा के समान सुन्दर मुखवाली, कमलपत्र के समान विशाल

शरदिति । अत्र शरदिन्दुशब्दसुन्दरशब्दयोः पूर्ववत्समासं कृत्वा ततो मुखेनोपमेयेन सह नायिकायामन्यपदार्थे समासः ।

भूयः प्रकारान्तरमाह—

उपमानपदेन समं यत्र समस्येत चोपमेयपदम् ।
अन्यपदार्थे सोदितसामान्येवाभिधेयान्या ॥२१॥

उपमानेति । उपमानपदेन सह यत्रोपमेयपदमन्यपदार्थेन सह समस्यते सान्या समासोपमा । चः पुनरर्थे भिन्नक्रमः । सा पुनः समासेनोक्तौ सामान्यमिवार्थश्च यस्यां सा तथोक्ता ॥

उदाहरणम्—

नवविकसितकमलकरे कुवलयदललोचने सितांशुमुखि ।
दहसि मनो यत्तत्किं रम्भागर्भोरु युक्तं ते ॥२२॥

नवेति । अत्र नवविकसितकमलमिव रम्यौ करौ यस्या इति बहुव्रीहिः ॥

नेत्रों से युक्त तथा कदलीवृक्ष के समान सुन्दर जाँघों वाली यह रमणी क्यों रात-दिन मेरे मन को जला रही है ।२०।

यहाँ 'शरदिन्दुसुन्दरमुखी' में उपमान, समान धर्म और उपमेय इन सबका समास है । यह सम्पूर्णपद नायिका (अन्य पदार्थ) का वाचक है । इस समस्त पद में 'इव' शब्द स्वतःगृहीत है ।

अन्य समासोपमा—

जहाँ उपमान के साथ उपमेय का समास अन्य पदार्थ [के रूप] में किया जाए, तथा सामान्य अर्थात् समान धर्म [स्वतः] कथित हो जाए वहाँ एक अन्य समासोपमा मानी जाती है ।२१।

उदाहरण—

हे चन्द्रमुखि ! नवविकसित कमल के समान [सुन्दर] हाथों वाली ! कमल-दल के समान [कोमल] लोचनों वाली ! तथा कदली वृक्ष के समान [वर्तुल] जाँघों वाली ! क्या मेरे मन को जलाते रहना तुम्हें उचित है ।२२।

यहाँ 'नवविकसितकमलकरे', 'कुवलयदललोचने' और 'रम्भागर्भोरु' इन समस्त पदों में उपमान और उपमेय का समास अन्य पदार्थ—नायिका—का वाचक है । इन पदों में समान धर्म का स्वतःग्रहण है ।

अथ प्रत्ययोपमामाह—

उपमानात्सामान्ये प्रत्ययमुत्पाद्य या प्रयुज्येत ।
सा प्रत्ययोपमा स्यादन्तर्भूतेवशब्दार्था ॥२३॥

उपमानादिति । उपमानादुपमानपदादन्यतो वा धात्वादिकात्प्रत्ययं सामान्येन साधारणधर्मविषय उत्पाद्य या प्रयुज्यते सा प्रत्ययोपमा । सा च प्रत्ययान्तशब्देऽन्तर्भूतेवशब्दा ॥

उदाहरणम्—

पद्मायते मुखं ते नयनयुगं कुवलयायते यदिदम् ।
कुमुदायते तथा स्मितमेवं शरदेव सुतनु त्वम् ॥२४॥

पद्मायत इति । पद्ममिवाचरतीत्यादि वाक्यम् । एवं धातोः प्रत्यये उष्ट्रकोशीत्यादि द्रष्टव्यमिति ॥

एवमुपमात्रयमभिधायेदानीमेतद्भेदान्सामान्येनाह—

मालोपमेति सेयं यत्रैकं वस्त्वनेकसामान्यम् ।
उपमीयेतानेकैरुपमानैरेकसामान्यैः ॥२५॥

प्रत्ययोपमा

जहाँ उपमान शब्द का सामान्यसूचक शब्द के साथ प्रत्यय लगाकर समास करने पर 'इव' आदि वाचक शब्दों का अर्थ [उस समस्त पद में] अन्तर्भूत हो जाए वहाँ प्रत्ययोपमा होती है।२३।

उदाहरण—

हे सुन्दर शरीर वाली ! तुम तो साक्षात् शरत् हो। [क्योंकि] तुम्हारा मुख कमल के समान आचरण करता है, आँखें नील कमल के समान आचरण करती हैं, तथा तुम्हारी मुस्कान कुमुदसदृश आचरण करती है।२४।

यहाँ 'पद्मायते', 'कुवलयायते' और 'कुमुदायते' पदों में क्यङ् प्रत्यय का प्रयोग किया गया है।

मालोपमा

जहाँ अनेक सामान्यों (समान धर्मों) वाली एक [उपमेय] वस्तु की उपमा अनेक सामान्यों वाले अनेक उपमानों के एक-एक सामान्य के साथ दी जाए वहाँ मालोपमा होती है।२५।

इसी प्रसंग में नमिसाधु-प्रस्तुत 'गायन्ति किन्नरगणाः...' पद्य का अर्थ है—किन्नरगण किन्नरियों के साथ हिमाचल के उच्च शिखरों की कन्दराओं में तुम्हारा

मालोपमेति । यत्रैकमुपमेयं वस्त्वनेकसामान्यमनेकधर्मकमेकसामान्यैरेकैकधर्मयुक्तैरनेकैरुपमानैरुपमीयते सेयमित्यमुना प्रकारेण मालोपमा । अथायं कोऽलंकारः—

गायन्ति किंनरगणाः सह किंनरीभिरुत्तुङ्गशृङ्गकुहरेषु हिमाचलस्य ।
क्षीरेन्दुकुन्ददलशङ्खमृणालनालनीहारहारहरहाससितं यशस्ते ।।

मालोपमैवेत्याहुः । यत एकत्वेऽपि शौक्ल्यस्यानेकसामान्यं विद्यत एव । तस्यानेकरूपत्वादन्यादृशमेव हि तच्छङ्खेऽन्यादृशं चन्द्रादौ तच्च सर्वं यशसि विद्यत इति । केचित्तु मालोपमाभास इत्याहुः ।।

उदाहरणम्—

श्यामालतेव तन्वी चन्द्रकलेवातिनिर्मला सा मे ।
हंसीव कलालापा चैतन्यं हरति निद्रेव ।।२६।।

श्यामालतेति । अत्रोपमेया कान्ता तनुत्वाद्यनेकधर्मयुक्ता । श्यामालतादीन्येकैकधर्मयुक्तान्युपमानानि । एषा वाक्योपमा । अन्ये त्विमे—

नवश्यामालतातन्वी शरच्चन्द्रांशुसप्रभा ।
मत्तहंसीकलालापा कस्य सा न हरेन्मनः ।।

समासोपमेयम्—

शरच्चन्द्रायसे मूर्तौ त्वं कृतान्तायसे युधि ।
दाने कर्णायसे राजन्सुनीतौ भास्करायसे ।।

प्रत्ययोपमेयम् ।।

यश गाते हैं, जो [यश] दूध, चन्द्र, कुन्दपत्र, शंख, कमलनाल, पाला, मुक्ताहार और शिव के अट्टहास के समान श्वेत है ।

इस पद्य में 'यश' की उपमा दूध, चन्द्र आदि कई श्वेत पदार्थों से दी गयी है, अतः यहाँ 'मालोपमा' है । किन्तु कई आचार्य यहाँ 'मालोपमाभास' मानते हैं क्योंकि उक्त पदार्थों की श्वेतता एक-समान नहीं है, जबकि इनके उपमेय 'यश' की कवि-ख्यात श्वेतता का एक निश्चित रूप ही माना जाना चाहिए ।

उदाहरण—

वह सुन्दरी श्याम लता के समान कोमल, चन्द्रकला की भाँति अति निर्मल, हंसिनी के समान मधुर बोलनेवाली तथा निद्रा के सदृश चेतना को हरनेवाली है ।२६।

इसी प्रसंग में नमिसाधु-प्रस्तुत दो पद्य विचारणीय हैं—

(१) 'नवश्यामलतातन्वी···' अर्थात् नवीन और श्यामल लता के समान क्षीण कटि वाली, शरत्कालीन चन्द्र की किरणों के समान सुन्दर, मस्त हंसिनी के समान मधुर बोलने वाली वह किसका मन हरण नहीं करती ?

भेदान्तरमाह—

अर्थानामौपम्ये यत्र बहूनां भवेद्यथापूर्वम् ।
उपमानमुत्तरेषां सेयं रशनोपमेत्यन्या ॥२७॥

अर्थानामिति । अत्रार्थानामुपमानोपमेयानां बहूनां सादृश्ये सति तेषामेव मध्याद्यथापूर्वं यो यः पूर्वः स स उत्तरेषामुपमानं भवेत्सेयं रशनासादृश्याद्रशनोपमेत्यन्या । यथा रशनायां परस्परमाभरणानां शृङ्खलाकटकवत्सम्बन्ध एवमिहार्थानामिति पूर्ववत् ।

उदाहरणम्—

नभ इव विमलं सलिलं सलिलमिवानन्दकारि शशिबिम्बम् ।
शशिबिम्बमिव लसद्द्युति तरुणीवदनं शरत्कुरुते ॥२८॥

नभ इति । अत्र गगनादिरर्थः पूर्व उत्तरेषां सलिलादीनामुपमानम् । एषा वाक्यरशनोपमा । अन्ये त्विमे—

शरत्प्रसन्नेन्दुसुकान्ति ते मुखं मुखश्रि लीलाम्बुजमम्बुजारुणौ ।
करौ करश्रीरवतंसपल्लवो वरानने पल्लवलोहितोऽधरः ॥

समासरशनोपमेयम् ।

चन्द्रायते शुक्लरुचाद्य हंसो हंसायते चारुगतेव कान्ता ।
कान्तायते तस्य मुखेन वारि वारीयते स्वच्छतया विहायः ॥

प्रत्ययरशनोपमेयम् ॥

---

(२) 'शरच्चन्द्रायसे···' अर्थात् हे राजन् ! तुम आकार में (सुन्दरता में) शरत्कालीन चन्द्र के समान, युद्ध में यमराज के समान, दान में कर्ण के समान और सुनीति में सूर्य के समान हो ।

इन दोनों पद्यों में क्रमशः समासगता मालोपमा और प्रत्ययगता मालोपमा माननी चाहिए ।

रशनोपमा

जहाँ अनेक अर्थों (उपमान-उपमेयों) की सदृशता होने पर [उन्हीं में से] पूर्ववर्ती अर्थ [उपमेय] को उत्तरवर्ती अर्थ का उपमान बनाते चलें वहाँ रशनोपमा होती है ।२७।

उदाहरण—

जल आकाश के समान स्वच्छ है, चन्द्रबिम्ब जल के समान आनन्ददायी है, तथा चन्द्रबिम्ब के समान तरुणी का कान्तिपूर्ण मुख शरद् ऋतु बना रहा है ।२८।

नमिसाधु ने समासगता रशनोपमा का भी निम्नोक्त उदाहरण प्रस्तुत किया है—

भूयोऽपि भेदान्तरमाह—

क्रियतेऽर्थयोस्तथा या तदवयवानां तथैकदेशानाम् ।
परमन्या ते भवतः समस्तविषयैकदेशिन्यौ ।।२६।।

क्रियत इति । अर्थयोरुपमानोपमेययोरवयविनोस्तदवयवानां च सहजाहार्योभयरूपाणां या क्रियते, न त्ववयविनोः, एषान्या एकदेशविषया । इति द्वितीयः प्रकारः ।।

उदाहरणम्—

अलिवलयैरलकैरिव कुसुमस्तबकैः स्तनैरिव वसन्ते ।
भान्ति लता ललना इव पाणिभिरिव किसलयैः सपदि ।।३०।।

अलिवलयैरिति । अत्र लता ललना अवयविन्योऽलिवलयादयश्चावयवाः सर्व एवोपमिताः । इत्येषा समस्तविषया ।।

'शरत्प्रसन्नेन्दुसुकान्ति···' अर्थात् हे सुन्दर आननवाली ! तुम्हारा मुख शरत्कालीन निर्मल चन्द्र की कान्ति को धारण करता है, मुख की कान्ति लीला-कमल के सदृश है । दोनों हाथ कमल के समान लाल हैं, हाथों की शोभा कर्णभूषण [के रूप में धारण किये जाने वाले] पल्लव के तुल्य है, और अधर की कान्ति पल्लव के समान अरुण है ।

मुख—मुखश्री, अम्बुज—अम्बुज, कर—करश्री, पल्लव—पल्लव इनका उत्तरोत्तर प्रयोग रशनोपमा का सूचक है । इसके अतिरिक्त यहाँ समस्त पदों का भी प्रयोग है ।

एक अन्य प्रकार—

जहाँ [अवयवीभूत] दोनों अर्थों (उपमान और उपमेय) की, तथा उनके एकदेशीय अवयवों की परस्पर उपमा दी जाए, वहाँ एक अन्य उपमा होती है । इसके दो प्रकार हैं—समस्तविषया और एकदेशिनी ।२६।

उदाहरण (समस्तविषया)—

वसन्त ऋतु में ये लताएँ ललनाओं के समान हैं, [क्योंकि] इनके भ्रमरसमूह केशपाश के समान हैं, पुष्पगुच्छ स्तनों के समान हैं और पत्र हाथों के समान हैं ।३०।

इस पद्य में लताएँ और ललनाएँ अवयवी हैं, तथा भ्रमर-समूह और केशपाश आदि अवयव हैं । इन दोनों का उल्लेख किया गया है ।

[इस पद्य में 'सपदि' शब्द पादपूर्त्यर्थ प्रयुक्त है ।]

कमलदलैरधरैरिव दशनैरिव केसरैर्विराजन्ते ।
अलिवलयैरलकैरिव कमलैर्वदनैरिव नलिन्यः ॥३१॥

कमलदलैरिति । अत्रावयवानामेव कमलदलादीनामौपम्यं न त्ववयविन्या नलिन्याः प्रतीयते । [वास्या] इत्येषैकदेशविषया । द्विविधापि वाक्योपमेयम् । अन्ये त्विमे—

मृणालिकाकोमलबाहुयुग्मा सरोजपत्रारुणपाणिपादा ।
सरोजिनीचारुतनुर्विभाति प्रियालिनीलोज्ज्वलकुन्तलासौ ॥

तथा—

पद्मचारुमुखी भाति पद्मपत्त्रायतेक्षणा ।
दशनैः केसराकारैरलिनीलशिरोरुहा ॥

समासोपमेयं द्विधा ।

लतायसेऽतितन्वी त्वमोष्ठस्ते पल्लवायते ।
सितपुष्पायते हासो भृङ्गायन्ते शिरोरुहाः ॥
मुखेन पद्मकल्पेन भाति सा हंसगामिनी ।
दोर्भ्यां मृणालकल्पाभ्यामलिनीलैः शिरोरुहैः ॥

प्रत्ययोपमेयं द्विधा ॥

उदाहरण (एकदेशिनी)—

कमलिनी के पत्र होंठों के समान, केसर दाँतों की भाँति, भ्रमरसमूह केशों के सदृश तथा कमल मुखों के समान शोभायमान हैं ।३१।

इस पद्य में कमलिनी की उपमा नायिका (अवयवी) से दी गयी है, किन्तु उसका उल्लेख नहीं किया गया है, केवल पत्र और होंठ आदि अवयवों का उल्लेख किया गया है ।

नमिसाधु ने निम्नोक्त चार उदाहरण प्रस्तुत किये हैं—

(१) उस प्रिया के बाहुयुगल मृणालिनी के समान कोमल हैं, उसके हस्त और चरण-कमल पत्र के सदृश [मृदु] हैं, उसका शरीर कमलिनी की भाँति कमनीय है, और उसके केश भ्रमरों के समान काले और चमकदार हैं ।

(२) उस रमणी का मुख कमल के समान सुन्दर है, नेत्र कमल-पत्र के समान विशाल हैं, उसके दाँत केसर की भाँति हैं, और केश भ्रमरवत् काले हैं ।

इन दोनों पद्यों में समस्त पदों का प्रयोग है, तथा ये दोनों एकदेशिनी मालोपमा के उदाहरण हैं, क्योंकि यहाँ अवयवों के तो उपमान प्रस्तुत किये गये हैं, अवयवी (नायिका) का उपमान प्रस्तुत नहीं किया गया ।

अथोत्प्रेक्षा—

अतिसारूप्यादैक्यं विधाय सिद्धोपमानसद्भावम्।
आरोप्यते च तस्मिन्नतद्गुणादीति सोत्प्रेक्षा ॥३२॥

अतिसारूप्यादिति । उपमानोपमेययोरतिसादृश्याद्धेतोरैक्यमभेदं विधाय । कीदृशं तत् । सिद्ध उपमानस्यैव, न तूपमेयस्य, सद्भावः सत्त्वं यत्र तत्तथाविधम् । अनन्तरं च तस्मिन्नुपमाने तस्योपमानस्य ये गुणक्रिये न संभवतस्ते समारोप्येते यत्र सा । इत्यमुना प्रकारेणोत्प्रेक्षा भण्यते । चशब्दोऽतद्गुणाद्यनध्यारोपितस्यापि समुच्चयार्थः । येन सिद्धोपमानसद्भावे तयोरभेदमात्रेऽप्युत्प्रेक्षा दृश्यते । यथा—

तं वदन्तमिति विष्टरश्रवाः श्रावयन्नथ समस्तभूभृतः ।
व्याजहार दशनांशुमण्डलव्याजहारशबलं दधद्वपुः ॥

इत्यादि ॥

उदाहरणम्—

चम्पकतरुशिखरमिदं कुसुमसमूहच्छलेन मदनशिखी ।
अयमुच्चैरारूढः पश्यति पथिकान्दिधक्षुरिव ॥३३॥

चम्पकेति । अत्रोपमेयश्चम्पकराशिरुपमानं मदनाग्निस्तयोर्लौहित्येन सारूप्यादैक्यं सिद्धोपमानसद्भावं विधाय ततोऽग्नेर्यद्दर्शनमचेतनत्वादसंभवि तदारोपितमिति ॥

---

(३) अत्यन्त कृश [कटिवाली] तुम लता के समान हो, तुम्हारा होंठ पल्लव के समान है, तुम्हारी मुस्कान श्वेत पुष्प-जैसी है और केश भौंरों-जैसे हैं ।

(४) वह हँसगमना पद्म-समान मुख से, मृणाल-तुल्य भुजाओं से तथा भ्रमरों के समान काले केशों से शोभित हो रही है ।

ये दोनों उदाहरण प्रत्ययगत एकदेशिनी मालोपमा के हैं ।

२. उत्प्रेक्षा

जहाँ उपमान के प्रसिद्ध होने के कारण तथा [उपमान और उपमेय में] अति सादृश्य होने के कारण अभेद की स्थापना हो, तथा [उपमान के] गुण [अथवा क्रिया] के [उपमेय में] सम्भव न होने पर उनका उपमेय में आरोप हो, वहाँ उत्प्रेक्षा अलंकार होता है ।३२।

उदाहरण—

यह चम्पक वृक्ष का शिखर पुष्पसमूह के व्याज से कामाग्नि के समान ऊँचे चढ़कर वियोगियों को जलाने की इच्छा से देख रहा है ।३३।

यहाँ चम्पक वृक्ष उपमेय है । कामाग्नि उपमान है । इन दोनों में लाल रंग की समानता के आधार पर दोनों में एक धर्म—देखने की इच्छा—की कल्पना की गयी है ।

प्रकारान्तरमाह—

सान्येत्युपमेयगतं यस्या संभाव्यतेऽन्यदुपमेयम् ।
उपमानप्रतिबद्धापरोपमानस्य तत्त्वेन ॥३४॥

सेति । इतीत्थं सान्योत्प्रेक्षा यत्रोपमेयस्थमुपमेयान्तरमुपमानप्रतिबद्धस्योपमानान्तरस्य तत्त्वेन ताद्रूप्येण संभाव्यते ॥

उदाहरणम्—

आपाण्डुगण्डपालीविरचितमृगनाभिपत्ररूपेण ।
शशिशङ्कयेव पतितं लाञ्छनमस्या मुखे सुतनोः ॥३५॥

आपाण्डुगण्डेति । अत्र शश्युपमानं तत्प्रसिद्धमपरं लाञ्छनमुपमानान्तरम् । तत्सादृश्येनोपमेयं नायिकामुखगतमन्यदुपमेयं मृगनाभिपत्रलक्षणं संभावितमिति ।

भूयोऽपि भेदान्तरमाह—

यत्र विशिष्टे वस्तुनि सत्यसदारोप्यते समं तस्य ।
वस्त्वन्तरमुपपत्त्या संभाव्यं सापरोत्प्रेक्षा ॥३६॥

यत्रोत्प्रेक्षायां शोभनत्वेनाशोभनत्वेन वा विशेषणेन विशिष्टे वस्तुन्युपमेयरूपे

इसी प्रसंग में नमिसाधु ने एक अन्य उदाहरण प्रस्तुत किया है—'तं वदन्तमिति विष्ठरश्रवाः···'अर्थात् उसके ऐसा कहने पर भगवान् विष्णु ने दाँतों से निकलती हुई [स्वच्छ] किरण-समूह के व्याज से शरीर को मानो हार से विचित्रवर्ण बनाते हुए तथा सब राजाओं को सुनाते हुए इस प्रकार कहा ।

अन्य प्रकार—

जहाँ उपमान से सम्बद्ध अन्य उपमान-तत्त्व के साथ उपमेय से सम्बद्ध अन्य उपमेय की सदृशता की सम्भावना की जाए वहाँ अन्य उत्प्रेक्षा होती है ।३४।

इस सुन्दरी के शुभ्र कपोल-प्रदेश पर कस्तूरी से बनी हुई पत्र-रचना ऐसे [विराजित है] जैसे चन्द्रमा पर अवस्थित कलंक ।३५।

यहाँ चन्द्रमा उपमान है तथा [उससे सम्बद्ध] कलंक एक अन्य उपमान है । इनकी सदृशता नायिका-मुख तथा [उससे सम्बद्ध कस्तूरी-पत्र रचना] से निर्दिष्ट की गयी है ।

एक अन्य भेद—

जहाँ किसी, [अच्छे अथवा बुरे] विशेषण से युक्त वस्तु (उपमेय) में [ऐसी] अविद्यमान समानता का आरोप किया जाता है, [जिसके विषय में] अन्य वस्तु की सम्भावना किसी युक्ति से कर दी जाती है, वहाँ एक अन्य उत्प्रेक्षा होती है ।३६।

सत्यविद्यमानमेव वस्त्वन्तरमुपमानलक्षणं समं समानमारोप्यते सापरान्योत्प्रेक्षा। ननु यद्यविद्यमानं कथं सममित्यारोपस्तस्येत्याह—उपपत्त्या युक्त्या संभाव्यं सावसरत्वात्संभावनायोग्यं यत इत्यर्थः ॥

उदाहरणम्—

अतिघनकुङ्कुमरागा पुरः पताकेव दृश्यते संध्या।
उदयतटान्तरितस्य प्रथयत्यासन्नतां भानोः ॥३७॥

अतिघनेति। अत्र विशिष्टे संध्याख्ये वस्तुन्यसदेव वस्त्वन्तरं पताकाख्यं साम्यादारोपितम्। तच्च युक्त्या संभाव्यम्। यतो रविरथे पताकया भाव्यम्, साप्युदयाचलव्यवहितस्य रवेर्दृश्यमाना सती नैकटचं प्रकटयति। अथ यत्र साम्यमात्रे सति विनैवोपपत्त्या संभावना भवति न चोपमाव्यवहारस्तत्र कोऽलंकारः। यथा—

यश्चाप्सरोविभ्रममण्डनानां संपादयित्रीं शिखरैर्बिभर्ति।
बलाहकच्छेदविभक्तरागामकालसंध्यामिव धातुमत्ताम् ॥

तथा—'आवर्जिता किंचिदिव स्तनाभ्याम्' इत्यादिषु। अत्र ह्यकालसंध्यादीनां संभावने न काचिदुपपत्तिर्निर्दिष्टा। न चाप्युपमाव्यवहारः। यतः सिद्धमुपमानं भवति। न वा काले सिद्धत्वम्। तथा यद्यर्थाश्रवणान्नाप्युत्पाद्योपमाव्यवहारः। न चाप्यतिशयोत्प्रेक्षा संभवोऽस्ति। अत्रोच्यते—उपमायामसंभव उत्प्रेक्षायां त्वनुपपत्तिरत उभयत्रापि लक्षणस्य न्यूनतायामुपमाभासो वा स्यादुत्प्रेक्षाभासो वा। एवम् 'पृथिव्या इव मानदण्डः' इत्यादावपि द्रष्टव्यम्। सूत्रकारेणानुक्तं भेदान्तरमपि चास्यां विद्यते—

कर्तुरुपमानयोगः सत्यौपम्येऽनिवादिरपि यत्र।
संभाव्यतेऽनुरोधाद्विज्ञेया सा परोत्प्रेक्षा ॥

उदाहरण—

बहुत घने कुंकुम राग से अरुण यह [प्रातःकालीन] सन्ध्या [रवि-रथ की] पताका के समान शोभित हो रही है, और [मानो] उदयाचल की ओट में छिपे सूर्य की समीपता को सूचित कर रही है।३७।

इसी प्रसंग में नमिसाधु-प्रस्तुत तीन उदाहरण अवलोकनीय हैं—

१. 'यश्चापसरोविभ्रम...' अर्थात् जो [हिमालय] अपने शिखरों पर अप्सराओं की विलास-प्रसाधन सामग्री को प्रस्तुत करने वाली [गैरिक आदि] धातुओं को इस प्रकार धारण करता है, मानो मेघों के खण्डों से विभक्त हुए रंगों वाली अकाल-सन्ध्या हो।

२. जहाँ उपमा होने पर भी कर्ता के उपमान में इव आदि का प्रयोग न हो, उसे एक अन्य [प्रकार की] उत्प्रेक्षा जानना चाहिए। जैसे—

यथा—

यः करोति वधोदर्का निःश्रेयसकरीः क्रियाः।
ग्लानिदोषाच्छिदः स्वच्छाः स मूढः पङ्कयत्यपः॥

तथा—

अरण्यरुदितं कृतं शवशरीरमुद्वर्तितं स्थलेऽब्जमवरोपितं सुचिरमूषरे वर्षितम्।
श्वपुच्छमवनामितं बधिरकर्णजापः कृतः कृतान्धमुखमण्डना यदबुधो जनः सेवितः॥

अथ रूपकम्—

यत्र गुणानां साम्ये सत्युपमानोपमेययोरभिदा।
अविवक्षितसामान्या कल्प्यत इति रूपकं प्रथमम्॥३८॥

यत्रेति। यत्रोपमानोपमेययोर्गुणानां साम्ये तुल्यत्वे सति विद्यमाने प्रतीतिपथवारिण्या भिदा तयोरैक्यं कल्प्यते तदित्यमुना प्रकारेण रूपकं प्रथमम्। उत्तरत्र समासग्रहणादिह प्रथमशब्देन वाक्यरूपकं विवक्षितम्। उत्प्रेक्षायामप्यभेदो विद्यते, ततस्तन्निरासार्थमाह—अविवक्षितसामान्येति। सदप्यत्र सामान्यं न विवक्ष्यते। सिंहो देवदत्त इति। उत्प्रेक्षायां तु छद्मलक्ष्मव्याजव्यपदेशादिभिः शब्दैरुपमानोपमेययोरभेदो भेदश्च विवक्षित इति। परमार्थतस्तूभयत्राभेद एवेति॥

उदाहरणम्—

साक्षादेव भवान्विष्णुर्भार्या लक्ष्मीरियं च ते।
नान्यद्भूतसृजा सृष्टं लोके मिथुनमीदृशम्॥३९॥

साक्षादिति। सुगममेव॥

'यः करोति वधोदर्काः···' अर्थात् जो व्यक्ति शुभ कार्यों को भी घातक बना देता है, वह मूर्ख श्रम आदि कष्ट को दूर करने वाले निर्मल जल को मलिन करता है।

३. अरण्यरुदितं कृतम्···' अर्थात् जिस व्यक्ति ने मूर्ख की सेवा की, उसने [मानो] अरण्यरोदन किया, शव के शरीर को उबटन लगाया, स्थल पर कमल उगाने की चेष्टा की, देर तक बंजर भूमि का सिंचन किया, कुत्ते की पूँछ को झुकाने की चेष्टा की, बहरे से बातें कीं और अन्धे के मुख का प्रसाधन किया।

३. रूपक

जहाँ उपमान और उपमेय के गुणों की समानता होने पर ऐसा अभेद कल्पित किया जाता है जिसके समान धर्म का निर्देश नहीं किया जाता, वहाँ प्रथम रूपक अलंकार होता है।३८।

उदाहरण—

आप साक्षात् विष्णु हैं। आपकी यह पत्नी [साक्षात्] लक्ष्मी हैं। संसार में विधाता ने अन्य किसी ऐसे दम्पती की सृष्टि नहीं की।३९।

अथ भेदान्तरमाह—

उपसर्जनोपमेयं कृत्वा तु समासमेतयोरुभयोः ।
यत्तु प्रयुज्यते तद्रूपकमन्यत्समासोक्तम् ।।४०।।

उपसर्जनेति । एतयोरुपमानोपमेययोः समासं कृत्वा यत्पुनः प्रयुज्यते तदपरं समासोक्तं रूपकम् । समासोपमाया रूपकत्वनिवृत्त्यर्थमाह—उपसर्जनमप्रधानमुपमेयं यत्र । यथा—दुर्जन एव पन्नगो दुर्जनपन्नगः । समासोपमायां तूपमानमुपसर्जनम् । यथा—शशीव मुखं यस्याः सा शशिमुखी । तु शब्दः समुच्चये । उभयग्रहणं नियमार्थम् । उभयोरेव समासे, न तृतीयस्यापि सामान्यपदस्येत्यर्थः ।।

सामान्यं रूपकभेदद्वयमेतदभिधायेदानीमेतद्विशेषानाह—

सावयवं निरवयवं संकीर्णं चेति भिद्यते भूयः ।
द्वयमपि पुनर्द्विधैतत्समस्तविषयैकदेशितया ।।४१।।

सावयवमिति । एतद्वाक्यसमासलक्षणं रूपकद्वयं भूयः सावयवं निरवयवं संकीर्णं चेत्यमुना प्रकारेण त्रिधा भिद्यते । पुनश्च द्वयमपि वाक्यसमासलक्षणमेतद्रूपकं समस्तविषयतयैकदेशितया च द्विधा भिद्यते । न तु सावयवादिभेदभिन्नं सत् । निरवयवादिषु सर्वत्रासंभवात् । तेनात्र भेदद्वये सावयवादिप्रभेदानुप्रवेशो यथासंभवमेव भवतीति ।।

यहाँ उपमान और उपमेय के ऐक्य-कथन में किसी समानधर्म का निर्देश नहीं किया गया ।

एक अन्य प्रकार (समासरूपक)—

जहाँ उपमान और उपमेय का समास करके उपमेय को अप्रधान रूप में प्रयुक्त किया जाता है, उसे एक अन्य प्रकार का रूपक—समासरूपक कहते हैं ।४०।

नमिसाधु ने समासरूपक और समासोपमा में भेद निर्दिष्ट करते हुए कहा है कि समासरूपक में उपमेय की अप्रधानता रहती है और समासोपमा में उपमान की । जैसे—(१) दुर्जन है पन्नग—दुर्जनपन्नगः (रूपक) । (२) शशि के समान मुख है जिसका—शशिमुखी (उपमा) ।

रूपक के भेद—

समास के [तीन] भेद हैं—सावयवव, निरवयव और संकीर्ण । [इनमें से प्रथम] दोनों के दो-दो भेद हैं—समस्तविषय और एकदेशी ।४१।

इदानीमेषामेव लक्षणमाह—तत्र सावयवम्—

उभयस्यावयवानामन्योन्यं तद्वदेव यत्क्रियते ।
तत्सावयवं त्रेधा सहजाहार्योभयैस्तैः स्यात् ॥४२॥

उभयस्येति । उभयस्योपमानोपमेयलक्षणस्य येऽवयवास्तेषां परस्परं यद्रूपणं तद्वदेवेति समस्तोपमावत्क्रियते तत्सावयवं रूपकम् । यथा समस्तोपमायामुपमानोपमेययोस्तदवयवानां चौपम्यम्, एवमिहापि रूपणमित्यर्थः । तच्च सहजैराहार्यैरुभयैश्च तैरवयवैस्त्रेधा स्यात्त्रिविधं भवेत् ॥

उदाहरणम्—

ललनाः सरोरुहिण्यः कमलानि मुखानि केशरैर्दशनैः ।
अधरैर्दलैश्च तासां नवबिसनालानि बाहुलताः ॥४३॥

ललना इति । एतद्वाक्यरूपकं सावयवं समस्तविषयं सहजावयवं च । आहार्यावयवं तु यथा—

गजो नगः कुथा मेघाः शृङ्खला पन्नगा अपि ।
यन्ता सिंहोऽभिशोभन्ते भ्रमरा हरिणास्तथा ॥

सावयव रूपक—

जहाँ उपमान और उपमेय के अवयवों का परस्पर अभेद वर्णित हो, वहाँ सावयव रूपक होता है । यह सावयव रूपक तीन प्रकार का है—सहज, आहार्य तथा उभय (सहजाहार्य) ।४२।

सहज से तात्पर्य है स्वाभाविक, और आहार्य से कृत्रिम ।

सावयव समस्तविषय सहजरूपक का उदाहरण—

वे कामिनियाँ कमलिनी हैं । उनके मुख कमल हैं, दाँत केसर हैं, अधर पत्र हैं, और बाहुलताएँ नवीन मृणालदण्ड हैं ।४३।

यहाँ कामिनी उपमेय है, कमलिनी उपमान । इनके क्रमशः अवयव हैं—मुख, दाँत, अधर और बाहु, तथा कमल, केसर, पत्र और मृणाल-दण्ड । यहाँ इन सभी अवयवों का परस्पर सहज अभेद निरूपित है ।

नमिसाधु ने इस प्रसंग में तीन उदाहरण प्रस्तुत किये हैं—

(१) 'गजो नगः कुथाः···' अर्थात् हाथी, पर्वत, दरी (एक बिछौने का वस्त्र), बादल, शृङ्खला, साँप, सारथी, सिंह, भौंरे तथा हरिण शोभित हो रहे हैं ।

(२) 'यस्या बीजमहंकृतिर्गुरुतरं···' अर्थात् [मेरे द्वारा की गयी आपकी स्तुति और सेवारूप कुल्हाड़े से आप मेरी तृष्णारूपी उस लता को काट दीजिए, अहंकार जिसका बीज है, 'मेरा-मेरा' इस प्रकार का आग्रह जिसकी मजबूत जड़ है, सदा उसकी

उभयावयवं यथा—

यस्या बीजमहंकृतिर्गुरुतरं मूलं ममेति ग्रहो
नित्यं तु स्मृतिरङ्कुरः सुतसुहृज्ज्ञात्यादयः पल्लवाः ।
स्कन्धो दारपरिग्रहः परिभवः पुष्पं फलं दुर्गतिः
सा मे त्वत्स्तुतिसेवया परशुना तृष्णालता लूयताम् ।।

इदानीं समासरूपकं सावयवं समस्तविषयं सहजावयवमुदाहर्तुमुचितम्, ग्रन्थकृतां तु नोदाहृतम् । तच्चेत्थं यथा—

वचनमधु नयनमधुकरमधरदलं दशनकेसरं तस्याः ।
मुखकमलमनुस्मरतः स्मरहतमनसः कुतो निद्रा ।।

समासरूपकाहार्योदाहरणमाह—

विकसितताराकुमुदे गगनसरस्यमलचन्द्रिकासलिले ।
विलसति शशिकलहंसः प्रावृड्विपदपगमे सद्यः ।।४४।।

विकसितेति । अत्र गगनमुपमेयं सर उपमानम् । तयोश्च समासः । ताराज्योत्स्नाशशिनो गगनस्याहार्यावयवाः । उपमानस्य तु ते यादृशास्तादृशा भवन्तु । नात्र तद्विवक्षा । प्रावृड्विपदिति रूपकमपि नोदाहरणत्वेन योज्यम् । अवयवत्वाभावात् ।।

स्मृति रहना अंकुर है, सन्तान, मित्र तथा सम्बन्धी आदि जिसके पत्ते हैं, पत्नी जिसकी शाखा है, सांसारिक परिभव (अपमान आदि) जिसके पुष्प हैं, और जिसका फल है दुर्गति ।

यह सावयव समस्त विषय सहजाहार्य रूपक का उदाहरण है । तृष्णा-रूपी लता का बीज अहंकार है—यह अभेद कथन तो सहज (स्वाभाविक) है, किन्तु 'मेरा-मेरा' इस प्रकार के आग्रह को दृढ़ जड़ कहना आहार्य अभेद-कथन है ।

(३) 'वचनमधुनयनमधुकरम्...' अर्थात् उस रमणी का सम्भाषण मधु है, आँखें मधुकर हैं, होंठ पल्लव हैं, दाँत केसर हैं और मुख कमल है, उसे स्मरण करते हुए मुझ कामपीड़ित को नींद कहाँ ?

नमिसाधु द्वारा प्रस्तुत इस पद्य में सावयव समस्त विषय सहज रूपक का उदाहरण समास-रूप में प्रस्तुत किया गया है ।

आहार्य समासरूपक का उदाहरण—

वर्षारूपी विपत्ति के नाश होने पर चन्द्ररूपी कलहंस चमकते हुए नक्षत्ररूपी कुमुदवाले और निर्मल चाँदनी रूपी जलवाले आकाश-सरोवर में विहार कर रहा है ।४४।

अथ समासरूपकोभयोदाहरणमाह—

अलिकुलकुन्तलभाराः सरसिजवदनाश्च चक्रवाककुचाः ।
राजन्ति हंसवसनाः सम्प्रति वाणीविलासिन्यः ।।४५।।

अलीति । अत्र वाप्य उपमेया विलासिन्य उपमानभूताः । तयोः समासोऽत्र । वाप्या अलिकुलचक्रवाकहंसाः । कृत्रिमा अवयवाः । सरसिजानि तु सहजा विवक्षिताः । विलासिन्यश्च यथातथा भवन्तु । न तद्विवक्षा ।।

अथ निरवयवमाह—

मुक्त्वावयवविवक्षां विधीयते यत्तु तत्तु निरवयवम् ।
भवति चतुर्धा शुद्धं माला रशना परम्परितम् ।।४६।।

मुक्त्वेति । यत्त्ववयवविवक्षां त्यक्त्वा विधीयते तन्निरवयवं रूपकम् । तच्चतुर्धा । कथमित्याह—शुद्धमित्यादि ।।

इस उदाहरण में आकाश उपमेय और सरोवर उपमान है । तारे, चाँदनी और चन्द्रमा आकाश के आहार्य अवयव हैं, 'सहज' नहीं ।

सहजाहार्यगत समासरूपक का उदाहरण—

[ये] बावली-रूपी रमणियाँ भ्रमरकुल-रूपी केशभार को धारण किये हुए, कमल-रूपी मुखवाली, चकवे रूपी कुचों वाली तथा हंसरूपी वस्त्रों को धारण करती हुई शोभित हो रही हैं ।४५।

यहाँ वापियाँ उपमेय हैं और विलासिनियाँ उपमान । इनके क्रमशः चार-चार अवयव हैं—अलिकुल, कमल, चक्रवाक तथा हंस; और कुन्तलभार, मुख, कुच तथा वस्त्र । इनमें से उधर कमल और इधर मुख तथा कुच ये तीन सहज अवयव हैं और शेष पाँच आहार्य अवयव हैं ।

निरवयव रूपक—

अवयव की विवक्षा से विमुक्त रूपक निरवयव कहलाता है । उसके चार उपभेद हैं—शुद्ध, माला, रशना और परम्परित ।४६।

निरवयव रूपक के चार भेदों का लक्षण—

[निम्नोक्त श्लोक में उक्त चारों भेदों के लक्षण एक साथ प्रस्तुत किये गये हैं, जो स्वतः अस्पष्ट हैं । यहाँ नमिसाधु की टीका भी पूर्णतः सहायक नहीं है । इन चारों का स्वरूप ग्रन्थकार एवं टीकाकार के अनुसार प्रायः इस प्रकार है—]

(१) जहाँ उपमेय और उपमान का अभेद हो, किन्तु उनके अवयवों का कथन न हो, वहाँ 'शुद्ध' निरवयव रूपक होता है ।

अथ तल्लक्षणम्—

शुद्धमिदं सा माला रशनाया वैपरीत्यमन्यदिदम् ।
यस्मिन्नुपमानाभ्यां समस्यमुपमेयमन्यार्थे ।।४७।।

शुद्धमिति । इदमिति 'मुक्तवावयवविवक्षाम्' इति पूर्वलक्षणकं सा मालेति । यत्रैकं वस्त्वनेकसामान्यम् । 'उपमीयेतानेकैरुपमानैरेकसामान्यैः' इत्येतदुपमालक्षणं यत्र रूपके तदित्यर्थः । रशनाया वैपरीत्यमिति । यो यः पूर्वोऽर्थः स स उत्तरेषामुपमानमित्युपमालक्षणवैपरीत्यम् । रूपकरशनायां हि यो यः पूर्वोऽर्थः स स उत्तरेषामुपमेय इति । पअन्यत्परम्परितमिदं वक्ष्यमाणलक्षणकम् । तदेव लक्षणमाह—यस्मिन्नित्यादि । यत्र द्वाभ्यामुपमानाभ्यां सहैकमुपमेयमन्यस्य द्वितीयस्योपमेयस्यार्थे वर्तमानं समस्यते । यत्र हि द्वे उपमाने तत्रावश्यमुपमेयद्वयेनैव भाव्यमित्युपमेयार्थे उपमेयं समस्यते । यथा—रजनिपुरंध्रिरोध्रतिलकश्चन्द्र इति ।।

एतेषामुदाहरणानि चत्वारि यथाक्रममाह—

कः पूरयेदशेषान्कामानुपशमितसकलसंतापः ।
अखिलार्थिनां यदि त्वं न स्याः कल्पद्रुमो राजन् ।।४८।।

---

(२) जहाँ एक उपमेय के अनेक उपमान हों, वहाँ माला [निरवयव] रूपक होता है ।

(३) जहाँ इस [माला] के विपरीत बात हो, अर्थात् पूर्व-पूर्व उपमेय उत्तर-उत्तर का उपमान बनता जाए वहाँ रशनोपमा [निरवयव] रूपक होता है ।

(४) जहाँ दो उपमानों के साथ एक उपमेय अन्य उपमेय की अपेक्षा रखे, अर्थात् दो उपमानों के साथ दो उपमेयों का होना आवश्यक हो, वहाँ परम्परित रूपक होता है ।४७।

शुद्ध निरवयव रूपक का उदाहरण—

हे राजन् ! यदि तुम सब जीवों के संताप को शान्त करने वाले कल्पवृक्ष न होओ तो कौन सब याचकों की अभीष्ट कामनाओं को पूर्ण करे ।४८।

यहाँ राजा और कल्पवृक्ष का अभेद-कथन तो है, किन्तु प्रजा, शाखा आदि इनके अवयवों का निर्देश नहीं है । अतः निरवयव रूपक है । यहाँ माला, रशना और परम्परित भी नहीं है, अतः शुद्ध है ।

नमिसाधु द्वारा प्रस्तुत 'नीचोऽपि···' पद्य 'शुद्ध निरवयव समास-रूपक' का उदाहरण है । क्योंकि पाद और पद्मयुगल में अभेद-कथन के कारण 'शुद्ध निरवयव-रूपक' है, तथा 'पाद-पद्मयुगल' में समास है—

इस लोक में आपके चरणकमलों में रहने पर नीच, मन्दबुद्धि, अकुलीन, भीरु,

क इति। अत्र राजा शाखादिभिरवयवैर्विना कल्पद्रुमेण रूपितः। एतच्छुद्धं वाक्यरूपकम्। समासरूपकं तु यथा—

नीचोऽपि मन्दमतिरप्यकुलोद्भवोऽपि भीरुः शठोऽपि चपलोऽपि निरुद्यमोऽपि।
त्वत्पादपद्मयुगले भुवि सुप्रसन्ने संदृश्यते ननु सुरैरपि गौरवेण॥

मालामाह—

कुसुमायुधपरमास्त्रं लावण्यमहोदधिर्गुणनिधानम्।
आनन्दमन्दिरमहो हृदि दयिता स्खलति मे शल्यम्॥४६॥

कुसुमेति। अत्रैका दयिता विरहिहृदयदारणाद्यनेकधर्मयोगात्कुसुमायुधपरमाऽस्त्रादिभिरनेकैरुपमानैरेकैकधर्मयुक्तै रूपिता। अत्र वाक्यमेव। रशनापरम्परितयोः समास एव संभव इति॥

रशनारूपकमाह—

किसलयकरैर्लतानां करकमलैः कामिनां जगज्जयति।
नलिनीनां कमलमुखैर्मुखेन्दुभिर्योषितां मदनः॥५०॥

किसलयकरैरिति। अत्र यो यः पूर्वोऽर्थः किसलयादिकः स स उत्तरेषां करादीनामुपमेय इति॥

दुष्ट, चंचल तथा आलसी मनुष्य को भी देवता लोग सम्मान से देखते हैं।

मालारूपक का उदाहरण—

कामदेव की परम अस्त्र, सुन्दरता की सागर, गुणों की कोश, आनन्द का निकेतन यह प्रिया मेरे हृदय में शूल फेंकती है।४६।

यहाँ उपमेय (प्रिया) का अनेक उपमानों के साथ अभेद-कथन है। अतः यहाँ 'मालारूपक' है।

रशनारूपक का उदाहरण—

लताओं के किसलय-रूपी हाथों से और कामियों के हाथरूपी कमलों से जगत् वन्दनीय है, और कमलिनियों के कमल-रूपी मुखों से तथा कामिनियों के मुख-रूपी चन्द्रमा से कामदेव धन्य है।५०।

यहाँ पहले जो उपमान-रूप में वर्णित हैं, वे बाद में उपमेय रूप में वर्णित हैं। अतः यहाँ रशना-रूपक है। 'किसलयकर' में किसलय (कमल पत्र) उपमान है तो 'करकमल' में उपमेय। इसी प्रकार 'कमलमुख' में मुख उपमान है तो 'मुखेन्दु' में उपमेय।

परम्परितमाह—

स्मरशबरचापयष्टिर्जयति जनानन्दजलधिशशिलेखा ।
लावण्यसलिलसिन्धुः सकलकलाकमलसरसीयम् ।।५१।।

स्मरेति । अत्रैकः स्मर उपमेयो द्वाभ्यामुपमानाभ्यां शबरचापयष्टिभ्यामन्यस्य नायिकालक्षणस्य पदार्थस्यार्थे समस्यते । स्मरस्य शबर उपमानम्, नायिकायाश्चापयष्टिः । स्मर एव शबरस्तस्य नायिका चापयष्टिः । यथा शबरश्चापयष्टया हरिणादीनि विध्यति, एवं स्मरस्तया कामिन इत्यर्थः । एवमन्यत्रापि योज्यम् ।।

संकीर्णमाह—

उपमेयस्य क्रियते तदवयवानां च साकमुपमानैः ।
उभयेषां निरवयवैर्विज्ञेयं तदिति संकीर्णम् ।।५२।।

उपमेयस्येति । उपमेयस्योपमेयावयवानां च सहजाहार्योभयरूपाणामुपमानैरुभयेषामपि निरवयवैः सह यद्रूपणं क्रियते तत्संकीर्णं नाम ज्ञेयम् । एवं च सहजाद्यवयवभेदजत्वात् त्रिधा भवति । उभयेषामित्यनेनोपमेयस्तदवयवाश्च निर्दिश्यन्ते ।।

परम्परित रूपक का उदाहरण—

यह [नायिका] कामदेव रूपी भील का धनुष है । यह लोगों के आनन्द रूपी समुद्र के लिए चन्द्रकला के समान है, और लावण्यरूपी जल का सागर है, तथा सम्पूर्ण कलारूपी कमलों का सरोवर है ।५१।

'इयं स्मरशबरचापयष्टिः' का अर्थ है कि यह [नायिका] कामदेव रूपी शबर का धनुष है । नायिका (उपमेय) को चापयष्टि तभी कहा जा सकता है जब नायिका से सम्बन्धित किसी वस्तु को 'चापयष्टि से सम्बन्धित बताया जाए, अतः यहाँ स्मर (नायिका से सम्बन्धित वस्तु) का उपमान शबर (चापयष्टि से सम्बन्धित वस्तु) बनाया गया है । अतः यहाँ परम्परित रूपक है । इस समग्र पद्य का भावार्थ यह है कि जिस प्रकार शबर धनुष से मृग आदि का वध करता है, उसी प्रकार कामदेव नायिका के द्वारा कामी पुरुषों का वध करता है ।

[जहाँ] उपमेय का तथा उसके अवयवों का उपमानों के साथ [साहश्य बताया जाए, किन्तु यह साहश्य उपमेय और उपमान] दोनों के अवयवों के साथ घटित न हो, [वहाँ] संकीर्ण रूपक जानना चाहिए ।५२।

नमिसाधु के अनुसार अवयव सहज और आहार्य दोनों प्रकार के हो सकते हैं ।

उदाहरणानि—

लक्ष्मीस्त्वं मुखमिन्दुर्नयने नीलोत्पले करौ कमले ।
केशाः केकिकलापो दशना अपि कुन्दकलिकास्ते ।।५३।।

लक्ष्मीरिति । नायिकात्रोपमेया । तदवयवाश्च सहजा मुखादयः । लक्ष्मीचन्द्रप्रभृतीनि चोभयेषामुपमानानि निरवयवानि । नहि लक्ष्म्याश्चन्द्रादयोऽवयवाः । उपमेयं सावयवमुपमानेषु विपर्यय इति संकीर्णत्वमिति ।।

अथाहार्यावयवोदाहरणमाह—

सुतनु सरो गगनमिदं हंसरवो मदनचापनिर्घोषः ।
कुमुदवनं हरहसितं कुवलयजालं दृशः सुदृशाम् ।।५४।।

सुतन्विति । हे सुतनु, इदं सरः शरदि निर्मलत्वाद्विस्तीर्णत्वाच्च गगनसदृशमित्यर्थः । अत्र च गगनकामधनुर्ध्वनिहरहसिततरुणीदृशो निरवयवोपमानानि । उपमेयं सरः । तदवयवा हंसरवकुमुदवनकुवलयजालान्याहार्याणि विवक्षितानीति ।।

अथोभयावयवमाह—

इन्द्रस्त्वं तव बाहू जयलक्ष्मीद्वारतोरणस्तम्भौ ।
खड्गः कृतान्तरसना जिह्वा च सरस्वती राजन् ।।५५।।

उदाहरण (सहजावयव)—

हे नायिका ! तुम लक्ष्मी हो । तुम्हारा मुख चन्द्रमा है, आँखें नील कमल हैं, दोनों हाथ कमल हैं । तुम्हारे केश मोरपंख हैं और दाँत कुन्दकली हैं ।५३।

यहाँ नायिका उपमेय है और लक्ष्मी उपमान है, किन्तु नायिका के मुख, नयन आदि सहज अवयवों की सदृशता जिन (उपमानावयवों) से दी गयी है, वे लक्ष्मी के साथ सम्बद्ध नहीं हैं ।

उदाहरण (आहार्य अवयव)—

हे सुन्दरि ! यह तालाब आकाश है। इसमें हंसों का शब्द कामदेव के धनुष की टंकार है, कुमुदवन महादेवजी का शुभ्र हास है और नीले कमल सुन्दिरियों के नेत्र हैं ।५४।

यहाँ तालाब उपमेय है और आकाश उपमान, किन्तु तालाब के हंसरव, कुमुदवन आदि आहार्य अवयवों की सदृशता जिन उपमानावयवों से दी गयी है, वे आकाश से सम्बद्ध नहीं हैं ।

उदाहरण (सहज एवं आहार्य)—

हे राजन् ! तुम देवराज इन्द्र हो । तुम्हारी भुजाएँ विजयद्वार के तोरणस्तम्भ हैं । खड्ग महाकाल की जिह्वा है और तुम्हारी जिह्वा सरस्वती है ।५५।

इन्द्र इति। अत्र राजोपमेयः। तदवयवाश्च बाहुखड्गजिह्वाः सहजाहार्याः। इन्द्रजयलक्ष्मीद्वारतोरणस्तम्भादीनि निरवयवोपमानानि। एतेषु वाक्यभेद एवेति॥

समस्तविषयरूपकं निरूप्येदानीमेकदेशिरूपकमाह—

उक्तं समस्तविषयं लक्षणमनयोस्तथैकदेशीदम्।
कमलाननैर्नलिन्यः केसरदशनैः स्मितं चक्रुः॥५६॥

उक्तमिति। अनयोर्वाक्यसमासरूपकयोर्यत्समस्तविषयं लक्षणं तत्सावयवं रूपयद्भिरुक्तम्। तथैकदेशीदमार्योत्तरार्धेनोदाह्रियते। यथा—कमलेत्यादि। अत्रावयवानामेव कमलकेसराणां मुखदशनै रूपणं कृतम्, न तु पद्मिन्या अङ्गनयेत्येकदेशित्वमिति। अन्यदपि रूपकं संगतं नाम विद्यते। यत्र संगतार्थतया रूप्यरूपकभावः यथा कालिदासस्य—

रावणावग्रहक्लान्तमिति वागमृतेन सः।
अभिवृष्य मरुत्सस्यं कृष्णमेघस्तिरोदधे॥

अत्र न सावयवादिव्यपदेशः। तत् क्वेदमन्तर्भवतीत्युच्यते—सामान्ये रूपकलक्षणमभिधाय तस्य वाक्यसमासभेदौ व्यापकौ उक्तौ। तयोश्च सावयवादिभेदा यथासंभवं योज्याः। ततस्तस्मिन् मूलभेदद्वये संगताद्यनुक्तभेदानामन्तर्भावः॥

अथापह्नुतिः—

अति साम्यादुपमेयं यस्यामसदेव कथ्यते सदपि।
उपमानमेव सदिति च विज्ञेयापह्नुतिः सेयम्॥५७॥

एकदेशी रूपक—

समस्त-विषयी रूपक का स्वरूप-निर्देश किया जा चुका है। अब इन दोनों [उपमेय और उपमान] के एकदेशी [रूप का उदाहरण प्रस्तुत] है—

कमलिनियों ने कमलरूपी मुखों से [तथा] परागरूपी दाँतों से स्मित किया।५६।

यहाँ कमल तथा मुख और पराग तथा दाँत—अवयवों का ही निर्देश है। अतः एकदेशी रूपक है।

नमिसाधु द्वारा प्रस्तुत रूपक का एक अन्य उदाहरण—

रावणरूपी अनावृष्टि से म्लान देवतारूपी कृषि पर अपनी वाणीरूपी अमृत से वर्षा करके विष्णु रूपी [कृष्ण] मेघ अन्तर्धान हो गये।

४. अपह्नुति

जहाँ अति साहृश्य के कारण सत्य [होने पर भी उपमेय को असत्य कहकर उपमान को सत्य] सिद्ध किया जाता है वहाँ अपह्नुति अलंकार होता है।५७।

अतिसाम्यदिति । यस्यामुपमानोपमेययोरत्यन्तसाम्यादुपमेयं प्रस्तुतं वस्त्वविद्यमानं कथ्यते, उपमानमेव सत्तया, सेयमपह्नुतिर्नाम । उत्प्रेक्षायां व्याजादिशब्दैरुपमेयस्य सत्त्वमप्युच्यते, इह तु सर्वथैवापह्नव इति विशेषः ।।

उदाहरणम्—

नवबिसकिसलयकोमलसकलावयवा विलासिनी सैषा ।
आनन्दयति जनानां नयनानि सितांशुलेखेव ।।५८।।

नवेति । अत्रातिसादृश्याद् विलासिनीमुपमेयमपह्नुत्य शशिकलाया उपमानस्यैव सद्भावः कथितः ।।

अथ संशयः—

वस्तुनि यत्रैकस्मिन्ननेकविषयस्तु भवति संदेहः ।
प्रतिपत्तुः सादृश्यादनिश्चयः संशयः स इति ।।५९।।

वस्तुनीति । यत्रैकस्मिन्वस्तुन्युपमेये प्रतिपत्तुरनेकविषयः सादृश्यात्संदेहो भवति, अनिश्चयान्तः स इत्येवं प्रकारः संशयनामालंकारः । तुर्विशेषे ।।

उदाहरणम्—

किमिदं लीनालिकुलं कमलं किं वा मुखं सुनीलकचम् ।
इति संशेते लोकस्त्वयि सुतनु सरोवतीर्णायाम् ।।६०।।

उदाहरण—

नये कमलपत्र के समान कोमल अंगों वाली यह विलासिनी लोगों के नेत्रों को चन्द्रकला के समान आनन्द देने वाली है ।५८।

रुद्रट-प्रस्तुत यह उदाहरण वस्तुतः अपह्नुति के स्वरूप का सम्यक् द्योतक नहीं है । इसके लिए विश्वनाथ-प्रस्तुत निम्नोक्त पद्य अवलोकनीय है—

नेदं नभोमण्डलमम्बुराशिर्नैताश्च तारा नवफेनभङ्गाः ।
नायं शशी कुण्डलितः फणीन्द्रो, नासौ कलंकः शयितो मुरारिः ।।

यह आकाशमण्डल नहीं है, सागर है, ये तारे नहीं हैं [सागर के जल पर] नयी-नयी झाग के कण हैं, यह चन्द्र नहीं है, कुण्डली मारे हुए शेषनाग है, यह [चन्द्र में स्थित] कलंक नहीं है, भगवान् [कृष्णवर्ण] मुरारि शयन कर रहे हैं ।

५. *संशय*

जहाँ किसी व्यक्ति को सादृश्य के कारण एक वस्तु (उपमेय) में अनेक विषयों का सन्देह हो जाए वहाँ अनिश्चय नामक संशय अलंकार होता है ।५९।

उदाहरण—

हे सुन्दरि ! जब तुम तालाब में प्रवेश करती हो, लोग तुम्हारे मुख को देख

किमिति । अत्रैकस्मिन्मुखे कमलमुखविषयः सादृश्यादनिश्चयसंशयः ।।

प्रकारान्तरमाह—

उपमेये सदसंभवि विपरीतं वा तथोपमानेऽपि ।
यत्र स निश्चयगर्भस्ततोऽपरो निश्चयान्तोऽन्यः ।।६१।।

उपमेय इति । यत्रोपमेये यद्वस्तु नैव संभवति तत्सत्कथ्यते, विपरीतं वा यत्सत्तदसंभवि कथ्यते, अथोपमाने यदसंभवि तत्सत्, यच्च सत्तदसंभवि कथ्यते स निश्चयगर्भाख्यः संशयो भवति । ततोऽन्यथा तु यत्र पर्यन्ते निश्चयो भण्यते सोऽन्यो निश्चयान्ताख्यः संशयो द्वितीयः । पूर्वोक्तं सामान्यं संशयलक्षणमुभयत्र योज्यम् ।।

निश्चयगर्भोदाहरणमाह—

एतत्किं शशिबिम्बं न तदस्ति कथं कलङ्कमङ्केऽस्य ।
किं वा वदनमिदं तत्कथमियमियती प्रभास्य स्यात् ।।६२।।
किं पुनरिदं भवेदिति सौधतलालक्ष्यसकलदेहायाः ।
वदनमिदं ते वरतनु विलोक्य संशेरते पथिकाः ।।६३।।
(युग्मम्)

एतदिति । किं पुनरिति । अत्रोपमाने शशिनि संभविनः कलङ्कस्याभावः, उपमेये त्वसंभविनः प्रभाबाहुल्यस्य सद्भाव उक्तः । वैपरीत्यं तु नोक्तम् । तदन्यत्र द्रष्टव्यम् ।।

कर संशय करते हैं कि क्या यह भ्रमरगर्भित कमल है अथवा कृष्ण केशों से युक्त मुख है ।६०।

अन्य प्रकार—

जहाँ उपमेय में असम्भव वस्तु की विद्यमानता बतायी जाए, अथवा इसके विपरीत [सम्भव] वस्तु की अविद्यमानता बतायी जाए, [इसी प्रकार] उपमान में भी [यही दोनों रूप बताये जाएँ], वहाँ निश्चयगर्भ नामक संशय अलंकार होता है, [और यदि अन्त में निश्चय हो जाए, तो वहाँ] निश्चयान्त संशय अलंकार होता है ।६१।

उदाहरण (निश्चयगर्भ)—

क्या यह चन्द्रबिम्ब है ? यदि है तो इसमें कलङ्क क्यों नहीं है ? क्या यह मुख है ? यदि यह मुख है तो इसकी इतनी प्रभा कैसे है ? फिर यह क्या हो सकता है ? हे सुन्दरि ! महल की छत पर तुम्हारे सारे शरीर के छिप जाने के कारण केवल तुम्हारे मुख को देखकर पथिक लोग इस प्रकार सन्देह कर रहे हैं ।६२-६३।

निश्चयान्तमाह—

किमयं हरिः कथं तद्गौरः किंवा हरः क्व सोऽस्य वृषः ।
इति संशय्य भवन्तं नाम्ना निश्चिन्वते लोकाः ॥६४॥

किमिति । अत्रोपमाने कृष्णे गौरत्वमसंभवि विद्यते । हरे च संभविनो वृषस्याभावः । नामग्रहणाच्च निश्चयः । अस्मिन्निश्चयान्ते संशयगर्भलक्षणापेक्षा न कार्येति । तेन 'उपमेये सदसंभवि' (८।६१) इत्यादिलक्षणाभावेऽपि भवति । यथा माघस्य—

किं तावत्सरसि सरोजमेतदारादाहोस्विन्मुखमवभासते तरुण्याः ।
संशय्य क्षणमिति निश्चिकाय कश्चिद्बिब्बोकैर्बकसहवासिनां परोक्षैः ॥

इति । अन्येऽपि संशयभेदा विद्यन्त एव । यथा—

यत्रोक्तेऽपि निवर्तेत संदेहो नैव साम्यतः ।
संशयोऽन्यः स विज्ञेयः शेषगर्भः स्फुटो यथा ॥
प्रत्यग्राहितचित्रवर्णकृतकच्छायो मयाद्येक्षितः
सौधे तत्र स कोऽपि कः पुनरसावेतन्न निश्चीयते ।
वाक्यं वक्ति न वक्त्रमस्ति न शृणोत्यंसावलम्बिश्रुति-
श्चक्षुष्मांश्च निरीक्षते न विदितं तत्स ध्रुवं पार्थिवः ॥

उदाहरण—

क्या यह हरि हैं ? नहीं, यह तो गौरवर्ण हैं ! तो क्या यह शिव हैं, नहीं, इसके पास बैल कहाँ है ? हे राजन् ! इस प्रकार लोग आपके विषय में संशय करते हैं, और आपके नाम से ही आपका निश्चय करते हैं ।६४।

नमिसाधु ने इसी प्रसंग में संशय के विभिन्न रूपों से सम्बद्ध निम्नोक्त चार उदाहरण प्रस्तुत किये हैं—

१. 'किं तावत् सरसि···' अर्थात् यह, सरोवर में दूर से दीखने वाला कमल है, अथवा युवती का मुख शोभित हो रहा है ? इस प्रकार थोड़ी देर संशय में पड़कर किसी [कामी] ने बगुलों के सहवर्ती [कमलों] के अप्रत्यक्ष (अविद्यमान) विलासों से निश्चय कर लिया [कि यह युवती का ही मुख है] ।

२. जहाँ कह देने पर भी, सादृश्य के कारण सन्देह दूर नहीं होता, उसे शेषगर्भ नामक संशय का एक अन्य प्रकार जानना चाहिए । यथा—

'प्रत्यग्राहितचित्रवर्ण···' अर्थात् मैंने आज महल में किसी को देखा, उसकी विचित्र वर्ण की कृत्रिम कान्ति थी । वह कौन था इसका निश्चय नहीं हुआ । वह बिना मुख के बोल रहा था, उसके कान कन्धों तक फैले हुए (विशाल) थे, किन्तु वह सुन नहीं रहा था, नेत्रयुक्त होने पर भी वह देख नहीं रहा था । अहो, जान लिया, वह राजा था ।

तथा—

उपमेयमपह्नुत्य संदेग्धुर्यत्र कथ्यते ।
उपमानमसावन्यः संशयो दृश्यते यथा ।।

यो गोपीजनवल्लभः स्तनतटव्यासङ्गलब्धास्पद-
श्छायावान्नवरक्तको बहुगुणश्चित्रश्चतुर्हस्तकः ।
कृष्णः सोऽपि हताशया व्यपहृतः कान्तः कयाप्यद्य मे
किं राधे मधुसूदनो नहि नहि प्राणाधिकश्चोलकः ।।

तथा—

अतिशयकारिविशेषणयुक्तं यत्रोपमेयमुच्येत ।
साम्यादुपमानगते संदेहे संशयः सोऽन्यः ।।

यथा—

भुजतुलिततुङ्गभूभृत्स्वविक्रमाक्रान्तभूतलो जयति ।
किमयं जनार्दनो नहि सकलजनानन्दनो देवः ।।
एवमन्येऽपि संशयप्रकारा लक्ष्यानुसारेण बोद्धव्या इति ।।

भूयोऽपि भेदान्तरमाह—

यत्रानेकत्रार्थे संदेहस्त्वेककारकत्वगतः ।
स्यादेकत्वगतो वा सादृश्यात्संशयः सोऽन्यः ।।६५।।

---

३. जहाँ सन्देह करने वाले से, उपमेय को छिपाकर उपमान का वर्णन कर दिया जाए, वहाँ संशय का एक अन्य प्रकार होता है । जैसे—

'यो गोपीजनवल्लभः···' अर्थात् वह गोपियों का प्रिय है, उनके स्तनों का सम्पर्क उसे प्राप्त है, सुन्दर कान्ति से युक्त है, रागपूर्ण (रंगा हुआ, अनुरागयुक्त) है, अनेक गुणों (तागों) से युक्त है, विचित्र है, चार हाथ परिमाण का है, मेरे उस सुन्दर कृष्ण का किसी दुष्टा ने अपहरण कर लिया है ! हे राधे ! क्या मधुसूदन का [अपहरण कर लिया ?] नहीं, नहीं, मेरी प्राणाधिक चोली का ।

४. जहाँ उपमान-विषयक सन्देह होने पर सादृश्य के कारण उपमेय को अतिशयोक्तिपूर्ण विशेषणों से युक्त कहा जाए, वहाँ संशय का एक और प्रकार होता है । जैसे—

भुजाओं से ऊँचे-ऊँचे पर्वतों को धारण करने वाले और अपने विक्रम [पादाक्षेप] से भुवन को व्याप्त करने वाले की जय हो । क्या जनार्दन कृष्ण की ? नहीं, नहीं, सब लोगों को आनन्दित करने वाले महाराज की ।

अन्य प्रकार—

जहाँ सादृश्य के कारण उपमान और उपमेय में [कर्ता आदि] कारकों से सम्बद्ध [इस प्रकार का] सन्देह हो कि [किसी क्रिया का] कारक [उपमान है

यत्रेति । सोऽयमन्यः संशयो यत्रानेकत्रोपमानोपमेयलक्षणेऽर्थे कर्त्रादिकारकत्व-विषयः संशयो भवति । अस्याः क्रियायाः किमुपमानं कारकं स्यादुतोपमेयमिति, इत्थं यत्र भ्रान्तिरित्यर्थः । तथैकत्वगतो वेति यत्रोपमानोपमेययोरैक्ये संभाव्यमान एकस्य तात्त्विक-मन्यस्यातात्त्विकमिति संदेह इत्यर्थः ।।

उदाहरणद्वयमप्यार्ययैकमाह—

गमनमधीतं हंसैस्त्वत्तः सुभगे त्वया नु हंसेभ्यः ।
किं शशिनः प्रतिबिम्बं वदनं ते किं मुखस्य शशी ।।६६।।

गमनमिति । अत्राद्यार्धेऽध्ययनक्रियां प्रति कर्तृत्वसंदेह उक्तः । द्वितीये तु मुख-शशिनोस्तात्त्विकातात्त्विकत्वमेकत्र संदिग्धमिति । अथायं कोऽलंकारः । यथा भारवेः 'रञ्जिता नु विविधास्तरुशैला नामितं नु गमनं स्थगितं नु । पूरिता नु विषमेषु धरित्री संहृता नु ककुभस्तिमिरेण ।।' औपम्याभास इति केचित् । उत्प्रेक्षैवेयमित्यन्ये ।।

अथ समासोक्ति—

सकलसमानविशेषणमेकं यत्राभिधीयमानं सत् ।
उपमानमेव गमयेदुपमेयं सा समासोक्तिः ।।६७।।

सकलेति । यत्रैकमुपमानमेवोपमेयेन सह सकलसाधारणविशेषणमभिधीयमानं सदुपमेयं गमयेत्सा समासोक्तिः । सकलग्रहणं मिश्रत्वनिवृत्त्यर्थम् । एकग्रहणं तूपमेय-वाचिपदप्रयोगनिवृत्त्यर्थम् । सद्ग्रहणं प्रतिपादनसमर्थत्वख्यापनार्थम् ।।

अथवा उपमेय], वहाँ एक अन्य प्रकार का संशय अलंकार होता है ।६५।

उदाहरण—

हे सुन्दरि ! क्या हंसों ने तुमसे तुम्हारी चाल सीखी है, या तुमने हंसों से उनकी चाल सीखी है ? क्या तुम्हारा मुख चन्द्रमा का प्रतिबिम्ब है, या चन्द्रमा तुम्हारे मुख का प्रतिबिम्ब है ?६६।

यहाँ कर्ता कारक के विषय में सन्देह है ।

नमिसाधु-प्रस्तुत एक अन्य उदाहरण—

क्या अन्धकार ने अनेक वृक्षों और पर्वतों को रंग दिया है ? क्या आकाश को [पृथ्वी तक] झुका दिया है ? क्या आकाश को आच्छादित कर दिया है ? क्या ऊँचे-नीचे स्थानों को भरकर पृथ्वी को समतल बना दिया है, क्या दिशाओं का लोप कर दिया है ।

६. समासोक्ति

जहाँ कोई उपमेय उपमान से घटित होने योग्य विशेषणों से कथित होने के कारण उपमान की प्रतीति कराए वहाँ समासोक्ति अलंकार होता है ।६७।

उदाहरणमाह—

फलमविकलमलघीयो लघुपरिणति जायतेऽस्य सुस्वादु ।
प्रीणितसकलप्रणयिप्रणतस्य सदुन्नतेः सुतरोः ।।६८।।

फलमिति । फलमाम्रादिकम् । दृष्टार्थश्चेत्यत्र तरुरुपमानं गुणसाधर्म्यात्सत्पुरुषमेव गमयति ।।

अथ मतम्—

तन्मतमिति यत्रोक्त्वा वक्तान्यमतेन सिद्धमुपमेयम् ।
ब्रूयादथोपमानं तथा विशिष्टं स्वमतसिद्धम् ।।६९।।

तदिति । तन्मतनामालंकारः । इत्यमुना वक्ष्यमाणप्रकारेण । यत्र वक्तान्यमतेन पराभिप्रायेण सिद्धं लोकप्रतीतमुपमेयमुक्त्वा प्रतिपाद्योपमानं ब्रूयात् । किंभूतम् । तथाविशिष्टमुपमेयधर्मसदृशम् । पुनश्च कीदृशम् । स्वमतेन स्वाभिप्रायेण तथोपमानत्वेन सिद्धम् । उपमेयमेव तत्त्वतस्तदित्यर्थः ।।

उदाहरणमाह—

मदिरामदभरपाटलमलिकुलनीलालकालिधम्मिल्लम् ।
तरुणीमुखमिति यदिदं कथयति लोकः समस्तोऽयम् ।।७०।।
मन्येऽहमिन्दुरेषः स्फुटमुदयेऽरुणरुचिः स्थितैः पश्चात् ।
उदयगिरौ छद्मपरैर्निशातमोभिर्गृहीत इव ।।७१।। (युग्मम्)

उदाहरण—

सब प्रेमियों को प्रसन्न करने वाले श्रेष्ठ उन्नति रूपी इस सुन्दर पेड़ का फल भी सुन्दर, बड़ा, स्वादिष्ट एवं शीघ्र पचने वाला होता है ।६८।

यहाँ वर्णित फलदार वृक्ष से किसी सत्पुरुष की भी प्रतीति होती है ।

७. मत

जहाँ वक्ता अन्यों के मत से सिद्ध (लोकप्रसिद्ध) उपमेय का वर्णन कर [उसी के समानधर्मा होने से] अपने अभिप्राय को सिद्ध करने के लिए उपमान का वर्णन करे वहाँ मत नामक अलंकार होता है । ।६९।

उदाहरण—

मदिरा के मद से कुछ-कुछ लाल और भ्रम-समूह के समान काले बालों की वेणी वाला यह तरुणी का मुख है—ऐसा सभी लोग कहते हैं, किन्तु मेरा विचार है कि यह चन्द्रमा है, और अभी-अभी उदय होने से कुछ-कुछ लाल है, तथा उदयगिरि पर स्थित रात्रि के कुटिल अन्धकार ने इसे सम्भवतः पीछे से पकड़ रखा है ।७०-७१।

मदिरेति। मन्य इति। अत्र मुखमुपमेयं लोकमतेनोक्त्वा स्वमतेनेन्दुमाह। विशेषणानि तुल्यानि। तथा हि मुखं मदिरामदभरेण लोहितमिन्दुरुदयारुणकान्तिः। मुखं कृष्णकेशकलापेन युक्तं शशी निशातमोभिः॥

अथोत्तरम्—

यत्र ज्ञातादन्यत्पृष्टस्तत्त्वेन वक्ति तत्तुल्यम्।
कार्येणानन्यसमख्यातेन तदुत्तरं ज्ञेयम्॥७२॥

यत्रेति। यत्र वक्ता ज्ञातात्प्रसिद्धादुपमानलक्षणादन्यदुपमेयभूतं वस्तु पृष्टः संस्तत्त्वेन तद्भावेन तत्तुल्यमुपमानसदृशं वक्ति। तत्तुल्यतापि कुत इत्याह—कार्येण। कीदृशेन। अनन्यसमेन ख्यातेन च। तदुपमानं वर्जयित्वान्यत्राविद्यमानेन। तत्र च प्रसिद्धेनेत्यर्थः। अथ परिसंख्याया वास्तवोत्तरस्यास्य चोत्तरस्य को विशेषः। उच्यते—परिसंख्यायामज्ञातमेव पृच्छति नियमप्रतीतिश्चौपम्याभावश्च। 'किं सुखमपारतन्त्र्यम्' (७।८०) इत्यत्र ह्यपारतन्त्र्यमेव सुखं नान्यदित्यर्थः। इह तु ज्ञातादन्यत्पृच्छ्यते, न च नियमप्रतीतिरस्ति, औपम्यं च विद्यते। यथा 'किं मरणम्' (८।७३) इत्यादि। वास्तवोत्तरे तु न नियमप्रतीतिर्नाप्यौपम्यसद्भावः। केवलं प्रश्नादुत्तरमात्रकथनमेव। यथा लक्ष्मीसौराज्यादि तत्र कथितम्॥

अथोदाहरणमाह—

किं मरणं दारिद्र्यं को व्याधिर्जीवितं दरिद्रस्य।
कः स्वर्गः सन्मित्रं सुकलत्रं सुप्रभुः सुसुतः॥७३॥

किमिति। अत्रमरणात्प्राणत्यागसकाशात्प्रतीतादन्यत्पृष्टो वक्ता कार्येणाकिंचित्करत्वदुःखकारित्वादिना तत्तुल्यं दारिद्र्यं मरणमिव कथितवान्॥

---

८. उत्तर

जहाँ प्रसिद्ध उपमान से पृथक् उपमेय के विषय में प्रश्न किये जाने पर वक्ता अनन्य समान (उपमान को छोड़कर अन्यत्र अविद्यमान) तथा प्रसिद्ध उपमान के सदृश उत्तर देता है, वहाँ उत्तर अलंकार होता है।७२।

उदाहरण—

मृत्यु क्या है ? दरिद्रता। रोग क्या है ? दरिद्र का जीवन। स्वर्ग क्या है ? अच्छा मित्र, सुलक्षणा स्त्री और श्रेष्ठ स्वामी।७३।

मृत्यु क्या है—इसका उत्तर होता प्राणों का निकल जाना, किन्तु वक्ता ने मृत्यु-तुल्य किसी अन्य पदार्थ (दरिद्रता) का उत्तर दिया है। इसी प्रकार अन्य प्रश्न एवं उत्तर भी ज्ञातव्य हैं।

अथान्योक्तिः—

असमानविशेषणमपि यत्र समानेतिवृत्तमुपमेयम् ।
उक्तेन गम्यते परमुपमानेनेति साऽन्योक्तिः ।।७४।।

असमानेति । यत्रासाधारणविशेषणमप्युपमेयमुपमानेनोक्तेन परं केवलं गम्यते प्रतीयते सेत्युक्तेन प्रकारेणान्योक्तिर्भवति । यनु यद्यसमानविशेषणं तत्कथं तेन गम्यत इत्याह—समानेतिवृत्तमिति । समानं सदृशमितिवृत्तमर्थशरीरं यस्य तत्तथोक्तम् । यत उपमानतुल्यव्यवहारमुपमेयमतस्तेन गम्यत इत्यर्थ । अपिशब्दात्किंचित्समानविशेषणत्वेऽपि क्वापि भवतीति सूच्यत इति ।।

उदाहरणमाह—

मुक्त्वा सलीलहंसं विकसितकमलोज्ज्वलं सरः सरलम् ।
बकलुलितजलं पल्वलमभिलषसि सखे न हंसोऽसि ।।७५।।

मुक्त्वेति । अत्र हंसेनोपमानेनोक्तेन सज्जनः प्रतीयते । विशेषणानि चात्र सलीलहंसादीन्यसमानानि । नहि पुरुषः सरो मुक्त्वा पल्वलमभिलषति । इतिवृत्तं तु समानम् । यतस्तस्य शिष्टजनाधिष्ठितं स्थानं त्यजतः खलमन्यं चाश्रयतस्तत्तुल्य उपालम्भ इति ।।

अथ प्रतीपमाह—

यत्रानुकम्प्यते सममुपमाने निन्द्यते वापि ।
उपमेयमतिस्तोतुं दुरवस्थमिति प्रतीपं स्यात् ।।७६।।

---

९. *अन्योक्ति*

जहाँ कथित उपमान के द्वारा ऐसे उपमेय की प्रतीति हो जो [उपमान के] विशेषणों के असमान होता हुआ भी समान इतिवृत्त वाला हो, वहाँ अन्योक्ति अलंकार होता है ।७४।

उदाहरण—

हे मित्र ! क्रीडा करते हुए हंसों वाले, खिले हुए कमलों से शोभायमान, निर्मल जलपूर्ण सरोवर को छोड़कर तुम बगुलों से मलिन किये जा रहे जल वाले जौहड़ पर जाना चाहते हो । निश्चय ही तुम हंस नहीं हो ।७५।

यहाँ हंस उपमान है, और कोई सज्जन उपमेय । यद्यपि हंस और सज्जन के विशेषण एकसमान नहीं हैं, तथापि इनका इतिवृत्त एकसमान है ।

१०. *प्रतीप*

जहाँ उपमेय की अति स्तुति करने के लिए उसकी तुलना उपमान से करते

यत्रेति। यत्रोपमेयमनुकम्प्यते निन्द्यते वा तत्प्रतीपं नामालंकारः। कस्मात्तस्य निन्दानुकम्पे क्रियेते इत्याह—सममुपमाने इति कृत्वा। यत उपमानेन तुल्यमतो निन्दानुकम्पे तस्येत्यर्थः। तादृशं तर्हि किमर्थमुपमानं क्रियत इत्याह—अतिस्तोतुं सातिशयमुपमेयं ख्यापयितुम्। ननु यदि सातिशयं तर्ह्युपमानेन सह साम्यं नास्तीत्याह—दुरवस्थमिति। इतिर्हेतौ। यतो दुष्टामवस्थां प्राप्तम्। उपमेयमुपमानेन समम्, अत एव निन्द्यतेऽनुकम्प्यते वेत्यर्थः। अपिर्विस्मये। एतदेव चालंकारस्य प्रतीपत्वं यदन्येनान्यद्गम्यते॥

उदाहरणम्—

वदनमिदं सममिन्दोः सुन्दरमपि ते कथं चिरं न भवेत्।
मलिनयति यत्कपोलौ लोचनसलिलं हि कज्जलवत्॥७७॥

वदनमिति। अत्राञ्जनवारिमलिनत्वान्मुखस्य दौरवस्थ्यम्, अत एवेन्दुनोपमीयते। अनुकम्प्यते। तत्त्वतः स्तुतिर्मुखस्य कृता॥

निन्दोदाहरणमाह—

गर्वमसंवाह्यमिमं लोचनयुगलेन वहसि किं भद्रे।
सन्तीदृशानि दिशि दिशि सरःसु ननु नीलनलिनानि॥७८॥

गर्वमिति। अत्र बाहुल्योपलभ्यमाननलिननिभनयनवत्तया गर्ववहनान्निन्दा स्तुतिप्रातीतिकी। दुरवस्थं कस्मादपि कारणाद्बोद्धव्यम्॥

अर्थान्तरन्यासमाह—

धर्मिणमर्थविशेषं सामान्यं वाभिधाय तत्सिद्ध्यै।
यत्र सधर्मिकमितरं न्यस्येत्सोऽर्थान्तरन्यासः॥७९॥

हुए उसकी दुरवस्था की अनुकम्पा (स्तुति) अथवा निन्दा की जाती है, वहाँ प्रतीप अलंकार होता है।७६।

उदाहरण (अनुकम्पा)—

तुम्हारे इस सुन्दर मुख की चन्द्रमा से क्यों न उपमा दी जाए, क्योंकि तुम्हारी आँखों का कज्जल-मिश्रित जल तुम्हारे कपोलों को मलिन (कलङ्कपूर्ण) बना रहा है।७७।

उदाहरण (निन्दा)—

हे सुन्दरि ! तुम क्यों व्यर्थ अपनी आँखों की सुन्दरता का अखर्व गर्व करती हो ? तुम्हारी आँखों-जैसे नीलकमल तो प्रत्येक दिशा में तालाबों के भीतर विद्यमान हैं।७८।

११. अर्थान्तरन्यास

जहाँ [उपमेय के] विशेष अथवा सामान्य धर्म को कहकर उसके समर्थन के

धर्मिणमिति । यत्रोपमेयं धर्मिणमर्थविशेषरूपं सामान्यरूपं वा केनचिद्धर्मेण परोपकारादिना युक्तमभिधाय तस्य धर्मस्य दृढीकरणार्थमितरं यथाक्रममेव सामान्यं विशेषरूपं च समानधर्मकमुपमानभूतमर्थं कविर्न्यस्येत्सोऽर्थान्तरन्यासोऽलंकारः ॥

उदाहरणमाह—

तुङ्गानामपि मेघाः शैलानामुपरि विदधते छायाम् ।
उपकर्तुं हि समर्था भवन्ति महतां महीयांसः ॥८०॥

तुङ्गानामिति । अत्रोपमेयविशेषं मेघपर्वताख्यं तुङ्गत्वादि युक्तमभिधाय सामान्यमुपमानं महल्लक्षणमुपन्यस्तम् ॥

द्वितीयमाह—

सकलमिदं सुखदुःखं भवति यथावासनं तथाहीह ।
रमयन्तितरां तरुणीर्नखक्षतादीनि रतिकलहे ॥८१॥

सकलमिति । अत्र सामान्यरूपेणैव सुखदुःखादियुक्तं सकलमुपमेयमुक्त्वा ततो विशिष्टं नखक्षताद्युपमानमुक्तम् ॥

अयं चार्थान्तरन्यासः साधर्म्यप्रयुक्तसामान्यविशेषद्वारेण चतुर्विधो भवति । तत्र साधर्म्येण भेदद्वयमुक्तम् । वैधर्म्येणाह—

पूर्ववदभिधायैकं विशेषसामान्ययोर्द्वितीयं तु ।
तत्सिद्धयेऽभिदध्याद्विपरीतं यत्र सोऽन्योऽयम् ॥८२॥

लिए वैसा इतर सधर्मी (क्रमशः सामान्य अथवा विशेष अर्थ वाला उपमान) कहा जाए, वहाँ अर्थान्तरन्यास अलंकार माना जाता है ।७६।

उदाहरण (विशेष कथन का सामान्य कथन द्वारा समर्थन)—

अत्युन्नत पर्वतों पर भी मेघ अपनी छाया करते हैं । बड़े लोग बड़ों का उपकार करने में पूर्ण समर्थ हुआ करते हैं ।८०।

उदाहरण (सामान्य कथन का विशेष कथन द्वारा समर्थन)—

सब सुख-दुःख अपने-अपने स्थान पर ठीक होता है । रति-कलह में किये हुए नखक्षत सुन्दरियों को आनन्दित करते हैं ।८१।

अन्य प्रकार—

जहाँ विशेष और सामान्य में से किसी एक धर्म (विशेष अथवा सामान्य) का पूर्ववत् (७।७६ की भाँति) वर्णन करके उसके समर्थन के लिए उससे विपरीत (सामान्य अथवा विशेष) धर्म का कथन विपरीत रूप में किया जाए वहाँ अन्य प्रकार का अर्थान्तरन्यास अलंकार होता है ।८२।

पूर्ववदिति । यत्र विशेषसामान्ययोर्मध्यादेकं पूर्ववत्केनचिद्धर्मेणोपेतमुक्त्वा ततस्तद्धर्मसिद्धये द्वितीयं सामान्यं विशेषं वा विपरीतं विधर्मकं कविर्ब्रूयात्सोऽन्योऽयमर्थान्तरन्यासः ॥

उदाहरणमाह—

अभिसारिकाभिरभिहतनिबिडतमा निन्द्यते सितांशुरपि ।
अनुकूलतया हि नृणां सकलं स्फुटमभिमतीभवति ॥८३॥

अभिसारिकाभिरिति । अत्र शशी अभिसारिकाश्च विशेषावुपमेयौ पूर्वमुक्तौ, ततो नृणां सकलमिति सामान्यं वैधर्म्येणोक्तम् । निन्द्यत इत्यस्य ह्यभिमतीभवतीति विरुद्धम् ॥

द्वितीयमाह—

हृदयेन निर्वृतानां भवति नृणां सर्वमेव निर्वृतये ।
इन्दुरपि तथाहि मनः खेदयतितरां प्रियाविरहे ॥८४॥

हृदयेनेति । अत्र सामान्यमुक्त्वा विशेषो वैधर्म्येणोक्तः अथायं कोऽलंकारः । यथा—

प्रियेण संग्रथ्य विपक्षसंनिधावुपाहितां वक्षसि पीवरस्तने ।
स्रजं न काचिद्विजहौ जलाविलां वसन्ति हि प्रेम्णि गुणा न वस्तुनि ॥

न ह्यत्रौपम्यसद्भावोऽस्तीत्यर्थान्तरन्यासाभास इति ब्रूमः । भामहादिमतेन त्वर्थान्तरन्यास एव । 'अर्थद्वयस्य न्यासः सोऽर्थान्तरन्यासः' इति तदीयलक्षणात् ॥

उदाहरण (विशेष का सामान्य द्वारा समर्थन : विपरीत रूप से)—

अभिसारिकाएँ गहन अन्धकार का नाश करने वाले चन्द्रमा की भी निन्दा करती हैं, क्योंकि लोगों को अपनी अनुकूल वस्तु ही अभिमत होती है ।८३।

यहाँ पहला कथन विशेष है और दूसरा कथन सामान्य, तथा 'निन्दा करने' का समर्थन 'अभिमत होने' द्वारा—विपरीत रूप से—किया गया है ।

उदाहरण (सामान्य का विशेष द्वारा समर्थन : विपरीत रूप से)—

जिनका हृदय प्रसन्न है, उन्हें सभी वस्तुएँ आनन्द प्रदान करती हैं । प्रिया के वियोग में चन्द्रमा भी मन को अत्यन्त उद्विग्न बना देता है ।८४।

विपरीत रूप—आनन्द प्रदान करना : उद्विग्न बनाना ।

नमिसाधु द्वारा प्रस्तुत एक अन्य उदाहरण लीजिए । यहाँ वे 'अर्थान्तरन्यासाभास' स्वीकार करते हैं—

प्रतिपक्षी की उपस्थिति में प्रिय के द्वारा गूँथी हुई और पीन स्तनों से शोभित वक्षःस्थल पर पहनायी हुई जलार्द्र पुष्पमाला का उस रमणी ने त्याग नहीं किया, क्योंकि प्रेम में गुण होते हैं, वस्तु में नहीं ।

अथोभयन्यासमाह—

सामान्यावप्यर्थौ स्फुटमुपमायाः स्वरूपतोऽपेतौ ।
निर्दिश्येते यस्मिन्नुभयन्यासः स विज्ञेयः ।।८५।।

सामान्याविति । यत्र प्रकटं विद्यमानसामान्यावपि द्वावर्थौ तुल्यकक्षतया कृत्वा तथाप्युपमाया यत्स्वरूपं ततो व्यपेतौ निर्दिश्येते । उपमायां हि सामान्यस्यैवादेश्च प्रयोगः, इह तु नैवेत्यर्थः । स उभयन्यासो ज्ञेयः ।।

उदाहरणमाह—

सकलजगत्साधारणविभवा भुवि साधवोऽधुना विरलाः ।
सन्ति कियन्तस्तरवः सुस्वादुसुगन्धि चारुफलाः ।।८६।।

सकलेति । अत्र साधव उपमेयास्तरव उपमानानि तेषां तुल्यकक्षतया निर्देशः । न तु सताप्युपमानोपमेयभावेनेति ।।

अथ भ्रान्तिमान्—

अर्थविशेषं पश्यन्नवगच्छेदन्यमेव तत्सदृशम् ।
निःसंदेहं यस्मिन्प्रतिपत्ता भ्रान्तिमान्स इति ।।८७।।

अर्थेति । यत्र प्रतिपत्तार्थविशेषमुपमेयलक्षणं पश्यंस्तत्सादृश्यादन्यमेवार्थमुपमानलक्षणं निःसंशयमवबुध्येत स इत्यमुना प्रकारेण भ्रान्तिमान्नामालंकारः ।।

---

१२. उभयन्यास

जहाँ दो प्रकट सामान्य अर्थों को उपमा के स्वरूप से विभिन्न रूप में निर्दिष्ट किया जाता है, उसे वहाँ उभयन्यास अलंकार जानना चाहिए ।८५।

अर्थान्तरन्यास अलंकार के विपरीत यहाँ सामान्य का सामान्य द्वारा समर्थन किया जाता है ।

उदाहरण—

आजकल संसार में सब लोगों से कम सम्पत्ति रखने वाले साधु विरले ही हैं । स्वादु, सुगन्धित और सुन्दर फलों वाले पेड़ हैं ही कितने ? अर्थात् थोड़े हैं ।८६।

यहाँ सामान्य कथन का सामान्य कथन द्वारा समर्थन किया गया है ।

१३. भ्रान्तिमान्

जहाँ कोई व्यक्ति किसी अर्थ-विशेष (उपमेय) को देखता हुआ उसी के सदृश किसी अन्य अर्थ (उपमान) को बिना किसी सन्देह के जान ले, वहाँ भ्रान्तिमान् अलंकार होता है ।८७।

उदाहरणम्—

पालयति त्वयि वसुधां विविधाध्वरधूममालिनीः ककुभः।
पश्यन्तो दूयन्ते घनसमयाशङ्कया हंसाः ॥८८॥

पालयतीति। अत्र यज्ञधूमधारिण्यो दिश उपमेयाः। वर्षाकाल उपमानम्। तत्रैवावगतिः॥

अथाक्षेपः—

वस्तु प्रसिद्धमिति यद्विरुद्धमिति वास्य वचनमाक्षिप्य।
अन्यत्तथात्वसिद्धयै यत्र ब्रूयात्स आक्षेपः ॥८९॥

वस्त्विति। यत्र वक्ता यत्किमपि लोके प्रसिद्धमिति विरुद्धमिति वा कारणाद्वस्तु भूतं वर्तते, अस्य वचनमाक्षिप्य ततश्चान्यद्वस्त्वन्तरं तथात्वसिद्ध्यै तस्य स्वरूपस्य सिद्ध्यर्थं ब्रूयात्स आक्षेपो नामालंकारः॥

तत्र प्रसिद्धस्योदाहरणमाह—

जनयति संतापमसौ चन्द्रकलाकोमलापि मे चित्रम्।
अथवा किमत्र चित्रं दहति हिमानी हि भूमिरुहः ॥९०॥

जनयतीति। अत्र चन्द्रकलाकोमलत्वेनापि संतापकत्वे सति विस्मयः। अथ च विरहे तथैव प्रतीयमानत्वाद्वस्तुत्वं प्रसिद्धम्। ततश्च किमत्र चित्रमित्येतेनाक्षिप्य तथात्वसिद्धौ हिमानीलक्षणमुपमानमुक्तम्॥

उदाहरण—

आपके शासन में अनेक यज्ञों के धुएँ से व्याप्त दिशाओं को देखकर हंस वर्षागमन की आशंका से व्याकुल हो रहे हैं।८८।

१४. आक्षेप

जहाँ [वक्ता] किसी प्रसिद्ध अथवा विरुद्ध वस्तु (उपमेय) को कहकर इस वचन का आक्षेप करते हुए उसके समर्थन के लिए अन्य वस्तु का कथन करे वहाँ आक्षेप अलंकार होता है।८९।

उदाहरण (प्रसिद्ध)—

आश्चर्य है कि चन्द्रकला के सदृश कोमल वह कामिनी भी मुझे संताप देती है, अथवा इसमें आश्चर्य की कोई बात नहीं, क्योंकि हिमवृष्टि भी तो वृक्षों को जला देती है।९०।

यहाँ पहले कथन का—जो कि प्रसिद्ध है—समर्थन दूसरे कथन द्वारा किया गया है। और साथ ही, इन दोनों के बीच 'इसमें क्या आश्चर्य है?' इस वचन द्वारा

अथ विरुद्धोदाहरणमाह—

तव गणयामि गुणानहमलमथवासत्प्रलापिनीं धिङ्माम्।
कः खलु कुम्भैरम्भो मातुमलं जलनिधेरखिलम् ॥९१॥

तवेति। अत्र समस्तगुणगणनमशक्यत्वाद्विरुद्धमथवेत्यादिनाक्षिप्य तद्विरुद्धत्वसिद्ध्यर्थमन्यदुपमानमुक्तं क इत्यादिना ॥

अथ प्रत्यनीकम्—

वक्तुमुपमेयमुत्तममुपमानं तज्जिगीषया यत्र।
तस्य विरोधीत्युक्त्या कल्प्येत प्रत्यनीकं तत् ॥९२॥

वक्तुमिति। यत्रोपमेयमुत्तमं वक्तुं तज्जिगीषयोपमेयविजयेच्छया हेतुभूतया तस्योपमेयस्य विरोधीति विपक्षभूतमित्युपमानं कल्प्येत तत्प्रत्यनीकनामालंकारः। ननु विरुद्धयोः कथमौपम्यमित्याह—उक्त्या वचनमात्रेण विरोधो न तत्त्वतः। उपमेयस्तुतिस्त्वत्र तात्पर्यार्थः ॥

उदाहरणम्—

यदि तव तया जिगीषोस्तद्वदनमहारि कान्तिसर्वस्वम्।
मम तत्र किमापतितं तपसि सितांशो यदेवं माम् ॥९३॥

'आक्षेप' भी किया गया है।

उदाहरण (विरुद्ध)—

मैं तुम्हारे गुणों की गणना करती हूँ। नहीं-नहीं मुझ असत्यवादिनी को धिक्कार है। क्या कभी कोई घड़ों से समुद्र का सम्पूर्ण जल माप सकता है? ९१।

गुणों की गणना कर सकना विरुद्ध (असम्भव) कथन है। असत्यवादिनी को धिक्कार है—यह आक्षेप-वचन है।

१५. प्रत्यनीक

जहाँ उपमेय को उत्तम बनाने के लिए उपमेय की विजय की इच्छा से उस उपमेय के विरोधी उपमान की कल्पना कर ली जाती है, वहाँ प्रत्यनीक अलंकार होता है।९२।

उदाहरण—

तुम उस [नायिका] के मुख को जीतने के इच्छुक थे, किन्तु यदि उसने तुम्हारी सर्वस्व कान्ति का अपहरण कर लिया है तो इसमें मेरा क्या अपराध है कि तुम इस प्रकार से मुझे सन्तप्त करते हो। ९३।

यदीति । अत्र मुखमुत्तमं वक्तुं तज्जिगीषया शशी उपमानं कल्पितः । एतच्च वचनमात्रेण, न तत्त्वतः ॥

अथ दृष्टान्तः—

अर्थविशेषः पूर्वं यादृङ् न्यस्तो विवक्षितेतरयोः ।
तादृशमन्यं न्यस्येद्यत्र पुनः सोऽत्र दृष्टान्तः ॥९४॥

अर्थेति । विवक्षितेतरयोः प्रस्तुताप्रस्तुतयोरर्थविशेषयोर्मध्याद्यादृशो येन धर्मेण युक्तोऽर्थविशेषः पूर्वमादौ न्यस्तो भवेत्तादृशं तद्धर्मयुक्तमेव पुनस्तमर्थविशेषमन्यं यत्र वक्ता न्यस्येत्स दृष्टान्तो नामालंकारः । विशेषग्रहणमर्थान्तरन्यासादस्य भेदख्यापनार्थम् । तत्र हि सामान्यविशेषयोर्मध्यादेकमुपमानमन्यदुपमेयम् । इह तु द्वयमपि विशेषरूपमिति । उभयन्यासस्यास्मात्सत्सामान्यत्वादिविशेषः ॥

विवक्षितोदाहरणमाह—

त्वयि दृष्ट एव तस्या निर्वाति मनो मनोभवज्वलितम् ।
आलोके हि सितांशोर्विकसति कुमुदं कुमुद्वत्याः ॥९५॥

त्वयीति । अत्रार्थविशेषो नायिकामनोलक्षणः पूर्वं कान्तदर्शनान्निर्वृत्तिधर्मयुक्तो यादृशो निर्दिष्टः पुनस्तादृशमेव चन्द्रदर्शनात्कुमुदं विकासयुक्तमिति ॥

अविवक्षितोदाहरणम्—

लोकं लोलितकिसलयविषवनवातोऽपि मङ्क्षु मोहयति ।
तापयतितरां तस्या हृदयं त्वद्गमनवार्तापि ॥९६॥

यहाँ मुख को उत्तम कहने के लिए उसके द्वारा शशि (उपमान) को जीतने की कल्पना की गयी है ।

१६. दृष्टान्त

जहाँ वक्ता प्रस्तुत-अप्रस्तुत [के बीच से जिस] अर्थ-विशेष को पहले रखकर पुनः उसी के सदृश किसी अन्य तत्त्व का उपस्थापन करता है, वहाँ दृष्टान्त अलंकार होता है।९४।

उदाहरण (प्रस्तुत)—

हे नायक ! तुम्हें देख लेने पर उसका कामाग्नि से दग्ध मन शान्त हो जाता है, क्योंकि चन्द्र के दर्शन से कुमुद्वती के कुमुद खिलने लगते हैं।९५।

उदाहरण (अप्रस्तुत)—

चंचल एवं विषैले किसलयवन की वायु भी लोगों को शीघ्र मूच्छित कर देती है। तुम्हारे जाने की बात ही उसके हृदय को सुतरां सन्तप्त कर देती है।९६।

लोकमिति । अत्राप्राकरणिकस्य विषवनवातस्य मोहकत्वधर्मयुक्तस्य पूर्वमुपन्यासः । पश्चात्प्रस्तुतस्य तःपकारित्वयुक्तस्य [गमनवृत्तस्य] अर्थवैधर्म्येण दृष्टान्तः कथं नोक्तः । असंभवादिति ब्रूमः । यत्र हि विशिष्टोऽर्थो विधर्मकश्च दृष्टान्तस्तादृशं लक्ष्यं न पश्यामः । दृश्यते चेत्तदा समुच्चय एव ज्ञेयः ॥

अथ पूर्वम्—

यत्रैकविधावर्थौ जायेते यौ तयोरपूर्वस्य ।

अभिधानं प्राग्भवतः सतोऽभिधीयेत तत्पूर्वम् ॥९७॥

यत्रेति । यत्र द्वावर्थावुपमानोपमेयलक्षणावेकविधौ तुल्यकर्मकौ यौ जायेते भवतस्तयोर्मध्यादपूर्वस्य सह पश्चाद्भाविनो वार्थस्योपमेयस्य प्राक्पूर्वं भवतः सतोऽभिधानं क्रियेत तत्पूर्वं नामालङ्कारः ॥

उदाहरणम्—

काले जलदकुलाकुलदशदिशि पूर्वं वियोगिनीवदनम् ।

गलदविरलसलिलभरं पश्चादुपजायते गगनम् ॥९८॥

काल इति । अत्रार्थौ गगनवदनलक्षणौ । तत्र वदनमुपमेयम् । तच्च गगनसमकालं पश्चाद्वा गलत्सलिलभरं भवति । अथ च विरहासहत्वप्रतिपादनार्थं प्रागुक्तम् ॥

अथ सहोक्तिः—

सा हि सहोक्तिर्यस्यां प्रसिद्धदूराधिकक्रियो योऽर्थः ।

तस्य समानक्रिय इति कथ्येतान्यः समं तेन ॥९९॥

---

१७. पूर्व

जहाँ दोनों अर्थ (उपमेय और उपमान) एक-से (एक-साथ) ही हों, [किन्तु उनमें से उपमेय का, जो वस्तुतः उपमान से] पहले न हुआ हो, पहले होना बताया जाए, वहाँ पूर्व अलंकार माना जाता है ।९७।

उदाहरण—

वर्षाकाल से जब मेघसमूह से दसों दिशाएँ व्याप्त हो जाती हैं, तब पहले वियोगिनी का मुख अविरत बहते हुए अश्रुजल से भर जाता है, तत्पश्चात् वर्षा की फुहारों से आकाश भरता है ।९८।

यहाँ उपमेय और उपमान दोनों एक-साथ हुए हैं, किन्तु उपमेय का होना पहले बताया गया है ।

१८. सहोक्ति

जो अर्थ (उपमान) प्रसिद्ध एवं अत्यधिक क्रिया वाला हो, उसी के समान उपमेय को बताना सहोक्ति अलंकार कहाता है ।९९।

सेति । इति वक्ष्यमाणप्रकारेण सा सहोक्तिर्नामालंकारः । यस्यां प्रसिद्धा दूरमतिशयेनाधिका क्रिया यस्य स तथाविध उपमानलक्षणो योऽर्थस्तेन सार्धमन्य उपमेयार्थस्तस्योपमानस्य समानक्रिय इत्यमुना प्रकारेण कथ्येत इति । अथ वास्तवसहोक्तेरस्याश्च को विशेषः । उच्यते—तत्र कार्यकारणभाव औपम्याभावश्च समस्ति । अस्यां तु तद्विपर्ययः ॥

उदाहरणमाह—

मधुपानोद्धतमधुकरमदकलकलकण्ठदीपितोत्कण्ठाः ।
सपदि मधौ निजसदनं मनसा सह यान्त्यमी पथिकाः ॥१००॥

मधुपानेति । अत्रोपमानं मनः शीघ्रगमनक्रियया दूराधिकमपि पथिकैः सह समानक्रियमुक्तम् ॥

भेदान्तरमाह—

यत्रैककर्तृका स्यादनेककर्माश्रिता क्रिया तत्र ।
कथ्येतापरसहितं कर्मैकं सेयमन्या स्यात् ॥१०१॥

यत्रेति । यत्रैककर्तृकानेककर्माश्रिता क्रिया भवति, तत्र चैकं प्रधानमुपमेयाख्यं कर्मापरेण कर्मणोपमानेन सहोच्यते सेयमन्या पुनः सहोक्तिः ॥

उदाहरणम्—

स त्वां बिभर्ति हृदये गुरुभिरसंख्यैर्मनोरथैः सार्धम् ।
ननु कोपनेऽवकाशः कथमपरस्या भवेत्तत्र ॥१०२॥

उदाहरण—

वसन्त ऋतु में मधुपान से उद्धत भ्रमरों के मदपूर्ण कलकल स्वर से इन प्रवासियों की उत्कण्ठा अत्यन्त प्रज्ज्वलित हो गयी है, और ये शीघ्रता से मन की गति के साथ अपने-अपने घरों को जा रहे हैं।१००।

मन की गति की तीव्रता प्रसिद्ध है, इसी के साथ-साथ प्रवासियों का गमन सहोक्ति अलंकार का सूचक है।

अन्य प्रकार—

जहाँ ऐसी क्रिया का वर्णन किया जाए जिसका एक कर्ता हो और अनेक कर्म हों, [तथा इन्हीं कर्मों में से] एक [प्रधान] क्रिया अर्थात् उपमेय को अन्य कर्मों के साथ कहा जाए, वहाँ अन्य सहोक्ति अलंकार होता है।१०१।

उदाहरण—

हे भामिनि ! वह [नायक] असंख्य बड़े-बड़े मनोरथों के साथ तुम्हें हृदय में धारण करता है, फिर भला वहाँ किसी और [रमणी] के लिए स्थान ही कहाँ है ?१०२।

स इति। अत्रैका क्रिया धारणलक्षणानेकं कर्म नायिकां मनोरथांश्चाश्रिता। तथैक एव नायकस्तस्यां कर्ता। प्रधानमेकं चात्र कर्म नायिकाख्यमुपमेयमपरैर्मनोरथै-रुपमानैः सह कथितम्॥

अथ समुच्चयः—

सोऽयं समुच्चयः स्याद्यत्रानेकोऽर्थ एकसामान्यः।
अनिवादिर्द्रव्यादिः सत्युपमानोपमेयत्वे॥१०३॥

स इति। सोऽयं समुच्चयो नामालंकारो यत्रानेकस्त्र्यादिकोऽर्थ उपमानोपमेय-लक्षणो द्रव्यादिर्द्रव्यगुणक्रियाजातिरूप एकसामान्य एकेन साधारणेन धर्मेण युक्तः स्यादिति। उपमायाः समुच्चयत्वनिवृत्त्यर्थमाह—अनिवादिः। उपमायामिवादिशब्द-प्रयोग इत्यर्थः। एवमपि रूपकत्वं स्यादित्यत आह—सत्युपमानोपमेयत्व इति। रूपके ह्यभेद एव हेतुभेदः। तयोरनेकग्रहणमत्र त्र्याद्यर्थपरिग्रहार्थम्। त्रिचतुराः पञ्चषा वा यत्रार्था निर्दिश्यन्ते स समुच्चयः शोभामावहतीति भावः॥

उदाहरणम्—

जालेन सरसि मीना हिंस्रैरेणा वने च वागुरया।
संसारे भूतसृजा स्नेहेन नराश्च बध्यन्ते॥१०४॥

जालेनेति। अत्र जालादीनां करणानां सरःप्रमुखाणामधिकरणानां हिंस्रादीनां कर्तॄणां बहूनामुपमानोपमेयभावे बन्धनमेकं सामान्यमिति॥

धारण करना—एक क्रिया, नायक—एक कर्ता, कई मनोरथ—अनेक कर्म। इन्हीं 'कर्मों' के साथ नायिका को भी धारण करना सहोक्ति अलंकार का सूचक है।

१९. समुच्चय

जहाँ उपमान और उपमेय के रूप में द्रव्य आदि (द्रव्य, गुण, क्रिया और जाति) अनेक अर्थ एक सामान्य (एक क्रिया) वाले हों, [और जहाँ] इव आदि का प्रयोग न किया जाए, वहाँ समुच्चय अलंकार [होता] है।१०३।

उदाहरण—

हिंसकों द्वारा तालाब में मछलियाँ जाल से, वन में मृगपाश से और ब्रह्मा के द्वारा संसार में मानव स्नेह से बाँधे जाते हैं।१०४।

यहाँ हिंसक और ब्रह्मा इन कर्ताओं का, तालाब, वन और संसार इन अधि-करणों का, मछलियाँ, मृग और मानव इन कर्मों का, जाल, पाश और स्नेह इन करणों का—एक ही क्रिया 'बाँधे जाते हैं' के साथ सम्बन्ध है। इनमें से ब्रह्मा, संसार मानव और स्नेह उपमेय हैं, तथा शेष सभी उपमान। इन सबका एक-साथ वर्णन समुच्चय अलंकार का सूचक है।

अथ साम्यम्—

अर्थक्रियया यस्मिन्नुपमानस्यैति साम्यमुपमेयम् ।
तत्सामान्यगुणादिककारणया तद्भवेत्साम्यम् ॥१०५॥

अर्थक्रिययेति । तयोरुपमानोपमेययोर्यत्सामान्यं साधारणं गुणक्रियासंस्थानादि तत्कारणं यस्यास्तया तथाविधयार्थक्रियया यत्रोपमानस्योपमेयसाम्यमिति तत्साम्यं भवेत् ॥

उदाहरणम्—

अभिसर रमणं किमिमां दिशमैन्द्रीमाकुलं विलोकयसि ।
शशिनः करोति कार्यं सकलं मुखमेव ते मुग्धे ॥१०६॥

अभिसरेति । अत्र शश्युपमानं मुखमुपमेयम्, प्रकाश्यमर्थक्रियासामान्यं कान्तिमत्त्वं गुणः ॥

भेदान्तरमाह—

सर्वाकारं यस्मिन्नुभयोरभिधातुमन्यथा साम्यम् ।
उपमेयोत्कर्षकरं कुर्वीत विशेषमन्यत्तत् ॥१०७॥

सर्वाकारमिति । यस्मिन्नुपमेयोत्कर्षकराद्विशेषादन्यथा प्रकारान्तरेणोभयोरुपमानोपमेययोः सर्वाकारं सर्वात्मना साम्यमभिधातुमुपमेयोत्कर्षकरविशेषं कंचन कविः कुर्वीत तदन्यत्साम्यमलंकारः ॥

---

२०. *साम्य*

जहाँ उपमेय सामान्य गुण आदि कारणों वाली अर्थ-क्रिया के द्वारा उपमान की समानता प्राप्त करता है वहाँ साम्य अलंकार माना जाता है।१०५।

उदाहरण—

अरी मुग्धे ! तुम अपने पति से रमण करो। क्यों व्याकुल होकर पूर्व दिशा को देख रही हो। तुम्हारा मुख ही चन्द्र का सारा कार्य सम्पादन कर रहा है।१०६।

मुख (उपमेय) द्वारा चन्द्र (उपमान) का कार्य-सम्पादन ।

अन्य प्रकार—

जहाँ उपमान और उपमेय में सर्वात्मना साम्य इसीलिए कहा (दिखाया) जाए कि जिससे उपमेय की उत्कर्षता-द्योतक विशेषता ज्ञात हो, वहाँ अन्य प्रकार का साम्य अलंकार होता है।१०७।

उदाहरणम्—

मृगं मृगाङ्कः सहजं कलङ्कं बिभर्ति तस्यास्तु मुखं कदाचित्।
आहार्यमेवं मृगनाभिपत्त्रमियानशेषेण तयोर्विशेषः ॥१०८॥

मृगमिति । अत्राहार्यकादाचित्कमृगनाभिपत्त्ररूपकालंकारभणनविशेषेणोपमेयस्य मुखस्योत्कर्षः प्रतिपादितः । अन्यथा तु नयनाह्लादनादिगुणैः सर्वथा साम्यमुक्तमिति ॥

अथ स्मरणम्—

वस्तुविशेषं दृष्ट्वा प्रतिपत्ता स्मरति यत्र तत्सदृशम् ।
कालान्तरानुभूतं वस्त्वन्तरमित्यदः स्मरणम् ॥१०९॥

वस्त्विति । अत्र प्रतिपत्ता विशिष्टं वस्तु किंचनावलोक्य कालान्तरानुभूतं वस्त्वन्तरं स्मरति, अद एतत्स्मरणं नामालंकारः । अथ भ्रान्तिमतोऽस्य च को विशेषः । उच्यते—तत्रोपमानावगतिरेव न तूपमेयावगतिः । इह तूपमानस्मरणमात्रं न भ्रान्तिरिति ॥

उदाहरणम्—

तव भवने पश्यन्तः स्थूलस्थूलेन्द्रनीलमणिमालाः ।
भूभृन्नाथ मयूराः स्मरन्त्यमी कृष्णसर्पाणाम् ॥११०॥

तवेति । अत्रेन्द्रनीलमणिमालादर्शनात्तत्सदृशं कृष्णसर्पाख्यं वस्त्वन्तरं मयूराः स्मरन्तीति लक्षणयोजना ॥

इति श्रीरुद्रटकृते काव्यालंकारे नमिसाधुविरचितटिप्पणसमेतो-
ऽष्टमोऽध्यायः समाप्तः ।

उदाहरण—

चन्द्रमा स्वाभाविक रूप से मृग को कलंक के रूप में धारण करता है, और तुम्हारा मुख आहार्य रूप से अर्थात् कभी-कभी मृग की नाभि से उद्‌भूत कस्तूरी से पत्र-रचना धारण करता है, बस इतना इन दोनों में अन्तर है ।१०८।

२१. स्मरण

जब कोई व्यक्ति किसी विशेष वस्तु को देखकर उसी के सदृश किसी अन्य काल में अनुभूत वस्तु का स्मरण करता है वहाँ स्मरण अलंकार होता है ।१०९।

उदाहरण—

हे राजेन्द्र ! तुम्हारे भवन में बहुत स्थूल इन्द्रनील मणियों की मालाओं को देखकर ये मोर काले साँपों का स्मरण करने लगते हैं ।११०।

इति 'अंशुप्रभा'ऽऽख्य-हिन्दी-व्याख्यायामष्टमोऽध्यायः समाप्तः ।

नवमोऽध्यायः

अथ क्रमप्राप्तमतिशयालंकारं वक्तुमाह—

यत्रार्थधर्मनियमः प्रसिद्धिबाधाद्विपर्ययं याति ।
कश्चित्क्वचिदतिलोकं स स्यादित्यतिशयस्तस्य ॥१॥

यत्रेति । यत्रालंकारेऽर्थधर्मयोर्नियमो नियतं स्वरूपं विपर्ययमन्यथात्वं गच्छति । नियमश्चेत्कथं विपर्ययं यातीत्याह—प्रसिद्धेरुष्णं दहतीत्यादिकायाः ख्यातेर्यो बाधो बाधनं तस्माद्धेतोः । स इत्यनेन प्रकारेणातिशयो नामालंकारः स्यात् । ननु यदि नियमस्यान्यथात्वमतिशयस्तर्हि स नास्त्येव नियमस्यान्यथाभावादित्यत आह—कश्चित्क्वचिदिति । न सर्वः सर्वत्रेत्यर्थः । कथं विपर्ययं यातीत्याह—अतिलोकं लोकातिक्रान्तं यथा भवति । अत एवातिशयनामकत्वम् । तस्येत्युत्तरेण संबन्धः ॥

अथ सामान्यस्यैव विशेषानाह—

पूर्वविशेषोत्प्रेक्षाविभावनातद्गुणाधिकविरोधाः ।
विषमासंगतिपिहितव्याघाताहेतवो भेदाः ॥२॥

पूर्वेति । एते तस्य पूर्वादयो द्वादश भेदाः ॥

नवमोऽध्यायः

रुद्रट-सम्मत वास्तव और औपम्य नामक वर्गों के उपरान्त इस अध्याय में अतिशय नामक तीसरा वर्ग निरूपित है। इसके अन्तर्गत उन्होंने १२ अर्थालंकारों का स्वरूप निर्दिष्ट किया है।

अतिशय

जहाँ कहीं कोई अर्थ और धर्म का नियम अपनी प्रसिद्धि (ख्यात स्थिति) के बाध के कारण लोकातिक्रान्त विपरीतता को प्राप्त होता है, वहाँ 'अतिशय' माना जाता है। उसके [निम्नोक्त भेद हैं] ।१।

उस [अतिशय] के ये भेद हैं—१. पूर्व, २. विशेष, ३. उत्प्रेक्षा, ४. विभावना, ५. तद्गुण, ६. अधिक, ७. विरोध, ८. विषम, ९. असंगति, १०. पिहित, ११. व्याघात, १२. अहेतु ।२।

तत्र पूर्वस्य तावल्लक्षणमाह—

यत्रातिप्रबलतया विवक्ष्यते पूर्वमेव जन्यस्य ।
प्रादुर्भावः पश्चाज्जनकस्य तु तद्भवेत्पूर्वम् ॥३॥

यत्रेति । यत्र प्रागेव जन्यस्य कार्यस्य प्रादुर्भावो विवक्ष्यते जनकस्य तु कारणस्य पश्चात्तत्पूर्वं नामालंकारः । विवक्षापि कथं तथा भवतीत्याह—अतिप्रबलतया [हेतुभूतया । तत्र जनकव्यापारं विना जन्योत्पत्तिरिति जन्यस्यातिप्रबलता ।] जन्यं जनयित्वा स्वयमुत्पद्यत इति जनकस्याप्रबलता । विवक्ष्यत इत्यनेन विवक्षामात्रमेतन्न परमार्थत इति सूचयति ॥

उदाहरणम्—

जनमसुलभमभिलषतामादौ दन्दह्यते मनो यूनाम् ।
गुरुरनिवारप्रसरः पश्चान्मदनानलो ज्वलति ॥४॥

जनमिति । अत्र दाहः कार्यं पूर्वं जातम्, मदनाग्निज्वलनं तु दाहकारणं पश्चादिति विशेषलक्षणम् । ज्वलितोऽग्निर्दहतीत्येवंविधश्च योऽर्थधर्मनियमः स क्वचिदेव कामिनि विपर्ययं यात इतीदं सामान्यलक्षणम् । अत्र चातिप्रबलत्वं हेतुः ॥

अथ विशेषमाह—

किंचिदवश्याधेयं यस्मिन्नभिधीयते निराधारम् ।
तादृगुपलभ्यमानं विज्ञेयोऽसौ विशेष इति ॥५॥

---

१. पूर्व

जहाँ अति प्रबलता के कारण उत्पन्न [पदार्थ] का वर्णन पहले तथा उसके उत्पादक [पदार्थ] का बाद में किया जाता है वहाँ पूर्व अलंकार होता है ।३।

उदाहरण—

दुर्लभ कामिनी की इच्छा करने वाले युवकों का मन तो पहले दग्ध होने लगता है, और इसके पश्चात् तीव्रता से फैलने वाली भीषण कामाग्नि प्रज्ज्वलित होती है ।४।

२. विशेष

जहाँ निश्चित आधार वाली भी कोई वस्तु आधार के बिना वर्णित की जाती है, [और इसकी] यह [निराधारता] उपलभ्यमान होती है, वहाँ विशेष अलंकार होता है ।५।

निश्चित आधार वाले किसी पदार्थ को निराधार-रूप में वर्णित करना दोष माना जाएगा न कि अलंकार । अतः यहाँ 'तादृगुपलभ्यमान' शब्द का प्रयोग किया गया है कि वह पदार्थ निराधार भी हो सकता है ।

किंचिदिति । यस्मिन्नलंकारे किंचिद्वस्त्ववश्याधेयमिति विद्यमानाधारमेव सन्निराधारमित्यभिधीयते स इत्यनेन प्रकारेण विशेषनामालंकारो ज्ञेयः । ननु तथाभूतस्यान्यथाकथनं दोष एव स्यान्न त्वलंकार इत्याह—तादृगुपलभ्यमानमिति । तथा दर्शनान्न किंचिदनुपपन्नमित्यर्थः । वस्त्वन्तरेभ्यो विशिष्टधर्माभिधानाद्विशेषसंज्ञा ॥

उदाहरणम्—

दिवमप्युपयातानामाकल्पमनल्पगुणगणा येषाम् ।
रमयन्ति जगन्ति गिरः कथमिह कवयो न ते वन्द्याः ॥६॥

दिवमिति । अत्र गिर आधेयाः । प्राण्याश्रितत्वात् । अथ च विनापि कविभिराधारै रमयन्तीत्युपलब्ध्या कथितम् ॥

प्रकारान्तरमाह—

यत्रैकमनेकस्मिन्नाधारे वस्तु विद्यमानतया ।
युगपदभिधीयतेऽसावत्रान्यः स्याद्विशेष इति ॥७॥

यत्रेति । यत्रानेकस्मिंस्त्र्यादिक आधारे वस्तु सत्तया कथ्यते सोऽत्रान्यः प्रकारान्तरेण विशेष इति । कदाचिद्वस्त्वप्यनेकं स्यात्तत्रातिशयत्वमित्यत आह—एकमिति । एकमपि पर्यायेणानेकत्र तिष्ठत्येवेति न विशेष इत्याह—युगपदित्यादि ॥

उदाहरणम्—

हृदये चक्षुषि वाचि च तव सैवाभिनवयौवना वसति ।
वयमत्र निरवकाशा विरम कृतं पादपतनेन ॥८॥

उदाहरण—

स्वर्ग में चले जाने पर भी वे कवि धन्य हैं, जो अपने असंख्य गुणों को युग-युगों तक स्थिर कर गये हैं । [उनकी] वाणी अब भी संसार को आनन्दित कर रही है ।६।

कवि और उसकी वाणी में आधार-आधेय सम्बन्ध निश्चित है, किन्तु कवि की मृत्यु के उपरान्त भी उसकी वाणी स्थित रहती है—यह निराधारता भी उपलभ्यमान है । इसकी निराधारता का निर्देश यहाँ विषम अलंकार का द्योतक है ।

प्रकारान्तर—

जहाँ एक वस्तु अनेक आधारों में युगपद् कही जाती है वहाँ अन्य विशेष अलंकार होता है ।७।

उदाहरण—

मिव मुखं मनोज्ञम्' में यदि उपमा अलंकार का चमत्कार मान्य है, और निम्नांकित पद्य—

स्तोकेनोन्नतिमायाति स्तोकेनायात्यधोगतिम् ।
अहो सुसदृशी वृत्तिस्तुलाकोटेः खलस्य च ॥

में अर्थश्लेष का, (यद्यपि दोनों में साम्यता-तत्त्व लगभग एक समान है, तो इसका एकमात्र कारण सहृदय का भावोद्वेलन ही है। अतः केवल इसी आधार पर **'सकलकलम्'**······' आदि कथनों में कवि द्वारा साम्यता के उद्दिष्ट रहने पर भी सहृदय का पलड़ा अत्यधिक भारी मानकर शब्दश्लेष स्वीकार करना चाहिए, उपमा नहीं । निष्कर्षतः—

१. श्लेष अलंकार का क्षेत्र स्वतन्त्र भी रहता है, तथा अन्य अलंकारों से युक्त भी ।

२. जहाँ श्लेष के साथ अन्य अलंकार रहते हैं वहाँ कभी यह उनसे पुष्ट होता है और कभी उनका पोषक रहता है ।

३. किन्तु उक्त तीनों स्थितियों का निर्णायक आधार सहृदय का भावोद्वेलन है, न कि कवि की विवक्षा ।

१. अविशेष श्लेष

जिस वाक्य में एक अर्थ से दूसरे अर्थ की प्रतीति [इस आधार पर] हो [कि ये दोनों अर्थ] एक-समान विशेषण से युक्त हों तो वहाँ अविशेष श्लेष अलंकार जाना जाता है ।३।

पुण्यः कण्ठे न करोतीति । एतत्प्रकृतं वाक्यं कान्तानवमालिकाशब्दयोरनेकार्थत्वादिदमर्थान्तरं गमयति । यथा—नवमालिकाख्यां सुमनोजातिं कान्तां हृद्यामल्पपुण्यः कण्ठे न कुरुत इति । शरदिन्दुसुन्दररुचमित्यादीन्यविशिष्टानि विशेषणानि ।।

अथ विरोधश्लेषः—

यत्र विरुद्धविशेषणमवगमयेदन्यदर्थसामान्यम् ।
प्रक्रान्तमतोऽन्यादृग्वाक्यश्लेषो विरोधोऽसौ ।।५।।

यत्रेति । असौ विरोधाख्यश्लेषः, यत्र प्रक्रान्तवाक्यमन्यदर्थसामान्यं विरुद्धविशेषणमवगमयेत् । कीदृग्वाक्यम् । अतोऽर्थान्तरादन्यादृशम् । विशेषरूपमविरुद्धं चेत्यर्थः । तेन यत्र प्रक्रान्तोऽर्थविशेषोऽन्यदर्थसामान्यं विरुद्धविशेषणमवगमयति स विरोधश्लेष इति तात्पर्यार्थः ।।

उदाहरणम्—

संवर्धितविविधाधिककमलोऽप्यवदलितनालिकः सोऽभूत् ।
सकलारिदाररसिकोऽप्यनभिमतपराङ्गनासङ्गः ।।६।।

उदाहरण—

शरत्कालीन चन्द्रमा के समान सुन्दर, सुकुमार, सुगन्धित द्रव्य धारण करने वाली एवं नवमालिका पुष्पों की माला से भूषित प्रिया को मन्दभाग्य पुरुष गले नहीं लगा सकता ।

दूसरा अर्थ—

शरच्चन्द्र के समान धवल, कोमल, पराग और मकरन्द से युक्त, सुन्दर, ताजी गूँथी हुई माला को मन्दभाग्य पुरुष नहीं पहन सकता ।४।

यहाँ कान्ता (प्रिया) और नवमालिका के विशेषण एक समान होने के कारण एक अर्थ से दूसरे अर्थ की प्रतीति हो रही है ।

२. *विरोध श्लेष*

जहाँ प्रक्रान्त (अभीष्ट) वाक्य अन्य अर्थ की समानता वाले विरुद्ध विशेषण-युक्त अपने से भिन्न [वाक्य] की प्रतीति कराए वहाँ विरोध श्लेष [माना जाता] है ।५।

उदाहरण—

कठिन शब्दों के अर्थ : नालिकः—भैंस (मूर्ख व्यक्ति), पक्षे नालिका—कमल की नालिका । दार—नारी, पक्षे विदारण । अनभिमत—अनिष्ट, पक्षे अनासक्त ।

प्रकृत अर्थ—

इस राजा ने विविध प्रकार से लक्ष्मी का संवर्धन किया है और मूर्खों का

संवर्धितेति । अत्रायं प्रक्रान्तोऽर्थः—स कश्चिद्राजा एवंविधोऽभूत् । यथा संवर्धितनानाभ्यधिकलक्ष्मीकोऽत्रदलितमूर्खश्च । तथा सकलशत्रुविदारणरसिकोऽनिष्टपरस्त्रीसङ्गश्चेति । इदं तु विरुद्धमर्थसामान्यं गम्यते—यदि संवर्धितानि विविधान्यधिकं कमलानि पद्मानि येन, कथमवदलितानि नालिकानि पद्मानि तेनैवेति । तथा यदि सकलेष्वरिदारेषु शत्रुकलत्रेषु रसिकः कथमनभिमतपराङ्गनासङ्ग इति । सामान्यरूपता चास्य विशेष्याविशेषणादिति ॥

अथाधिकश्लेषः—

यत्राधिकमारब्धादसमानविशेषणं तथा वाक्यम् ।
अर्थान्तरमवगमयेदधिकश्लेषः स विज्ञेयः ॥७॥

यत्रेति । यत्र वाक्यं कर्तृभूतमारब्धात्प्रकृतादन्यदर्थान्तरमधिकमुत्कृष्टं गमयेत्सोऽधिकश्लेषः । अविशेषश्लेषादस्य विशेषमाह—असमानविशेषणमिति । तत्र हि समानार्थानि विशेषणान्युक्तानि ॥

उदाहरणम्—

प्रेम्णा निधाय मूर्धनि वक्रमपि बिभर्ति यः कलावन्तम् ।
भूतिं च वृषारूढः स एव परमेश्वरो जयति ॥८॥

प्रेम्णेति । यः कलावन्तं विदग्धं वक्रमनृजुहृदयमपि बिभर्ति, प्रेम्णा प्रीत्या

तिरस्कार किया है । अपने समस्त शत्रुओं का विनाश करने में तत्पर इस राजा की अपने अनिष्ट शत्रुओं की स्त्रियों में आसक्ति है ।६।

विरुद्धार्थ—

इस राजा ने विविध कमलों का संवर्धन किया है तथा कमलों को पददलित किया है, शत्रुओं की स्त्रियों में आसक्त है, तथा शत्रुओं की स्त्रियों के संग से इसे अनासक्ति है ।

३. अधिक श्लेष

जहाँ [प्रकृत] वाक्य आरब्ध (अर्थात् प्रकृत अर्थ) से अन्य ऐसे अर्थ को बताता है जो [प्रकृत अर्थ] से अधिक तथा असमान-विशेषणों वाला होता है वहाँ अधिक श्लेष अलंकार होता है ।७।

अविशेष श्लेष में विशेषण समान रहते हैं किन्तु यहाँ असमान रहते हैं ।

उदाहरण—

कठिन शब्दों के अर्थ : वक्र—कुटिलमति, पक्षे तिरछा । कलावान्—विद्वान्, पक्षे चन्द्रमा । भूतिम्—ऐश्वर्य, पक्षे राख । वृष—धर्म, पक्षे वृषभ (बैल) ।

जो कुटिल कलावान् (विद्वान्) का भी प्रेमपूर्वक आदर करने वाला है और समृद्धिशाली एवं धर्मात्मा है, वही राजा प्रशंसनीय है ।

शिरसिकृत्वा । तथा भूतिं समृद्धिं च बिभर्ति । कीदृशः सन् । वृषे धर्मे समारूढः । स एव परमेश्वरो नायको जयति । एतत्प्रकृतं वाक्यमिदं तूत्कृष्टमर्थान्तरं गमयति—यथा स एव परमेश्वरो महादेवो जयति, यः कलावन्तं चन्द्रं वक्रं कलाशेषमपि प्रेम्णा मूर्ध्नि निधाय वहति । भूतिं च भस्म वहति । वृषे वृषभे समारूढ इति । उत्कृष्टत्वं चात्र देववर्णनात् । नृभ्यो हि देवा अधिकाः । विशेषणान्यपि भिन्नार्थान्यत्रेति ॥

अथ वक्रश्लेषः—

यत्रार्थादन्यरसस्तत्प्रतिबद्धश्च गम्यतेऽन्योऽर्थः ।
वाक्येन सुप्रसिद्धो वक्रश्लेषः स विज्ञेयः ॥९॥

यत्रेति । यत्र वाक्येन स्वमर्थं ब्रुवतान्योऽर्थः प्रासङ्गिको गम्यते । कीदृशः । प्रकृतादन्यरसः । तथा तेन प्रकृतार्थेन प्रतिबद्धः । प्रतिबद्धता चैकविषयत्वेन । तथा सुप्रसिद्धस्तत्प्रतिबद्धत्वेन सुष्ठु प्रतीतः ॥

उदाहरणम्—

आक्रम्य मध्यदेशं विदधत्संवाहनं तथाङ्गानाम् ।
पतति करः काञ्च्यामपि तव निर्जितकामरूपस्य ॥१०॥

आक्रम्येति । तव निर्जितकामरूपाख्यजनपदस्य संबन्धी करो नृपदेयभागः काञ्चीनाम्नि यावद्देशे पतति । काञ्च्यपि त्वया जितेत्यर्थः किं कृत्वा । मध्यदेशं कान्यकुब्जा-

---

दूसरा अर्थ—

वक्र चन्द्रमा को प्रेमपूर्वक सिर पर बैठाने वाले, नन्दी वृषभारोही एवं भस्मधारी भगवान् शिव की जय हो ।८।

यहाँ प्रकृत अर्थ (राजा) की अपेक्षा अप्रकृत अर्थ (महादेव) 'अधिक' है, क्योंकि मानवों की अपेक्षा देवों को अधिक माना जाता है ।

४. वक्रश्लेष

जिस वाक्य से [प्रकृत] अर्थ से इतर ऐसा अर्थ प्रतीत होता है जो उस प्रकृत से प्रतिबद्ध (सम्बद्ध) होता हुआ भी अन्य रस का बोधक हो वहाँ वक्रश्लेष अलंकार होता है ।९।

उदाहरण—

हे राजन्, तुम कामरूप देश के विजेता हो । कांची देश वाले तुम्हें कर देते हैं । मध्यदेश (कान्यकुब्जादि) और अंगदेश पर भी आक्रमण करके तुमने उन्हें अपने अधिकार में किया है ।

दूसरा अर्थ—

तुम कामदेव के रूप का तिरस्कार करने वाले हो । तुम्हारा हाथ उदर पर पड़कर अंगों का मर्दन करता हुआ कांची (रशना) पर पड़ता है ।१०।

दिकमाक्रम्याभिभूय। अनन्तरमङ्गानां देशविशेषाणां संवाहनमुपमर्दनं कुर्वन्निति। अथ गम्यमर्थान्तरं भण्यते—यथा तव तिरस्कृतमदनरूपस्य करो हस्तः काञ्च्यां रसनाप्रदेशे पतति। मध्यदेशमुदरमात्रम्। अङ्गानामूरुस्तनादीनां संवाहनं परिमलनं कुर्वन्। अयं चार्थः शृङ्गाररसयुक्तः। एकविषयत्वेन च पूर्वार्थप्रतिबद्धः। पूर्वत्र तु रसो वीराभिधः॥

अथ व्याजश्लेषः—

यस्मिन्निन्दा स्तुतितो निन्दाया वा स्तुतिः प्रतीयेत।
अन्या विवक्षिताया व्याजश्लेषः स विज्ञेयः॥११॥

यस्मिन्निति। यत्र स्तुतेर्विवक्षिताया अन्या प्रासङ्गिकी निन्दा प्रतीयते निन्दाया वा विवक्षितायाः प्रासङ्गिकी स्तुतिः स व्याजश्लेषः॥

उदाहरणमाह—

त्वया मदर्थे समुपेत्य दत्तमिदं यथा भोगवते शरीरम्।
तथास्यते दूति कृतस्य शक्या प्रतिक्रियानेन न जन्मना मे॥१२॥

त्वयेति। अत्र कयापि नायिकया दूती दयितपार्श्वे प्रेषिता। सा तु तत्र स्वार्थं कृतवती। समागत्य चाधरक्षतादिकमुद्दिश्योत्तरं दत्तवती यथाहं तत्र त्वदर्थे गता सती सर्पेण दष्टा, परं वैद्यैश्चिकित्सितेति जीविता। ततस्तां कृतदोषां दूतीं नायिका स्तुतिद्वारेण निन्दति त्वयेत्यादिना। भोगवते इत्येकत्र सर्पाय, अन्यत्र विलासिने। प्रतिक्रिया त्वेकत्रोपकारः, अन्यत्रापकारः॥

निन्दास्तुतिमाह—

नो भीतं परलोकतो न गणितः सर्वः स्वकीयो जनो
मर्यादापि च लङ्घिता न च तथा मुक्ता न गोत्रस्थितिः।
भुक्ता साहसिकेन येन सहसा राज्ञां पुरः पश्यतां।
सा मेदिन्यपरैः परं परिहृता सर्वैरगम्येति या॥ १३॥

यहाँ प्रकृत अर्थ वीररस से सम्बद्ध है किन्तु अप्रकृत अर्थ शृंगार रस से।

५. व्याजश्लेष :

जहाँ [प्रकृत वाक्य में] स्तुति की विवक्षा हो, पर निन्दा प्रतीत हो, अथवा निन्दा की विवक्षा हो तो स्तुति प्रतीत हो, वहाँ व्याजश्लेष जानना चाहिए।११।

उदाहरण (स्तुति से प्रतीयमान निन्दा)—

हे दूति ! तुमने मेरे लिए अपने शरीर को उस भोगी (साँप) के अर्पण कर दिया, मैं तुम्हारे इस उपकार (अपकार) का ऋण इस जन्म में नहीं चुका सकती।१२।

वस्तुतः श्लेष द्वारा प्रतीयमान अर्थ यह है कि तुमने उस भोगी (विलासी) को

नो इति । अत्र निन्दा तावत्—या सर्वैरेव लोकैरगम्यत्वात्परिहृता सा मेदिनी शिल्पिविशेषनारी येन साहसिकेन राज्ञां पुरतः सहसैव भुक्ता । तेन किं कृतम् । न परलोकाद्भीतम्, न स्वजनो गणितः, मर्यादा च लङ्घिता, गोत्रस्थितिर्मुक्तेति । अतोऽपि निन्दायाः प्रासङ्गिकी स्तुतिरेव गम्यते । यथा—सा मेदिनी भूर्येन साहसिकेन राज्ञां पुरः पश्यतां सहसा भुक्तात्मवशीकृता । या सर्वैरेव राजभिर्दुर्गमत्वाद्दूरं परिहृता । तेन किं कृतम् । परलोकतः शत्रुलोकान्नो भीतम् । तथातिबलवत्त्वादात्मीयजनोऽपि साहाय्ये नापेक्षितः । तथा मर्यादा स्वदेशसीमा लङ्घिता । तथा गोत्राः पर्वतास्तेषु स्थितिश्च मुक्ता दुर्गं मुक्तमित्यर्थः ।।

अथोक्तिश्लेषः—

यत्र विवक्षितमर्थं पुष्यन्ती लौकिकी प्रसिद्धोक्तिः ।
गम्येतान्या तस्मादुक्तिश्लेषः स विज्ञेयः ।। १४ ।।

यत्रेति । यत्र तस्माद्विवक्षितार्थादन्या लोकप्रसिद्धोक्तिर्वचनं गम्यते स उक्तिश्लेषः । का तर्ह्यस्यालंक्रियेत्याह – विवक्षितमर्थं पुष्यन्तीं । एतदुक्तं भवति—प्रकृतोऽर्थो रम्यो भवतु, मा वा भूत्, लौकिकी चेदुक्तिर्गम्यते तयैव तस्य पोषः क्रियत इति ।।

उदाहरणमाह—

कलावतः संभृतमण्डलस्य यया हसन्त्यैव हृताशु लक्ष्मीः ।
नृणामपाङ्गेन कृतश्च कामस्तस्याः करस्था ननु नालिकश्रीः ।।१५।।

शरीर अर्पण कर दिया । अतः तुझे धिक्कार है ।

उदाहरण (निन्दा से प्रतीयमान स्तुति)—

निन्दा—इस दुःसाहसी ने अगम्या मेदिनी (शिल्पी की स्त्री) से सब राजाओं के सामने ही बलात्कार करते हुए परलोक का भी ध्यान नहीं किया, अपने सम्बन्धियों की परवाह नहीं की । अपने वंश और मर्यादा की अवहेलना की ।

स्तुति—इस साहसी राजा ने अन्य वीरों से दुराक्राम्य पृथ्वी को सब राजाओं के होते हुए अपने अधीन किया । वह शत्रुओं से भयभीत न हुआ, अपने स्वजनों की सहायता की अपेक्षा न करके अकेले ही इसने राज्य-सीमा का अतिक्रमण किया और दुर्ग छोड़ दिया ।१३।

६. उक्तिश्लेष

जहाँ विवक्षित अर्थ को पुष्ट करती हुई [श्लेष द्वारा] किसी लोक-प्रसिद्ध उक्ति की प्रतीति हो वहाँ 'उक्तिश्लेष' जानना चाहिए ।१४।

उदाहरण—

इस [नर्तकी] ने अपने मुस्कराते हुए मुख से पूर्ण मण्डल से युक्त चन्द्रमा की

कलावत इति । कस्याश्चिद्रूपवर्णनं क्रियते—कलावतश्चन्द्रस्य पूर्णबिम्बस्य यया हसन्त्यैवाशु शीघ्रं लक्ष्मीः शोभा हृताभिभूता । नृणां चापाङ्गेन कटाक्षेण कामः कृतः तस्या नालिकश्रीः पद्मशोभा करस्थैव । यया मुखेनाखण्डः शशी जितस्तया हस्तशोभया पद्ममपि नूनं जीयेतेत्यर्थ इति । एषोऽत्र विवक्षितोऽर्थः । एतस्यैव परिपोषं कुर्वाणान्या लौकिकी प्रसिद्धोक्तिर्गम्यते । यथा—यया नर्तक्या कलावतो विदग्धस्य संभृतमण्डलस्य ससहायवृन्दस्य हसन्त्यैवाक्लेशेनैवाशु लक्ष्मीर्हृता धनं भक्षितम् । नृणां चापाङ्गेन हेलयैव कामः कृतः । तस्या नालिकश्रीर्मुग्धजनसंपत्करस्थितैवेति । एष एव चात्र पूर्वार्थपोषो यल्लोकप्रसिद्धयोक्त्यवगम इति ॥

अथासंभवश्लेषः—

गम्येत प्रक्रान्तादसंभवत्तद्विशेषणोऽन्योऽर्थः ।
वाक्येन सुप्रसिद्धः स ज्ञेयोऽसंभवश्लेषः ॥ १६ ॥

गम्येतेति । सोऽसंभवश्लेषो ज्ञेयः, यत्र वाक्येन प्रक्रान्तादर्थादन्योऽप्रस्तुतोऽर्थो गम्यते । कीदृशः । असंभवत्तद्विशेषण इति । असंभवन्ति तस्य प्रस्तुतार्थस्य संबन्धीनि विशेषणानि यस्य स तथोक्तः । तथा सुप्रसिद्धः ख्यात इति ॥

उदाहरणमाह—

परिहृतभुजंगसंगः समनयनो न कुरुषे वृषं चाधः ।
नन्वन्य एव दृष्टस्त्वमत्र परमेश्वरो जगति ॥ १७ ॥

छवि का हरण किया, अपने कटाक्ष से लोगों को काम-विह्वल किया, इसके हाथ कमलों की शोभा को धारण कर रहे हैं।

दूसरा अर्थ—

इस नर्तकी ने अपनी मधुर मुस्कान से गोष्ठी में इस कलाविज्ञ पुरुष की लक्ष्मी का अपहरण कर लिया है। अपने कटाक्ष से लोगों को काम-विवश कर दिया है, भोले-भाले लोगों की सम्पत्ति तो इसके हाथ में ही है।१५।

यहाँ 'नालिकश्री' शब्द के दो अर्थ हैं—नालिका (पद्म) की शोभा और नालिका भैंस अर्थात् मूर्ख व्यक्तियों की सम्पत्ति ।

मूर्ख व्यक्तियों की सम्पत्ति नर्तकी के हाथ में होती है—यहाँ श्लेष द्वारा इस लोकोक्ति की प्रतीति हो रही है ।

७. असम्भवश्लेष

जिस वाक्य से प्रकृत अर्थ की अपेक्षा ऐसे अन्य अर्थ की प्रतीति हो जिसके विशेषण [प्रकृत अर्थ] के साथ घटित न हो सकें वहाँ असम्भवश्लेष जानना चाहिए।१६।

उदाहरण—

हे राजन् ! आप तो महादेव से भिन्न जान पड़ते हैं, क्योंकि महादेव भुजंग

परिहृतेति । अत्र प्रकृतान्नृपलक्षणादर्थादन्योऽर्थो महादेवलक्षणोऽसंभवद्विशेषणः प्रसिद्धो गम्यते । महादेवो हि विद्यमानवासुकिसङ्गस्त्रिनयनो वृषवाहनश्च । राजा तु दूरीकृतविटः समदृष्टिः पूजितधर्मश्च । अस्य चालंकारस्यान्यैर्व्यतिरेक इति नाम कृतम् । अत्र तु न व्यतिरेकरूपेण साम्यं प्रतिपिपादयिषितम् । अन्यत्वमेव विशेषणान्तरयुक्तमिति । रूपकताशङ्काप्यत्र न कार्या । साम्यस्य स्वयमेवाप्रकृतत्वादिति ॥

अथावयवश्लेषः—

यत्रावयवमुखस्थितसमुदायविशेषणं प्रधानार्थम् ।
पुष्यन्गम्येतान्यः सोऽयं स्यादवयवश्लेषः ॥ १८ ॥

यत्रेति । यत्र प्रधानार्थं पुष्यन्प्रकृतार्थपोषं कुर्वाणोऽन्योर्थो गम्यते सोऽवयवश्लेषः । कीदृशं प्रधानार्थम् । अवयवमुखेनावयवद्वारेण स्थितानि समुदायस्य विशेषणानि यत्र तत्तथोक्तम् ॥

उदाहरणम्—

भुजयुगले बलभद्रः सकलजगल्लङ्घने तथा बलिजित् ।
अक्रूरो हृदयेऽसौ राजाभूदर्जुनो यशसि ॥ १९ ॥

भुजयुगल इति । स राजा भुजयुगले बलेन हेतुना भद्रः श्रेष्ठः । तथा सकलस्य जगतो लङ्घने आक्रमणे कर्तव्ये बलिनः शक्तानपि जयत्यभिभवतीति बलिजित् । तथा

धारण करते हैं, किन्तु अपने भुजंगों (दुष्टों) का संग छोड़ दिया है । महादेव विषमनेत्र (तीन नेत्रों वाले) हैं, किन्तु आप समनयन (सबसे एक समान व्यवहार करने वाले) हैं । शिवजी नन्दी वृषभ पर सवारी करते हैं, किन्तु आप कभी वृष (धर्म) को [सवारी के लिए] नीचा नहीं होने देते ।१७।

८. *अवयव श्लेष*

जहाँ ऐसा अप्रकृत अर्थ प्रतीत हो जो उस प्रकृत अर्थ का पोषण करे जिसका समग्र विशेषण [विशेषण के एक भाग के द्वारा] अवस्थित हो ।१८।

उदाहरण—

वह राजा अपनी दोनों भुजाओं में बल के कारण श्रेष्ठ है, सारे संसार का उल्लंघन (विजय) करते हुए बलवानों को जीतने वाला है । उसका हृदय क्रूर न होकर मृदु-स्वभाव है और उसका धवल यश सर्वत्र प्रसृत हो रहा है ।

दूसरा अर्थ—

वह राजा भुजबल में बलभद्र (बलदेव) है । सारे जगत् को नाप लेने में (जीत लेने में) वह बलिजित् कृष्ण है । हृदय की कोमलता में वह साक्षात् अक्रूर है और अपने शुभ्र यश के कारण वह महावीर अर्जुन प्रतीत होता है ।१९।

हृदये मनस्यक्रूरो मृदुः। यशसि चार्जुनः शुक्लः। अत्रैतानि विशेषणान्यवयवद्वारेण समुदायस्य स्थितानि। यस्मान्नात्र बलभद्रत्वादिकं भुजादीनाम्। अपि तु राजैव यदा भुजयुगले बलेन भद्रस्तदा स एव बलभद्र इत्युच्यते। तथा सकलजगल्लङ्घने बलिजयनाद्बलिजित्। एवं हृदयस्याक्रूरत्वात्स एवाक्रूरः। यशसोऽर्जुनत्वात्स एवार्जुन इति। एवं प्रधानार्थं पोषयन्नयमन्योऽर्थोऽवगम्यते। यथा—बलभद्रो हलधरः। बलिजिद्वासुदेवः। अक्रूरो वृष्णिविशेषः। अर्जुनः पाण्डवः। एष एव चात्र प्रधानार्थपोषो यदन्येषां यानि नामानि तान्येवास्यान्वर्थेन प्रशंसाकारीणीति ॥

अथ तत्त्वश्लेषः—

यस्मिन्वाक्येन तथा प्रक्रान्तस्य प्रसाधयत्तत्त्वम्।
गम्येतान्यद्वाच्यं तत्त्वश्लेषः स विज्ञेयः ॥ २० ॥

यस्मिन्निति। यत्र वाक्येन पूर्ववत्प्रक्रान्तस्यार्थस्य तत्त्वं परमार्थं प्रसाधयदलंकुर्वाणमन्यद्वाच्यमर्थान्तरं गम्यते स तत्त्वश्लेषो विज्ञेयः ॥

उदाहरणमिदम्—

नयने हि तरलतारे सुतनु कपोलौ च चन्द्रकान्तौ ते।
अधरोऽपि पद्मरागस्त्रिभुवनरत्नं ततो वदनम् ॥२१॥

नयन इति। हे सुतनु, तव नयने चञ्चलकनीनिके। कपोलौ च चन्द्रवत्कान्तौ। पद्मवल्लोहित ओष्ठः। ततो वदनं मुखं त्रिभुवने रत्नं सारम्। जातौ यद्यदुत्कृष्टं तत्तद्र-

---

यहाँ राजा को 'भुजयुगले बलभद्रः' आदि चार विशेषणों से युक्त बताया गया है। ये सभी विशेषण समग्र रूप से राजा के साथ घटित होते हैं, किन्तु इन विशेषणों का एक-एक अवयव (बलभद्र, बलिजित्, अक्रूर और अर्जुन) अप्रकृत अर्थ का द्योतक होता हुआ प्रकृत अर्थ का पोषण करता है।

९. *तत्त्वश्लेष*

जहाँ वाक्य के द्वारा ऐसा अन्य अर्थ प्रतीत हो जो प्रकृत अर्थ के तत्त्व का प्रसाधन [पोषण] करे, वहाँ तत्त्वश्लेष जानना चाहिए।२०।

उदाहरण—

हे सुन्दरि ! तुम्हारी आँखों की पुतलियाँ चञ्चल हैं, तुम्हारे कपोल चन्द्रमा के समान सुन्दर हैं, तुम्हारे होंठ कमल की रक्तिमा धारण कर रहे हैं और तुम्हारा मुख त्रिभुवन का श्रेष्ठ रत्न—चिन्तामणि है।२१।

दूसरा अर्थ—

नयन चंचल तार (हार-मध्यमणि) के समान, कपोल चन्द्रकान्तमणि के समान, अधर पद्मराग के समान, और वदन त्रिभुवन रत्न अर्थात् चिन्तामणि के समान।

त्नमुच्यते । एनमर्थं प्रसाधयन्नयमन्योऽर्थो गम्यते । तव नयने तरले च तारे च । तरलो हारमध्यमणिः । तथा चन्द्रकान्तो मणिभेदः, पद्मरागश्च । यतश्चैतेऽवयवा रत्नरूपास्ततो वदनं त्रिभुवनरत्नं चिन्तामणिरेव । अस्माच्च पूर्वत्र विशेषोऽवयवमुखस्थितसमुदायविशेषणत्वमिति ॥

अथ विरोधाभासः—

स इति विरोधाभासो यस्मिन्नर्थद्वयं पृथग्भूतम् ।
अन्यद्वाक्यं गमयेदविरुद्धं सद्विरुद्धमिव ॥२२॥

स इति । स इत्यनेन प्रकारेण विरोधाभासोऽलंकारः, यस्मिन्नेकमेव वाक्यमन्यदर्थद्वयं पृथग्भूतं गमयति । कीदृशमर्थद्वयम् । स्वरूपेणाविरुद्धमपि विरुद्धमिव लक्ष्यमाणम् ॥

उदाहरणमाह—

तव दक्षिणोऽपि वामो बलभद्रोऽपि प्रलम्ब एष भुजः ।
दुर्योधनोऽपि राजन्युधिष्ठिरोऽस्तीत्यहो चित्रम् ॥२३॥

तवेति । हे राजन्, तव बाहुर्भक्तान्प्रत्यनुकूलत्वाद्दक्षिणोऽपि शत्रून्प्रति प्रतिकूलतया वाम इत्यविरुद्धमर्थद्वयम् । तथा स एव बलेन भद्रोऽपि प्रलम्बो दीर्घः । तथा दुःखेन योध्यत इति दुर्योधनोऽपि युधि समरे स्थिरोऽचञ्चल इत्यविरोधः । विरोधप्रतिभासश्च

यहाँ दूसरा प्रतीत अर्थ प्रकृत अर्थ के प्रत्येक तत्त्व का पोषण कर रहा है—मुख को चिन्तामणि कहना तभी सम्भव हुआ है, जब मुख के तत्त्वों (अवयवों) नयन आदि को 'हार-मध्यमणि' आदि कहा गया है ।

१०. विरोधाभास श्लेष

जहाँ एक ही वाक्य दो ऐसे पृथक् अर्थों का निर्देश करता है जो [परस्पर] विरुद्ध न होते हुए भी विरुद्ध-से प्रतीत होते हैं वहाँ विरोधाभास श्लेष होता है ।२२।

उदाहरण—

विरुद्धार्थ—**हे राजन् ! तुम्हारी भुजा दक्षिण (दाईं) होती हुई [भी] वाम (बाईं) है । बलभद्र (बलदेव) होती हुई भी प्रलम्ब (बलदेव का शत्रु प्रलम्बासुर) है । दुर्योधन होती हुई भी युधिष्ठिर है—कितना आश्चर्य है ।**

अविरुद्धार्थ—**हे राजन् ! [भक्तों की रक्षा करने वाली] तुम्हारी दक्षिण भुजा [शत्रुओं को सन्तप्त करने के कारण] वाम है, और बल से श्रेष्ठ [बलदेव] तथा लम्बी [प्रलम्बासुर] है । युद्ध में कठिनता से लड़ती हुई भी (दुर्योधन होकर भी) अविचल भाव से स्थित (युधिष्ठिर) है ।२३।**

दक्षिणवामयोः सव्येतररूपयोरन्यत्वात्, तथा बलभद्रप्रलम्बयोर्हलधरासुरयोरन्यत्वात्, तथा दुर्योधनयुधिष्ठिरयोर्धार्तराष्ट्रपाण्डवयोर्भिन्नत्वाल्लक्ष्यते । अथ विरोधादस्य को विशेषः । उच्यते—तत्र यादृग्विशेषणमादौ निर्दिष्टं तत्प्रत्यनीकं पुनरुच्यते । यथा संवर्धितकमलोऽप्यवदलितनालिक इति । अत्र तु वाक्यान्तरार्थपर्यालोचनया विरोधच्छायास्तीति । अत्रापि भवति, यदि दुर्योधनोऽपि सुयोधन इत्युच्यते । अत एव विरोधाभाससंज्ञा ॥

एवं शुद्धानलंकारान्सप्रभेदानाख्यायाधुना पूर्वकविलक्ष्यसिद्ध्यर्थं संकीर्णास्तानाह—

एषां तु चतुर्णामपि संकीर्णानां स्युरगणिता भेदाः ।
तन्नामानस्तेषां लक्षणमंशेषु संयोज्यम् ॥२४॥

एषामिति । एषां चतुर्णां वास्तवौपम्यातिशयश्लेषाणां संकीर्णानां मिश्राणां भेदाः स्युर्भवन्ति । कियन्त इत्याह—अगणिताः बाहुल्यपरमेतद्वचनम् । संख्या तु विद्यते । एषां त्विति तुरवधारणे । तेषामेव नान्यदलंकारजातमस्तीत्यर्थः । किं तेषां भेदानां नामेत्याह—तन्नामान इति । येषामलंकाराणां मिश्रभावस्त एव मिलितास्तेषां नामेत्यर्थः । यदि सहोक्तेः समुच्चयस्य च संकरस्तदा सहोक्तिसमुच्चय इति नाम । उत सहोक्तेर्व्यतिरेकस्य च तदा सहोक्तिव्यतिरेक इति नाम । एवमन्यत्रापि दृश्यम् । किं तेषां तर्हि लक्षणमित्याह—तेषामित्यादि । तेषां संकरभेदानां लक्षणमंशेषु भागेषु संयोज्यम् । यस्यालंकारस्य योंऽशस्तदीयमेव तत्र लक्षणमित्यर्थः ॥

अथ संकरस्यैव भेदानाह—

योगवशादेतेषां तिलतण्डुलवच्च दुग्धजलवच्च ।
व्यक्ताव्यक्तांशत्वात्संकर उत्पद्यते द्वेधा ॥२५॥

अलंकारों की परस्पर-संकीर्णता

इन चार (वास्तव, औपम्य, अतिशय और श्लेष) के परस्पर संकीर्ण (मिश्रण) होने से अलंकारों के अगणित भेद होते हैं । वाक्य के जिस अंश में जो अलंकार हो उसका नाम तथा लक्षण उसमें जोड़ देना चाहिए ।२४।

संकर के दो भेद—

तिल-तण्डुल और दूध-पानी के योग से व्यक्त और अव्यक्त अंशों के कारण संकर दो प्रकार का होता है ।२५।

एक से अधिक अलंकारों के परस्पर-मिश्रण को संकर कहते हैं । संकर दो प्रकार का होता है—'तिल-तण्डुल' के मिश्रण के समान व्यक्त अंशों का संकर 'व्यक्तांश संकर' कहाता है, और 'क्षीर-नीर' के मिश्रण के समान 'अव्यक्तांश संकर' कहाता है ।

योगवशादिति । एतेषां वास्तवादीनां संकरो व्यक्ताव्यक्तांशत्वाद्धेतोर्द्वेधा द्विप्रकारो भवति । व्यक्ताव्यक्तांशत्वमपि कुत इत्याह—योगवशात् । तथाविधसंबन्धवशादित्यर्थः । केषां यथा स स्यादित्याह—तिलतण्डुलवदित्यादि । तिलतण्डुलानां यथा व्यक्तांशः संकरः, दुग्धजलयोश्चाव्यक्तांशस्तद्वदेतेषामपीत्यर्थः ।।

अत्र हि दिङ्मात्रप्रदर्शनार्थमाह—

अभियुज्य लोलनयना साध्वसजनितोरुवेपथुस्वेदा ।
अबलेव वैरिसेना नृप जन्ये भज्यते भवता ।।२६।।

अभियुज्येति । त्वया सेनाभियुज्याक्रम्य भज्यते भङ्गं नीयते । कीदृशी । भयवशाल्लोलनयना चञ्चलाक्षी । तथा साध्वसेन भयेन जनित उरुर्महान्वेपथुः कम्पः स्वेदश्च यस्याः । अत्राबलेव सेनेति । यथा येन केनचिद्वनिता भज्यते सेव्यते तेनाभियुज्याभिसृत्यादौ ततो भज्यते । तथा सापि प्रथमसमागमवशाच्चञ्चलनेत्रा भवति । तस्या अपि साध्वसेनोर्वोर्वेपथुस्वेदौ भवत इति । इहाबलेवेत्येष उपमाविभागः । अभियुज्येत्यादिकस्तु श्लेषविभागः । तयोर्लक्षणं स्वधिया योज्यम् । एतौ तिलतण्डुलवत्प्रकटौ ।।

तथान्यदप्यत्रैवाह—

सन्नारीभरणो भवानपि न किं किं नाधिरूढो वृषं
किं वा नो भवता निकामविषमा दग्धाः पुरो विद्विषाम् ।

उदाहरण (व्यक्तांश संकर)—

हे राजन् ! आपकी शत्रुसेना अबला स्त्री के समान है । उसकी आँखें भय से चंचल हैं । वह डर के कारण काँप रही है और पसीने से तरबतर हो रही है । आप युद्ध में उस पर आक्रमण करके उसे तितर-बितर कर रहे हैं । (पक्षे—उससे समागम कर रहे हैं) ।२६।

यहाँ 'अबलेव' इस व्यक्त अंश में उपमा अलंकार है, और शेष व्यक्त अंशों में श्लेष अलंकार है । 'तिल-तण्डुल' के समान इन दोनों अलंकारों का संकर है ।

अन्य उदाहरण—

हे लोकव्यापक राजन् ! आप और महादेव—दोनों के स्वभाव और कार्य एक जैसे हैं । महादेव श्रेष्ठ नारी (उमा) के पति हैं, क्या आप श्रेष्ठ स्त्री के भर्ता नहीं हैं ? अथवा युद्ध में शत्रु के हाथियों को मारने वाले नहीं हैं । शिवजी वृषारोही हैं । क्या आप वृष (धर्ममार्ग) पर आरूढ़ नहीं हैं ? शिवजी ने शत्रुओं के विषम (तीन) पुरों को जलाया था । क्या आपने भी शत्रुओं के विषम (अजेय) दुर्गों को

इत्थं द्वौ परमेश्वराविह शिवस्त्वं चैकरूपस्थिती
तत्किं लोकविभो न जातु कुरुषे सङ्गं भुजंगैः सह ॥२७॥

सन्नारीति। हे लोकविभो राजन्, इत्थमुक्तप्रकारेण त्वं हरश्च परमेश्वरौ। यस्मादेकरूपस्थिती तुल्यस्वभावव्यवहारौ। तत्कदाचिदपि भुजंगैः सह सङ्गं न कुरुषे। तदेव तुल्यत्वं वक्ति– स हि हरः सतीं नारीमुमाख्यां बिभर्ति धारयति। भवानपि शोभना नारी। बिभर्ति पोषयत्येव। अथवा सन्ना अवसादं गता अरीभा रिपुकरिणो रणे यस्य स तथाविधः। हरो वृषं जरद्गवमधिरूढः। भवानपि वृषं धर्मम्। तथा हरेण विद्विषां त्रिपुरवासिनां त्रिषमास्तिस्रः पुरो दग्धाः। भवतात्यन्तदुर्गाः शत्रूणां पुरो दग्धाः। सर्वत्र किंशब्दः प्रश्ने। तथा तस्य परमेश्वर इति संज्ञा। त्वमपि परम उत्कृष्ट ईश्वरोऽर्थवान्। एवं यादृशो हरस्तादृशो भवानपि। तद्यथा तेन भुजंगैः सह संपर्कः कृतस्तथा त्वयापि खिङ्गैः कथं न कृत इति व्यतिरेकस्य श्लेषस्य चात्र संकरः। साधारणविशेषणयोगात् (श्लेषणयोगात्) श्लेषसद्भावः। हरे उपमाने भुजङ्गसङ्गस्य दोषस्य सत्त्वाद्राजनि चासत्त्वाद्गुणत्वे सति व्यतिरेकसद्भावः एतौ चात्र तिलतण्डुलवत्प्रकटौ॥

इदानीमव्यक्तसंकरोदाहरणमाह—

आलोकनं भवत्या जननयनानन्दनेन्दुकरजालम्।
हृदयाकर्षणपाशः स्मरतापप्रशमहिमसलिलम् ॥२८॥

आलोकनमिति। भवत्या आलोकनं जननयनानन्दनेन्दुकरजालमेवेति रूपकम्। गुणानां साम्ये सत्युपमानोपमेययोरभिदेति रूपकलक्षणात्। अथवा भवत्या आलोकनं

दग्ध नहीं किया है ? शिवजी परमेश्वर हैं। आप भी परम ऐश्वर्य वाले हैं। शिवजी भुजंगों को अपने पास रखते हैं, किन्तु हे राजन्, आप भुजंगों (दुष्टों) को अपने पास क्यों नहीं रखते ? ।२७।

यहाँ भी, तिल-तण्डुल-न्याय' से श्लेष और व्यतिरेक अलंकारों का संकर है। उदाहरण (अव्यक्त संकर)—

हे सुन्दरि ! तुम्हारा दर्शन लोगों की आँखों को आनन्द देने में चन्द्रमा का शीतल किरणजाल ही है, अथवा उसके समान है। यह हृदय को आकृष्ट करने में पाश ही है, अथवा पाश के समान है, तथा कामसन्ताप को शान्त करने में शीतल जल है, अथवा शीतल जल के समान है ।२८।

यहाँ 'जननयनानन्दनेन्दुकरजालम्' में रूपक भी है और उपमा भी। यही स्थिति 'हृदयाकर्षणपाशः' तथा 'स्मरतापप्रशममहिमसलिलम्' की भी है। इन स्थलों के अव्यक्त अंशों में ही ये दोनों अलंकार हैं। यहाँ १०।२६ में 'अवलेव' इस व्यक्त अंश के समान स्थिति नहीं है।

जननयनानन्दने इन्दुकरजालमिवेत्युपमा। एतौ चालंकारावव्यक्तांशौ। अत्र प्रमाणाभावादेकत्रानिश्चयः। दोषाभावाच्चोभयमप्याश्रयितुं योग्यम्। एवं हृदयाकर्षणपाश-एव पाश इव वा। स्मरतापप्रशमने हिमसलिलमेव तदिव वेति। रूपकोपमासंकरोऽयमलंकारः॥

तथा—

आदौ चुम्बति चन्द्रबिम्बविमलां लोलः कपोलस्थलीं
संप्राप्य प्रसरं क्रमेण कुरुते पीनस्तनास्फालनम्।
युष्मद्वैरिवधूजनस्य सततं कण्ठे लगत्युल्लसन्
किंवा यन्न करोत्यवारितरसः कामीव वाष्पः पतन्॥२९॥

आदाविति। हे नृप, युष्मद्वैरिवधूजनस्य संबन्धी वाष्पः पतन्प्रसरन्कामीव किं वा यन्न करोति। वा इवार्थे। किमिव यन्न करोतीत्यर्थः। वाष्पस्तावत्पतन्प्रथमं कपोलस्थलीं चुम्बति। कामुकोऽपि तथैव। ततो वाष्पः प्रसरं प्राप्य क्रमेण पीनस्तनास्फालनं कुरुते। काम्यपि तदेव। ततः कण्ठे च द्वावपि लगतः। ततश्चावारितरसो वाष्पः कामीव किमिव न कुरुते। जघनस्थलमपि स्पृशतीत्यर्थः। अत्र रूपकोपमाश्लेषपर्यायाणां संकरः। तत्र कपोलस्थलीमिति रूपकम्। कामीव चन्द्रबिम्बविमलामिति चोपमा। वाष्पकामिनोः साधारणविशेषणयोगाच्छ्लेषः। शत्रवश्च त्वया जिता इति तात्पर्यतः पर्यायसद्भाव इति। अत्र चालंकारसंकरे पूर्वकविलक्ष्याणि भूरिशो दृश्यन्त इत्यत्र महानादरः कार्यः। तथा च—'दिवाकराद्रक्षति यो गुहासु' इत्यादि। अत्रोत्प्रेक्षार्थान्तरन्यासोपमानां संकरः। यथा च—

अन्य उदाहरण—

हे राजन्! आपकी शत्रुस्त्रियों का आँसू कामुक व्यक्ति की भाँति क्या-क्या नहीं करता। पहले तो वह उनके चन्द्रबिम्ब के समान निर्मल कपोलों का चुम्बन करता है, फिर आगे बढ़ता हुआ उनके स्थूल कुचों का ताड़न करता है। तत्पश्चात् उनके गले लगता है। इस प्रकार आनन्दानुभव में बाधा न डालते हुए वह उनके जघन आदि का स्पर्श करता है।२९।

यहाँ विभिन्न अव्यक्त अंशों में रूपक, उपमा, श्लेष, पर्याय आदि अलंकारों का संकर है।

इसी प्रकार नमिसाधु-प्रस्तुत 'रक्तस्त्वम्……' पद्य में श्लेष और व्यतिरेक का संकर है—

हे अशोक वृक्ष! तुम अपने नवकिसलयों से रक्त (अरुण) हो, और मैं अपनी प्रिया के प्रशंसनीय गुणों के कारण रक्त (अनुरक्त) हूँ। तुम्हारे ऊपर शिलीमुख

रक्तस्त्वं नवपल्लवैरहमपि श्लाघ्यैः प्रियाया गुणै—
स्त्वामायान्ति शिलीमुखाः स्मरधनुर्मुक्ता सखे मामपि ।
कान्तापादतलाहतिस्तव मुदे तद्वन्ममाप्यावयोः
सर्वं तुल्यमशोक केवलमहं धात्रा सशोकः कृतः ॥

एतौ श्लेषव्यतिरेकौ । एवमन्यदपि बोद्धव्यमिति ।

इति श्रीरुद्रटकृते काव्यालंकारे नमिसाधुविरचितटिप्पणसमेतो
दशमोऽध्यायः समाप्तः ।

(भ्रमर) आते हैं और मुझ पर भी कामदेव के धनुष से छूटे हुए शिलीमुख (बाण) आते हैं (गिरते हैं) । सुन्दर रमणी के चरणतल का प्रहार तुम्हें प्रसन्नता (विकास) देनेवाला है और इसी प्रकार मुझे भी । हम दोनों की इन बातों में तो समानता है, अन्तर केवल इतना है कि तुम अशोक (शोकरहित) हो और मुझे विधाता ने सशोक (शोकयुक्त) बनाया है ।

इति 'अंशुप्रभा'ऽऽख्य-हिन्दी-व्याख्यायां दशमोऽध्यायः समाप्तः ।

एकादशोऽध्यायः

अर्थस्यालङ्कारा अभिहिताः । संप्रति दोषाः कथ्यन्ते । नन्वर्थालङ्कारप्रतिपादनात्प्रागेवार्थदोषा परिहृता एव तत्किमिति पुनस्ते कथ्यन्त इत्याह—

परिहृत एव प्रायो दोषोऽर्थस्यान्यथोक्तिपरिहारात् ।
अयमुच्यते ततोऽन्यस्तत्कारणमन्यथोक्तौ च ॥१॥

परिहृत इति । 'सर्वः स्वं स्वं रूपम्' (७।७) इत्यादिना ग्रन्थेनार्थस्य विपरीतकथनलक्षणो यो महान्दोषः सोऽस्माभिः 'तं च न खलु बध्नीयान्निष्कारणमन्यथातिरसात्' (७।७) इत्यनेनान्यथोक्तिपरिहारात्परिहृत एव । यस्तु ततोऽन्यथोक्तेरन्यः स्वल्पदोषः सोऽयमधुनोच्यते । तथा तस्यार्थस्यान्यथोक्तौ यत्कारणं तदप्युच्यते । परिहृतमेव सर्वं दोषजातमन्यथोक्तिपरिहारद्वारेण । किंचिदेव दुर्लक्ष्यमपरिहृतमस्तीति प्रायोग्रहणेन सूच्यते । यत्तु विद्यते तदधुना परिह्रियते ॥

अथ तानेव दोषानुद्दिशति—

अपहेतुरप्रतीतो निरागमो बाधयन्नसंबद्धः ।
ग्राम्यो विरसस्तद्वानतिमात्रश्चेति दुष्टोऽर्थः ॥२॥

अपहेतुरिति । अपहेत्वादयो नवार्थदोषाः । इतिशब्दो हेत्वर्थे प्रत्येकमभिसंबध्यते यतोऽपहेतुरतो दुष्ट इत्यर्थः । एवमन्यत्रापि योज्यम् ।

एकादश अध्याय

इस ग्रन्थ के छठे अध्याय में ७ पद-दोषों, और ४ वाक्य-दोषों का निरूपण किया जा चुका है। इसके अतिरिक्त दूसरे अध्याय के ८वें श्लोक में भी गुणों के वैपरीत्य से सम्भव [पदवाक्यगत] छः दोषों की चर्चा की गयी थी। अब इस अध्याय में आचार्य ने ९ अर्थदोषों का निरूपण करने के उपरान्त ४ उपमा-दोषों पर प्रकाश डाला है।

अर्थ की अन्यथा [विपरीत, अशुद्ध, अमान्य, भ्रान्त, अपूर्ण आदि] उक्ति का त्याग करना चाहिए, इसी कारण दोष प्रायः त्याज्य होते हैं, [यह पहले इस ग्रन्थ में बताया जा चुका है, अब] अन्य दोषों का निरूपण किया जाता है तथा उनकी अन्यथा-उक्ति का कारण भी [निर्दिष्ट किया जाता है।] ।१।

अपहेतु, अप्रतीत, निरागम, बाधयन्, असम्बद्ध, ग्राम्य, विरल, तद्वान् और अतिमात्र ये [नौ] अर्थ-दोष हैं ।२।

यथोद्देशस्तथा लक्षणमिति कृत्वा पूर्वमपहेतुलक्षणमाह—

अपहेतुरसौ यस्मिन्केनचिदंशेन हेतुतामर्थः ।
याति तथात्वे युक्त्या बलवत्या बाध्यते परया ।।३।।

अपहेतुरिति । असावपहेतुर्दोषः, यत्र केनचित्प्रकारेणार्थस्तथात्वे तद्धर्मतायां हेतुत्वं याति । स च हेतुतां गतः सन्नपरया बलिष्ठया युक्त्या बाध्यते । यदा चार्थहेतुत्वसद्भावस्तदान्यथोक्तिपरिहारेण न परिहृतः ।।

उदाहरणम्—

तव दिग्विजयारम्भे बलधूलीबहलतोयजनितेषु ।
गगनस्थलेषु भानोश्चक्रमभूद्रथभराभिज्ञम् ।।४।।

तवेति । गतार्थमेव । अत्र धूलेर्बहलत्वलक्षणोऽर्थः स्थलत्वे हेतुतां यात्येव । किंतु स्थलस्य गगने निराधारत्वादवस्थानं न संभवतीत्यनयोत्तरकालभाविन्या बलवत्या युक्त्या बाध्यते ।।

---

१. अपहेतु

जिसमें अर्थ किसी अंश में कारण बन जाता है, फिर वैसा हो जाने पर अन्य बलवान् युक्ति से बाधित हो जाता है, वहाँ अपहेतु होता है ।३।

उदाहरण—

[हे राजन्] तुम्हारे दिग्विजय के आरम्भ में सेना की धूलि-समूह और जल के मिश्रण [के उड़ने] से उत्पन्न आकाश-मार्गों में सूर्य का चक्र रथ के भार से परिचित हो गया ।४।

धूलि-समूह और जल के मिश्रण से स्थल बन जाने का कारण तो मान्य है, किन्तु निराधार गगन में इसकी स्थिति असम्भव होने से यहाँ अपहेतु दोष है ।

२. अप्रतीत

जो अर्थ होता हुआ भी वृद्धों (पूर्व कवियों) द्वारा प्रयुक्त नहीं होता वह (उसका प्रयोग करना) 'अप्रतीत' [दोष] कहलाता है ।

उदाहरण—

वह सुकुमारी शरद् ऋतु के समान शोभित होती है, क्योंकि ये दोनों 'विकसत्पुलकोत्करा' हैं—सुकुमारी का पुलक-(रोमांच-)समूह प्रसरित है, और शरद् ऋतु में 'पुलक' नामक वृक्षों के समूह पुष्पित होते हैं ।५।

यहाँ 'पुलक' शब्द वृक्ष के अर्थ में अप्रतीत है ।

अथाप्रतीतः—

अर्थोऽयमप्रतीतो यः सन्नपि न प्रयुज्यते वृद्धैः ।
शरदिव विभाति तन्वी विकसत्पुलकोत्करेयमिति ।।५।।

अर्थ इति । अयमप्रतीतोऽर्थो भण्यते यो विद्यमानोऽपि वृद्धैः पूर्वकविभिर्न प्रयुज्यते । उदाहरणम्—[शरदिति ।] प्रसरद्रोमाञ्चनिवहा तन्वी भाति । शरच्च पुष्यत्पुलकाख्यवृक्षविशेषनिवहा । अत्र पुलकशब्दो वृक्षविशेषवाचकोऽपि तद्वाचकत्वेन पूर्वकविभिर्न प्रत्युक्त इति न प्रयोज्यः ।।

अथ निरागमः—

आगमगम्यस्तमृते य उच्यतेऽर्थो निरागमः स इति ।
सततं स राजसूयैरीजे विप्रोऽश्वमेधैश्च ।।६।।

आगमेति । योऽर्थ आगमात्सिद्धान्ताद्गम्यते, अथ चागमनिरपेक्ष एवोच्यते, स इत्यनेन प्रकारेण निरागमः । उदाहरणम्—सततमिति । अत्र विप्रस्य राजसूयाश्वमेधौ यागौ कथितौ । तौ च वेदगम्यौ । वेदे च तयोर्नृपस्यैवाधिकारो न ब्राह्मणस्येत्युक्तम् ।।]

अथ बाधयन्—

यः पूर्वमन्यथोक्तं तद्वक्तृकमेव बाधयेदर्थम् ।
अर्थः स बाधयन्निति मृगाक्षि नेत्रे तवानुपमे ।।७।।

---

३. निरागम

जो अर्थ आगम (सिद्धान्त) से ज्ञातव्य हो, किन्तु उसे इसके बिना कहा जाए उसे निरागम कहते हैं ।

उदाहरण—

वह ब्राह्मण राजसूय और अश्वमेध यज्ञों द्वारा निरन्तर इष्टि करता है ।६।

राजसूय और अश्वमेध ये दोनों यज्ञ वेद में नृप के लिए अधिकृत हैं न कि ब्राह्मण के लिए । अतः यहाँ 'निरागम' दोष है ।

४. बाधयन्

जो अर्थ उसी वक्ता द्वारा पहले कहे गये विपरीत अर्थ का बाध करे वह अर्थ 'बाधयन्' [दोष] कहाता है ।

उदाहरण—

मृग के समान नेत्रों वाली । तुम्हारे नेत्र अनुपम हैं ।७।

जिस वक्ता द्वारा नायिका के नेत्र मृग के नेत्रों के समान कहे गये हैं उसी के द्वारा उन्हें अनुपम कहना 'बाधयन्' दोष है, क्योंकि इससे पूर्व कथन का बाध होता है।

य इति । योऽर्थ उत्तरकालं भण्यमानः समानववतृकं पूर्वमन्यथोक्तमर्थं बाधयेत्स बाधयन्निति भण्यते । यथा—मृगाक्षि नयने तवानुपमे, अत्र येनैव वक्त्रा प्रथमं मृगाक्षीत्युक्तं तेनैव पुनस्तव नयने अनुपमे इति पूर्वस्य बाधकमुक्तम् । इदं चात्र निदर्शनम्। यथा—

वपुरनुपमं नाभेरूर्ध्वं विधाय मृगीदृशो ललितललितैरङ्गन्यासैः पुरा रभसादिव ।
तदनु सहसा खिन्नेनेव प्रजापतिना भृशं पृथुलपृथुला स्थूलस्थूला कृता जघनस्थली ।।

अत्र नाभेरूर्ध्वमनुपमं वपुरित्याद्युक्त्वा मृगीदृश इत्युक्तम् ।।

अथासंबद्धः—

प्रक्रान्तानुपयोगी प्राप्तो यस्तत्क्रमादसंबद्धः ।
स इति गता ते कीर्तिर्बहुफेनं जलधिमुल्लङ्घ्य ।।८।।

प्रक्रान्तेति । योऽर्थः प्रक्रान्तार्थक्रमायातोऽपि प्रक्रान्तेऽर्थेऽनुपयोगी सोऽसंबद्ध इत्युच्यते । उदाहरणम्—गता ते कीर्तिरित्यादि । अत्र जलधौ संबद्धत्वात्फेनानां बहुफेनत्वं क्रमप्राप्तम् । अथ च प्रस्तुतेऽर्थेऽनुपयोगि । यदि बहुफेनत्वं जलधेर्दुस्तरत्वे हेतुर्भवेत्तदा भवेदपारजलधिलंघनं कीर्तेरतिशयाय । न चैवमस्ति । तस्माद्बहुफेनमित्येतदकिंचित्करम् ।।

इसी प्रकार का एक अन्य उदाहरण नमिसाधु ने भी प्रस्तुत किया है—

प्रजापति ने पहले तो जल्दी में उस [नायिका] की नाभि से ऊपर के शरीर को अति रमणीय अंगों के निवेश द्वारा अनुपम बना दिया, बाद में सहसा खिन्न-से होकर उस मृगनयनी के नितम्ब-भाग को विशाल-विशाल सा एवं स्थूल-स्थूल सा बना डाला।

यहाँ भी नायिका के उपरिभाग-स्थित शरीर को अनुपम कहकर कवि ने उसके नेत्रों को मृग के नेत्रों के समान कह दिया है ।

५. *असम्बद्ध*

जो अर्थ क्रम से आया हुआ भी प्रस्तुत अर्थ में अनुपयोगी भी हो वह असम्बद्ध होता है ।

उदाहरण—

[हे राजन्] तेरी कीर्ति बहुफेनयुक्त समुद्र को भी लाँघकर चली गयी है—समुद्र के पार भी फैल गयी है ।८।

समुद्र के प्रसंग से 'बहुफेन' शब्द का प्रयोग समुचित होता हुआ भी प्रस्तुत अर्थ में अनुपयोगी है, क्योंकि यह कीर्ति की लंघनीयता में बाधक नहीं है ।

अथ ग्राम्यः—

ग्राम्यत्वमनौचित्यं व्यवहाराकारवेषवचनानाम् ।
देशकुलजातिविद्यावित्तवयःस्थानपात्रेषु ॥९॥

ग्राम्यत्वमिति । यद्व्यवहाराकारवेषवचनानां चतुर्णामपि प्रत्येकं देशकुलजातिविद्यावित्तवयःस्थानपात्रेष्वष्टसु विषयेष्वनौचित्यं तद्ग्राम्यत्वं दोषः । तत्र व्यवहारश्चेष्टा । आकारः स्वाभाविकं रूपम् । कृत्रिमं तु वेषः । वचनं भाषा । तथा देशो मध्यदेशादिरार्यानार्यभिन्नः । कुलं गोत्रमिक्ष्वाक्वादिः । देवदैत्यादिकमित्यन्ये । जातिः स्त्रीपुंसादिका । ब्राह्मणत्वादिका वा । विद्या शास्त्रज्ञता । वित्तं धनम् । वयः शैशवादिकम् । स्थानं पदमधिकारः । पात्राणि भरतोक्तान्युत्तममध्यमादीनि । तत्रार्यदेशेष्वकरुणो व्यवहारः, भयंकर आकारः, उद्धतो वेषः, परुषवचनमनुचितम् । म्लेच्छेषु त्वेतदेवोचितम् । तथा ग्रामेषु यदुचितं तदेव नगरेषु ग्राम्यम् । एवं कुलजेषु परिभवसहत्वादिको व्यवहारः, असौम्य आकारः, विकृतो वेषः, वितथं वचनमनुचितानि । जातौ तु ब्राह्मणादीनां निजनिजजातिविहितव्यवहाराकारवेषवचनान्युचितानि तदन्यथा त्वनुचितानि । पुरुषेषु शूद्रवर्जमन्नपाकादिको व्यवहारः, स्थूलस्तनश्मश्रुरहितं च रूपमाकारः, कौसुम्भवस्त्रं काचाद्याभरणं च वेषः, समन्मथादिवचनमनुचितम् । स्त्रीषु तदेवोचितम् । एवमन्येषामपि । तथा विद्यायां पण्डितेषु शस्त्रग्रहणपूर्वको व्यवहारः, सव्याधिवपुराकारः, उद्भटो वेषः, असंस्कृतवचनमनुचितानि । मूर्खेषु तान्येवोचितानि । वित्ते धनिनां दानोपभोगरहितो व्यवहारः, दुःस्पर्शादिराकारः, मलिनवस्त्रादिको वेषः, दीनं वचनमनुचितानि । द्रमकेषु (?) तान्येवोचितानि । वयसि वृद्धेषु सेवादिव्यवहारः, इन्द्रियपाटवादिराकारः, कुण्डलादिधारणं वेषः, समन्मथं वचनमनुचितानि । तरुणेषु तान्येवोचितानि । स्थाने राज्ञां सक्रोधलोभादिको व्यवहारः, निर्लक्षण आकारः, कुण्डलादिरहितो वेषः, परुषं दीनं वचनमनुचितानि । एवं पात्रेषु यानि भीमसेने व्यवहारादीन्युचितानि तान्येव युधिष्ठिरे ग्राम्याणीत्यादि । एतत्तु ग्राम्यत्वमन्यथोक्तिपरिहारेण न परिहृतम् ॥

---

९. *ग्राम्य*

कुल, जाति, विद्या, वित्त, आयु, स्थान और पात्र इन [आठों विषयों] में व्यवहार, आकार, वेश और वचन का औचित्य ग्राम्य कहाता है ।९।

यहाँ नमिसाधु ने ग्राम्यत्व (अनौचित्य) की एक लम्बी सूची प्रस्तुत की है । विज्ञ पाठकों के लिए वह अति सुबोध है । उदाहरणार्थ— विद्वान् जनों के लिए शस्त्र-ग्रहण रूप व्यवहार, व्याधि (रोग, चाहें तो इसका अर्थ 'कुप्रकृति', विषय-वासना आदि भी ले सकते हैं) से युक्त देह रूप, आकार, भयंकर वेष और अपरिष्कृत वचन अनुचित हैं, किन्तु मूर्खों के लिए ये सभी उचित हैं । इत्यादि ।

अथात्रैव दिक्प्रदर्शनार्थमाह—

प्रागल्भ्यं कन्यानामव्याजो मुग्धता च वेश्यानाम् ।
वैदग्ध्यं ग्राम्याणां कुलजानां धौर्त्यमित्यादि ॥१०॥

प्रागल्भ्यमिति । कन्याशब्देन नवोढा लक्ष्यते । कन्यानां नवोढाङ्गनानां प्रागल्भ्यं वैयात्यम् । तथा वेश्यानां पण्यस्त्रीणामव्याजकृत्रिमं मौग्ध्यम् । तथा ग्राम्याणां वैदग्ध्यम् । तथा कुलीनानां धूर्तत्वमनुचितम् । ग्राम्यमित्यर्थः ॥

ततश्च किमित्याह—

एतद्विज्ञाय बुधैः परिहर्तव्यं महीयसो यत्नात् ।
नहि सम्यग्विज्ञातुं शक्यमुदाहरणमात्रेण ॥११॥

एतदिति । एतद्ग्राम्यत्वं विशेषेण ज्ञात्वा महीयसो यत्नादादरेण परिहर्तव्यम् । महाकवयो यत्र मुह्यन्तीत्यतो महीयसो यत्नादित्युक्तम् । तदुदाहरणानि किमेतेषु नोच्यन्त इत्याह—नहीत्यादि । यस्मादुदाहरणमात्रेण न यथावद्विज्ञातुं शक्यते । ततः स्वधिया विज्ञाय यथा ग्राम्यत्वं न भवति तथा प्रयोज्यम् ।

यथा—

व्याहृता प्रतिवचो न संदधे गन्तुमैच्छदवलम्बितांशुका ।
सेवते स्म शयनं पराङ्मुखी सा तथापि रतये पिनाकिनः ॥

कन्याओं की [नवोढाओं की भी] धृष्टता, वेश्याओं की अकृत्रिम मुग्धता, ग्रामीणों की चतुरता, कुलीनों की धूर्तता—यह सब [वर्णन करना] ग्राम्य दोष है ।१०।

इस ग्राम्यत्व को जानकर बुद्धिमानों को महान् प्रयास से इस ग्राम्यत्व का परिहार करना चाहिए । केवल उदाहरण-मात्र से यह अच्छी प्रकार से नहीं जाना जा सकता ।११।

इसी प्रसंग में नमिसाधु ने दो पद्य प्रस्तुत किये हैं जिनमें ग्राम्यत्व दोष की स्वीकृति नहीं करनी चाहिए—

(१) 'व्याहृता प्रतिवचो न…'—वह पार्वती संभाषण करने पर उत्तर नहीं देती थी । दुपट्टा पकड़ने पर [वहाँ से] चले जाना चाहती थी । शय्या पर मुँह फेर लेती थी । फिर भी [इन विपरीत चेष्टाओं से] भगवान् शिव को आनन्द ही मिलता था ।

(२) 'उपचारिताप्यतिमात्रम्…'—[इस पद्य में किसी वेश्या का वर्णन प्रतीत होता है] वह प्रकट-वधू अर्थात् वेश्या [धन-राशि द्वारा] अत्यधिक उपचारित (सेवित) की जाती हुई भी उस वैशिक की ओर, जिसकी सम्पत्ति अब क्षीण हो चुकी है और

तथा—

उपचरिताप्यतिमात्रं प्रकटवधूः क्षीणसंपदः पुंसः ।
पातयति दृशं व्रजतः स्पृहया परिधानमात्रेऽपि ।। एवमादि ।।

अथ विरसः—

अन्यस्य यः प्रसङ्गे रसस्य निपतेद्रसः क्रमापेतः ।
विरसोऽसौ स च शक्यः सम्यग्ज्ञातुं प्रबन्धेभ्यः ।।१२।।

अन्यस्येति । रसान्तरप्राप्तौ सत्यां यो रसः शृङ्गारादिः निपतति स विरसोऽर्थदोषः । ननु सर्वरसयुक्तत्वान्महाकाव्यस्य रसान्तरापातोऽभ्युपगत एव । तत्कथमत्र विरसोऽर्थदोष इत्याह—क्रमापेतः प्रसङ्गविरुद्धः । यस्य रसस्य तत्रानवसरः स दुष्ट इत्यर्थः । किमत्रोदाहरणमित्याह—स चेत्यादि । चो हेतौ । यस्मात्स विरसोर्थदोषः प्रबन्धेभ्यो महाकाव्यादिभ्यः सम्यग्विज्ञातुं शक्यते । अत इह नोदाहृत इत्यर्थः ।।

सूचीमात्रमाह—

तव वनवासोऽनुचितः पितृमरणशुचं विमुञ्च किं तपसा ।
सफलय यौवनमेतत्सममनुरक्तेन सुतनु मया ।।१३।।

जो [बाहर] जा रहा है, अपने दरवाज़े को बन्द करते हुए भी [इस] स्पृहा से दृष्टि-पात कर रही है [कि वह पुनः धनराशि लेकर आएगा] ।

इन दोनों उदाहरणों में परिस्थिति का अनुकूल-चित्रण होने के कारण ग्राम्यत्व दोष नहीं मानना चाहिए ।

७. विरस

जो रस किसी अन्य रस के प्रसङ्ग में क्रम से हटा हुआ अर्थात् विरुद्ध रूप में आ पड़े वह विरस [दोष कहाता] है, और यह प्रबन्ध-काव्यों द्वारा जाना जा सकता है ।१२।

उदाहरण—

हयग्रीव का सुत नरकासुर को लाने के लिए उसकी नगरी में गया । वहाँ उसे ज्ञात हुआ कि विष्णु द्वारा नरकासुर का वध कर दिया गया है और उसकी पुत्री अपने पिता की मृत्यु के शोक से आकुल होकर वन में चली गयी है तो वह उसे आश्वासन देने के लिए चला गया । किन्तु उस सुन्दरी को देखते ही वह कामपीड़ित होकर इस प्रकार कहने लगा—

वन में रहना तेरे लिए अनुचित है । पिता की मृत्यु के शोक को छोड़ । तपस्या करने से क्या लाभ ? सुकुमारि ! अपने प्रति मुझ अनुरक्त के साथ अपने इस यौवन को सफल बना ।१३।

तवेति । हयग्रीवसुतो नरकासुरानयनाय तत्पुरीं गतः, तत्र च हरिहतं नरकासुरं जनेभ्यः श्रुत्वा तत्सुतां च पितृमरणदुःखेन वनगतां बुद्ध्वा समाश्वासनाय गतः, तत्र दृष्ट्वा च तां सकामः सन्नाह—तव वनवास इत्यादि । पातनिकयैव गतार्थम् ।।

प्रकारान्तरमाह—

य: सावसरोऽपि रसो निरन्तरं नीयते प्रबन्धेषु ।
अतिमहतीं वृद्धिमसौ तथैव वैरस्यमायाति ।।१४।।

य इति । यः काव्यादौ क्वापि प्रस्तुतो रसो नैरन्तर्येण महतीं वृद्धिं नीयते स श्रोतृणां वैरस्यमावहतीति विरसो भवति । अत्र वेणीसंहारषष्ठोऽङ्को निदर्शनम् ।।

अथ तद्वान्—

यो यस्याव्यभिचारी सगुणादिस्तद्विशेषणं क्रियते ।
परिपूरयितुं छन्दो यत्र स तद्वानिति ज्ञेयः ।।१५।।

य इति । यो गुणादिर्यस्य पदार्थस्याव्यभिचारी नित्यस्थः स गुणादिस्तस्य विशेषणतया यत्र क्रियते स दोषस्तद्वानिति ज्ञेयः । यद्यव्यभिचारी तर्हि किमर्थं क्रियत इत्याह—परिपूरयितुं छन्दः । तस्य हि छन्दःपूरणमात्रमेवार्थ इति ।।

उदाहरणम्—

क्व नु यास्यन्ति वराकास्तरुकुसुमरसैकलालसा मधुपाः ।
भस्मीकृतं वनं तद्दवदहनेनातितीव्रेण ।।१६।।

यहाँ करुण रस के प्रसंग में विरोधी रस शृंगार रस का आपतन विरस दोष है ।

अन्य प्रकार—

जो रस प्रसंगानुकूल होता हुआ भी प्रबन्ध-काव्यों में निरन्तर [प्रयोग के कारण] अतिशय वृद्धि को पहुँचा दिया जाता है वह भी विरसता को प्राप्त होता है ।१४।

नमिसाधु के अनुसार 'वेणीसंहार' का छठा अंक इस प्रकार की विरसता का निदर्शन है ।

८. *तद्वान्*

जो गुण आदि जिस [पदार्थ] का अव्यभिचारी है, अर्थात् उसके साथ नित्य रूप से रहता है, उसे [गुण] को यदि छन्दः की पूर्ति के लिए उस [पदार्थ] का विशेषण बना दिया जाता है तो वहाँ तद्वान् दोष होता है ।१५।

उदाहरण—

यदि यह वन अति तीव्र वनाग्नि से भस्म कर दिया गया तो ये बेचारे भ्रमर जो एक मात्र वृक्षों के पुष्पों के रस की ही लालसा रखते हैं कहाँ जाएँगे ।१६।

क्वेति। अत्र दवदहनस्यातितीव्रेणेति विशेषणं छन्दःपूरणार्थमेव। तत्राव्यभिचारादिति ॥

अथातिमात्रः—

अतिदूरमतिक्रान्तो मात्रां लोकेऽतिमात्र इत्यर्थः ।
तव विरहे हरिणाक्ष्याः प्लावयति जगन्ति नयनाम्बु ॥१७॥

अतिदूरमिति। योऽर्थो लोकप्रसिद्धां मात्रां परिणाममतिदूरमत्यर्थमतिक्रान्त उल्लङ्घितः सोऽतिमात्रोऽर्थदोषः। उदाहरणम्—तवेत्याद्युत्तरार्धम्। अत्राश्रुलक्षणोऽर्थो मात्रां त्यक्तवान्। परा ह्यश्रूणां भूयस्ता यद्वस्त्रार्द्रीकरणम्। न तु प्रलयजलदवज्जगत्प्लावनम् ॥

अथ यत्पूर्वमुक्तम् 'तत्कारणमन्यथोक्तौ च' (११।१) इति तदाह—

अत्यन्तमसंबद्धं परमतमभिधातुमन्यदश्लिष्टम् ।
संगतमिति यद् ब्रूयात्तत्रायुक्तिर्न दोषाय ॥१८॥

अत्यन्तमिति। असंबद्धार्थता महान्दोषः। तस्यापवादोऽयम्। यत्र परकीयं मतमतिशयेनासंबद्धं प्रतिपादयितुमन्यदात्मीयमश्लिष्टमसंबद्धमर्थं वक्ता वक्ति तत्रायुक्तिरसंगतता न दोषाय। अथ कथं तेनासंबद्धेन परमतस्यासंबद्धता प्रतिपाद्यत इत्याह—संगतमिति। इतिर्हेतौ। यतस्तस्यासंबद्धस्याश्लिष्टमेव संगतं सदृशतया दर्शयितुम् ॥

उदाहरणम्—

किमिदमसंगतमस्मिन्नादावन्यत्तथान्यदन्ते च ।
यत्नेनोप्ता माषाः स्फुटमेते कोद्रवा जाताः ॥१९॥

यहाँ वनाग्नि का 'अति तीव्र' विशेषण पादपूर्त्यर्थ प्रयुक्त है। वस्तुतः इस विशेषण का प्रयोग अनावश्यक है, क्योंकि यह वनाग्नि के साथ नित्यरूप से रहता है।

९. *अतिमात्र*

जो अर्थ लोक-प्रसिद्ध मात्रा को अत्यधिक उल्लंघन कर जाता है वह अतिमात्र कहाता है।

उदाहरण—

तुम्हारे विरह में उस मृगनयनी के अश्रु [तीनों] लोकों को डुबो रहे हैं।१७।

इस दोष का परिहार—

जहाँ किसी दूसरे के अत्यन्त असम्बद्ध तथा असुगठित मत को [उसकी असमानता में अपने मत को] संगत [बताने के लिए] कहा जाए वहाँ यह 'असंगतता' दोष नहीं होती।१८।

उदाहरण—

यह क्या असंगत [बात कही] है [आपने कि] इसके आदि में कुछ और है

किमिदमिति । कश्चिदसंबद्धं परवचनं क्षिपन्नाह—अस्मिन्वस्तुनि किमिदमसंगतं भवतोच्यते । कुतः । आदौ प्रारम्भेऽन्यत्तथान्ते च निर्गमे चान्यदिति । किमिवासंभवमिति तत्सदृशमाह—यथा माषा उप्ताः कोद्रवाश्चोत्पन्ना इत्यसंबद्धम्, एवं तवापि वचनमित्यर्थः ॥

भूयोऽप्याह—

अभिधेयस्यातथ्यं तदनुपपन्नं निकाममुपपन्नम् ।
यत्र स्युर्वक्तॄणामुन्मादो मौर्ख्यमुत्कण्ठा ॥२०॥

अभिधेयस्येति । यत्र वक्तुरुन्मादो मौर्ख्यमुत्कण्ठा च दोषः स्यात्त्रातथ्यमयथार्थतानुपपन्नापि निकाममतिशयेनोपपन्ना युक्ता । स्वस्थस्य ह्यन्यथावचनं दोषाय । उन्मत्तादीनां तु तदेवं भूषायै ॥

एतदुदाहरणानि यथाक्रममाह—

भुक्ता हि मया गिरयः स्नातोऽहं वह्निना पिबामि वियत् ।
हरिहरहिरण्यगर्भा मत्पुत्रास्तेन नृत्यामि ॥२१॥

भुक्ता इति । इत्युन्मादे ॥

किं मां ब्रवीषि मूर्ख पश्येदं शिशिरमेव ननु तिमिरम् ।
सुस्वादुरयं गन्धस्तमसा त्वेनं न पश्यामि ॥२२॥

तथा अन्त में कुछ और । [यह तो ऐसे असम्बद्ध है जैसे] यत्न से उड़द बोये गये किन्तु उत्पन्न हो गये कोद्रव (धान्य-विशेष) ।१९।

इसी प्रसंग में कुछ और भी कथनीय है—

जहाँ वक्ता का उन्माद, मूर्खता और उत्कण्ठा दिखानी हो वहाँ अर्थ यदि तथ्यरहित तथा असंगत हो तो भी उसे नितान्त संगत समझना चाहिए ।२०।

उदाहरण (उन्मादपूर्ण वचन)—

मैंने पहाड़ों को खा लिया है, मैं अग्नि से नहाया हूँ, मैं हवा पीता हूँ । विष्णु, महादेव और हिरण्यगर्भ मेरे पुत्र हैं । अतः नाचता हूँ ।२१।

उदाहरण (मूर्खतापूर्ण वचन)—

क्या मुझे मूर्ख कहते हो ! देखो यह अन्धकार शीतल है । यह गन्ध अति स्वादिष्ट है, किन्तु इसे अन्धकार के कारण नहीं देखता हूँ ।२२।

किमिति । इति मौर्ख्ये ॥

हे हंस देहि कान्तां सा मे भवता हृतेति किं मिथ्या ।
ननु गतिरियं तदीया वाणी सैवेयमतिमधुरा ॥२३॥

हे इति । इत्युत्कण्ठायाम् । अत्र गिरिभोजनं वह्निस्नानमाकाशपानमजादि-पुत्रत्वं च, तथा तिमिरस्य शीतलत्वम्, गन्धस्य सुस्वादुत्वम्, तस्य चान्धकारेण दर्शनम्, तथा हंसेन कान्ताहरणं च सर्वमेवासंबद्धमुन्मत्तमूर्खोत्कैश्चोक्तत्वाच्चार्वेव ॥

एवं सर्वार्थालंकारसाधारणान्दोषानभिधायेदानीं केवलोपमादोषानाह—

सामान्यशब्दभेदो वैषम्यमसंभवोऽप्रसिद्धिश्च ।
इत्येते चत्वारो दोषा नासम्यगुपमायाः ॥२४॥

सामान्येति । औपम्यभेदस्योपमाया इत्येते सामान्यशब्दभेदादयश्चत्वारो दोषाः । ते च नासम्यक् । अपि तु स्फुटा एव । अत्र च स्वरूपोपादाने सत्यपि चत्वार इति ग्रहणाद्यन्मेधाविप्रभृतिभिरुक्तं यथा—"लिङ्गवचनभेदौ हीनताधिक्यमसंभवो विपर्ययोऽसादृश्यमिति सप्तोपमादोषाः । तत्र लिङ्गवचनभेदावन्योन्यमुपमानोपमेययोः । यथा—

भक्षिताः सक्तवो राजञ्शुद्धाः कुलवधूरिव ।
परमातेव निःस्नेहाः शीतलाः परकार्यवत् ॥

उपमेयादुपमानस्य यत्रोनानि विशेषणानि सा हीनता । यथा—

स मारुताकम्पितपीतवासा बिभ्रत्सलीलं शशिभासि शङ्खम् ।
यदुप्रवीरः प्रगृहीतशार्ङ्गः सेन्द्रायुधो मेघ इवावभासे ॥

उदाहरण (उत्कण्ठापूर्ण वचन)—

हे हंस, मेरी प्रिया को मुझे वापस दे दो । उसे तूने ही चुराया है—क्या यह बात असत्य है ? यह तेरी गति उसी की ही है । यह तेरी अति मधुर वाणी भी उसी की ही है ।२३।

सब अर्थालंकारों के सामान्य दोषों को दिखाने के उपरान्त अब रुद्रट केवल उपमा अलंकार के दोषों का निर्देश करते हैं—

उपमा-दोष

सामान्य शब्दभेद, वैषम्य, असम्भव और अप्रसिद्धि—ये चार उपमा के स्पष्ट दोष हैं ।२४।

इस प्रसंग में यह उल्लेखनीय है कि रुद्रट से पूर्व भामह, दण्डी और वामन ने भी उपमा-अलंकार के दोषों का उल्लेख किया था । दण्डी और वामन ने भामह से ही सामग्री ली है, किन्तु रुद्रट का विवेचन प्रायः स्वतन्त्र है । रुद्रट के उपरान्त आनन्द-वर्धन, भोजराज, मम्मट और विश्वनाथ ने इस विषय पर प्रकाश डाला है । इन सब

एवं यत्रोपमेयादुपमानस्याधिकानि विशेषणानि तदाधिक्यम् । यथा—

स पीतवासाः प्रगृहीतशार्ङ्गो मनोन्यभीमं (?) वपुराप कृष्णः ।
शतह्लदेन्द्रायुधवान्निशायां संसृज्यमानः शशिनेव मेघः ।।

अत्रोपमाने मेघे शशियोगोऽधिकः । यत्र विनैव यद्यर्थमसंभवद्विशेषणमुपमानं क्रियते सोऽसंभवः । यथा—

निपेतुरास्यादिव तस्य दीप्ताः शरा धनुर्मण्डलमध्यभाजः ।
जाज्वल्यमाना इव वारिधारा दिनार्धभाजः परिवेषिणोऽर्कात् ।।

नहि वारिधाराणामयद्यर्थं जाज्वल्यमानत्वं रविबिम्बाद्वा वारिधारापतनं संभवति । यत्रोपमेयाद्धीनमुत्कृष्टं वोपमानं क्रियतेऽसौ विपर्ययः । तत्र हीनं यथा—

स्फुरन्ति निखिला नीले तारका गगने निशि ।
भास्कराभीशुसंस्पृष्टाः कृमयः कर्दमे यथा ।।

उत्कृष्टं यथा—

अयं पद्मासनासीनश्चक्रवाको विराजते ।
युगादौ भगवान्ब्रह्मा विनिर्मित्सुरिव प्रजाः ।।

की विषय-सामग्री का संक्षिप्त विवरण इस प्रकार है—

१. भामह ने अपने पूर्ववर्ती आचार्य मेधावी के नाम से इन सात उपमा-दोषों का उल्लेख किया है—हीनता, असम्भव, लिंग-भेद, वचन-भेद, विपर्यय, उपमानाधिकता और असदृशता । (काव्यालंकार—भामह, २. ३९)

२. दण्डी ने इन में से केवल चार उपमा-दोष माने हैं, और वह तभी जब वे सहृदयजनों के उद्वेग के कारण बनें, अन्यथा नहीं । इस प्रकार दण्डी ने दोष की स्वीकृति अथवा अस्वीकृति में प्रथम बार अनुद्वेगजनकता अर्थात् औचित्यविधान की ओर संकेत किया—

न लिंगवचने भिन्ने न हीनाऽधिकताऽपि वा ।
उपमादूषणायालं यत्रोद्वेगो न धीमताम् ।। (का० द० २।५१)

३. वामन ने उक्त सात दोषों में से 'विपर्यय' के अतिरिक्त शेष छः दोषों को स्वीकार किया है । (का० सू० वृ० ४.२.८)

उपमेय के विशेषणों की अपेक्षा उपमान के विशेषणों की हीनता अथवा अधिकता; उपमेय के लिंग और वचन के अनुसार उपमान के लिंग अथवा वचन का न होना; और असम्भव तथा असदृश उपमान की स्थापना—यह हुए छः दोष, जो भामह और वामन को अभीष्ट हैं, इनमें से चार दोष दण्डी को भी स्वीकृत हैं । शेष रहा भामह का विपर्यय दोष—उपमान की अपेक्षा उपमेय में हीनता अथवा अधिकता—तो वामन के शब्दों में इसका अन्तर्भाव हीनता और अधिकता में किया जा सकता

यत्रोपमानोपमेययोः साम्यं नास्ति तदसादृश्यम् । यथा—

वनेऽथ तस्मिन्वनिताविहारिणः प्रभिन्नदानार्द्रकटा मतङ्गजाः ।
विचित्रबर्हाभरणाश्च बर्हिणो बभुर्दिवीवामलविग्रहा ग्रहाः ।।

अत्र न किंचिद्दन्तिनां मयूराणां च ग्रहैः सारूप्यमस्तीति" । तदेतन्निरस्तम् । यतश्चत्वार एवामी संग्राहका भेदाः । न त्वन्ये । तथाहि सामान्यशब्दभेदं विना लिङ्ग-वचनभेदमात्रं न दुष्टम् । इह हि का दुष्टता । यथा—

अन्यदा भूषणं पुंसः क्षमा लज्जेव योषितः ।
पराक्रमः परिभवे वैयात्यं सुरतेष्विव ।।

है । जहाँ उपमान में अधिकता होगी, वहाँ उपमेय में हीनता अवश्य होगी; और जहाँ उपमान में हीनता होगी, वहाँ उपमेय में अधिकता अवश्य होगी । अतः 'विपर्यय' का इन दोनों में अन्तर्भाव होने के कारण उसे अलग दोष मानना उचित नहीं है :

अनयोर्दोषयोर्विपर्ययाऽऽख्यस्य दोषस्याऽन्तर्भावान्न पृथगुपादानम् । अतएवा-ऽस्माकं मते षड् दोषा इति । का० सू० ४।२।११।

४. रुद्रट ने उपमा के चार दोष गिनाये हैं—सामान्य शब्द-भेद, वैषम्य, असम्भव और अप्रसिद्ध । इनके मत में यही चार दोष ही पर्याप्त हैं । रुद्रट-प्रणीत 'काव्यालंकार' के टीकाकार नमिसाधु ने भामह-प्रस्तुत सात उपमा-दोषों में से छः दोषों का इन्हीं चार दोषों में अन्तर्भाव दिखाया है । दोष-मर्मज्ञता की दृष्टि से यह विवेचन अवेक्षणीय है—

(क) उपमेय और उपमान का पारस्परिक लिंग और वचन का भेद सामान्य-शब्दभेद के आधार पर ही सदोष होता है, अन्यथा नहीं । जैसे **'चन्द्रकलेव सुगौरः'** यहाँ लिंगभेद, और **'कुवलयदलमिव दीर्घे तव नयने'** यहाँ वचनभेद तो सदोष हैं; पर 'अन्यदा भूषणं पुंसां शमो लज्जेव योषितः' में पुमान् और योषित में, शमः, लज्जा और भूषणाम् में लिंगभेद होने पर भी कोई दोष नहीं है । (तुलनार्थ—का० द० २।५२,५३,५५ : प्रभा टीका) इसके अतिरिक्त 'सामान्य शब्दभेद' में न केवल उपमेय-उपमान में लिंग, वचन का भेद सम्मिलित है; अपितु काल, कारक और विभक्ति का भेद भी सम्मिलित है ।

(ख) उपमेय के विशेषणों की अपेक्षा उपमान के विशेषणों की हीनता और अधिकता नामक दोष साम्याभाव अथवा वैषम्य पर ही आश्रित है ।

(ग) उपमेय और उपमान की हीनता और अधिकता का 'विपर्यय' नामक दोष अप्रसिद्धि के अन्तर्गत आ जाता है । और फिर कभी-कभी निन्दा अथवा स्तुति की इच्छा से जान-बूझकर भी तो उपमान को हीन अथवा अधिक बनाना पड़ता है, जैसे—

निशि चण्डाल इवायं मारयति वियोगिनीश्चन्द्रः ।

किं च लिङ्गवचनभेदे दोषत्वेनाश्रीयमाणे कालकारकविभक्तिभेदा नाश्रिताः। सामान्यशब्दभेदे तु तेऽपि संगृहीताः। तथा हीनताधिक्ये चोपमानोपमेयसाम्याभावाद्दोषत्वेनाश्रिते परेण। तत्र च वैषम्यमेवोभयदोषसंग्राहकमेकमुक्तमस्माभिः। तथा योऽपि हीनताधिक्यविशिष्टो विपर्यय उक्तः सोऽपि न तावन्मात्रेण दोषहेतुः अतिप्रसङ्गात्। अपि त्वप्रसिद्धित एव। अन्यथा हि निन्दास्तुती यत्र चिकीर्षिते भवतस्तत्रापि यथाक्रमं

(घ) भामह का 'असादृश्य' दोष अमान्य है। ऐसा कौन है जो उपमा-लक्षण को जानता हुआ भी सादृश्याभाव में उपमा का उदाहरण प्रस्तुत करेगा; और फिर सदृश उपमान भी यदि अप्रसिद्ध हो तो उसकी स्थापना अशास्त्रीय ही नहीं, अवांछनीय भी है।

(ङ) शेष रहा भामह का असम्भव दोष, तो वह रुद्रट को स्वीकार है।

५. आनन्दवर्द्धन ने अलंकार-दोषों का पृथग् रूप से कहीं निर्देश नहीं किया। उन्होंने शब्दालंकारों और अर्थालंकारों के प्रयोग के विषय में कुछ सीमाएँ निर्धारित की हैं।[1] उदाहरणतया—शृंगार रस में अनुप्रास अलंकार का प्रयोग रस का अभिव्यंजक नहीं है; शृंगार विशेषतः विप्रलम्भ शृंगार में यमक आदि का निबन्धन समुचित नहीं है। रूपकादि अर्थालंकारों की अलंकारता उनके रसानुकूल प्रयोग में ही निहित है—उनकी विवक्षा सदा रसपरक हो; प्रधान रूप से किसी भी दशा में न हो; उनका उचित समय पर ग्रहण और त्याग होना चाहिए तथा आद्यन्त उनके निर्वाह की इच्छा नहीं करनी चाहिए। इन सीमाओं और नियमों के उल्लंघन को अलंकार-दोषों के अन्तर्गत रखा जा सकता है।

६. भोजराज ने वाक्यगत और वाक्यार्थगत दोषों के अन्तर्गत प्राचीन आचार्यों द्वारा सम्मत छः उपमादोषों को भी स्थान दिया है।[2] इस प्रसंग में उनकी अपनी कुछ भी मौलिकता लक्षित नहीं होती।

